नं: १३

सिद्धान्तकौमुदी पूर्वार्द्धः

तिङन्त प्राक्रिया पत्राणि

१३८

नं० १३
सिद्धान्तकौमुदी पूर्वार्द्धः
तिङन्त प्रक्रिया
पत्राणि १३६

रामारामारामारामारामा

१८६





खि॰ ति॰ ॥१॥

श्रीगणेशाय नमः। श्रीव्याघ्रेश्वराय नमः॥ श्रीगुरुचरणेभ्यो नमः। श्रीदुर्गायै नमः॥ ॐ॥ श्रौत्राहंतीचरणौर्गुणैर्ये
मैहर्षिभिरहर्दिवं॥ तोष्टूयमानोप्यगुणो विभुर्विजयतेतरां॥१॥ पूर्वार्द्धे कथितास्तस्य पंचमाध्यायवर्त्तिनः॥
प्रत्ययाः अथ कथ्यंते तृतीयाध्यायगोचराः॥२॥ तत्रादौ दशलकाराः प्रदर्श्यंते॥ लट् लिट् लुट् लृट् लेट् लोट्
लङ् लिङ् लुङ् लृङ्॥ एषु पंचमो लकारश्छंदोमात्रगोचरः। वर्त्तमाने लट्। वर्त्तमानक्रियावृत्तेर्धातोर्लट् स्या
त्। अटावितौ। लः कर्मणि च भावे चाकर्मकेभ्यः। लकाराः सकर्मकेभ्यः कर्मणि कर्त्तरि च स्युरकर्मकेभ्यो भावे
कर्त्तरि च। लस्य। अधिकारोयं। तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्। एते ष्टाद
श लस्यादेशाः स्युः। लः परस्मैपदं। लादेशाः परस्मैपदसंज्ञाः स्युः। तङानावात्मनेपदं। तङ् प्रत्याहारः शानच्
कानचौ चैतत्संज्ञाः स्युः। पूर्वसंज्ञापवादः। अनुदात्तङित आत्मनेपदं। अनुदात्तेत उपदेशे यो ङित्तदंताश्च
धातोर्लस्य स्थाने आत्मनेपदं स्यात्। स्वरितञितः कर्त्रभिप्राये क्रियाफले। स्वरितेतो ञितश्च धातोरात्मनेप
दं स्यात् कर्तृगामिनि क्रियाफले। शेषात्कर्त्तरि परस्मैपदं। आत्मनेपदनिमित्तहीनाद्धातोः कर्त्तरि परस्मैपदं
स्यात्। तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः। तिङ्ङुभयोः पदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः। तान्ये गणेश
कवचनद्विवचनबहुवचनान्येकशः। लब्धप्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि वचनानि प्रत्येकमेकवच ॥१॥

नादि संज्ञानि स्युः। युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः। तिङ्वाच्यकारकवाचिनि युष्मदि अप्रयुज्यमा
नेपि प्रयुज्यमाने च मध्यमः स्यात्। प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च। मन्यधातुरूपपदं यस्य धातोस्तस्मि
न्प्रकृतिभूते सति मध्यमः स्यात् परिहासे गम्यमाने मन्यतेरुत्तमः स्यात्स चैकार्थवाचकः स्यात्। भूसत्तायां। ४
अस्मद्युत्तमः। तथाभूतेस्मद्युत्तमः स्यात्। शेषे प्रथमः। मध्यमोत्तमयोरविषये प्रथमः स्यात्। कर्तृविवक्षायां भू
ति इति स्थिते। तिङ्शित्सार्वधातुकं। तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः स्युः। कर्तरि शप्। कर्त्रर्थे सार्वधा
तुके परे धातोः शप् स्यात्। शपावितौ। सार्वधातुकार्द्धधातुकयोः। अनयोः परयोरिगन्ताङ्गस्य गुणः स्यात्। अ
वादेशः। भवति। भवतः। झोन्तः। प्रत्ययावयवस्य झस्यान्तादेशः स्यात्। अतो गुणे। भवन्ति। भवसि। भवथः। भवथ।
अतो दीर्घो यञि। अतोङ्गस्य दीर्घः स्याद्यञादौ सार्वधातुके परे। भवामि। भवावः। भवामः। स भवति। तौ भवतः। ते भवं
ति। त्वं भवसि। अहं भवामीत्यादि। एहि मन्ये। ओदनं भोक्ष्यसे। नहि भोक्ष्यसे भुक्तः सोतिथिभिः। एतं एतवा मन्ये ओदनं भोक्ष्ये
थे भोक्ष्यध्वे। ओदनं भोक्ष्ये भोक्ष्यावहे इत्यादि। मन्यसे मन्येथे इत्यादिरर्थः। युष्मद्युपपद इत्याद्यनुवर्तते। तेनेह
न। एतु भवान् मन्यते ओदनं भोक्ष्ये इति। प्रहासे किं। यथार्थकथने मा भूत्। एहि मन्यसे ओदनं भोक्ष्ये इत्यादि।
परोक्षे लिट्। भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात्। लस्य तिबादयः। लिट् च। लिडादेशस्तिङार्द्धधातु

सि॰ ति॰ ।।२।। कसंज्ञ एव स्यान्न तु सार्वधातुकसंज्ञः। तेन ङित्त्वाभावाद्यो न। परस्मैपदानां णलतुसुस्थलथुसणल्वमाः। लिटस्तिबादी
नां नवानां णलादयो नव स्युः। भू अ इति स्थिते। भुवो वुग्लुङ्लिटोः। भुवो वुगागमः स्याल्लुङ्लिटोरचि। नित्य
त्वाद्वुक् गुणवृद्धी बाधते। एकाचो द्वे प्रथमस्य। अजादेर्द्वितीयस्य। षष्ठीद्वे स्य। लिटि धातोरनभ्यासस्य। लिटि
परेऽनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्त आदिभूतादचः परस्य तु द्वितीयस्य। भूव् भूव् इति स्थिते। पूर्वो
भ्यासः। अत्र ये द्वे विहिते तयोः पूर्वोऽभ्याससंज्ञः स्यात्। हलादिः शेषः। अभ्यासस्यादिर्हल् शिष्यतेऽन्ये हलो लुप्यन्
ते। इति वलोपः। ह्रस्वः। अभ्यासस्याचो ह्रस्वः स्यात्। भवतेरः। भवतेरभ्यासोकारस्य अः स्याल्लिटि। अभ्यासे चर्च। अभ्या
से झलां चरः स्युर्जशश्च। झशां जशः खयां चरः। तत्रापि प्रकृतिजशां प्रकृतिजशः। प्रकृतिचरां प्रकृतिचरः इति विवे
क आन्तरतम्यात्। असिद्धवदत्राभात्। इत ऊर्ध्वमापादपरिसमाप्तेराभीयं समानाश्रये तस्मिन्कर्तव्ये तदसिद्धं स्यादि
ति वुकोऽसिद्धत्वादुवङि प्राप्ते। वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ। बभूव। बभूवतुः। बभूवुः। आर्द्धधातुकस्येड्वला
देः। वलादेरार्द्धधातुकस्य इडागमः स्यात्। बभूविथ। बभूवथुः। बभूव। बभूव। बभूविव। बभूविम। अनद्यतने
लुट्। भविष्यत्यनद्यतने धातोर्लुट् स्यात्। स्यतासी ऌलुटोः। ऌ इति ऌङ्ऌटोर्ग्रहणं। धातोः स्यतासी एतौ प्रत्य
यौ स्तो ऌलुटोः परतः। शबाद्यपवादः। आर्द्धधातुकं शेषः। तिङ्शिभ्योऽन्यो धातोरिति विहितः प्रत्यय एतत्संज्ञः स्यात्। इट्।।
लुटः प्रथमस्य डारौरसः। डारौरस एते क्रमात्स्युः। डित्त्वसामर्थ्यादभस्यापि टेर्लोपः। पुगन्तलघूपधस्य च। पुगन्तस्य ल गणेश
घूपधस्य चाङ्गस्येको गुणः स्यात्सार्वधातुकार्द्धधातुकयोः। येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात्। ।।२।।

तेन भिन्नत्वीत्यादावनेकव्यवहितस्येकोन गुणः। भवित् आ। अत्रेको गुणे प्राप्ते दीधीवेवीटाम्। दीधीवेव्योरिटश्च गुणवृ
द्धीन स्तः। भविता। तासस्त्योर्लोपः। तासेरस्तेश्च लोपः स्यात्सादौ प्रत्यये परे। रि च। रादौ प्रत्यये प्राग्वत्। भवितारौ। भ
वितारः। भवितासि। भवितास्थः। भवितास्थ। भवितास्मि। भवितास्वः। भवितास्मः। लृट् शेषे च। भविष्यदर्था
द्धातोर्लृट् स्यात् क्रियार्थायां क्रियायामसत्यां सत्यां च। इट्। भविष्यति। भविष्यतः। भविष्यन्ति। भविष्यसि। भविष्य
थः। भविष्यथ। भविष्यामि। भविष्यावः। भविष्यामः। लोट् च। विध्यादिष्वर्थेषु लोट् स्यात्। आशिषि लिङ्लोटौ।
एरुः। लोट इकारस्य उः स्यात्। भवतु। तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्। आशिषि तुह्योस्तातङ् वा स्यात्। अनेका
लत्वात्सर्वादेशः। यद्यपि ङित्वस्य समपवादस्तथाप्यनन्यार्थङित्वेषु नङ्ङादिषु चरितार्थ इति गुणवृद्धिप्रतिषेध
संप्रसारणार्थतया संभवत्प्रयोजनङ्कारे तातङि संस्थस्थं प्रवृत्तः परेण बाध्यते। इत्युत्सर्गापवादयोरपिस
मबलत्वात्। भवतात्। लोटो लङ्वत्। लोटो लङ इव कार्यं स्यात्। तेन तामादयः सलोपश्च। तथाहि। तस्थस्थमि
पां तांतंतामः। ङितश्च। तु एते तामादयः क्रमात्स्युः। नित्यं ङितः। सकारान्तस्य ङिदुत्तमस्य नित्यं लोपः स्यात्। अलोऽन्त्य
स्येति सस्य लोपः [illegible]। भवताम्। भवन्तु। सेर्ह्यपिच्च। लोटः सेर्हिः स्यात्सोऽपिच्च। अतो हेः। अतः परस्य हेर्लुक् स्यात्।
भव। भवतात्। भवतम्। भवत। मेर्निः। लोटो मेर्निः स्यात्। आडुत्तमस्य पिच्च। लोडुत्तमस्याडागमः स्यात्स च पिच्च। हिन्यो
रुत्वं न। इकारोच्चारणसामर्थ्यात्। भवानि। भवाव। भवाम। अनद्यतने लङ्। अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् स्यात्।
लुङ्लङ्लृङ्क्ष्वडुदात्तः। एषु परेष्वङ्गस्याडागमः स्यात्स चोदात्तः। इतश्च। ङितो लस्य परस्मैपदमिकारान्तं यत्तस्य

सि॰ ति॰ ॥१॥

लोपः स्यात्। अभवत्। अभवतां। अभवन्। अभवः। अभवतं। अभवत। अभवं। अभवाव। अभवाम। विधिनिमंत्रणामंत्र
णाधीष्टसंप्रश्नप्रार्थनेषु लिङ्। एष्वर्थेषु द्योत्येषु वाच्येषु धातोर्लिङ् स्यात्। विधिः प्रेरणं भृत्यादेर्निकृष्टस्य प्रवर्तनं नि
मंत्रणं नियोगकरणं। आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनं। आमंत्रणं कामचारानुज्ञा। अधीष्टं सत्का
रपूर्वको व्यापारः। प्रवर्तनायां लिङ् इत्येव सुवचनं। संप्रश्नप्रार्थनयोस्तु ग्रहणं प्रपंचार्थं। यासुट् परस्मै[illegible]पदेषूदात्तो
ङिच्च। लिङः परस्मैपदानां यासुडागमः स्यात्स चोदात्तो ङिच्च। ङित्वोक्तेर्ज्ञायते स्थानिवदनुबंधकार्येष्वनल्विधावि
ति प्रतिषेध इति। आदेशस्य शानचः शित्वमपीह लिंगं। सुट् तिथोः। लिङस्तकारथकारयोः सुट् स्यात्। सुटा यासुट्
न बाध्यते। लिङो यासुट् तकार[illegible] सुडिति विषयभेदात्। लिङः सलोपोऽनंत्यस्य। सार्वधातुके लिङोऽनंत्यस्य सस्य लो
पः स्यात्। इति सकारद्वयस्यापि निवृत्तिः। सुटः श्रवणं त्वाशीर्लिङि। स्फुटतरं तु तत्रात्मनेपदे। अतो येयः। अतः परस्य सा
र्वधातुकावयवस्य यास् इत्यस्य इय् स्यात्। गुणः। यलोपः। भवेत्। सार्वधातुके किं। चिकीर्ष्यात्। मध्येऽपवादन्यायेनातो लोप
एव बाध्येत। भवेदित्यादौ तु परत्वाद्दीर्घः स्यात्। भवेतां। झेर्जुस्। लिङो झेर्जुस् स्यात्। उस्यपदांतात्। अपदांतादव
र्णादुसि पररूपमेकादेशः स्यात्। इति प्राप्ते परत्वान्नित्यत्वाच्चातो येय इति प्राबः। यद्यप्यंतरंगत्वात्पररूपं प्राप्यते तथा
पि यासः इस्येतस्य इय् इति व्याख्येयं। एवं च सलोपस्यापवाद इय्। अतो येय इत्यत्र तु संधिरार्षः। भवेयुः। भवेः। भवेतं। भवे
त। भवेयं। भवेव। भवेम। लिङ् [illegible] आशिषि। आशिषि लिङस्तिङ् आर्धधातुकसंज्ञः स्यात्। किदाशिषि। आशिषि लिङो यासुट्
कित् स्यात्। स्कोः इति सलोपः। क्ङिति च। गित्किङ्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः। भूयात्। भूयास्तां। भूयासुः। भू

थकारयोः)

गणेश ॥३॥

याः। भूयास्तं। भूयास्त। भूयासं। भूयास्व। भूयास्म। लुङ्। भूतार्थे धातोर्लुङ् स्यात्। माङि लुङ्। सर्वलकारापवादः। स्मोत्तरे लङ्
च। स्मोत्तरे माङि लङ् स्याल्लुङ् च। च्लि लुङि। शबाद्यपवादः। च्लेः सिच्। इचाविती। गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु।
एभ्यः सिचो लुक् स्यात्। गापाविहेण्गादेशपिबती गृह्येते। भूसुवोस्तिङि। भूसू एतयोः सार्वधातुके तिङि परे गुणो न स्या
त्। अस्तिसिचोऽपृक्ते। सिच्च अस्तिश्चेति समाहारद्वन्द्वः। सिच्छब्दस्य सौत्रं भत्वं। अस्तीत्यव्ययेन कर्मधारयः। ततः पंचम्याः
सौत्रो लुक्। विद्यमानात् सिचोऽस्तेश्च परस्यापृक्तस्य हल ईडागमः स्यात्। इति ईट् नेह। सिचो लुप्तत्वात्। अभूत्। हलः
किं। ऐधिषि। अभूतां। सिजभ्यस्तविदिभ्यश्च। सिचोऽभ्यस्ताद्विदेश्च परस्य ङित्संबंधिनो झेर्जुस् स्यात् इति प्राप्ते। आ
तः। सिज्लुकि आदन्तादेव झेर्जुस् स्यात्। अभूवन्। अभूः। अभूतं। अभूत। अभूवं। अभूव। अभूम। न माङ्योगे।
अडाटौ न स्तः। मा भवान् भूत्। मा स्म भवत् भूद्वा। लिङ्निमित्ते लृङ् क्रियातिपत्तौ। हेतुहेतुमद्भावादि लिङ्निमित्तं तत्र
भविष्यत्यर्थे लृङ् स्यात् क्रियाया अनिष्पत्तौ गम्यमानायां। अभविष्यत्। अभविष्यतां। अभविष्यन्। अभविष्यः।
अभविष्यतं। अभविष्यत। अभविष्यं। अभविष्याव। अभविष्याम। ते प्राग्धातोः। ते गत्युपसर्गसंज्ञा धातोः प्रागेव
प्रयोक्तव्याः। आनि लोट्। उपसर्गस्थान्निमित्तात्परस्य लोडादेशस्य आनीत्यस्य नस्य णः स्यात्। प्रभवाणि। दुरः ष
त्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः। दुःस्थितिः। दुर्भवानि। अंतःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यं। अं
तर्द्धी। अंतर्द्धिः। अंतर्भवाणि। शेषे विभाषा। अकखादावषान्त उपदेशे। उपदेशे कादिखादिषान्तवर्जं गदनदादेरन्य
स्मिन्धातौ परे उपसर्गस्थान्निमित्तात्परस्य नेर्णत्वं वा स्यात्। प्रणिभवति। प्रनिभवति। इत्युपसर्गाणसमस्तत्वे

पिसंहितानिस्यात्। तदुक्तं। संहितैकपदे नित्या नित्या धातूपसर्गयोः। नित्या समासे वाक्ये तु सा विवक्षामपेक्षते। सत्ताद्यर्थनि
र्देशोऽयमुपलक्षणं। यागात्स्वमो भवती। सा दावुत्पघत इत्याद्यर्थात्। उपसर्गास्तु धर्थविशेषस्य द्योतकाः। प्रभवति
पराभवति संभवति अनुभवति अभिभवति उद्भवति परिभवति इत्यत्र विलक्षणार्था गताः। उक्तं चाउपसर्गेण
धात्वर्थो बलादन्यत्र नीयते। प्रहाराहारसंहारविहारपरिहारवदिति। एध वृद्धौ। कथ्यन्ताः घट्यादनुदात्तेतः॥
इत आत्मनेपदानां टेरे। टितो लस्यात्मनेपदानां टेरेत्वं स्यात्। एधते। सार्वधातुकमपित्। अपित्सार्वधातुकं ङिद्व
त्स्यात्। आतो ङितः। अतः परस्य ङितामाकारस्य इय् स्यात्। एधेते। एधन्ते। थासः से। टितो लस्य थासः से स्यात्। ए
धसे। एधेथे। एधध्वे। अतो गुणे। एधे। एधावहे। एधामहे। इजादेश्च गुरुमतोऽनृच्छः। इजादिर्यो धातुर्गुरुमानृच्छ
त्यन्यस्तत आम् स्याल्लिटि। आमो मकारस्य नेत्वम्। आस्यकासोराम्विधानात् ज्ञापकात्। आमः। आमः परस्य लुक् स्यात्।
कृञ्चानुप्रयुज्यते लिटि। आमन्तात् लिट्पराः कृभ्वस्तयोऽनुप्रयुज्यन्ते। आम्प्रत्ययवत्कृञोऽनुप्रयोगस्येति सूत्रे कृञ्ग्र
हणसामर्थ्यादनुप्रयोगोऽन्यस्यापीति ज्ञायते। तेन कृभ्वस्तियोगः सिद्धः। कृञो द्वितीयेति ञकारे एण प्रत्याहाराश्रयणात्
कृभ्वस्तिलाभः। तेषां क्रियासामान्यवाचित्वात् आम्प्रकृतीनां विशेषवाचित्वात्तदर्थयोरभेदान्वयः। संयदि स्कृप्रत्याहारे
तर्हि तोमनञ्चितार्थत्वान्नप्रयुज्यते। कृञः स्क्रियाफले परगामिनि परस्मैपदे प्राप्ते। आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य।
आम्प्रत्ययो यस्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिः। आम्प्रकृत्या तुल्यमनुप्रयुज्यमानात्कृञोऽप्यात्मनेपदं स्यात्।
इह पूर्ववदित्यनुवर्तनादास्यमेदेनसंबध्यते। पूर्ववदेवात्मनेपदं न तु तद्विपरीतमिति। तेन कृतृनिविफले इदं चकारे
सादीन तङ्। लिटस्तझयोरेशिरेच्। लिडादेशयोस्तझयोरेशिरेच् एतौ स्तः। एकारो द्वारलंज्ञापकं। तङ् आदेशा

नांदेरेत्वं नेति । तेन डारौरसां न । कृ एङ् इति सिद्धे । असंयोगाल्लिट्कित् । असंयोगात्परोऽपित् लिट् कित्स्यात् । क्ङिति चेति निषेधा
त्सार्वधातुकार्धधातुकयोरिति गुणो न । द्वित्वात्सरत्वाच्छ्लि प्राप्ते । द्विर्वचनेऽचि । द्वित्वनिमित्ते अचि परे ; अच आदेशो न स्यात्
द्वित्वे कर्तव्ये । उरत् । अभ्यासऋवर्णस्य अत्स्यात्प्रत्यये परे । रपरत्वं । हलादिः शेषः । प्रत्यये परे कि । चख्रे । अभ्यासात् कुहोश्चुः । अ
भ्यासकवर्गहकारयोश्चवर्गादेशः स्यात् । एधाञ्चक्रे । एधाञ्चक्राते । एधाञ्चक्रिरे । एकाच उपदेशेऽनुदात्तात् । उपदेशे
यो धातुरेकाजनुदात्तश्च ततः परस्यार्धधातुकस्येण् न स्यात् । उपदेशे इत्युभयान्वयि । एकाच इति किं । यङ्लुग्व्याव
र्त्यर्थं स्यात् । स्मरति हि । श्तिपा शपानुबन्धेन निर्दिष्टं यद्गणेन च । यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकीति । ए
तच्चेहैकाज्ग्रहणेन ज्ञाप्यते । अत्र सेड्वेट्कत्वविवक्षयात तद्ग्रहणेन चासिद्धे एकग्रहणसामर्थ्यादनेकाच्को
पदेशो व्यावर्त्यते । तेन वधेर्हनुपदेशे एकाचोपि न निषेधः । आदेशोपदेशे नैकाचत्वात् । अनुदात्तानामनुपदमेव
संग्रहीष्यते । एधाञ्चकृषे । एधाञ्चक्राथे । इणः षीध्वंलुङ्लिटां धोऽङ्गात् । इणन्तादङ्गात्परेषां षीध्वंलुङ्लिटां धस्य मू
र्धन्यः स्यात् । एधाञ्चकृढ्वे । एधाञ्चक्रे । एधाञ्चकृवहे । एधाञ्चकृमहे । एधाम्बभूव । अनुप्रयोगसामर्थ्यादस्तेर्भा
वो न । अन्यथा हि कृञ्स्वेवानुप्रयुज्यत इति कृभ्वितिबाध्येयात । अत आदेः । अभ्यासस्यादेरतो दीर्घः स्यात् । पररूपा
पवादः । एधामास । एधामासतुरित्यादि । एधिता । एधितारौ । एधितारः । एधितासे । एधितासाथे । धि च । धादौ प्रत्य
ये परे सलोपः स्यात् । एधिताध्वे । ह एति । तासस्त्योः सस्य हः स्यादेति परे । एधिताहे । एधितास्वहे । एधितास्महे । एधि
ष्यते । एधिष्येते । एधिष्यन्ते । आमेतः । लोट एकारस्याम् स्यात् । एधताम् । एधेताम् । एधन्ताम् । सवाभ्यां वामौ । सवाभ्यां प
रस्य लोडेतः क्रमाद्वअमौ स्तः । एधस्व । एधेथाम् । एधध्वम् । एत ऐ । लोडुत्तमस्य एत ऐ स्यात् । आमोपवादः । एधै । एधावहै ।

एधामहै। आडजादीनाम्। अजादीनामाट् स्याल्लुङादिषु। अटोपवादः। आटश्च। ऐधत। ऐधेताम्। ऐधन्त। ऐधथाः। ऐधेथाम्। ऐध
ध्वम्। ऐधे। ऐधावहि। ऐधामहि॥ लिङः सीयुट्। सलोपः। एधेत। एधेयाताम्। झस्य रन्। लिङो झस्य रन् स्यात्। एधेरन्। ए
धेथाः। एधेयाथाम्। एधेध्वम्। इटोऽत्। लिङादेशस्येटोऽत् स्यात्। एधेय। एधेवहि। एधेमहि। आशीर्लिङि आर्धधातुकत्वा
ल्लिङः सलोपो न। सीयुट् सुट् तिथोः प्रत्ययावयवत्वात् षत्वम्। एधिषीष्ट। एधिषीयास्ताम्। एधिषीरन्। एधिषीष्ठाः। एधिषीयास्थाम्।
एधिषीध्वम्। एधिषीय। एधिषीवहि। एधिषीमहि। ऐधिष्ट। ऐधिषाताम्। आत्मनेपदेष्वनतः। अनकारात्परस्यात्मनेपदे
षु झस्य अत् इत्यादेशः स्यात्। ऐधिषत। ऐधिष्ठाः। ऐधिषाथाम्। इणः षीध्वंलुङ्लिटां धोऽङ्गात्। ऐधिढ्वम्। इड्भिन्न इण्ग्रह
णमिति मते तु ऐधिध्वम्। ढधयोर्वस्य मस्य च द्वित्वविकल्पात् षोडश रूपाणि। ऐधिषि। ऐधिष्वहि। ऐधिष्महि। ऐधि
ष्यत। ऐधिष्येताम्। ऐधिष्यन्त। ऐधिष्यथाः। ऐधिष्येथाम्। ऐधिष्यध्वम्। ऐधिष्ये। ऐधिष्यावहि। ऐधिष्यामहि। उदात्तत्वाद
लादेरिट्। प्रसंगादनुदात्ताः संगृह्यन्ते। ऊदृदन्तैर्यौतिरुक्ष्णुशीङ्स्नुनुक्षुश्विडीङ्श्रिभिः। वृङ्वृञ्भ्यां च विनैकाचोऽजन्ते
षु निहताः स्मृताः॥१॥ शक्लृपच्मुचिरिच्वच्विच्सिच्प्रच्छित्यज्निजिर्भजः। भञ्ज्भुज्भ्रस्ज्मस्जियज्युज्रुज्र
ञ्ज्विजिर्स्वञ्जिसञ्ज्सृजः॥२॥ अद्क्षुद्खिद्छिद्तुदिनुदः पद्यभिद्विद्यतिर्विनद्॥ शद्सदी स्विद्यतिः स्कन्दिहदी
क्रुध्क्षुध्बुध्यती॥३॥ बन्धिर्युधिरुधी राधिव्यध्शुधः साधिसिध्यती। मन्यहन्नाप्क्षिप्छुपितप्तिपस्तृप्यतिदृप्य
ती॥४॥ लिप्लुप्वप्शप्स्वप्सृपि यभ्रभ्लभ्गम्नम्यमो रमिः॥ क्रुशिर्दंशिदिशीदृश्मृश्रिश्रुश्लिश्विशस्पृ
शः कृषिः॥५॥ त्विष्तुष्द्विष्दुष्पुष्यपिष्विष्शिष्शुष्श्लिष्यतयो घसिः॥ वसतिर्दहदिहिदुहो नहिमिहरुहलिह
वहिस्तथा॥६॥ अनुदात्ता हलन्तेषु धातवो द्व्यधिकं शतम्। तुदादौ मतभेदेन स्थितौ यौ च पुरादिषु॥ तृप्दृपी तौ वार

तसातत्यगमने। अतति। अत आदेः। आत। आततुः। आतुः। लुङि आतिस ईटि दैरिस्थिते। इट ईटि। इटः परस्य सस्य लोपः स्यादी
टि परे। सिज्लोप एकादेशे सिद्धो वाच्यः। आतीत्। आतिष्टां। आतिषुः। वदव्रजहलंतस्याचः। वदेर्व्रजेर्हलंतस्य चाचो स्था
वः स्थाने वृद्धिः स्यात् सिचि परस्मैपदेषु। इति प्राप्ते। नेटि। इडादौ सिचि प्रागुक्तं न स्यात्। माभवानतीत्। अतिष्टां। अ
तिषुः। ३८। चिती संज्ञाने। चेतति। चिचेत। अचेतीत्। अचेतिष्टां। अचेतिषुः। ३९। च्युतिर् आसेचने। सेचनमार्द्रीक
रणं। आङीषदर्थेभिव्याप्तौ च। ईषत्स्रवनं अभिव्याप्ती वाच्या। च्योतति। चुच्योत। इरितो वा। इरितो धातोश्च्लेरङ्वा स्यात् परस्मैप
दे परे। अच्युतत्। अच्योतीत्। ४०। श्च्युतिर् क्षरणे। श्च्योतति। चुश्च्योत। अश्च्युतत्। अश्च्योतीत्। यकाररहितोऽप्य
यं श्चोतति। ४१। मन्थ विलोडने। यासुटः कित्वादाशिषीति किल्लाद् अनिदितामिति लोपः। मथ्यात्। ४२। कुथि पुथि
लुथि मथि हिंसासंक्लेशनयोः। इदित्वान्नलोपो न। कुंथ्यात्। मंथ्यात्। ४६। षिधु गत्यां। सेधति। सिषेध। सेधिता।
असेधीत्। सात्पदाद्योरिति निषेधे प्राप्ते। उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसं
जस्वंजां। उपसर्गस्थान्निमित्तादेषां सस्य षः स्यात्। सदिरप्रतेः। प्रतिभिन्नादुपसर्गात्सदेः सस्य षः स्यात्। स्त
न्भेः। स्तन्भेः सौत्रस्य सस्य षः स्यात्। योगविभाग उत्तरार्थः। किं च अप्रतेरिति नानुवर्तते। बाहुप्रतिष्टंभविवृद्धमन्युः।
अवाच्चालंबनाविदूर्ययोः। अवात्स्तन्भे रेतयोरर्थयोः षत्वं स्यात्। वेश्च स्वनो भोजने। व्यवाभ्यां स्वनतेः षः स्या
त् भोजने। परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वंजां। परिनिविभ्यः परेषामेषां सस्य षः स्यात्। निषेध
ति। प्राक्सितादड्व्यवायेपि। सेवसितेत्यत्र सितशब्दात्प्राग्ये सुनोत्यादयस्तेषामड्व्यवायेपि षत्वं स्यात्। न्य

× झलो झलि। झलः परस्य सस्य लोपः स्यात् झलि। असैद्धां। असैत्सुः। असैत्सीः। असैद्धं। असैद्ध। असैत्सं। ५

सि॰ति॰ ॥७॥ षेधत्। अषेधीत्। अषेधिष्यत्। स्थादिष्वभ्यासेन चाभ्यासस्य। प्राक्सितात् स्थादिष्वभ्यासेन व्यवायेऽपि षत्वं स्यात्। एषामेव
चाभ्यासस्य न तु सुनोत्यादीनां। निषिषेध। निषिषिधतुः। सेधते गतौ। गत्यर्थस्य सेधतेः षत्वं न स्यात्। गंगां विसेध
ति। ४७। षिध शास्त्रे मांगल्ये च। शास्त्रं शासनं। स्वरतिसूतिसूयतिधूञूदितो वा। स्वरत्यादेरूदितश्च परस्य वला
देरार्धधातुकस्येड् वा स्यात्। झषस्तथोर्धोऽधः। झषः परयोः तथयोर्धः स्यान्न तु दधातेः। उस्सं। सिषेद्ध। सिषेधिथ
सेद्धा। सेधिता। सेत्स्यति। सेधिष्यति। असैत्सीत्। असैत्स्व। असैत्स्म। पक्षे। असेधीत्। असेधिष्टामित्यादि। ४८॥
खादृ भक्षणे। ऋकार इत्। खादति। चखाद। ४९। खद स्थैर्ये हिंसायां च। चाद्भक्षणे। स्थैर्ये अकर्मकः। खदति।
अत उपधायाः। उपधाया अतो वृद्धिः स्यात् ञिति णिति च प्रत्यये परे। चखाद। णलुत्तमो वा। उत्तमो णल्वा
णित् स्यात्। चखाद। चखद। अतो हलादेर्लघोः। हलादेर्लघोरकारस्य इडादौ परस्मैपदे परे सिचि वृद्धिर्वा स्या
त्। अखादीत्। अखदीत्। ५०। बद स्थैर्ये पवर्गीयादिः। बदति। बबाद। बेदतुः। बेदिथ। बबाद। बबद। अबा
दीत्। अबदीत्। ५१। गद व्यक्तायां वाचि। नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपति
वहतिशाम्यतिचिनोतिदेग्धिषु च। उपसर्गस्थान्निमित्तात्परस्य नेर्णः स्यात् गदादिषु परेषु। प्रणिगदति।
जगाद। ५२। रद विलेखने। विलेखनं भेदनं। ररद। ५३। णद अव्यक्ते शब्दे। णो नः। धात्वादेर्णस्य नः स्या गणेशा
त्। णोपदेशास्त्वनर्द्नाटिनाथ्नाध्नन्दनक्कनॄनृतः। नादेर्दीर्घा ह्रस्यपर्युदासा ह्रदादि णोपदेशा एव। तवर्ग ॥७॥

चतुर्थांतेनाधातेर्न्टेन घोर्भि के त्विल्लोपदेशानामाहुः। उपसर्गादसमासेपि णोपदेशस्य। उपसर्गस्थान्निमित्तात्परस्य णोपदेश
स्य धातोर्नस्य णः स्यात्समासेऽसमासेपि च। प्रणदति। प्रणिनदति। ५४ अदि गतौ याचने च। अत आदेः। तस्मान्नुड् द्विहलः।
द्विहलो धातोर्दीर्घीभूतादकारात्परस्य नुट् स्यात्। आनंदे। आनंदिता। ५५ नर्द गर्द शब्दे। णोपदेशत्वाभावान्न णः। प्रन
र्दति। ५६ गर्दति। जगर्द। ५७ तर्द हिंसायां। तर्दति। ५८ कर्द कुत्सिते शब्दे। कुत्सिते कौक्षे। कर्दति। खर्द दंदशूके। दंशहिंसादि
रूपायां दंदशूक क्रियायामित्यर्थः। खर्दति। चखर्द। ६० अति अदि बंधने। अंतति। आनंत। अंदति। आनंद। ६१ इदि
परमैश्वर्ये। इंदति। इंदांचकार। ६२। बिदि अवयवे। पवर्गतृतीयादिः। बिंदति। अयं पर्यंकरोतीत्यर्थः। ६४ भिदीति पाठांतरं। ६५
गडि वदनैकदेशे। गंडति। अयं सादिः पंचैते न तिङ्विषया इति काश्यपः। अन्येतु तिङमपीच्छति। ६६ णिदि कुत्सायां। निंद
ति। प्रणिंदति। ६७ टुनदि समृद्धौ। आदिर्ञिटुडवः। उपदेशे धातोराद्या एते इतः स्युः। नंदति। इदित्वान्न लोपो न। नं
धातोः। ६८ चदि आह्लादे। चचंद। ६९ त्रदि चेष्टायां। तत्रंद। ७० कदि क्रदि क्लदि आह्वाने रोदने च। चकंद। चक्रंद। चक्लंद। ७३
क्लिदि परिदेवने। चिक्लिंद। ७४ शुंध शुद्धौ। शुशुंध। नलोपः। शुध्यात्। ७५ अथ पवर्गीयांताः। अनुदात्तेतो द्विचत्वा
रिंशत्। शीकृ सेचने। तालव्यादिः। दंत्यादिरित्येके। शीकते। शिशीके। ७६। लोकृ दर्शने। लोकते। लुलोके। श्लोकृ
संघाते संघातो ग्रंथः। स चेह ग्रथ्यमानस्य व्यापारो ग्रंथितुर्वा। आद्येऽकर्मको द्वितीये सकर्मकः। श्लोकते। ७८। द्रेकृ
ध्रेकृ शब्दोत्साहयोः। उत्साहो वृद्धिरौद्धत्यं च। दिद्रेके। दिध्रेके। ८०। रेकृ शंकायां। रेकते। ८१। सेकृ स्रेकृ स्रकि श्रकि

॥१६॥

सि॰ति ।१७।

ऋकि गतौ। गयोदंत्यादयः। दौतालव्यादी। अषोपदेशत्वाच्च षः। सिसेके। ८६। शकि शंकायां। शंकते। शशंके। ८७।
अकि लक्षणे। अंकते। आनंके। ८८। वकि कौटिल्ये। वंकते। ८९। मकि मंडने। मंकते। ९०। कक लौल्ये। लौल्यं गर्व
श्चापलं च। ककते। चकके। ९१। कुक वृक आदाने। कोकते। चुकुके। वर्कते। ऋदुपधेभ्यो लिटः कित्वं गुणात्पूर्व
विप्रतिषेधेन। ववृके। ९२। चक तृप्तौ प्रतीघाते च। चकते। चेके। ९४। ककि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क
मस्क टिकृ टीकृ तिकृ तीकृ रघि लघि गत्यर्थाः। कंकते। डुढौके। तुत्रौके। सुब्धातुष्ठिवुष्वष्कतीनां सत्वप्रतिषेधो वक्तव्यः।
ष्वष्कते। षष्वष्के। अत्र तृतीयं दंत्यादिमे के। लघिर्भोजननिवृत्तावपि। १०२। अघि वघि मघि गत्याक्षेपे। आक्षेपो
निंदा। गतौ गत्यारंभे चेत्यन्ये। अंघते। आनंघे। वंघते। मंघते। मघि कैतवे च। ११२। राघृ लाघृ द्राघृ सामर्थ्ये।
राघते। धाघृ इत्यपि केचित्। द्राघृ आयामे च। ११६। श्लाघृ कत्थने। श्लाघते। ११७। अथ परस्मैपदिनः पंचाश
त्। फक्क नीचैर्गतौ। नीचैर्गतिर्मंदगमनं। असद्व्यवहारश्च। फक्कति। तक हसने। तकति। तकि कृच्छ्रजीवने। तंकति।
बुक्क भषणे। भषणं श्वरवः। बुक्कति। कख हसने। प्रनिकखति। १२२। ओखृ राखृ लाखृ द्राखृ ध्राखृ शोषणा
लमर्थयोः। १२७। शाखृ श्लाखृ व्याप्तौ। शाखति। १२९। उख उखि वख वखि मख मखि णख णखि रख रखि लख
लखि इख इखि ईख वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि गत्यर्थाः। द्वितीयं ताः
पंचदश तृतीयं तालव्योदंत्यो दश। इह रखांते धुरि खत्र खत्रि। खिशि। खिर सपि च तुरः केचित्पठंति। अभ्यासस्यासव

गणेश ॥२॥

र्णे। अभ्यासस्य इवर्णोवर्णयोरियङुवङौ स्तोऽसवर्णे। चिखुवोरव। सन्निपातपरिभाषया इजादेरित्याम्न। उखतुः। उखुः। इ
हसवर्णग्रहणस्याभ्यासग्रहणेन ग्रहणं ह्रस्वः प्राप्तो न भवति। सकृत्प्रवृत्तत्वात्। आगत्वाद्विपर्जन्यवल्लक्षणप्रवृत्त्या
ह्रस्वे कृते ततो दीर्घः। वार्णादाङ्गं बलीय इति न्यायात्। परत्वाच्च। उखंति। ववखतुः। ववखति। मेखतुः। त्वगि कंपने च। १६३।
युगि जुगि बुगि वर्जने। युंगति। १६४। घघ हसने। घघति। जघाघ। १६५। मघि मंडने। मंघति। १६६। शिघि आघ्राणे। शिं
घति। १६७। अथ चवर्गीयांताः। तत्रानुदात्तेत एकविंशतिः। वर्च दीप्तौ। वर्चते। १६८। षच सेचने सेवने च। सचते। सेचे। स
चिता। १६९। लोचृ दर्शने। लोचते। लुलोचे। १७०। शच व्यक्तायां वाचि। शेचे। १७१। श्वच श्वचि गतौ। श्वचते। श्वंचते। १७३। क
च बंधने। कचते। चकचे। १७४। कचि काचि दीप्तिबंधनयोः। कंचते। चकांचे। १७६। मच मुचि कल्कने। कल्कनं दंभः। शाठ्यं च। कत्थ
नमित्यन्ये। मेचे। मुमुंचे। मचि धारणोच्छ्रायपूजनेषु। ममंचे। पचि व्यक्तीकरणे। पंचते। १८०। ष्टुच प्रसादे। स्तोचते। तुष्टु
चे। १८१। ऋज गतिस्थानार्जनोपार्जनेषु। अर्जते। आनृजे। नुड्विधौ ऋकारैकदेशो रेफो हल्त्वेन गृह्यते। तेन द्विहल्त्वान्नुट्।
आनृजे। १८२। ऋजि भृजी भर्जने। ऋंजते। उपसर्गादृति धातौ इति वृद्धिः। प्रार्जते। ऋंजांचक्रे। आर्जिष्ट। भर्जते। बभृजे। अभर्जि
ष्ट। १८४। एजृ भ्रेजृ भ्राजृ दीप्तौ। एजांचक्रे। १८७। ईज गतिकुत्सनयोः। ईजांचक्रे। १८८। अथ द्विसप्ततिर्ण्डयंताः परस्मैप
दिनः। शुच शोके। शोचति। १८९। कुच शब्दे तारे। कोचति। १९०। कुञ्च क्रुञ्च कौटिल्याल्पीभावयोः। अनिदितामिति नलो
पः। कुच्यात्। क्रुच्यात्। लुंच अपनयने। १९३। अंचु गतिपूजनयोः। अच्यात्। गतौ नलोपः। पूजायां तु अंच्यात्। १९४। वं

सि· ति· तं· वु
॥ १८ ॥

चुबं चुलं चुमुं चुम्लुं चुम्रु चुम्लु चुगत्यर्थाः। चव्यात्। चव्यात्। तव्यात्। लव्यात्। अमुंचीत्। अम्लुचीत्। २००। ऽदृसां मु म्रुचु म्लु
चु गुचु ग्लुचु ग्लुचु श्विभ्यश्च। एभ्यश्च्लेरङ् स्यात्। अमुचत्। अम्रोचीत्। अम्लुचत्। अम्लोचीत्। २०२। गुचु ग्लुचु कु
ञ्चु खुञ्जु स्तेयकरणे। जुगोच। अगुचत्। अगोचीत्। जुग्लोच। अग्लुचत्। अग्लोचीत्। अकोञ्चीत्। अखोञ्जीत्। ग्लु
चु षस्ज गतौ। अङ्। अग्लुचत्। अग्लुंचीत्। सस्य श्चुत्वेन शः। जश्त्वेन जः। सज्जति। ससज्ज। अयमात्मनेपद्यपि। सज्जते। २०८
गुजि अव्यक्ते शब्दे। गुंजति। गुंज्यात्। २०९। अर्च पूजायां। आनर्च। २१०। म्लेच्छ अव्यक्ते शब्दे। अस्फुटे अपशब्दे चेत्यर्थः।
म्लेच्छति। मिम्लेच्छ। २११। लछ लाछि लक्षणे। ललच्छ। ललांछ। २१२। वांछि इच्छायां। वांछति। आछि आयामे।
आंछति। अत आदेरित्यत्र तपरकरणस्याभाविकत्वहस्वपरिग्रहार्थं। तेन दीर्घाभावाच्च नुट्। आंछ। तपरकरणं सु
खमुखार्थमिति मते तु नुट्। आनाछ। ह्रीछ लज्जायां। जिह्रीछ। हुर्छा कौटिल्ये। कौटिल्यमपसरणमिति मैत्रेयः। उपधा
यां चेति दीर्घः। हूर्छति। मुर्छा मोहसमुछ्राययोः। मूर्छति। स्फुर्छा विस्तृतौ। स्फूर्छति। युछ प्रमादे। युछति। २२०। उछि उ
छी उंछे। उंछः कणश आदानं कणिशाद्यर्जनं शिलमिति यादवः। उंछति। उछी वकारादि। वुछी विवासे। विवासः समाप्तिः। आ
द्येण येविसर्वः। ध्रुछति। ध्रज ध्रजि धृज धृजि ध्वज ध्वजि गतौ। ध्रजति। ध्रंजति। धर्जति। धृंजति। ध्वजति। ध्वंज
ति। कूज अव्यक्ते शब्दे। चुकूज। अर्ज षर्ज अर्जने। अर्जति। आनर्ज। २३०। सर्जति। ससर्ज। गर्ज शब्दे। गर्जति। तर्ज भर्त्स
ने। तर्जति। कर्ज व्यथने। खर्ज पूजने। चकर्ज। चखर्ज। अज गतिक्षेपणयोः। अजति। अजेर्व्यघञपोः। अजते वीः स्य

व १

ग लेश्रा
॥ १८ ॥

यमादेशः स्यादार्धधातुकविषये घञमपं च वर्जयित्वा। वलादावार्धधातुके वेष्यते। विवाय। विव्यतुः। विव्युः। अत्र यकारस्य
हल्परत्वान्नोपधायां चेति दीर्घप्राप्तेः चः परस्मिन्निति स्थानिवद्भावेन च पूर्वत्वे। न च न पदान्तेति निषेधः स्वरदीर्घ
यलोपेषु लोपाजादेश एव न स्थानिवदिति स्फुटे॥ थलि एकाच इतीण्निषेधे प्राप्ते। कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि।
एभ्यो लिट इडेन स्यात्। क्रादीनां चतुर्णां ग्रहणं नियमार्थं। प्रकृत्याश्रयः प्रत्ययाश्रयो वा यावान् लिटीण्निषेधः स लिटि
चेत्तर्हि क्रादिभ्य एव नान्येभ्य इति। ततश्चतुर्णां थलि भारद्वाजनियमप्रापितस्य वमादिषु क्रादिनियमप्रापितस्य वे
टो निषेधार्थं। अचस्तास्वत्थल्यनिटो नित्यं। उपदेशेऽजन्तो यो धातुस्तासौ नित्यानिट् ततः परस्य थल इडेन स्यात्।
उपदेशेऽत्वतः। उपदेशेऽकारवतस्तासौ नित्यानिटः परस्य थल इडेन स्यात्। ऋतो भारद्वाजस्य। तासौ नित्यानिट ऋदं
तादेव थलो नेट् भारद्वाजस्य मतेन। तेनान्यस्य स्यादेव। अयमत्र संग्रहः। अजन्तोऽकारवान्वा यस्तास्यनिट् थलि वेडयं।
व ५ ऋदंत ईदृङ् नित्यानिट् क्राद्यन्यो लिटि सेड् भवेत्। नस्तृद्रादीनामपि थलि विकल्पः शक्यः। अचस्तास्वदिति उपदेशे
त्वत इति च योगद्वयप्रापितस्यैव हि प्रतिषेधस्य भारद्वाजनियमो निवर्त्तकः। अनंतरस्येति न्यायात्। विवयिथ। वि
वेथ। आ[illegible]थ। विव्यतुः। विव्य। विवाय। विवय। विव्यिव। विव्यिम। वेता। अजिता। वेष्यति। अजिष्यति। अजतु। आजत्।
अजेत्। वीयात्। सिचि वृद्धिः परस्मैपदेषु। इगन्ताङ्गस्य वृद्धिः स्यात् परस्मैपदपरे सिचि। अवैषीत्। आजीत्। अवेष्यत्।
आजिष्यत्। तेज पालने। तेजति। खज मंथे। खजति। खजि गतिवैकल्ये। खंजति। एजृ कंपने। एजांचकार। २५०। टुओ

स्फूर्जा वज्रनिर्घोषे। स्फूर्जति। पुस्फूर्ज। क्षि क्षये। अकर्मकः। अन्तर्भावितण्यर्थस्तु सकर्मकः। क्षयति। चिक्षाय। चिक्षियतुः।
चिक्षियुः। चिक्षयिथ। चिक्षेथ। चिक्षियिम। क्षेता। अकृत्सार्वधातुकयोर्दीर्घः। अजन्ताङ्गस्य दीर्घः स्याद्यादौ प्रत्य
ये परे न तु कृत्सार्वधातुकयोः। क्षीयात्। अक्षैषीत्। क्षीज अव्यक्ते शब्दे। कूजिनासहायं पठितुं युक्तः। चिक्षीज। ल
ज लजि भर्जने। लाज लाजि भर्त्सने च। जज जजि युद्धे। तुज हिंसायां। तोजति। तुतोज। २५०। तुजि पालने। गज गजि गृ
ज गृजि मुज मुजि शब्दार्थाः। गज मदने च। वज व्रज गतौ। वदव्रजेति वृद्धिः। अव्राजीत्। अथ टवर्गीयान्ताः शाड्वन्ता
अनुदात्तेतः षड्विंशत्। अट्ट अतिक्रमहिंसयोः। दोपधोयं। तोपधोयमित्येके। अट्टते। आनट्टे। वेष्ट वेष्टने। विवेष्टे। चेष्ट
चेष्टायां। अचेष्टिष्ट। गोष्ट लोष्ट संघाते। जुगोष्टे। लुलोष्टे। घट्ट चलने। जघट्टे। स्फुट विकसने। स्फोटते। पुस्फुटे। अठि
गतौ। अंठते। आनंठे। वठि एकचर्यायां। ववंठे। मठि कठि शोके। शोकः स्मरणं आध्यानं। कंठते। मंठते। मुठि पालने। मुंठ
ते। हेठ विबाधायां। जिहेठे। एठ च। एठांचक्रे। हिडि गत्यनादरयोः। हिंडते। जिहिंडे। हुडि संघाते। जुहुंडे। कुडि दाहे। चु
कुंडे। वडि विभाजने। मडि च। भडि परिभाषणे। परिहासः सनिंदोपालंभश्च परिभाषणं। पिडि संघाते। २६०। मुडि मा
र्जने। मार्जनं शुद्धिर्न्यग्भावश्च। मुंडते। तुडि तोडने। तोडनं दारणं हिंसनं च। तुंडते। तुडि वरणे। हरणमित्येके। चडि को
पे। शडि रुजायां। तडि ताडने। पडि गतौ। कडि मदे। खडि मंथे। हेडृ होडृ अनादरे। जिहेडे। २७०। जुहोडे। बाडृ आप्लाव्ये। गणेश
बश्यादिः। आप्लाव्यमाप्लवः। बाडते। द्राडृ ध्राडृ विशरणे। शाडृ श्लाघायां। ॥ अथ आटवर्गीयान्तसमाप्तेः परस्मैपदिनः। ॥१०॥

शौटृ गर्वे। शौटति। शुशौट। योटृ बंधे। योटति। म्लेटृ म्रेडृ उन्मादे। द्वितीयोऽन्तः। टान्तमध्येपाठस्त्वर्थसाम्यान्नाथतिवत्।
म्लेटति। म्रेडति। कटे वर्षावरणयोः। चटेइत्येके। चकारः। स्विचि। अतोहलादेर्लघोरिति वृद्धौ प्राप्तायां ह्म्यंतक्षण
श्वसजागृणि श्व्येदितां। हमयांतस्य क्षणदे एवं तस्य श्वयतेरिदितश्चेरद्धिनेस्यादि उक्तो सिचि। अकटीत्। अ
टपट गतौ। अटति। आटतुः। आटुः। पपाट। पेटतुः। पेटुः। रट परिभाषणे। लट बाल्ये। शट रुजाविशरणगत्यवसादनेषु।
वट वेष्टने। ववाट। ववटतुः। ववटुः। ववटिथ। किट त्रिट त्रासे। शिट षिट अनादरे। शेटति। शिशेट। सेटति। सिषेट।
३१०। जट झट संघाते। भट भृतौ। तट उच्छ्राये। खट कांक्षायां। णट नृत्तौ। नटचु। पिट शब्दसंघातयोः। हट दीप्तौ।
षट अवयवे। लुट विलोडने। ऊंतो यमित्येके। ३२०। चिट परप्रेष्ये। विट शब्दे। बिट आक्रोशे। बशादिः। हिठेत्येके।
इट किट कटी गतौ। एटति। केटति। कटति। ईकारः श्व्यीदितो निष्ठायामितीट्प्रतिषेधार्थः। केचित्तु इदितं मत्वा नुमि
कृते कंटतीत्यादिवदंति। अन्ते च इई इति प्रश्लिष्य। अयति। इयाय। इयतुः। इयुः। इययिथ। इयेथ। इयाय।
इययादीर्घस्य ह्रिजादरित्यामिश्रयां चकारे सादिउदाहरंति। मडि भूषायां। कुडि वैकल्ये। कुंडति। कुंडत
इति लुप्ताहेगतं। मुट प्रमर्दने। ३३०। चुडि अल्पीभावे। मुडि खंडने। मुंडति। पुडि चेत्येके। पुंडति। रुटि लुटि
स्तेये। रुंटति। लुंटति। रुठि लुठि इत्येके। रुडि लुडी त्यपरे। स्फुटिर् विशरणे। इरित्वाद् ङा। अस्फुटत्।
अस्फोटीत्। स्फुटी सपि केचित्। इदित्वान्नुम्। स्फुंटति। पठ व्यक्तायां वाचि। पेठतुः। पेठिथ। अपठीत्। अ

सि·ति· ।।११।। पाठीत।वठस्थौल्ये।ववठतुः।ववठिथ।मठमदनिवासयोः।कठकृच्छ्रजीवने।रठपरिभाषणे।३४०।हठप्लुति
शठत्वयोः।बलात्कारेइत्येके।हठति।जहाठ।रुठलुठउठउपघाते।ओठति।ऊठेत्येके।ऊठति।ऊठां
चकार।पिठहिंसासंक्लेशनयोः।शठकैतवेच।शुठप्रतीघाते।शोठति।शुठीतिस्वामी।शुंठति।कु
ठिच।कुंठति।लुठिआलस्येप्रतीघातेच।शुठिशोषणे।३५०।रुठिलुठिगतौ।चुडुभावकरणे।भावक
रणमभिप्रायस्सूचनं।चुडुति।चुचुड।अडुअभियोगे।अडुति।आनडु।कडुकार्कश्ये।कडुति।चुड्ड
दयस्त्रयोदोपधाः।तेनक्विपिचुत्।अत्।कत्।क्रीडृविहारे।चिक्रीड।तुडृतोडने।तोडति।तुतोड।तूडृ
इत्येके।हूडृहुडृहोडृगतौ।हूड्यात्।हुड्यात्।होड्यात्।३६०।रौडृअनादरे।रोडृलोडृउन्मादे।अडउ
द्यमे।अडति।आड।आडतुः।आडुः।लडविलासे।लडति।लडयोर्ललयोश्चैकत्वस्मरणाल्ललति
तिस्वाम्यादयः।कडमदे।कडति।कडिइत्येके।कंडति।गडिवदनैकदेशे।गंडति।इतिटवर्गीयान्ताः।।
अथपवर्गीयान्ताः।तत्रानुदात्तेतः।शोभसंताश्चतुस्त्रिंशत्।तिपृतेपृष्टिपृष्टेपृक्षरणार्थाः।आद्योनुदात्तः।क्षीरस्वा
मीत्वयंसेडिति बभ्राम।तेपते।तितिपे।केचिदनियमादिट्।तितिपिषे।तेप्ता।तेप्स्यते।लिङ्सिचावात्मनेपदेषु।इकःसमी
पाद्धलःपरौझलादीलिङ्सिचौआत्मनेपदपरस्मिंश्चेत्तौकितौस्तः।कित्वान्नगुणः।तिप्सीष्ट।तिप्सीयास्तां।ति
प्सीरन्।अतिप्त।अतिप्साताम्।अतिप्सत।तितेपे।तिष्टिपे।तिष्टिपाते।तिष्टिपिरे।३७०।तिष्टेपे।तिष्टेपाते।तिष्टेपिरे।। गणेश ।।११।।

ते एकं पने च। ग्लेपृ दैन्ये। टुवेपृ एकंपने। वेपते। केपृ गेपृ ग्लेपृ च। चात्कंपने गतौ च। स्तत्र विभागादिति स्वामी। मैत्रेयस्तु चकारमंत
रेणार्थद्वयं त्वाकंपने इत्यपेक्षितं इत्याह। ग्लेपेरर्थभेदात्पुनः पाठः। मेपृ रेपृ लेपृ गतौ। ३९० त्रपूष् लज्जायां। त्रपते। तॄ
फलभजत्रपश्च। एषामेत एत्वं स्यात् किति लिटि सेटि थलि च। त्रेपे। त्रेपाते। त्रेपिरे। ऊदित्वाद्वेट्। त्र
पिता। त्रप्ता। त्रपिषीष्ट। त्रप्सीष्ट। कपि चलने। कंपते। चकंपे। रबि लबि अबि शब्दे। ररंबे। ललंबे। आनंबे। लबि अवस्रंसने च।
कबृ वर्णे। चकबे। क्लीबृ अधार्ष्ट्ये। चिक्लीबे। क्षीबृ मदे। क्षीबते। शीभृ कत्थने। शीभते। चीभृ च। ३२० रेभृ शब्दे। रिरेभे।
अभि रभि क्वचित् पठ्यते। अंभते। रंभते। ष्टभि स्कभि प्रतिबंधे। स्तंभते। उत्तंभते। उदः स्थास्तंभोरिति पूर्वसवर्णः। विस्तं
भते। स्तन्भेरिति षत्वं तु न भवति। अनुविधौ निर्दिष्टस्य सौत्रस्यैव तत्र ग्रहणात्। तद्धि जंतु स्यात्स्तंभोरिति पवर्गीयोपध
पाठः। स्तन्भेरिति तवर्गीयोपधपाठ इति माधवः। केचिदस्य टकारमोष्ठ्योपदेशिकमित्याहुः। तन्भते। ष्टंभते। टष्टंभे। जभी जृ
भि गात्रविनामे। रधिजभोरचि। एतयोर्नुमागमः स्यादचि। जंभते। जजंभे। जंभिता। अजंभिष्ट। जृंभते। जजृंभे। शल्भ क
त्थने। शशल्भे। वल्भ भोजने। दंत्योष्ठ्यादिः। ववल्भे। गल्भ धार्ष्ट्ये। गल्भते। श्रंभु प्रमादे। तालव्यादिः। दंत्यादिश्च। त्रं
श्रंभते। स्रंभते। ष्टुभु स्तंभे। स्तोभते। विष्टोभते। तुष्टुभे। अष्टोभिष्ट। ४०० अथ परस्मैपदिनः। गुपू रक्षणे। गुपूधूपविच्छि
पणिपनिभ्य आयः। एभ्य आयप्रत्ययः स्यात्स्वार्थे। पुगंतेति गुणः। सनाद्यंता धातवः। सनादयः कमेर्णिङंताः प्रत्ययाः अं
ते येषां ते धातुसंज्ञाः स्युः। धातुत्वाल्लडादयः। गोपायति। आयादय आर्द्धधातुके वा। आर्द्धधातुकविवक्षायामायादयो वा
स्युः। कास्प्रत्ययादाममंत्रे लिटि। कास्धातोः प्रत्ययांतेभ्यश्चाम् स्याल्लिटि न तु मंत्रे। कास्यनेकाच् ग्रहणं कर्तव्यं। स्वरे प्र

x उपमानसेच। चपसांत्वने। षपसमवाये। समवायः संबंधः सम्यगवबोधो वा। सपति। रपलपव्यक्तायां वाचि। x

सि॰ ति॰ ॥१२॥ स्यय ग्रहणमपनीयत स्थानेऽनेकाच इति वाच्यमित्यर्थः। अतो लोपः। आर्द्धधातुकोपदेशकाले यदकारांतं तस्याकारस्य लो
पः स्यादार्द्धधातुके परे। गोपायांचकार। गोपायांबभूव। गोपायामास। जुगोप। जुगुपतुः। जुगुपुः। ऊदित्वाद्वेट्। जुगो
पिथ। जुगोप्थ। गोपायिता। गोपिता। गोप्ता। गोपाय्यात्। गुप्यात्। अगोपायीत्। अगोपीत्। अगौप्सीत्। धूप संतापे। धूपा
यति। धूपायांचकार। दुधूप। धूपायितासि। धूपितासि। जप जल्प व्यक्तायां वाचि। चुप मंदायां गतौ। चोपति। चुचोप।
चोपिता। तुप तुंप त्रुप त्रुंप तुफ तुंफ त्रुफ त्रुंफ हिंसार्थाः। तोपति। तुतोप। ४१०। तुंपति। तुतुंप। तुतुंपतुः। संयोगात्परस्य लि
टः कित्वाभावान्नलोपो न। किदाशिषीति कित्वान्नलोपः। तुप्यात्। प्रात्तुंपतौ गवि कर्तरीति पारस्करादिगणे पाठात्सुट्।
प्रस्तुंपति गौः। शिपा निर्देशाद्यङ्लुकि न। प्रतोतुंपीति। त्रोपति। त्रुंपति। तोफति। तुंफति। त्रोफति। त्रुंफति। इहाद्यौ द्वौ
पंचमषष्ठौ च निरेफाः। अन्ये सरेफाः। आद्याश्चत्वारः प्रथमांताः। ततो द्वितीयांताः। अष्टावुकारवंतः। पर्फ रफ र
फि अर्ब पर्ब लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ। आद्यः प्रथमांतः। ततो द्वितीयांतौ। तत एकादश तृतीयां
ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। पर्फति। पपर्फ। रफति। रंफति। ४२०। अर्बति। आनर्ब। पर्बति। लर्बति। बर्बति। प
वर्गीयादिरयं। मर्बति। कर्बति। खर्बति। गर्बति। शर्बति। सर्बति। ४३०। चर्बति। कुबि आच्छादने। कुंबति। लुबि तुबि अर्दने।
लुंबति। तुंबति। चुबि वक्त्रसंयोगे। चुंबति। षृभु षृंभु हिंसार्थौ। सर्भति। ससर्भ। सर्भिता। सृंभति। ससृंभ। सृभ्यात्। षि
भु षिंभु इत्येके। सेभति। सिंभति। शुभ शुंभ भाषणे। भासन इत्येके। हिंसायामित्यन्ये। अथानुनासिकांताः। तत्रैक गणेश
म्यंताः अनुदात्तेतो दश। घिणि घुणि घृणि ग्रहणे। नुम् घुंटे। घिंणते। जिघिंणे। ४४०। घुंणते। जुघुंणे। घृंणते। ज ॥१२॥

घ्रसे। घुण घूर्ण भ्रमणे। घोणते। घूर्णते। इमौतु दादौ परस्मैपदिनौ। पण व्यवहारे स्तुतौ च। पन च। स्तुतावि सेव संबध्य
ते। एथ ङिं देशात्। पनिसाहचर्यात् पणेरपि स्तुतावेवाय प्रत्ययः। व्यवहारे तु। पणते। पेणे। पणितेत्यादि। स्तुतावनुबं
धस्य केवले चरितार्थत्वादायप्रत्ययान्तान्नात्मनेपदं। पणायति। पणायांचकार। पेणे। पणायितासि। पणितासे। प
णाय्यात्। पणिषीष्ट। पनायति। पनायांचकार। पेने। भाम क्रोधे। भामते। बभामे। क्षमूष् सहने। क्षमते। चक्षमे। चक्षमि
षे। चक्षंसे। चक्षमिध्वे। चक्षंध्वे। चक्षमिवहे। म्वोश्च। मान्तस्य धातोर्नकारादेशः स्यात् मकारे वकारे च परे। णत्वं। चक्ष
ण्वहे। चक्षमिमहे। चक्षण्महे। क्षमिष्यते। क्षंस्यते। क्षंतेमे। आशिषि। क्षमिषीष्ट। क्षंसीष्ट। अक्षमिष्ट। अक्षंस्त। कमु कां
तौ। कांतिरिच्छा। कमेर्णिङ्। स्वार्थे ङित्वात्तङ्। कामयते। अयामंताल्वाय्येत्विष्णुषु। आम् अंत आलु आय्य इत्नु इष्णु
एषु णेरयादेशः स्यात्। वक्ष्यमाणलोपापवादः। कामयांचक्रे। आयादय आर्द्धधातुके वा। चकमे। कामयिता। कमिता। काम
यिष्यते। कमिष्यते। णिश्रिद्रुस्रुभ्यः कर्तरि चङ्। ण्यंताच्छ्र्यादिभ्यश्च च्लेश्चङ् स्यात् कर्त्रर्थे लुङि परे। काम् इ अ त इति स्थिते।
णेरनिटि। अनिडादावार्द्धधातुके परे णेर्लोपः स्यात्। परत्वादेरनेकाच इति यणि प्राप्ते। णल्लोपो वियङ्यण्गुणवृद्धि
दीर्घेभ्यः पूर्वविप्रतिषेधेनेति वार्त्तिकं। णिलोपस्य तु पाचयतेः पाचकिरित्यादि क्तिः अंतमवकाश इति भावः। वस्तुतस्त्वनि
म २ टीति वचनसामर्थ्यादार्द्धधातुकमात्रस्य विषयः। तथा च यञादेरपवाद एवायं। इयङ्। अततक्षत्। यणि। आटिटत्।
गुणः। कारणं। वृद्धिः। कारकः। दीर्घः। कार्यते। णौ चङ्युपधाया ह्रस्वः। चङ्परे णौ यदंगं तस्योपधाया ह्रस्वः स्यात्।

सि॰ ति॰ ॥२३॥ चङि। चङि परेऽनभ्यासस्य धात्ववयवस्यैकाचः प्रथमस्य द्वे स्तोऽजादेस्तु द्वितीयस्य। सन्वल्लघुनि चङ्परेऽनग्लो
पे। चङ्परे इति बहुव्रीहिः। सन्वांगस्येति च द्वयमप्यावर्त्तते। अंगसंज्ञानिमित्तं यच्चङ्परं णिरिति यावत्। तस्मिन्परे य
ल्लघु तत्परो योऽङ्गस्याभ्यासस्तस्य सनीव कार्यं स्यात् णावग्लोपेऽसति। अथ वांगस्येति नावर्त्तते। चङ्परे णौ यद
ङ्गस्य तत्परो योऽभ्यासो लघुपरस्तस्येत्यादि प्राग्वत्। सन्यतः। अभ्यासस्यात इकारः स्यात्सनि। दीर्घो लघोः। लघोरभ्या
सस्य दीर्घः स्यात्सन्वद्भावविषये। अचीकमत। णिङभावपक्षे। कमेश्च्लेश्चङ् वक्तव्यः। णिङभावान्न दीर्घसन्वद्भा
वौ। अचकमत। संज्ञायाः कार्यकालत्वादङ्गं यत्रैव हि रुच्यते। तत्रैव दीर्घः सन्वद्भावो नान्ये काक्षितिमाधवः। चकारस्यार्था
पयस्त्वर्णिस्यादौ नांगं हि रुच्यते। किंत्वस्यावयवः कश्चित्तस्मादेकाक्षि दद्वयं। वस्तुतोऽङ्गस्यावयवोऽभ्यास इति वर्णना यो ७
त। कुत्रौ दीर्घोऽर्थापयतो द्वयं स्यादिति मन्महे। वकारस्तोतूभयमिदं न स्यात् स्याद्व्यवस्थया। णेर्विशेषणं संन्निहितं
लघुनी सुगमेव वा। इति व्याख्याविकल्पस्य कैयटेनैव वर्णनात्। णेरग्लोपेऽपि संबंधस्त्वागितामपि सिद्धये। अ
थकम्यंतास्त्रिंशत्परस्मैपदिनः। अण रण वण भण मण कण क्व ण व्रण भ्रण ध्व ण शब्दार्थाः। अणति। ५५०।
रणति वणति। वकारादित्वादेत्वाभ्यासलोपौ न। ववणतुः। ववणिथ। धणिरपि केश्चित्पठ्यते। धणति। ओ
ने२ णृ अपनयने। ओणति। औणं चकार। ५६०। शोणृ वर्णगत्योः। शोणति। शुशोण। श्रोणृ संघाते। श्रोणति। गणेश
श्लोणृ च। शोणादयस्त्रयो मीतालव्योष्मादयः। पैणृ गतिप्रेरणश्लेषणेषु। पिपैण। ध्रण शब्दे। उपदेशे नान्तोऽयं। ॥१३॥

रेफात्परत्वाल्लत्वं। ध्रुवाति। नोपदेशफलं यद्धु किः। दंध्रंति। बभ्रे त्यपिकेचित्। बेभ्रतुः। बेभ्रिथ। कनी दीप्तिकांतिगतिषु।
चकान। ष्टनवनशब्दे। स्तनति। वनति। वनषेलसंभक्तौ। वनेरर्थभेदात्स्तनेः पाठः। सनति। ससान। सेनतुः। ये विभाषा।
जनसनखनामात्वं वा स्याद्झलादौ क्ङिति। सायात्। सन्यात्। ४७०। श्रमगत्यादिषु। कनी। दीप्तिगतौ यत्र गतेः परयोः शब्द
द्संभक्त्योरादिशब्देन ग्रहः। श्रमति। श्राम। द्रमहम्म मीम्गतौ। ड्रमति। दड्राम। ह्म्यंतेति न वृद्धिः। अद्रमीत्। जहं
म। मीमति। मिमीम। अयं शब्दे च। वमुछ मुजमु ज्ञमु अदने। ष्ठिवु क्लमु चमाशिति। एषामचो दीर्घः स्याच्छिति।
आङि चम इति वक्तव्ये। आचामति। आङः किं। चमति। विचमति। अचमीत्। जिमिं केचित् पठंति। जेमति। क्रमुपादविक्षे
पे। वाभ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः। एभ्यः श्यन्वा स्यात्कर्त्रर्थे सार्वधातुके परे। क्रमः परस्मैपदेषु।
क्रमे दीर्घः स्यात्परस्मैपदपरे शिति। क्राम्यति क्रामति। चक्राम। क्राम्येतु। क्रामतु। स्नु क्रमोरनात्मनेपदनिमित्ते। अ
त्रैवेट्। अक्रमीत्। अथ रेवत्यंताः अनुदात्तेतः। अय वय पय मय चय तय णय गतौ। अयते। दयायासश्च। दयअ
यश्चासर एभ्य आम्स्याल्लिटि। अयांचक्रे। अयेत। अयिषीष्ट। विभाषेटः। इणः परो य इट् ततः परेषां षीध्वंलुङ्लिटां
धस्य मूर्धन्यः स्याद्वा। अयिषीढ्वं। अयिषीध्वं। आयिष्ट। आयिढ्वं आयिध्वं। उपसर्गस्यायतौ। अयतिपरस्योपसर्गस्य
योरेफस्तस्य [redacted] लत्वं स्यात्। लायते। पलायते। निसदुसोः रुत्वस्यासिद्धत्वान्न लत्वं। निरयते। दुर[illegible]यते। निरदुरोस्तु
निलयते। दुलयते। प्रत्यय इति। लिति णौ रूपं। अथकथमुदयति वितततोर्ध्वरश्मिरज्जावितिमाघः। इट किट कटी इ स्वत्र

प्रश्लिष्टस्य भविष्यति। यद्वा। अनुदात्तेत्वलक्षणमात्मनेपदमनित्यं। चक्षिङो ङित्करणं तज्ज्ञापकात्। ४८०। वादित्वा
त्वबये। पेये। मेये। चेये। तेये। प्रणयते। नेये। दय दानगतिरक्षणहिंसादानेषु। आदानं ग्रहणं। दयां चक्रे। रय गतौ। कुयी
तंतुसंताने। कुयां चक्रे। पूयी विशरणे दुर्गन्धे च। पूयते। पुपूये। ४९०। क्नूयी शब्दे उन्दे च। चुक्नूये। क्ष्मायी विधूनने। च
क्ष्माये। स्फायी ओप्यायी वृद्धौ। स्फायते। पस्फाये। प्यायते। लिड्यङोश्च। लिटि यङि च प्यायः पी भावः स्यात्। पुनः प्रस
ङ्गविज्ञानात् पी शब्दस्य द्वित्वं। एरनेकाच इति यण्। पिप्ये। पिप्याते। पिप्यिरे। दीपजनबुधपूरितायिप्यायिभ्योन्यतर
स्यां। एभ्यश्च्लेश्चिण् वा स्यादेकवचने त शब्दे परे। चिणो लुक्। चिणः परस्य लुक् स्यात्। अप्यायि। अप्यायिष्ट। ताय संता
नपालनयोः। संतानः प्रबंधः। तायते। तताये। अतायि। अतायिष्ट। शल्ल वल्ल संवरणे। शल्ले। वल्ल वल्ल संवरणे
संचरणे च। ववल्ले। ववल्ले। मल्ल मल्ल धारणे। मेले। ममल्ले। ५००। भल्ल भल्ल परिभाषणहिंसादानेषु। बभले। बभल्ले। क
ल शब्दसंख्यानयोः। कलते। चकले। कल्ल अव्यक्ते शब्दे। कल्लते। अशब्द इति स्वामी। अशब्दस्तूष्णींभाव इति च। तेवृ देवृ
देवने। तितेवे। दिदेवे। षेवृ गेवृ ग्लेवृ पेवृ मेवृ म्लेवृ सेवने। परिनिविभ्य इति षत्वं। परिषेवते। [redacted]। सिषेवे। अयं सोपदे
शोपीति न्यासकारादयः। तद्भाष्यविरुद्धं। मेवते। जिगेवे। जिग्लेवे। पिपेवे। ५१०। मेवते। शेवृ खेवृ क्षेवृ इत्यप्येके। रेवृ प्ल
वगतौ। प्लवगतिः प्लुतगतिः। रेवते। अथावसंताः परस्मैपदिनः। मव्य बंधने। ममव्य। सूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः।
हय गतौ। अहयीत्। यांतत्वान्न वृद्धिः। शुच्य अभिषवे। अवयवानां शिथिलीकरणं सुरायाः संधानं वा। अभिषवः

स्नानं च। भुभुच्य। भुच्य इत्येके। हर्य गतिकांत्योः। जहर्य। ५२०। अल भूषण पर्याप्ति वारणेषु। अलति। आल। अतोल्लांत
स्याल्लेतिलुप्तषष्ठीकं। अतः समीपो योल्लोत दंतांगस्यातो वृद्धिः स्यात् परस्मैपदपरे सिचि। नेटीतिनिषेधस्यातो ह
ल्लादेरिति विकल्पस्यापवादः। माभवानालीत्। अयं स्वरितेदित्येके। तन्मते ऽलत इत्याद्यपि। ञि फला विशरणे।
तृफले सेत्वं। फेलतुः। फेलुः। अफालीत्। मील श्मील स्मील क्ष्मील निमेषणे। निमेषणं संकोचः। द्वितीयस्तालव्यादिः।
तृतीयो दंत्यादिः। पील प्रतिष्टंभे। प्रतिष्टंभो रोधनं। नील वर्णे। निनील। शील समाधौ। शीलति। कील बंधने। कूल आ
वरणे। शूल रुजायां। संघोषे च। तूल निष्कर्षे। निष्कर्षो निष्कोषणं। तन्त्रांतर्गतस्य बहिर्निःसारणं। तुतूल। पूल संघाते।
मूल प्रतिष्ठायां। फल निष्पत्तौ। फेलतुः। फेलुः। चुल्ल भावकरणे। भावकरणमभिप्रायविष्कारः। फुल्ल विकसने। चिल्ल शै
थिल्ये भावकरणे च। तिल गतौ। तेलति। तिल्ल इत्येके। तिल्लति। ५४०। वेलृ चेलृ केलृ खे [redacted] लृ क्ष्चेलृ वेल्ल चलने। पंचरुदि
तः षष्ठो लोपधः। पेलृ फेलृ शेलृ गतौ। बेलृ इत्येके। स्खल संचलने। चस्खाल। अस्खालीत्। ५५०। खल संचये। गल्ल अदने।
गलति। अगालीत्। षल गतौ। सलति। दल विशरणे। श्वल श्वल्ल आशुगमने। शश्वाल। अश्वालीत्। शश्वल्ल। अश्व
ल्लीत्। खोलृ खोर्ऋ गतिप्रतिघाते। खोलति। खोरति। धोर्ऋ गतिचातुर्ये। धोरति। त्सर छद्मगतौ। तत्सार। अत्सारीत्। ५६०।
[redacted] क्मर हूर्छने। चक्मार। अभ्र वभ्र मभ्र चर गत्यर्थाः। चरतिर्भक्षणेपि। अभ्रति। आनभ्र। माभवानभ्रीत्। अगां स [redacted]
रेफ [redacted] स्यातः समीपस्थाभावान्नवृद्धिः। ष्ठिवु निरसने। ष्ठिवु क्षिवु इति दीर्घः। ष्ठीवति। अस्य द्वितीयस्थकारष्ठका

सि॰ति॰
॥१५॥

रो वेति वृत्तिः। तिष्ठेव। तिष्ठिवतुः। तिष्ठिवुः। टिष्ठेव। टिष्ठिवतुः। हलि चेति दीर्घः। ष्ठीव्यात्। जि जये। अयमजंतेषु पठितुं युक्तः। जय उ
त्कर्षप्राप्तिः। अकर्मकोयं। जयति। सन्लिटोर्जेः। जयतेः सन्लिणिनमित्तो योभ्यासस्ततः परस्य कुत्वं स्यात्। जिगाय।
जिग्यतुः। जिग्युः। जिगयिथ। जिगेथ। जिगाय। जिगय। जिग्यिव। जिग्यिम। जेता। जीयात्। अजैषीत्। जीव प्राणधा
रणे। जिजीव। पीव मीव तीव नीव स्थौल्ये। पिपीव। मिमीव। ५७०। तितीव। निनीव। क्षीवु क्षेवु निरसने। उर्वी तुर्वी थुर्वी
दुर्वी धुर्वी हिंसार्थाः। ऊर्वांचकार। उपधायां च। तुतूर्व। गुर्वी उद्यमने। गूर्वति। ५८०। मुर्वी बंधने। पुर्व पर्व मर्व पूरणे।
चर्व अदने। भर्व हिंसायां। कर्व खर्व गर्व दर्पे। अर्व शर्व षर्व हिंसायां। आनर्व। ५९०। शर्वति। सर्वति। इवि व्याप्तौ। इन्वति।
इन्वांचकार। पिवि मिवि णिवि सेचने। तृतीयो मूर्द्धन्योष्ठ्यादिरित्येके। सेवन इति तरंगिण्यां। पिन्वति। पिपिन्व। हिवि दिवि
धिवि जिवि प्रीणनार्थाः। हिन्वति। दिन्वति। धिन्विकृण्व्योर च। अनयोरकारोंतादेशः स्यादुप्रत्ययश्च शब्विषये। अ
तो लोपः। तस्य स्थानिवद्भावाल्लघूपधगुणो न। उप्रत्ययस्य पित्त्वाद्गुणः। धिनोति। धिनुतः। धिन्वंति। लोपश्चास्यान्य
तरस्यां म्वोः। असंयोगपूर्वो यः प्रत्ययोकारस्तदंतस्यांगस्य लोपो वा स्यान्म्वोः परयोः। धिन्वः। धिनुवः। धिन्मः। धिनुमः।
५३ मिपितुरत्वाद्गुणः। धिनोमि। उतश्च प्रत्ययादसंयोगपूर्वात्। असंयोगपूर्वो यः प्रत्ययोकारस्तदंतादंगात्परस्य हेर्लु
क्स्यात्। धिनु। [illegible]नि त्यत्वादुकारलोपात्पूर्वमाट्। धिनवाव। धिनवाम। जिन्वतीत्यादि। ६००। रिवि रवि धवि गत्यर्थाः। रि
ण्वति। रण्वति। धन्वति। कृवि हिंसाकरणयोश्च। चकाराद्गतौ। कृणोतीत्यादि धिन्वतिवत्। अयं स्वादौ च। मव बंधने

गणेश
॥१५॥

मेवतुः। मेवुः। अमवीत्। अमावीत्। अव रक्षण गति कांति प्रीति तृप्ति अवगम प्रवेश श्रवण स्वाम्यर्थ याचन क्रियेच्छा दीप्त्यवा
प्त्यालिंगन हिंसा दान भाग वृद्धिषु। अवति। आव। मा भवानवीत्। धावु गतिशुद्ध्योः। स्वरितेत्। धावति। धावते। दधाव
दधावे। अथोष्मांता आत्मनेपदिनः। धुक्ष धिक्ष संदीपन क्लेशन जीवनेषु। धुक्षते। दुधुक्षे। धिक्षते। दिधिक्षे। वृक्ष वरणे
। वृक्षते। ववृक्षे। १० ॥ शिक्ष विद्योपादाने। शिक्षते। भिक्ष भिक्षायामलाभे लाभे च। भिक्षते। क्लेशः अव्यक्तायां वाचि।
बाधन इति दुर्गः। क्लेशते। चिक्लिशे। दक्ष वृद्धौ शीघ्रार्थे च। दक्षते। ददक्षे। दीक्ष मौण्ड्येज्योपनयन नियम व्रतादेशेषु।
दीक्षते। दिदीक्षे। ईक्ष दर्शने। ईक्षांचक्रे। ईष गतिहिंसादर्शनेषु। ईषांचक्रे। भाष व्यक्तायां वाचि। भाषते। वर्ष स्नेहने। दंतो
ष्ठ्यादिः। ववर्षे। गेषृ अन्विच्छायां। ग्लेषृ इत्येके। अ। चिच्छौ अन्वेषणे। जिगेषे। २० येषृ प्रयत्ने। जेषृ णेषृ एषृ प्रेषृ गतौ।
जेषते। नेषते। एषांचक्रे। पिप्रेषे। रेषृ हेषृ ह्रेषृ अव्यक्ते शब्दे। आद्यो वृकशब्दे। ततो द्वौ अश्वशब्दे। रेषते। हेषते। ह्रेषते।
४ सि कासृ शब्दकुत्सायां। कासांचक्रे। भासृ दीप्तौ। बभासे। ३० णासृ रासृ शब्दे। नासते। प्रणासते। णसकौटिल्ये। नस
ते। भ्यस भये। भ्यसते। बभ्यसे। आङः शसि इच्छायां। आशंसते। ग्रसु ग्लसु अदने। जग्रसे। जग्लसे। ईह चेष्टायां। ईहांचक्रे।
बहि महि वृद्धौ। बंहते। बबंहे। मंहते। ४० अहि गतौ। अंहते। आनंहे। गर्ह गल्ह कुत्सायां। जगर्हे। जगल्हे। बर्ह बल्ह प्राधा
न्ये। ओष्ठ्यादी। वर्ह वल्ह परिभाषण हिंसाच्छादनेषु। दंतोष्ठ्यादी। केचित्तु सर्वे यो दंतोष्ठ्यादिता मनयोरोष्ठ्यादिता वा
तुः। प्लिह गतौ। पिप्लिहे। वेहृ जेहृ बाहृ प्रयत्ने। आद्यो दंतोष्ठ्यादिः। उभावप्योष्ठ्यादी इत्येके। दंतोष्ठ्यादी इत्यपरे। जेहति र्गत्य

सि·ति·
॥९६॥

थोपि। ६५०। बबाहे। द्राहृ निद्राक्षये। निक्षेपे इत्येके। अंसः केवल्यौ छ्वादिः।५ काशृ दीप्तौ। चकाशे। ऊह वितर्के। ऊहां चक्रे।
गाहू विलोडने। गाहते। जगाहे। जगाहिषे। जघाक्षे। जगाहिढ्वे। जगाहिध्वे। जघाढ्वे। गाहिता। ढो ढे लोपः। ढस्य लोपः स्या
द्ढपरे। गाढा। गाहिष्यते। घाक्ष्यते। गाहिषीष्ट। घाक्षीष्ट। अगाढ। अगाहिष्ट। अघाक्षाता। अघाक्षत। अगाढाः। अघा
ढ्वं। अघाक्षि। गृहू ग्रहणे। गर्हते। जगृहे। जगृहिषे। जघृक्षे। जघृढ्वे। गर्हिता। गर्ढा। गर्हिष्यते। घर्क्ष्यते। गर्हिषीष्ट। घृक्षीष्ट।
लुङि। अगर्हिष्ट। इडभावे। शल इगुपधादनिटः क्सः। इगुपधो यः शलन्तस्तस्मादनिटश्च्लेः क्सादेशः स्यात्। अघृक्षत।
क्सस्याचि। अजादौ तङि क्सस्य लोपः स्यात्। अलोन्त्यस्य। अघृक्षाताम्। अघृक्षन्त। ग्लह च। ग्लहते। घुषि कान्तिकरणे।
घुषते। जुघुषे। केचिद्घुषेति अदुपधं पठन्ति। अर्थादस्यैतस्मै पदिनः। घुषिर् अविशब्दे। विशब्दनं प्रतिज्ञानं ततो न
न्यस्मिन्नर्थे इत्येके। शब्दे इत्यन्ये पेठुः। घोषति। जुघोष। घोषिता। इरितो वा। अघुषत्। अघोषीत्। अक्षू व्याप्तौ।
अक्षोऽन्यतरस्यां। अक्षो वा श्नु प्रत्ययः स्यात्कर्त्रर्थे सार्वधातुके परे। पक्षे शप्। अक्ष्णोति। अक्ष्णुतः। श्नु प्रत्ययान्तत्वा
दचि श्नु इति उवङ्। अक्ष्णुवन्ति। अक्षति। अक्षतः। अक्षन्ति। आनक्ष। आनक्षिथ। आनष्ठ। अक्षिता। अष्टा। अक्षिष्य
ति। स्कोरिति कलोपः। षढोः कः सि। अक्ष्यति। अक्ष्णोतु। अक्ष्णुहि। अक्ष्णवानि। आक्ष्णोत्। आक्ष्णवम्। अक्ष्णुयात्।
अक्ष्यात्। ऊदित्वादिट् वा। नेटि। मा भवानक्षीत्। अक्षिष्टां। अक्षिषुः। इडभावे तु मा भवानाक्षीत्। आष्टां। आक्षुः। ६६०। त गणेश
क्षू त्वक्षू तनूकरणे। तनूकरणे तक्षः। श्नुः स्याच्छब्दविषये। तक्ष्णोति। तक्षति काष्ठं। ततक्षिथ। ततष्ठ। अतक्षीत्। ॥९६॥

अतक्षिष्टां। अताक्षीत्। अताष्टां। तनूकरणे किं। वाग्भिः संतक्षति। भर्त्सयतीत्यर्थः। उक्ष सेचने। उक्षांचकार। रक्ष पालने। णि
क्ष चुंबने। प्रणिक्षति। तृक्ष स्तृक्ष णक्ष गतौ। तृक्षति। स्तृक्षति। नक्षति। वक्ष रोषे संघाते इत्येके। मृक्ष संघाते। म्रक्ष इत्येके। ६७०।
तक्ष त्वचने। त्वचनं संवरणं त्वचो ग्रहणं च। पक्ष परिग्रह इत्येके। सूर्क्ष आदरे। सुसूर्क्ष। अनादर इति क्वाचित्कोपपाठः। अव
ज्ञावहेलनमसूर्क्षणमित्यमरः। काक्षि वाक्षि माक्षि कांक्षायां। द्राक्षि ध्राक्षि ध्वाक्षि घोरवाशिते। चूष पाने। चुचूष। तूष तुष्टौ। ६८०।
पूष वृद्धौ। मूष स्तेये। लूष रूष भूषायां। शूष प्रसवे। प्रसवोऽभ्यनुज्ञानं। तालव्योष्मादिः। यूष हिंसायां। जूष च। भूष अलंकारे।
भूषति। ऊष रुजायां। ऊषांचकार। ईष उञ्छे। ६९०। कष खष शिष जष झष शष वष मष रुष रिष हिंसार्थाः। तृतीयषष्ठौ ताल
व्योष्मादी। समसमो दंतोष्ठ्यादिः। चकाष। चखाष। शिशेष। शिशेषिथ। शेष्टा। क्सः। अशिक्षत्। अशेक्ष्यत्। जेषतुः। जझषतुः। शेव
तुः। ववषतुः। मेषतुः। तीषसहलुभरुषरिषः। इच्छ्यादेः परस्य तादेरार्धधातुकस्येड्वा स्यात्। रोषिता। रोष्टा। रोषिष्यति। रेषि
ता। रेष्टा। रेषिष्यति। ७००। भष भर्त्सने। इह भर्त्सनं श्वरवः। भषति। बभाष। उष दाहे। उषविदजागृभ्योऽन्यतरस्यां। एभ्यो लिट्या
म्वा स्यात्। ओषांचकार। उवोष। ऊषतुः। उवोषिथ। जिषु विषु मिषु सेचने। जिजेष। क्रादिनियमादिट्। विवेषिथ। विविषि
वा। वेष्टा। वेक्ष्यति। अविक्षत्। पुष पुष्टौ। पोषति। पोषिता। अपोषीत्। अनिट्केषु पुष्येति श्यना निर्देशादयं सेट्। अतो न क्सः।
अड्विधौ दैवादिकस्य ग्रहणं नाङ्। श्रिषु श्लिषु प्रुषु प्लुषु दाहे। श्रेषति। शिश्रेष। श्रेषिता। श्लेषति। शिश्लेष। श्लेषिता।
अयमपि सेट्। अनिट्सु दैवादिकस्यैव ग्रहणमिति कैयटादयः। यत्त्वनिट्कारिकान्यासे द्वयोर्ग्रहणमित्युक्तं। तस्योक्ति

खि॰ ति॰
॥१७॥

घिरो घाऊं धांतर विरो घाञ्चो पेक्ष्यं। पुप्रो षए लोष ।७१०। पषुव षुमषुसेचने। मषुसहने च। इतरौ हिंसासंक्लेशनयोश्च। षर्ष
ति। पपर्ष। पर्ष्यात्। घ्रषु संघर्षे। हषु अलीके। तुसहु सहु सरसञ्चे। तुतोस। अजहास। अजहास। ररास। लस श्लेषणक्री
डनयोः ।७२०। घस्लृ अदने। अयं न सार्वत्रिकः। लिघु यत रस्यां मिस्यदेघस्लादेश विधानात्॥ ततश्च यत्र लिंगं वचनं
वास्ति तत्रैवास्य प्रयोगः। अत्रैव पाठः। तापि परस्मैपदे लिंगं। लृदित्करणमङि। अनिट्कारिकासु पाठो वलो घार्द्धधा
तुके। क्मरविविशिष्योपादानं। घसति। घस्ता। सः स्यार्द्धधातुके। सस्यतः स्या सार्वार्द्धधातुके। घत्स्यति। घसतु। अ
घसत्। घसेत्। लिंगाघभावादाशिष्यस्याप्रयोगः। पुषादिद्युता द्यॢदितः परस्मैपदेषु। च्यच्चिकरण पुषादेर्घ्क्तादेर्ऌ
दितश्च परस्य च्लेरङ् स्यात्परस्मैपदेषु। अघसत्। जर्जर्चर्चझर्झ परिभाषणहिंसातर्जनेषु। पिस्रपेस्र गतौ। पिपिसतुः।
पिपेसतुः। हसे हसने। एदित्वान्न वृद्धिः। अहसीत्। णिश शसमाधौ। तालव्योष्मांतः। प्रणेशति। मिश मश शब्दे रोषकृते च।
तालव्योष्मांतौ ।७३०। शव गतौ। दंतोष्म्यांतः। तालव्योष्मादिः। शवति। अशावीत्। शश प्लुतगतौ। तालव्योष्मांघंतः। शशा
श। शेशतुः। शेशुः॥ शेशिथ। शसु हिंसायां। दंत्योष्मांतः। न शसददवादिगुणानां। शशासुः। शशसिथ। शंसु स्तुतौ। अयं दुर्गता
वपीति दुर्गः। नशांसोघातुकः क्रूर इसमरः। शशंस। आशिषि नलोपः। शस्यात्। चह परिकल्कने। कल्कनं शाठ्यं। अ
चहीत्। मह पूजायां। अमहीत्। रह त्यागे। रहि गतौ। रंहति। रंह्यात्। दृह दृहि वृह वृहि वृद्धौ। दर्हति। ददर्ह। ददृहतुः। दृंहति ।७४०।
बर्हति। वृंहति। वृहि शब्दे च। वृंहितं करिगर्जितं। वृहि इत्येके। अवर्हत्। अबर्हीत्। तुहिर् दुहिर् उहिर् अर्दने। तोहति। तुतोह।

गणेश
॥१७॥

अतुहत्। अतोहीत्। दोहति। अदुहत्। अदोहीत्। अनिट्कारिकास्वस्य दुहेर्ग्रहणं नेच्छंति। ओहति। उवोह। ऊहतुः। ओहिता।
मा भवानुहत्। औहीत्। अर्ह पूजायां। अर्हति। आनर्ह। अथ कृपूपर्यंता अनुदात्तेतः॥ द्युत दीप्तौ। द्योतते। द्युतिस्वाप्योः संप्रसारणं।
अनयोरभ्यासस्य संप्रसारणं स्यात्। दिद्युते। दिद्युताते। द्योतिता। द्युद्भ्यो लुङि। द्युतादिभ्यो लुङः परस्मैपदं वा स्यात्। पुषादि
तिस्तृत्वेण परस्मैपदे अङ्। अद्युतत्। अद्योतिष्ट। श्विता वर्णे। श्वेतते। शिश्विते। अश्वितत्। अश्वेतिष्ट। ञिमिदा स्नेहने। मेदते।
मिदेर्गुणः। मिदेरिको गुणः स्यादित्संज्ञकशकारादौ। एश आदिशित्वाभावान्नानेन गुणः। मिमिदे। अमिदत्। अमेदि
ष्ट। ञिष्विदा स्नेहनमोचनयोः। मोहनयोरित्येके। स्वेदते। सिष्विदे। अस्विदत्। अस्वेदिष्ट। ञिक्ष्विदा चेत्येके। अक्ष्विदत्।
अक्ष्वेदिष्ट। १५०। रुच दीप्तावभिप्रीतौ च। रोचते सूर्यः। हरये रोचते भक्तिः। अरुचत्। अरोचिष्ट। घुट परिवर्तने। घोटते।
जुघुटे। अघुटत्। अघोटिष्ट। रुट लुट लुठ प्रतिघाते। अरुटत्। अरोटिष्ट। शुभ दीप्तौ। क्षुभ संचलने। णभ तुभ हिंसायां॥
आद्यो भावेपि। नभंतामन्यके समे। मा भूवन्नन्यके सर्वे इति निरुक्तं। अनभत्। अनभिष्ट। अतुभत्। अतोभिष्ट। इमौ दिवादौ क्र्या
दौ च। स्रंसु ध्वंसु भ्रंसु अवस्रंसने। ध्वंसु गतौ च। अनिदितां नलोपः॥ अस्रसत्। अस्रंसिष्ट। नास्रस्त्करिणां ग्रैवमिति रघुकाव्ये। १६०।
भ्रंशु इत्यपि केचित्पठंति। अत्र तृतीय एव तालव्यांत इत्यन्ये। भ्रंशु भ्रंसु अधःपतन इति दिवादौ। स्रंभु विश्वासे। अस्रभत्।
अस्रंभिष्ट। दंत्यादिरयं। तालव्यादिस्तु प्रमादे गतः। वृतु वर्तने। वर्तते। ववृते। वृद्भ्यः स्यसनोः। वृतादिभ्यः परस्मैपदं वा स्यात् स्ये
सनि च। न वृद्भ्यश्चतुर्भ्यः। एभ्यः सकारादेरार्धधातुकस्येण्न स्यात् तङानयोरभावे। वर्त्स्यति। वर्तिष्यते। अवृतत्। अवर्तिष्ट।
अवर्त्स्यत्। अवर्तिष्यत। वृधु वृद्धौ। शृधु शब्दकुत्सायां। इमौ वृतिवत्। स्यंदू प्रस्रवणे। स्यंदते। सस्यंदे। सस्यंदिषे सस्यंत्से।

सि॰ ति॰
॥१८॥

सस्यंदिध्वे। सस्यंध्वे। स्यंदिता। स्यंता। वृद्भ्यः स्यसनोरिति परस्मैपदे कृते ऊदित्त्वलक्षणमेतरंगमपि विकल्पं बाधित्वा चतुर्थं हल
सामर्थ्यान्नेड्ग्रह इति निषेधः। स्यंत्स्यति। स्यंदिष्यते। स्यंत्स्यते। स्यंदिषीष्ट। स्यंत्सीष्ट। द्युद्भ्यो लुङीति परस्मैपदपक्षे। अङ्। नलोपः।
अस्यदत्। अस्यंदिष्ट। अस्यंत। अस्यंत्साताम्। अस्यंत्स्यत्। अस्यंदिष्यत। अस्यंत्स्यत। अनुविपर्यभिनिभ्यः स्यंदतेरप्राणिषु। ए
भ्यः परस्याप्राणिकर्तृकस्य स्यंदतेः सस्य षो वा स्यात्। अनुष्यंदते। अनुस्यंदते वा जलं। अप्राणिषु किं। अनुस्यंदते हस्ती। अप्रा
णिष्विति पर्युदासान्मत्स्योदके अनुष्यंदते इत्यत्रापि पक्षे षत्वमेव स्यात्। प्राणिषु नेत्युक्तौ तु न स्यात्। कृपू सामर्थ्ये। कृपो रो लः। कृ
पउ इति छेदः। कृपेति लुप्तषष्ठीकं। न चावर्तते। कृपो यो रेफस्तस्य लः स्यात्। कृपेरृकारस्यावयवो यो रेफस्तत्सदृशस्तस्य च लृका
रसदृशः स्यात्। कल्पते। चक्लृपे। चक्लृपिषे। चक्लृप्से। इत्यादि स्यंदिवत्। लुटि च क्लृपः। लुटि स्यसनोश्च क्लृपेः परस्मैपदं वा स्या
त्। तासि च क्लृपः। क्लृपेः परस्य तासेः सकारादेरार्द्धधातुकस्य चेण्न स्यात् तङानयोरभावे। कल्प्तासि। कल्प्तास्थः। कल्पि
तासे। कल्प्तासे। कल्प्स्यति। कल्पिष्यते। कल्प्स्यते। कल्पिषीष्ट। क्लृप्सीष्ट। अक्लृपत्। अकल्पिष्ट। अक्लृप्त। अकल्प्स्यत्। अ
कल्पिष्यत। अकल्प्स्यत। वृत्। वृतः। संपूर्णो द्युतादिर्वृतादिश्चेत्यर्थः॥ अथ त्वरत्यंतास्त्रयोदशानुदात्तेतः षितश्च। घट चे
ष्टायां। घटते। जघटे। घटादयो मितः इति वक्ष्यमाणेन मित्संज्ञा। तत्फलं तु णौ। मितां ह्रस्वः इति चिण्णमुलोर्दीर्घोऽन्यतरस्या
मिति च वक्ष्यते। घटयति। विघटयति। कथं तर्हि कमलवनोद्घाटनं कुर्वते ये। प्रविघाटयिता समुत्पतन्हरिदश्वः कमलाक
राणि वेत्यादि। अणु। घट संघात इति चौरादिकस्य। न चैतस्यैवार्थविशेषे मित्त्वार्थमनुवादोऽयमिति वाच्यं। नान्ये मितो
हेताविति निषेधात्। अहेतौ स्वार्थणिचि तु यादिरं च कव्यतिरिक्ता अकारादयो मितो नेत्यर्थः। व्यथ भयसंचलनयोः। व्य गणेश
थते। व्यथो लिटि। व्यथोऽभ्यासस्य संप्रसारणं स्याल्लिटि। हलादिःशेषापवादः। थस्य हलादिःशेषेण निवृत्तिः। विव्यथे। २७०। ॥१८॥

प्रथ प्रख्याने। पप्रथे। प्रस विस्तारे। पप्रसे। म्रद मर्दने। स्खद स्खदने। स्खदनं विद्रावणं। क्षजि गतिदानयोः। मित्वसामर्थ्यादनुप
धत्वेपि चिण्णमुलोरिति दीर्घविकल्पः। अक्षञ्जि। अक्षाञ्जि। क्षञ्जं क्षञ्जं। क्षाञ्जं क्षाञ्जं। दक्ष गतिहिंसनयोः। योयं वृद्धिशी
घ्रयोरनुदात्तेत्सु पठितस्तस्येहार्थविशेषे मित्वार्थोनुवादः॥ क्रप कृपायां गतौ। कदि क्रदि क्लदि वैक्लव्ये। वैकल्य इत्येके। त्रयोप्यनिदित
इति नंदी। इदित इति स्वामी। कंदि क्रंदि इदितौ। क्रद क्लद इति चानिदिताविति मैत्रेयः। कदि क्रदि क्लदीनामाह्वानरोदनयोः परस्मैप
देष्टक्तानां पुनरिह पाठो मित्वार्थ आत्मनेपदार्थश्च ७२०॥ ञित्वरा संभ्रमे। घटादयः षितः। षित्वादङ्। त्वरा वक्ष्यते। अथ फणां
ताः परस्मैपदिनः। ज्वर रोगे। ज्वरति। जज्वार। गड सेचने। गडति। जगाड। हेड वेष्टने। हेडृ अनादरे इत्यात्मनेपदिषु गतः। स ए
वोत्सृष्टानुबंधोनूद्यते अर्थविशेषे मित्वार्थं। परस्मैपदिभ्योऽत्वरादिभ्यः प्रागेवानुवादे कर्तव्ये तन्मध्येनुवादसामर्थ्यात्पर
स्मैपदं। हेडति। जिहेड। हिडयति। अजिहिडि। अजीहिडि। अनादरे तु हेडयति। वट भट परिभाषणे। वट वेष्टने। भट भृताविति
पठितयोः परिभाषणे। मित्वार्थोनुवादः। नट नृतौ। इत्थमेव पूर्वमपि पठितं। तत्रायं विवेकः। पूर्वं पठितस्य नाट्यमर्थः। यत्कारि
पुनर्व्यपदेशः। वाक्यार्थाभिनयो नाट्यं। घटादौ तु नर्तनं चार्थः। यत्कारि पुनर्नर्तके व्यपदेशः। पदार्थाभिनयो नृत्तं। गात्र
विक्षेपमात्रं नृत्तं। केचित्तु घटादौ नटनताविति पठंति। गता विस्तृये। एतेपदेशपक्षे तास वाक्ये भाष्यकृता नाटीति दीर्घपाठात् घ
टादिष्वेवोपदेश एव। ष्टक प्रतीघाते। स्तकति। चक तृप्तौ। तृपि प्रतिघातयोः। एवं पठितस्य तु मित्वमात्रे मित्वार्थोनुवादः। आत्म
नेपदिषु अनुवादात्परस्मैपदं। कखे हसने। एदित्वान्न वृद्धिः। अकखीत्। ७२०। रगे शंकायां। लगे संगे। ह्रगे ह्लगे षगे ष्ठगे स
वरणे। कगे नोच्यते। अस्यायमर्थ इति विशिष्य नोच्यते। क्रियासामान्यार्थत्वात्। अनेकार्थत्वादित्यन्ये। अथ श्नथ क्रथ क्लथ हिंसा
र्थाः। जासिनिप्रहणेति सूत्रे क्राथेति मित्वेपि वृद्धिर्निपात्यते। क्राथयति। ४ अक अग कुटिलायां गतौ। कण रण गतौ। चकाण। ८००।
ररणे। चण शण श्रण दाने च। शण गतावित्यन्ये। ४ मित्वं तु निपातनात् परत्वाच्चिण्णमुलोरिति दीर्घे चरितार्थं। अक्रथि॥

सि॰ ति॰ ॥१६॥

अक्राथि। क्रथं। क्रथं। क्राथं। क्राथं। नच। हिंसायामिति शेषः। वनुवनो यते। वनुइत्यस्य एवं एवायं धातुर्नैतु तानादिकस्यानुवादः॥ उदि
त्करणसामर्थ्यात्। तेन क्रियासामान्येव नतीत्यादि। प्रवनयति। अनुपसर्गस्य तु मित्त्वविकल्पो वक्ष्यते। २१० ज्वल दीप्तौ। एव प्रयार्थे प
ठिष्यमाणत्वाय मित्वार्थमनुघते। प्रज्वलयति। ह्वल ह्मल चलने। प्रह्वलयति। प्रह्मलयति। स्मृ आध्याने॥ चिंतायां पठिष्यमाण
स्य आध्याने मित्वार्थोनुवादः। आध्यानमुत्कंठापूर्वकं स्मरणं। दॄ भये। दॄ विदारण इति क्र्यादेरयमनुवादः। दृणंतं प्रेरयति दरयति।
भयादन्यत्र तु दारयति। घाटन्तरमेवेदमिति मते तु दरतीत्यादि। केचित्तु टाते अत्यस्य दॄ स्वरे इति स्वत्रे च दॄ इति दीर्घस्थाने ह्रस्वं पठंति। तन्नेति मा
धवः। नॄ नये। क्र्यादिषु पठिष्यमाणस्यानुवादः। नयादन्यत्र नारयति। श्रा पाके। श्रै इति कृतात्वस्य श्रा इत्यादादिकस्य च सामान्येनानुकर
णं। लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य॥ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति परिभाषाभ्यां। श्रपयति। विक्लेदय
तीत्यर्थः। पाकादन्यत्र श्रापयति। स्वेदयतीत्यर्थः॥ मारणतोषणनिशामनेषु ज्ञा। निशामनं चाक्षुषं ज्ञानमिति माधवः। ज्ञाप
नमात्रमित्यन्ये। निशानेष्विति पाठांतरे। निशानं तीक्ष्णीकरणं। एषु एवार्थेषु ज्ञा नान्यत्रेति। ज्ञपमिच्चेति चुरादौ। ज्ञापनं मारणादिकं
च तस्यार्थः। कथं विज्ञापना भर्तृषु सिद्धिमेतीति। तद्ज्ञापयत्यो वार्थ इति च। भरत। माधवमते चाक्षुषज्ञाने मित्वाभावात्। ज्ञाप
नमात्रे मित्वमिति मते तु ज्ञानियोग इति चौरादिकस्य धातूनामनेकार्थत्वात्। निशानेष्विति पठतां हरदत्तादीनां मते तु न काप्यनुपपत्तिः।
कंपने चलिः। चल कंपने इति ज्वलादिः। चलयति शाखां। कंपनादन्यत्र तु शीलं चालयति। अन्यथा करोतीत्यर्थः। हरतीत्यर्थ इति स्वा
मी। सूत्रं चालयति। क्षिपतीत्यर्थः॥ छदिर् ऊर्जने। छद अपवारण इति चौरादिकस्य स्वार्थे णिजभावे मित्वार्थोयमनुवादः। अनेकार्थ
त्वाद्धूर्जेरर्थे वृत्तिः। छदं तं प्रयुंक्ते छदयति। बलवंतं प्राणवंतं वा करोतीत्यर्थः। अन्यत्र छादयति। अपवारयतं प्रयुंक्ते इत्यर्थः। स्वा
र्थे णिचि तु छादयति। बली भवति। प्राणी भवति। अपवारयति वेत्यर्थः॥ [redacted] जिह्वोन्मथने लडिः। लड विलास इ
ति पठितस्य मित्वार्थोनुवादः। उन्मथनं तापनं। जिह्वाशब्देन षष्ठी तत्पुरुषः॥ लडयति जिह्वां। न तीयात तत्पुरुषो वा। लडयति जि

गणेश ॥१६॥

त्तिर्द्ध्या। अन्ये तु णिजर्थाभावेन तद्व्यापारो लक्ष्यते। समाहारद्वन्द्वोयं। लडयति शत्रुं। लडयति दधि। अन्यत्र लाडयति पुत्रं। मदी हर्षग्ले
पनयोः। ग्लेपनं दैन्यं। दैवादिकस्य मित्त्वार्थोयमनुवादः। मदयति हर्षयति ग्लेपयति वेत्यर्थः। अन्यत्र मादयति चित्तविकारमुत्पाद
यतीत्यर्थः। ध्वन शब्दे। नायं यमित्त्वार्थमनूद्यते। ध्वनयति घण्टां। अन्यत्र ध्वानयति। अस्फुटाक्षरमुच्चारयतीत्यर्थः। अत्र भोजः। दलि
लुष वलि स्खलि रणि ध्वनि त्रपि क्षपयश्चेति पाठः। तत्र ध्वनिरणी तु दाहृतौ। दलि विदारणे। वल संवरणे। स्खल संचलने। त्रपूष् लज्जायां। मि
तिगताः। तेषां लोदलयति। वलयति। स्खलयति। त्रपयति। क्षै क्षये इति वक्ष्यमाणस्य कृतात्वस्य पुकां निर्देशः। क्षपयति। स्यन अव
तंसने। शब्दे इति पठिष्यमाणस्यानुवादः। स्यनयति। अन्यत्र स्यानयति। घटादयो मितः। मित्संज्ञा इत्यर्थः। जनीजृष्क्नसुरंजोऽमंता
श्च। मितः इत्यनुवर्तते। जृषिति षिन्निर्देशाज्जीर्यतेर्ग्रहणं। जरणं तेस्क जारयति। केचित्तु जनीजृष्क्नसुरंजेति पठित्वा क्नसु निरसने इति
दैवादिकमुदाहरंति। ज्वलह्वलह्मलनमामनुपसर्गाद्वा। एषां मित्त्वं वा। प्राप्तविभाषेयं। ज्वलयति। ज्वालयति। उपसर्गे तु नित्यं मित्त्वं।
प्रज्वलयति। कथं तर्हि प्रज्वालयति उन्नामयतीति। घञंतात्तत्करोतीति णौ। कथं संक्रामयतीति। मितां ह्रस्वः इति सूत्रे याचित्तवि
रागइत्यतो वेत्यनुवर्त्य व्यवस्थितविभाषाश्रयणादिति वृत्तिकृतः। एतेन रजो विश्रामयन्राज्ञां। ध्रुयीन्द्रिश्रामयेति सहस्रादिव्या
ख्यातं। ग्लास्नावनुवमां च। अनुपसर्गादेषां मित्त्वं वा स्यात्। आद्ययोरप्राप्ते इतरयोः प्राप्ते विभाषा। नकम्यमिचमां। अमंतत्वात्प्रा
मित्व प्ते मेषां न स्यात्। कामयते। आमयति। चामयति। शमो दर्शने। शाम्यतिर्दर्शने मित्त्वं स्यात्। निशामयति रूपं। अन्यत्र तु प्रण
यिनो निशमय्य वचः कथाः। कथं तर्हि निशामयत दुःखितविस्तरान्मदतो ममेति। शाम आलोचने इति चौरादिकस्य। धातूना
मनेकार्थत्वाच्छ्रवणे वृत्तिः। शाम्यतिवत्। यमोऽपरिवेषणे। यच्छतिर्भोजनं ततोऽन्यत्र मित्त्वं स्यात्। आयामयति। द्राघयति व्याप
रयतीत्यर्थः। परिवेषणे तु यमयति ब्राह्मणान्। भोजयतीत्यर्थः। पर्यवसितं नियमयन्नित्यादौ तु नियमवच्छब्दात्तत्करोतीति
णौ बोध्यः। स्खदिर् अवपरिभ्यां च। मित्त्वमेव। अवस्खादयति। परिस्खादयति। अपाच्च परिभ्य इति न्यासकारः। स्खामीतु नकमी

सि· ति·
॥२०॥

तिनयमुत्तर त्रिसत्र्यामननुवर्त्स्यशामः। अदर्शनेइतिचिच्छेदायमस्यपरिवेषणेऽमित्युमाह। तन्मते। पर्यवसितंनियमयत्रिस्मादिसम्यगे
वाऽपसरत्स्यस्वदेश्चेदवादिदर्वस्येतिनियमात्स्रस्वादयतीस्याह। तस्मात्सूत्रद्वयेऽप्युदाहरणप्रस्फुदाहरणयोर्व्यत्यासः फलितः। इद
चमतंवृत्तिन्यासादिविरोधादुपेक्ष्यं। फणगतौ। येतिनिव्रत्तमसंभवात्। निवेधात्सर्वमसौनपठितः [redacted] फणादिकार्यानुरोधात्। फ
णंचसप्तानां। एषांवा एत्वाभ्यासलोपौस्तः। कितिलिटिसेटिथलिच। फेणतुः। फेणुः। फेणिथ। पफणतुः। पफणुः। फणयति। वन्। घ
टादिःसमासः। फणेःप्रागेववरदिस्येके। तन्मतेफाणयतीसेव। राऽदीप्तौ। स्वरितेत्। राजति। राजते। रेजतुः। रराजतुः। रेजे। रराजे। अतर
त्यनुवृत्तावपिविधानसामर्थ्यादत्त्वं। टुभ्राऽटदुभ्रीऽटदुभ्लाशृदीप्तौ। अनुदात्तेतः। भ्राजते। रिहपाठः। फणादिकार्यार्थः। एवंपाठ
स्तुभ्राअादिषत्वाभावार्थः। तत्रहिराजिसाहचर्यात्फणादेरेवग्रहणं। भ्रेजे। बभ्राजे। वाभ्राशेति श्यन्वा। भ्राश्यते। भ्राशते। भ्रेशे। बभ्रा
शे। भ्लाश्यते। भ्लाशते। भ्लेशे। बभ्लाशे। ष्ठावपीमौतालव्यांतौ। स्यमुस्वनध्वनशब्दे। स्यमादयःक्षरसंताःपरस्मैपदिनः। स्येमतुः। सस्य
मेतुः। अस्यमीत्। स्वेनतुः। सस्वनतुः। अस्वानीत्। अस्वनीत्। विष्वणति। अवष्वणति। सशब्दंभुंक्तेऽस्यार्थः। वेश्चस्वनइति षत्वं। फणादयो
गताः। दध्वनतुः। २२०। षमष्टमअवैकल्ये। ससाम। तस्ताम। ज्वलदीप्तौ। अज्वालीत्। चलकंपने। जलघातने। घातनंतैक्ष्ण्यं। जलति।
टलट्वलवैक्लव्ये। ष्ठलस्थाने। हलविलेखने। णलगंधे। बंधनइत्येके। २३०। पलगतौ। पलति। बलप्राणनेधान्यावरोधनेच। बेलतुः।
बेलुः। पुलमहत्वे। पोलति। कुलसंस्त्याने बंधुषुच। संस्त्यानं संघातः। बंधुशब्देनतद्व्यापारोगृह्यते। कोलति। चुकोल। शलहुल
पत्लृगतौ। शशाल। जुहोल। पपात। पेततुः। पतिता। पतःपुम्। अडि परे। अपप्तत्। नेर्गदेतिणत्वं। प्रणिपतत। क्वथेनिष्पाके। क्व
थति। चक्वाथ। अक्वथीत्। पथेगतौ। अपथीत्। मथेविलोडने। मेथतुः। अमथीत्। २४०। टुवमउद्गिरणे। इहैवनिपातनाद्वृत्तस्त्वमि
तिसुधाकरः। ववाम। ववमतुः। वादित्वादेत्वाभ्यासलोपौन। भागवृत्तौतुमेवेतुरित्याद्यपिसाहृतं। तन्नाप्याधानदृष्टं। अमुवल्
ने। वाभ्राशेतिश्यन्वा। भ्रम्यति। भ्रमति। भ्राम्यतीतितुद्विवादेर्वक्ष्यते। वादिः भ्रमुत्रसां। एषामेत्वाभ्यासलोपौवास्तः। कितिलिटिसेटिथलिच। गणेश

गणेश
॥२०॥

भ्रेमतुः। बभ्रमतुः। अभ्रमीत्। क्षर संचलने। अक्षारीत्। अथ षहावनुदात्तेतौ। षह मर्षणे। परिनिविभ्य इति षत्वं। परिषहते। सेहे। सहिता।
तीषसहे ति वेट्। इडभावे ढत्वधत्वष्टुत्वढलोपाः। सहिवहोरोदवर्णस्य। अनयोरवर्णस्य ओत्स्यात् ढलोपे। सोढः। सोढुं परस्य सहेः स
स्य षत्वं न स्यात्। परिसोढा॥ सिवादीनां वाड्व्यवायेपि। परिनिविभ्यः परेषां सिवादीनां सस्य षो वा स्यात् अड्व्यवाये। पर्यषहत। पर्य
सहत। रमु क्रीडायां। रेमे। रेमिषे। रंता। रंस्यते। रंसीष्ट। अरंस्त। अथ कसंताः परस्मैपदिनः। षद्लृ विशरणगत्यवसादनेषु। पाघ्रा
ध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्छधौशीयसीदाः। पादीनां पिबादयः स्युरित्संज्ञकश
कारादौ प्रत्यये परे। सीदति। ससाद। सेदतुः। सेदिथ। ससत्थ। सत्ता। सत्स्यति। लृदित्वादङ्। असदत्। सदिरप्रतेः। निषीदति। न्यषी
दत्। सदेः परस्य लिटि। सदेरभ्यासात्परस्य षत्वं न स्याल्लिटि। निषसाद। निषेदतुः। शद्लृ शातने। विशीर्णतायामयं। शातनं तु वि
षयतया निर्दिश्यते। शदेः शितः। शितो विनोस्मात्परस्मैपदं स्यात्। शीयते। शशाद। शेदतुः। शेदिथ। शशत्थ। शत्ता। अशद
त्। क्रुश आह्वाने रोदने च। क्रोशति। क्रोष्टा। क्लेः क्सः। अक्रुक्षत्। कुच संपर्चनकौटिल्यप्रतिष्टंभविलेखनेषु। कोचति। चुकोच।
बुध अवगमने। बोधति। बोधिता। बोधिष्यति। २५०। रुह बीजजन्मनि प्रादुर्भावे च। रोहति। रुरोह। रुरोहिथ। रोढा। रोक्ष्यति। अरु
क्षत्। कस गतौ। अकसीत्। अकासीत्। इति ज्वलादिगणः समाप्तः। अथ यजादयः स्वरि[illegible]तेतः। हिक्क अव्यक्ते शब्दे। हिक्कति। हि
क्कते। अञ्चु गतौ याचने च। अञ्चति। अञ्चते। अञ्चु इत्येके। अचि इत्यपरे। टु याचृ याञ्चायां। याचति। याचते। रेट परिभाषणे। रेटति। रे
टते। चते चदे याचने। चचात। चेते। अचतीत्। चचाद। चेदे। अचदीत्। प्रोथृ पर्याप्तौ। पुप्रोथ। पुप्रोथे। मिदृ मेदृ मेधाहिंसयोः। मिमेद।
मिमिदे। २६०। मिमेद। थांतावितिमा वितिस्वामी। नमामिमेथ। थांतावितिन्यासः। मेधृ संगमे च। मेधति। मिमेधे। णिदृ णेदृ कुत्सा
संनयोः। निनिदतुः। निनिदे। निनेदतुः। निनेदे। शृधु मृधु उंदने। उंदनं क्लेदनं। शर्द्धति। शर्द्धते। शर्द्धिता। मर्द्धति। मर्द्धते।
१निकर्ष

सि॰ति॰ ॥२१॥

बुधिर् बोधने। बोधति। बोधते। इरित्वादङ् वा। अबुधत्। अबोधीत्। अबोधिष्ट। दीपजनेति चिण् तु न भवति पूर्वोत्तरसाहचर्येण
दैवादिकस्यैव तत्र ग्रहणात्। उबुन्दिर् निशामने। निशामनं ज्ञानं। बुबुन्द। बुबुन्दे। अबुदत्। अबुन्दीत्। वेणृ गतिज्ञानचिन्तानिशामन
वादित्रग्रहणेषु। वेणति। वेणते। अन्तोऽप्ययं। २२०। खनु अवदारणे। खनति। खनते। गमहनजनखनघसां लोपः क्ङित्यनङि। एषामुप
धाया लोपः स्यादजादौ क्ङिति न त्वङि। चख्नतुः। ये विभाषा। खायात्। खन्यात्। चीवृ आदानसंवरणयोः। चिचीव। चिचीवे। चाय पूजा
निशामनयोः। व्यय गतौ। अव्ययीत्। दाशृ दाने। ददाश। ददाशे। भेषृ भये। गतावित्येके। भेषति। भेषते। भ्रेषृ भ्लेषृ गतौ। अस गतिदी
प्त्यादानेषु। असति। असते। आस। आसे। अयं पान्तोऽपि। स्पश बाधनस्पर्शनयोः। स्पर्शनं ग्रथनं। स्पशति। स्पशते। २२०। लष कान्तौ।
वा भ्राशेति श्यन् वा। लष्यति। लषति। लेषे। चष भक्षणे। छष हिंसायां। चच्छषतुः। चच्छषे। झष आदानसंवरणयोः। भ्लक्ष भक्ष अ
दने। दासृ दाने। माहृ माने। गुहू संवरणे। ऊदुपधाया गोहः। गुहेरुपधाया ऊत् स्याद् गुणहेतावजादौ प्रत्यये। गूहति। गूहते। ऊदित्वा
दिड्वा। गूहिता। गोढा। गूहिष्यति। गूहेत्। गुह्यात्। अगूहीत्। इडभावे क्सः। अघुक्षत्। लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये।
एषां क्सस्य लुग्वा स्याद् दन्त्ये तङि। ढत्वधत्वष्टुत्वढलोपदीर्घाः। अगूढ। अघुक्षत। क्सस्याचि सस्य लोपः। अघुक्षातां। अघुक्षन्त।
अगुह्वहि। अघुक्षामहि। ७। अथाजन्ता उभयपदिनः। श्रिञ् सेवायां। श्रयति। श्रयते। शिश्राय। शिश्रियतुः। श्रयिता। श्रि
श्रीति चङ्। अशिश्रियत्। २२०। भृञ् भरणे। भरति। बभार। बभ्रतुः। बभर्थ। बभृव। बभृषे। भर्ता। ऋद्धनोः स्ये। ऋतो हन्तेश्च स्यस्य
२ ङ् इट् स्यात्। भरिष्यति। रिङ् शयग्लिङ्क्षु। शे यकि यादावार्द्धधातुके लिङि च ऋतो रिङादेशः स्यात्। रीङ् प्रकृते रिङ्विधिसामर्थ्याद्दी गणेश
र्घो न। भ्रियात्। उश्च। ऋवर्णात्परौ झलादी लिङ्सिचौ तङ्परौ कितौ स्तः। भृषीष्ट। भृषीयास्तां। अभार्षीत्। अभार्ष्टां। अभा ॥२१॥
र्षुः। ह्रस्वादङ्गात्। सिचो लोपः स्यात् झलि। अभृत। अभृषातां। अभरिष्यत। हृञ् हरणे। हरणं प्रापणं स्वीकारः स्तेयं नाशनं च।

जहर्थ। जह्रिव। जह्रिम। हर्त्ता। हरिष्यति। धृञ् धारणे। धरति। अधार्षीत्। अधृत। णीञ् प्रापणे। निनयिथ। निनेथ। निन्यिव। अथाजन्ताः
परस्मैपदिनः। धेट् पाने। धयति। आदेच उपदेशेऽशिति। उपदेशे एजन्तस्य धातोरात्वं स्यान्न तु शिति। आत औ णलः। आदन्ताद्धातो
र्णल औकारादेशः स्यात्। दधौ। आतो लोप इटि च। अजाद्योरार्धधातुकयोः क्ङिदिटोः परयोरातो लोपः स्यात्। द्वित्वात् परत्वात्
लोपे प्राप्ते द्विर्वचनेऽचीति निषेधः। द्विर्वचने कृते आल्लोपः। दधतुः। दधुः। दधिथ। दधाथ। दधिव। धाता। दाधाघ्वदाप्। दारूपा धा
रूपाश्च धातवो घुसंज्ञाः स्युर्दाप् दैपौ विना। एर्लिङि। घुसंज्ञानां मास्थादीनां च एत्वं स्यादार्धधातुके लिङि किति। धेयात्। धेयास्तां।
धेयासुः। विभाषा धेट्श्व्योः। आभ्यां च्लेश्चङ् वा स्यात् कर्तृवाचिनि लुङि परे। चङीति द्वित्वं। अदधत्। अदधतां। विभाषा घ्राधेट्शाच्छासः।
एभ्यः सिचो लुग्वा स्यात् परस्मैपदपरे। अधात्। अधातां। अधुः। यमरमनमातां सक् च। एषां सक् एभ्यः सिच इट् स्यात् परस्मैपदेषु।
अधासीत्। अधासिष्टां। अधासिषुः। ग्लै म्लै हर्षक्षये। हर्षक्षयो धातुक्षयः। ग्लायति। जग्लौ। जग्लिथ। जग्लाथ। वान्यस्य संयोगादेः।
घुमास्थादेरन्यस्य संयोगादेर्धातोरात एत्वं वा स्यादार्धधातुके किति लिङि। ग्लायात्। ग्लेयात्। अग्लासीत्। म्लायति। धै न्यक्क
रणे। न्यक्करणं तिरस्कारः। द्रै स्वप्ने। ध्रै तृप्तौ। ६.१। ध्यै चिन्तायां। रै शब्दे। स्त्यै ष्ट्यै शब्दसंघातयोः। स्त्यायति। षोपदेशस्यापि सत्वे कृते रू
पतुल्यं। षोपदेशत्वफलं तु तिष्ट्यासति। अतिष्ट्यपदिस्यत्र षत्वं। खै खदने। क्षै जै षै क्षये। क्षायति। जजौ। ससौ। घुमास्थेत्यत्र विभाषा घ्रा
धेडित्यत्र च स्यतेरेव ग्रहणं। नत्वस्य। तेन एत्वसिज्लुकौ न। सायात्। असासीत्। कै गै शब्दे। ६.१०। श्रै पाके। पै ओवै शोषणे। पायात्।
अपासीत्। घुमास्थेतीत्वं तदपवाद एर्लिङीति सेत्वं गातिस्थेति सिज्लुक् च न। पारूपस्य लाक्षणिकत्वात्। ष्टै वेष्टने। स्तायति। ष्णै वेष्टने।
शोभायां चेत्येके। स्नायति। दैप् शोधने। दायति। अघुत्वादेत्वसिज्लुकौ न। दायात्। अदासीत्। पा पाने। पाघ्राध्मेति पिबादेशः। नस्था
दत्वान्नोपधागुणः। पिबति। पेयात्। अपात्। घ्रा गन्धोपादाने। जिघ्रति। घ्रायात्। घ्रेयात्। अघ्रासीत्। अघ्रात्। ध्मा शब्दाग्निसंयोगयोः।

सि॰ति॰ ॥२२॥

धमति। ष्ठा गतिनिवृत्तौ। तिष्ठति। स्थादिष्वभ्यासेनेति षत्वं। अधितष्ठौ। उपसर्गादिति षत्वं। अधिष्ठाता। स्थेयात्। ६२०। म्ना अभ्यासे। मनति। दाण्
दाने। प्रणियच्छति। देयात्। अदात्। ह्वृ कौटिल्ये। ह्वरति। ऋतश्च संयोगादेर्गुणः। ऋदन्तस्य संयोगादेरङ्गस्य गुणः स्याल्लिटि। किदर्थ
मपीदं परत्वाण्णलि थल्यपि भवति रपरत्वं उपधावृद्धिः। जह्वार। जह्वरतुः। जह्वरुः। जह्वर्थ। ह्वर्ता। ऋद्धनोः स्ये। ह्वरिष्यति। गुणो
र्तिसंयोगाद्योः। अर्तेः संयोगादेरृदन्तस्य च गुणः स्याद्यकि यादावार्धधातुके लिङि च। ह्वर्यात्। अह्वार्षीत्। अह्वार्ष्टां। स्वृ शब्दोपता
पयोः। स्वरति। स्वर्ता निवेट्। सस्वरिथ। सस्वर्थ। वमयोस्तु + घा + श्र्युकः क्किति। श्रि एकाच उगन्तोश्च परयोर्गित्कितोरिण्
न स्यात्। परमपि स्वरत्यादिविकल्पं बाधित्वा पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यादनेन निषेधे प्राप्ते क्रादिनियमान्नित्यमिट्।
सस्वरिव। सस्वरिम। परत्वादृद्धनोरिति नित्यमिट्। स्वरिष्यति। स्वर्यात्। अस्वारीत्। अस्वारिष्टां। अस्वार्षीत्। अस्वार्ष्टां। स्मृ
चिन्तायां। द्दृ संवरणे। सृ गतौ। क्रादित्वान्नेट्। ससर्थ। ससृव। रिङ्। स्रियात्। असार्षीत्। असार्ष्टां। सर्तिशास्त्यर्तिभ्यश्च। ए
भ्यश्च्लेरङ् स्यात्कर्तरि लुङि। इह लुप्तशपा शासिना साहचर्यात्सर्तेर्जौहोत्यादिकस्यैव ग्रहणमिति। तेन भ्वादेर्नाङ्। शीघ्रग
तौ तु पाघ्राध्मेति धावादेशः। धावति। ऋ गतिप्रापणयोः। ऋच्छति। ऋच्छत्यॄतां। तौदादिक ऋच्छेर्ऋधातोर्ॠतां च गुणः
स्याल्लिटि। णलि आगवदुपधावृद्धिः। आर। आरतुः। आरुः। इडत्त्यर्तिव्ययतीनां। अदृव्येञ एभ्यस्थलो नित्यमिट्स्यात्। आ
रिथ। अर्ता। अरिष्यति। अर्यात्। आर्षीत्। आर्ष्टां। गृ घृ सेचने। गरति। जगार। जग्रिव। रिङ्। ग्रियात्। अगार्षीत्। ६३०। ध्वृ हूर्छ
ने। स्रु गतौ। सुस्रोथ। सुस्रुव। स्रूयात्। णिश्रीति चङ्। लघूपधगुणादन्तरङ्गत्वादुवङ्। असुस्रुवत्। षु प्रसवैश्वर्ययोः। प्रस
वोऽभ्यनुज्ञानं। सुषोथ। सुषविथ। सुषुविव। सोता। स्तुसुधूञ्भ्यः परस्मैपदेषु। एभ्यः सिच इट् स्यात्परस्मैपदेषु। असावीत्। गणेश
द् सर्वोत्तराभ्यां त्रिभ्यां साहचर्यात्सुनोतेरेव ग्रहणमिति पक्षे। असोषीत्। श्रु श्रवणे। श्रुवः शृ च। श्रुवः शृ इत्यादेशः स्यात् श्नु ॥२२॥

प्रत्ययश्च शपोऽपवादः। श्नोऽङ्गत्वाज्ज्ञातो गुणो न। शृणोति। शृणुतः। हुश्नुवोः सार्वधातुके। जुहोतेः श्नुप्रत्ययान्तस्यानेकाचोऽङ्गस्य चासं-
योगपूर्वोवर्णस्य यण् स्यादजादौ सार्वधातुके परे। उवङोऽपवादः। शृण्वन्ति। शृणोमि। शृण्वः। शृणुवः। शृण्मः। शृणुमः। शुश्रोथ।
शुश्रुव। शृणु। शृणवानि। शृणुयात्। श्रूयात्। अश्रौषीत्। ध्रु स्थैर्ये। ध्रुवति। अयं कुटादौ गत्यर्थोऽपि। दु द्रु गतौ। दुदोथ। दुद्रविथ।
दुद्रुविव। दुद्रोथ। दुद्रुव। णिश्रीति चङ्। अदुद्रुवत्। जि ञ्जि अभिभवे। अभिभवो न्यक्करणं। न्यग्भवनं च। आद्ये सकर्मकः।
शत्रून् जयति। द्वितीये त्वकर्मकः। अध्ययनात्पराजयते। अध्येतुं ग्लायतीत्यर्थः। विपराभ्यां जेरिति तङ्। पराजेरसोढ इत्यपादानत्वं।
अपडीनं ताडितः। ष्मिङ् ईषद्धसने। स्मयते। सिष्मिये। सिष्मियिध्वे। सिष्मियिढ्वे॥ २४०॥ गुङ् अव्यक्ते शब्दे। गवते। जुगुवे। गाङ् गतौ।
गाते गाते। इट एत्वे कृते वृद्धिः। गै। लङ् इटि। अगे। गेत। गेयातां। गेरन्। गासीष्ट। गाङ् कुटादिस्त्वेङादेशस्यैव गाङो ग्रहणं। न त्वस्य।
तेन ङित्त्वात् हुमास्थेतीत्वं न। अगास्त। आदादिकोऽयमिति हरदत्तादयः। फले तु न भेदः। कुङ् घुङ् उङ् ङुङ् शब्दे। अयं तु उङ् कुङ्
खुङ् गुङ् घुङ् ङुङ् इत्याहुः। कवते। चुकुवे। घवते। अवते। ऊवे। वाणी दाङ् ब्लीयइत्यवङ्। ततः सवर्णदीर्घः। ओता। ओष्यते। ओषीष्ट।
औष्ट। ङवते। जुङुवे। ङोता। च्युङ् ज्युङ् प्रुङ् प्लुङ् गतौ। क्रुङ् इत्येके॥ २५०॥ रुङ् गतिरेषणयोः। रेषणं हिंसा। रुरुवे। रविता। धृ-
ङ् अवध्वंसने। धरते। दध्रे। मेङ् प्रणिदाने। प्रणिदानं विनिमयः। प्रत्यर्पणं च। प्रणिमयते। नेर्गदेति णत्वं। तत्र घुप्रकृतिमाङ् इति प-
ठित्वा ङितो माप्रकृतेरपि ग्रहणस्येष्टत्वात्। देङ् रक्षणे। दयते। दयतेर्दिगि लिटि। दिग्यादेशेन द्वित्वबाधनमिष्यत इति वृत्तिः।
दिग्ये। दिग्याते। दिग्यिरे। स्थाघ्वोरिच्च। अनयोरिदादेशः स्यात् सिच्च कित् स्यात्। अदित। अदिथाः। अदिषि। श्यैङ् गतौ। श्यायते।
शश्ये। प्यैङ् वृद्धौ। प्यायते। पप्ये। प्याता। त्रैङ् पालने। त्रायते। तत्रे। पूङ् पवने। पवते। पुपुवे। पविता। मूङ् बन्धने। मवते। डीङ्

विहायसागतौ।डयते।डिड्ये।डयिता।९६९ तॄ प्लवनतरणयोः।ऋत इद्धातोः।ऋदंतस्य धातोरंगस्येत्स्यात्।इत्वोत्वाभ्यां गुणवृद्धी
र्वे विप्रतिषेधेन।तरति।ऋच्छत्यॄतां।इति गुणः।तॄफलेत्येत्वं।तेरतुः।तेरुः।वृतो वा।वृङ्वृञ्भ्यामृदंताच्चेटो दीर्घो वा स्यान्न तु लिटि।
तरीता।तरिता।अलिटीति किं।तेरिथ।हलि चेति दीर्घः।तीर्यात्।सिचि च परस्मैपदेषु।अत्र वृत इटो दीर्घो न।अतारिष्टां।अथा
ष्टावनुदात्तेतः।गुप गोपने।तिज निशाने।मान पूजायां।बध बंधने।गुप्तिज्किद्भ्यः सन्।मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य।सू
त्रद्वयोक्तेभ्यः सन्स्यात् मानादीनामभ्यासस्येकारस्य दीर्घश्च।गुपेर्निंदायां तिजेः क्षमायां।कितेर्व्याधिप्रतीकारे निग्रहेऽपनयने ना ने ५
शने संशये च।मानेर्जिज्ञासायां बधेश्चित्तविकारे।दानेरार्जवे।शानेर्निशाने।सनाद्यंता धातव इति धातुत्वं।सन्यङोः।सन्नंतस्य यङंतस्य
च प्रथमैकाचो द्वे स्तः अजादेस्तु द्वितीयस्य।अभ्यासकार्यं।गुपिप्रभृतयः कित्भिन्नाः निंदाद्यर्थका एवानुदात्तेतो दानशानौ च स्वरि
नर तेतौ।एते नित्यसन्नंताः।अर्थांतरे त्वनुबंधकाश्चुरादयः।अनुबंधस्य केवलेऽचरितार्थत्वात्सन्नंतात्तङ्।धातोरित्यविहितत्वात्स
न्नोत्र नार्द्धधातुकत्वं।तेनेड्गुणौ न।जुगुप्सते।जुगुप्सांचक्रे।तितिक्षते।मीमांसते।भूष भावः।चर्त्वं।बीभत्सते।रभ राभस्ये।आर
भते।आरेभे।रब्धा।रप्स्यते।डुलभष् प्राप्तौ।लभते।ष्वंज परिष्वंगे।दंशसञ्जस्वञ्जां शपि।एषां शपि नलोपः।स्वजते।प
रिष्वजते।श्रंथिग्रंथिदंभिस्वंजीनां लिटः कित्वं वेति व्याकरणांतरं।देभतुः।सस्वजे इति भाष्योदाहरणादेकदेशानुमत्या इत
प्याश्रीयते।सदेः परस्य लिटीति षत्वे स्वंजेरुपसंख्यानं।अतोऽभ्यासात्परस्य षत्वं न।परिषस्वजे।परिषस्वजे।सस्वजिषे।सस्व
ञ्जिषे।स्वङ्क्ता।स्वङ्क्ष्यते।स्वजेत।स्वंक्षीष्ट।प्रास्वङ्क्त।प्राक्।सितादिति षत्वं।परिनिविभ्यस्तु सिवादीनां वेति विकल्पः।एत गणेश
दर्थमेवोपसर्गात्सुनोतीत्येव सिद्धे स्तस्वंज्योः परिनिविभ्य इत्यत्र पुनरुपादानं।पर्यष्वङ्क्त।पर्यस्वङ्क्त।हद पुरीषोत्सर्गे।हदते।जहदे। ॥२३॥

हत्ता। हत्स्यते। हदेत। हत्सीष्ट। अहत्त। अथ परस्मैपदिनः॥ क्ष्विदा अव्यक्ते शब्दे।९७०॥ स्कंदिर् गतिशोषणयोः। चस्कंद। चस्कंदिथ। चस्कंथ।
स्कंत्ता। स्कंत्स्यति। नलोपः। स्कद्यात्। इरित्वाद्वा। अस्कदत्। अस्कांत्सीत्। अस्कांत्तां। अस्कांत्सुः। वेः स्कंदेरनिष्ठायां। षत्वं वा स्यात्।
विष्कंदति। अनिष्ठायामिति पर्युदासात्। विष्कंता। विस्कंता। निष्ठायां तु विस्कन्नः॥ परेश्च॥ अस्मात्परस्य स्कंदेः सस्य षो वा। योगविभा-
गादनिष्ठायामिति न संबध्यते। परिष्कंदति। परिस्कंदति। परिष्कण्णः। परिस्कन्नः। षत्वपक्षे णत्वं। न च पदद्वयाश्रयतया बहिरंगत्वा-
त्सत्वस्यासिद्धत्वं। धातूपसर्गयोः कार्यमंतरंगमित्यभ्युपगमात्। एवं धातुरुपसर्गेण युज्यते ततः साधनेनेति भाष्यं। एवं साध-
नेनेति मतांतरे तु णत्वं। यभ मैथुने। येभिथ। ययब्ध। यब्धा। यप्स्यति। अयाप्सीत्। णम प्रह्वत्वे शब्दे च। नेमिथ। ननंथ। नंता। अनं-
सीत्। अनंसिष्टां। गम्लृ सृप्लृ गतौ। इषुगमियमां छः॥ एषां छः स्यात् शिति परे। गच्छति। जगाम। जग्मतुः। जगमिथ। जगंथ। गंता।
गमेरिट् परस्मैपदेषु। गमेः परस्य सकारादेरिट् स्यात्। गमिष्यति। लृदित्वादङ्। अनङीति पर्युदासान्नोपधालोपः। अगमत्। स-
र्पति। ससर्प। अनुदात्तस्य चर्दुपधस्यान्यतरस्यां। उपदेशेऽनुदात्तो य ऋदुपधस्तस्य अम् वा स्यात् झलादावकिति परे। स्रप्ता। सर्प्ता।
स्रप्स्यति। सर्प्स्यति। असृपत्। यम उपरमे। यच्छति। येमिथ। ययंथ। यंता। अयंसीत्। अयंसिष्टां। तप संतापे। तप्ता। अताप्सीत्। नि-
षः स्यात् ४
सस्तपतावनासेवने। आसेवनं पौनःपुन्यं। ततोऽन्यस्मिन्विषये निष्टपति। त्यज हानौ। तत्यजिथ। तत्यक्थ। त्यक्ता। अत्याक्षीत्।
षंज संगे। दंशसंजस्वंजां शपि। सजति। सङ्क्ता। दृशिर् प्रेक्षणे। पश्यति। विभाषा सृजिदृशोः। आभ्यां थल इड्वा स्यात्। सृजिदृ-
शोर्झल्यमकिति। अनयोरमागमः स्याज्झलादावकिति। ददृष्ठ। ददर्शिथ। द्रष्टा। द्रक्ष्यति। दृश्यात्। इरित्वादङ् वा। ऋदृशो-
ऽङि गुणः। ऋवर्णांतानां दृशेश्च गुणः स्यादङि। अदर्शत्। अङभावे न दृशः। दृशश्च्ले क्सो न। अद्राक्षीत्।९८०॥ दंश दशने। दशनं

दंष्ट्राव्यापारः। एषो दशादित्वादनुनासिकलोपः। अत एव निपातनाद् दिशे के। तस्याप्यत्रैव तात्पर्यं। अर्थनिर्देशस्याधुनिकत्वात्। दंश दंशने
तिन्लोपः। दशति। ददंशिथ। ददंष्ठ। दंष्टा। दङ्क्ष्यति। दशेत्। दश्यात्। अदाङ्क्षीत्। कृष विलेखने। विलेखनमाकर्षणं। क्रष्टा। कर्ष्टा॥
क्रक्ष्यति। कर्क्ष्यति। स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः। अक्राक्षीत्। अक्राष्टां। अकार्क्षीत्। अकार्ष्टां। अकार्क्षुः। पक्षे क्सः। अ
कृक्षत्। अकृक्षतां। अकृक्षन्। दह भस्मीकरणे। देहिथ। ददग्ध। दग्धा। धक्ष्यति। अधाक्षीत्। अदाग्धां। अधाक्षुः। मिह सेचने। मिमेह।
मिमेहिथ। मेढा। मेक्ष्यति। अमिक्षत्। कित निवासे रोगापनयने च। चिकित्सति। संशये प्रायेण विपूर्वः। विचिकित्सा तु संशय इत्यमरः।
अस्यानुदात्तेत्त्वमाश्रित्य चिकित्सते इत्यादि कश्चिदुदाजहार। निवासे तु केतयति। दान खण्डने। शान तेजने। इतो वहत्यंताः स्वरितेतः॥
दीदांसति। दीदांसते। शीशांसति। शीशांसते। अर्थविशेषे सन्। अन्यत्र दानयति। शानयति। डुपचष् पाके। पचति। पचते। पेचिथ। प
पक्थ। पेचे। पक्ता। पक्षीष्ट। षच समवाये। सचति। सचते। भज सेवायां। भेजतुः। भेजिथ। बभक्थ। भक्ष्यति। भक्ष्यते। अभाक्षीत्।
अभक्त॥ १२०॥ रंज रागे। नलोपः। रजति। अराङ्क्षीत्। अरङ्क्त। शप आक्रोशे। आक्रोशो विरुद्धानुध्यानं। शशाप। शेपे। अशाप्सी
त्। अशप्त। त्विष दीप्तौ। त्वेषति। तित्वेष। तित्विषे। त्वेक्ष्यति। त्विक्षीष्ट। अत्विक्षत्। अत्विक्षत। अत्विक्षातां। यज देवपूजासंग
तिकरणदानेषु। यजति। यजते। लिट्यभ्यासस्योभयेषां। वच्यादीनां ग्रह्यादीनां चाभ्यासस्य संप्रसारणं स्याल्लिटि। इयाज।
वचिस्वपियजादीनां किति। वचिस्वप्योर्यजादीनां च संप्रसारणं स्यात् किति। पुनः प्रसंगविज्ञानाद्द्वित्वं। ईजतुः। ईजुः। इयजि
थ। इयष्ठ। ईजे। यष्टा। यक्ष्यति। इज्यात्। यक्षीष्ट। अयाक्षीत्। अयष्ट। डुवप् बीजसंताने। बीजसंतानः क्षेत्रे विकरणं गर्भाधानं च।
अयं छेदनेपि। केशान्वपति। उवाप। ऊपे। वप्ता। उप्यात्। वप्सीष्ट। अवाप्सीत्। अवप्त। वह प्रापणे। उवाह। उवहिथ। सहिव

होरोद्वर्णस्य। उवोढ। वोढा। वक्ष्यति। अवाक्षीत्। अवोढां। अवाक्षुः। अवोढ। अवक्षातां। अवोढ्वं। वस निवासे। परस्मैपदी। वसति। उ
वास। शासिवसिघसीनां च। इण्कुभ्यां परस्यैषां सस्य षः स्यात्। ऊषतुः। ऊषुः। उवसिथ। उवस्थ। उष्यात्। वस्ता। सस्यार्द्धधातुके। वत्स्यति। अवा
त्सीत्। अवात्तां। वेञ् तंतुसंताने। वयति। वयते। वेञो वयिः। वा स्याल्लिटि। इकार उकार एणार्थः। उवाय। ग्रहिज्यावयिव्यधिवष्टि
विचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च। एषां किति ङिति च संप्रसारणं स्यात्। यकारस्याभावे। लिटि वयो यः। वयो यस्य संप्रसारणं
न स्याल्लिटि। ऊयतुः। ऊयुः। वश्चास्यान्यतरस्यां किति। वयो यस्य वो वा स्यात् किति लिटि। ऊवतुः। ऊवुः। वयस्तासावभावात् थलि नि
त्यमिट्। उवयिथ। स्थानिवद्भावेन त्रिलात्तद्। ऊये। ऊवे। वयादेशाभावे। वेञः। वेञो न संप्रसारणं स्याल्लिटि। ववौ। ववतुः। ववुः। व
विथ। ववाथ। ववे। वाता। ऊयात्। वासीष्ट। अवासीत्। व्येञ् संवरणे। व्ययति। न व्यो लिटि। व्येञ आत्वं न स्याल्लिटि। वट्ङिः परमपि ह
लादिःशेषं बाधित्वा यस्य संप्रसारणं। उभयेषां ग्रहणसामर्थ्यात्। अन्यथा वव्यादीनां ग्रस्यादीनां चानुवृत्तेव सिद्धे किं तेन। वि
व्याय। विव्यतुः। विव्युः। इडत्यर्तीति नित्यमिट्। विव्ययिथ। विव्याय। विव्ये। व्याता। वीयात्। व्यासीष्ट। अव्यासीत्। अव्यास्त। ह्वेञ्
स्पर्द्धायां शब्दे च। अभ्यस्तस्य च। अभ्यस्तीभविष्यतो ह्वेञः संप्रसारणं स्यात्। ततो द्वित्वं। जुहाव। जुहुवतुः। जुहुवुः। जुहोथ।
जुहुविथ। जुहुवे। ह्वाता। हूयात्। ह्वासीष्ट। लिपिसिचिह्वश्च। च्लेरङ्। आत्मनेपदेष्वन्यतरस्यां। आतो लोपः। अह्वत। अ
ह्वत। अह्वास्त। १०००। अथ द्वौ परस्मैपदिनौ। वद व्यक्तायां वाचि। अ... वदति। उवाद। ऊदतुः। उवदिथ। वदिता। उद्यात्। वद
व्रजेति वृद्धिः। अवादीत्। टुओश्वि गतिवृद्ध्योः। श्वयति। विभाषा श्वेः। श्वयतेः संप्रसारणं वा स्याल्लिटि यङि च। शुशाव। शुशु
वतुः। श्वयतेर्लिट्यभ्यासलक्षणप्रतिषेधः। तेन लिट्यभ्यासस्येति संप्रसारणं न। शिश्वाय। शिश्वियतुः। श्वयिता। श्वयेत्।
शूयात्। जृस्तंभ्विस्यङ्। श्वयतेरः। श्वयतेरिकारस्याकारः स्यादङि। पररूपं। अश्वत्। अश्वतां। अश्वन्। विभाषा धेट्श्व्योः।

सि॰ति॰
॥२५॥

रितिचङ्।इयङ्।अशिश्रियत्।स्वंतेतिनरङ्किः।अभ्ययीत्।ऋतु।यजादयोदृश्याः।आदिस्त्वाकृतिगणः।तेनचुलुंपतीत्यादिसंग्र
हः॥छ॥छ॥इतिभ्वादयः॥छ॥ ॥छ॥ऋतेरीयङ्।ऋतिःसौत्रस्तस्मादीयङ्स्यात्स्वार्थे।जुगुप्सायामयंधातुरितिबहवः।
कृपायांवेत्येके।सनाद्यन्ताइतिधातुत्वं॥ऋतीयते।ऋतीयांचक्रे।आयादयआर्धधातुकेवेतीयङभावेशेषात्कर्तरिपरस्मैप
दं।आनर्त।अर्तिष्यति।आर्तीत्।अदभक्षणे।द्वौपरस्मैपदिनौ।अदिप्रभृतिभ्यःशपः।लुक्स्यात्।अत्ति।अत्तः।अदंति।लि
ट्यन्यतरस्यां।अदोघस्लृवास्याल्लिटि।जघास।गमहनजनखनघसांलोपः।तस्यचविधिंप्रतिस्थानिवद्भावनिषेधाद्घस्यचर्त्वे।
शासिवसीतिषत्वं।जक्षतुः।जक्षुः॥घसस्त्वासाबभावात्थलिनित्यमिट्।जघसिथ।आद।आदतुः।इडत्यर्तीतिनित्यमिट्।
आदिथ।अत्ता।अत्स्यति।हुझल्भ्योहेर्धिः।होर्झलंतेभ्यश्चहेर्धिःस्यात्।अद्धि।अत्तात्।अदानि।अदःसर्वेषां।अदःपरस्या
पृक्तसार्वधातुकस्याडागमःस्यात्सर्वमतेन।आदत्।आत्तां।आदन्।आदः।आत्तं।आत्त।आदं।आद्व।आद्म।अद्यात्।अ
द्यातां।अद्युः।अद्याः।अद्यास्तं।अद्यासुः।लुङ्सनोर्घस्लृ।अदोघस्लृस्याल्लुङिसनिच।लृदित्वादङ्।अघसत्।हन्हिंसा
गत्योः।प्रणिहंति।अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपोझलिक्ङिति।अनुनासिकेतिलुप्तषष्ठीकं।वनतीतरे
षांविशेषणं।अनुनासिकान्तानामेषांवनतेश्चलोपःस्यात्झलादौक्ङितिपरे।यमिरमिनमिगमिहनिमन्यत्योऽनुदात्तोपदेशाः॥
तनुक्षणुक्षिणुऋणुतृणुघृणुवनुमनुतनोत्यादयः।हतः।घ्नंति।नेमोर्वा।उपसर्गस्थान्निमित्तात्परस्यहंते[hole]स्यणत्वंवास्याद्वम
योःपरतः।प्रह[hole]न्मि।प्रहन्मि।प्रहण्वः।प्रहन्वः।होहंतेरितिकुत्वं।जघान।जघ्नतुः।जघ्नुः॥अभ्यासाच्च।अभ्यासात्परस्यहं
तेर्हस्यकुत्वंस्यात्।जघनिथ।जघंथ।हंता।ऋद्धनोःस्ये।इट्।हनिष्यति।हंतु।हतात्।घ्नंतु।हंतेर्जः।होपरे।आभीयतयाजस्यासि
द्धत्वाद्धेर्नलुक्।जहि।हनानि।हनाव।हनाम।अहन्।अहतां।अघ्नन्।अहन्।आर्धधातुकइत्यधिकृत्य।हनोवधलिङि।लु

गणेश
॥२५॥

ङि वा वधादेशोऽदंतः॥ आर्द्धधातुक इति विषयसप्तमी। तेनार्द्धधातुकोपदेशेऽकारांतत्वादतो लोपः॥ वध्यात्। वध्यास्तां। आर्द्धधा
तुके किं। विध्यासौ हन्यात्। हतेति णत्वं। प्रहण्यात्। अल्लोपस्य स्थानिवत्वादतो हलादेरिति न वृद्धिः॥ अवधीत्। अथ चत्वारः
स्वरितेतः॥ द्विष अप्रीतौ। द्वेष्टि। द्विष्टे। द्वेष्टा। द्वेक्ष्यति। द्वेष्टु। द्विष्टात्। द्विड्ढि। द्वेषाणि। द्वेषावहै। अद्वेट्। द्विषन्। लङो झेर्जु
स्वा स्यात्। अद्विषुः। अद्विषन्। अद्वेषं। द्विषीत। द्विक्षीष्ट। अद्विक्षत्। दुह प्रपूरणे। दोग्धि। दुग्धः। धोक्षि। दुग्धे। धुक्षे। धु
ग्धे। दोग्धु। दुग्धि। दोहानि। धुक्ष्व। धुग्ध्वं। दोहै। अधोक्। अदोहं। अधुग्ध्वं। अधुक्षत्। अधुक्षत। लुग्वा दुहेति लुक्पक्षे तथा
सधं। वहि पुलुङ्दपि। दिह उपचये। प्रलिदेग्धि। दिग्धे। लिह आस्वादने। लेढि। लीढः। लिहंति। लेक्षि। लीढे। लिक्षे। लिढ्वे॥
लेढु। लीढि। लेहानि। अलेट्। अलिक्षत। अलीढ। अलिक्षावहि। अलिह्वहि। चक्षिङ् व्यक्तायां वाचि। अयं दर्शनेपि। इका
रोनुदात्तः पुजर्थः॥ विचक्षणः प्रथयन्। तुमतुन। अतेदितइति व्याख्यानात्। ङकारस्त्वनुदात्तेत्त्वप्रयुक्तमात्मनेप
पदमनित्यमिति ज्ञापनार्थः॥ तेन स्फायन्निर्मोकसंधीत्यादि सिध्यति। चष्टे। चक्षाते। आर्द्धधातुके। चक्षिङः ख्याञ्॥
वा लिटि। अत्र भाष्ये ख्शादिरयमादेशः॥ असिद्धकांडे शस्य यो वेति स्थितं। त्रिखासदहयं। चख्यौ। चख्ये। चक्शौ। चक्
शे। वयो द्वितीया इति तु न। वर्त्वस्यासिद्धत्वात्। चचक्षे। ख्याता। क्शाता। ख्यास्यति। ख्यास्यते। क्शास्यति। क्शास्यते। अ
चष्टां। चक्षीत। ख्यायात्। ख्येयात्। क्शायात्। क्शेयात्। अस्यतिवक्तिख्यातिभ्योऽङ्। एभ्यश्च्लेरङ्। अख्यत्। अख्यत।
अक्शासीत्। अक्शास्त। वर्जने क्शाञ् नेष्टः॥ समचक्षिष्टेत्यादि। अथ पख्यांता अनुदात्तेतः॥ ईर गतौ कंपने च। ईर्ते। ईरा

सि॰ त्रि॰ चक्षे। ईर्त्ते। ईर्ष्व। ईर्ध्वम्। ऐरिष्ट। ईड स्तुतौ। ईट्टे। ईशः से। ईडजनोर्ध्वे च। ईशीडजनां से ध्वे शब्दयोः सार्वधातुकयोरिट् स्यात्। योग
॥२६॥ विभागो वैचित्र्यार्थः। ईडिषे। ईडिध्वे। एकदेशविकृतस्यानन्यत्वादीडिष्व। ईडिध्वं। विकृतिग्रहणेन प्रकृतेरग्रहणत्। ऐड्ढ्वं। ईश ऐ ङ्
श्वर्ये। ईष्टे। ईशिषे। ईशिध्वे। आस उपवेशने। आस्ते। दयायासश्च। आसांचक्रे। आस्स्व। आध्वं। आसिष्ट। आङः शासु इच्छायां।
प्रशा४ आशास्ते। आशासते। आङ् स्वर्वत्वं प्रायिकं। तेन नमोवाकं प्रशास्महे इति सिद्धं। वस आच्छादने। वस्ते। वस्से। वध्वे। ववसे। वसिता।
कसि गतिशासनयोः। कंस्ते। कंसाते। कंसते। अयमनिदित् इत्येके। कस्ते। तालव्यान्तोप्यनिदित्। कष्टे। कशाते। कक्षे। कड्[illegible]। ड्ढ्वे। णि
सि चुम्बने। निंस्ते। दन्त्यान्तोयं। आभरणकारस्तु तालव्यान्त इति बभ्राम। णिजि शुद्धौ। निंक्ते। निंक्षे। निंजिता। शिजि अव्यक्ते शब्दे।
शिङ्क्ते। पिजि वर्णे। संपर्चने इत्येके। उभयत्रेत्यन्ये। अवयवे इत्यपरे। अव्यक्ते शब्दे इतीतरे। पिङ्[illegible]क्ते। पृजी इत्येके। पृङ्क्ते। वृ
जी वर्जने। दन्तोष्ठ्यादिः। ईदित्। वृक्ते। वृजाते। वृक्षे। इदित् इत्यन्ये। वृङ्क्ते। पृची संपर्चने। पृक्ते। षूङ् प्राणिगर्भविमोचने। सूते। सु
षुविषे। सोता। सविता। स्वरतिसूतीति गुणनिषेधः। सुवै। सविषीष्ट। सोषीष्ट। असविष्ट। असोष्ट। शीङ् स्वप्ने। शीङः सार्वधा
स्याप तुके गुणः। क्ङिति चेत्यस्यापवादः। शेते। शयाते। शीङो रुट्। शीङः परस्य झादेशस्यातो रुडागमः स्यात्। शेरते। शेषे। शेध्वे। शये।
शेवहे। शिश्ये। शयिता। अशयिष्ट। अथ कौत्यन्ताः परस्मैपदिनः। ऊर्णुस्तूभयपदी। यु मिश्रणेऽमिश्रणे च। उतो वृद्धिर्लुकि
हलि। लुग्विषये उकारस्य वृद्धिः स्यात्पिति हलादौ सार्वधातुके न त्वभ्यस्तस्य। यौति। युतः। युवन्ति। युयाव। यविता। युयात्॥
इह उतो वृद्धिर्न। भाष्ये पिच्च ङिन्न ङिच्च पिन्नेति व्याख्यानात्। विशेषविहितेन ङित्त्वेन पित्त्वस्य बाधात्। यूयात्। अयावीत्।
रु शब्दे। तुरुस्तुशम्यमः सार्वधातुके। एभ्यः परस्य सार्वधातुकस्य हलादेस्तिङ ईड्वा स्यात्। आभ्यस्ताश्चेत्यतोनुवृत्तिसंभवे गणेश ॥२६॥

पुनः सार्वधातुकग्रहणमपिदर्थं। रवीति। रौति। रुवीतः। रुतः। हलादेः किं। रुवंति। तिङः किं। शाम्यति। सार्वधातुके किं। आशिषि रूयात्। वि
ध्यादौ तु। रुयात्। रुवीयात्। अरावीत्। अरविष्यत्। तु इति सौत्रो धातुः। गतिवृद्धिहिंसासु। अयं च लुग्विकरण इति स्मरंति। तवीति। तो
ति। तुयात्। तुतः। तोता। तोष्यति। णु स्तुतौ। नौति। नविता। टुक्षु शब्दे। क्षौति। क्षविता। क्ष्णु तेजने। क्ष्णौति। क्ष्णविता। ष्णु प्रस्रवणे॥
स्नौति। सुष्णाव। स्नविता। स्नुयात्। स्नूयात्। ऊर्णुञ् आच्छादने। ऊर्णोतेर्विभाषा। वृद्धिः स्याद्वा हलादौ पिति सार्वधातुके। ऊर्णौति।
ऊर्णोति। ऊर्णुतः। ऊर्णुवंति। ऊर्णुते। ऊर्णुवाते। ऊर्णुवते। ऊर्णोतेराम्नेति वाच्यं। नन्द्राः संयोगादयः। अचः पराः संयोगादयो नद
ने राद्विर्भवंति। नुशब्दस्य द्वित्वं। णत्वस्यासिद्धत्वात्। पूर्वत्रासिद्धीयमद्विर्वचने इति त्वनित्यं। उभौ साभ्यासस्येति लिंगात्। ऊर्णुनाव।
ऊर्णुनुवतुः। ऊर्णुनुवुः। विभाषोर्णोः। इडादिप्रत्ययो ङिद्वा स्यात्। ऊर्णुनुविथ। ऊर्णुनविथ। ऊर्णुविता। ऊर्णविता। ऊर्णोतु। ऊर्णौतु। ऊ
र्णवानि। ऊर्णवै। गुणोऽपृक्ते। ऊर्णोतेर्गुणः स्यादपृक्ते हलादौ पिति सार्वधातुके। वृद्ध्यपवादः। और्णोत्। और्णोः। ऊर्णुयात्। ऊर्णुयाः।
इह वृद्धिर्न। ङिच्चपिन्नेति भाष्यात्। ऊर्णूयात्। ऊर्णविषीष्ट। ऊर्णुविषीष्ट। और्णुवीत्। और्णुविष्टां। ऊर्णोतेर्विभाषा। इडादौ परस्मै
पदपरे सिचि वृद्धिः स्यात्। पक्षे गुणः। और्णावीत्। और्णाविष्टां। और्णाविषुः। और्णवीत्। और्णविष्टां। और्णविषुः। द्यु अभि
गमने। द्योति। द्योता। षु प्रसवैश्वर्ययोः। प्रसवोऽभ्यनुज्ञानं। सोता। असौषीत्। कु शब्दे। कोता। ष्टुञ् स्तुतौ। स्तौति। स्तवीति। स्तु
तः। स्तुवीतः। स्तुते। स्तुवीते। स्तुसुधूञ्भ्य इतीट्। अस्तावीत्। प्राक्सितादिति षत्वं। अभ्यष्टौत्। सिवादीनां वा। पर्यष्टौत्। पर्यस्तौत्।
ब्रूञ् व्यक्तायां वाचि। ब्रुवः पंचानामादित आहो ब्रुवः। ब्रुवो लटः परस्मैपदानामादितः पंचानां णलादयः पंच वा स्युर्ब्रुवश्चा
हादेशः। अकार उच्चारणार्थः। आह। आहतुः। आहुः। आहस्थः। झलि परे। चर्त्वं। आत्थ। आहथुः। ब्रुव ईट्। ब्रुवः परस्य हला

सि॰ति॰
॥२७॥

देः पित ईट् स्यात्। आत्थेऽस्यत्र स्थानिवद्भावात् आत्तोऽयं सन्निति थत्वविधानान्न भवति। ब्रवीति। ब्रूतः। ब्रुवंति। ब्रूते। आर्द्धधातुकाधिकारे॥
ब्रुवो वचिः। उवाच। ऊचतुः। ऊचुः। उवचिथ। उवक्थ। ऊचे। वक्ता। ब्रूतात्। ङित्त्वपिन्नेत्यपित्त्वादीडन। ब्रवाणि। ब्रवै। ब्रूयात्। उच्यात्। अस्य
तिवक्तीत्यङ्। वचउम्। अङि परे। अवोचत्। अवोचत। अथ शास्यंताः परस्मैपदिनः। इङ्‌त्वात्मनेपदी। इण् गतौ। एति। इतः। इणो यण्।
अजादौ प्रत्यये। इयङोऽपवादः। यंति। इयाय। दीर्घ इणः किति। इणोऽभ्यासस्य दीर्घः स्यात् किति लिटि। ईयतुः। ईयुः। इययिथ इयेथ। एता।
एतौ। आयन्। इयात्। ईयात्। एतेर्लिङि। उपसर्गात्परस्य इणो ऽणो ह्रस्वः स्यादार्द्धधातुके किति लिङि। निरियात्। उभयत आश्रये
नांतादिवत्। अभीयात्। अणः किं। समेयात्। समीयादिति प्रयोगस्तु भौवादिकस्य। इणो गा लुङि। गातिस्थेति सिचो लुक्। अगात्।
अगातां। अगुः। इङ् अध्ययने। नित्यमधिपूर्वः। अधीते। अधीयाते। अधीयते। गाङ् लिटि। इङो गाङ् स्याल्लिटि। लावस्थायां वि
वक्षिते वा। अधिजगे। अधिजगाते। अधिजगिरे। अध्येता। अध्येष्यते। अध्ययै। गुणायादेशयोः कृतयोरुपसर्गस्य यण्।
पूर्वं धातुरुपसर्गेणेति दर्शनेंऽतरंगत्वाद्गुणः पूर्वं सवर्णदीर्घः प्राप्तः। एरध्ययने वृत्तमिति निर्देशान्न भवति। अध्यैत। परत्वा
दियङ्। तत आट्। वृद्धिः। अध्यैयातां। अध्यैयत। अध्यैयि। अध्यैवहि। अधीयीत। अधीयीयातां। अधीयीध्वं। अधीयीय।
अध्येषीष्ट। विभाषा लुङ्लृङोः। इङो गाङ् स्यात्। गाङ्कुटादिभ्योऽञ्णिन्ङित्। गाङादेशात्कुटादिभ्यश्च परेऽञ्णितः प्रत्यया ङि
तः स्युः। घुमास्थागापाजहातिसां हलि। एषामात ईत्स्याद्धलादौ क्ङित्यार्द्धधातुके। अध्यगीष्ट। अध्यैष्ट। अध्यगीष्यत। अध्यै
ष्यत। इक् स्मरणे। अयमप्यधिपूर्वः। अधीगर्थदयेशामितिलिंगात्। अन्यथा ह्यीगर्थे सेवक्ष्यात्। इण्वदिक इति वक्तव्यं। अ गलेऽन्वा
धियंति। अध्यगात्। केचित्तु। आर्द्धधातुकाधिकारे रूपस्यैवातिदेशमाहुः। तन्मते यणेन। तथा च भट्टिः। स्मसीतयो राघवयोर ॥२७॥

धीयन्निति। वीगतिव्याप्तिप्रजनकांत्यसनखादनेषु। प्रजनोगर्भग्रहणं। असनंक्षेपणं। वेतिवीतः। वियंति। वेषिवेमि। वीहि। अवेत्।
अवीतां। अवियन्। अजागमेससनेकारत्ताघलि [redacted] तिकेचित्। अव्यन्। अत्रईकारोपिधात्वंतरंप्रश्लिष्यते। एति। ईनः। इयं
ति। ईयात्। ऐषीत्। या प्रापणे। प्रापणमिहगतिः। प्रणियाति। यातः। यांति। लङः शाकटायनस्यैव। आदंतात्परस्यल
ङोझेर्जुस्यावास्यात्। अयुः। अयान्। यायात्। यायातां। यायास्तां। वाति गंधनयोः। भादीप्तौ। ष्णाशौचे। श्रापाके। द्राकुत्सायांगतौ।
प्साभक्षणे। पारक्षणे। पायास्तां। अपासीत्। रादाने। लाआदाने। द्वावपिदानेइतिचंद्रः। दापलवने। प्रणिदाति। प्रनिदाति। दा
यास्तां। अदासीत्। ख्याप्रकथने। अयंसार्वधातुकमात्रविषयः। सस्थानत्वेनमः ख्याञेरितिवार्तिकं। तद्भाष्यंचेहलिंगं। स
ख्यानोज्जिकाम्भलीयः। सनेतिखूशात्रादेशस्यखूशादित्वेनप्रयोजनमिसर्थः। संप्रर्वस्यख्यातेः प्रयोगोनेतिन्यासकारः।
प्राप्रणे। मामाने। अकर्मकः। तनोमपुस्तत्र। उपसर्गवशेनार्थांतरेसकर्मकः। उदरंपरिमातिमुष्टिनानेमेदंस्त्रनास्य। ग्र
हणं। प्रणिमाति। प्रनिमाति। वचपरिभाषणे। वक्ति। वक्तः। अयमंतिपरोनयुज्यते। बहुवचनपरइसन्ये। झिपरइसपरे॥
वच्मि। वच्यात्। उच्यात्। अवोचत्। विदज्ञाने। विदोलटोवा। वेतेर्लटः परस्मैपदानांणलादयोवास्युः। वेद। विदतुः। विदुः। वेत्थ। वि
दथुः। विद। वेद। विद्व। विद्म। पक्षेवेति। वित्तः। इत्यादि। विवेद। विविदतुः। उषविदेस्याम्पक्षेविदेसकारांतनिपातनान्नलघूपध
गुणः। विदांचकार। वेदिता। विदांकुर्वंत्वित्यन्यतरस्यां। वेतेर्लोघाम्गुणाभावोलोटोलुक्लोडंतकरोत्वनुप्रयोगश्चवानिपा
त्यते। पुरुषवचनेनविवक्षिते। इतिशब्दात्। तनादिकृञभ्यउः। तनादेःकृञश्चउप्रत्ययःस्यात्। शपोपवादः। तनादित्वादेवसि
द्धेकृञ्ग्रहणंगणकार्यस्यानित्यत्वेलिंगं। तेननविश्वसेदविश्वस्तमित्यादिसिद्धं। विदांकरोतु। अतउत्सार्वधातुके। उप्रत्ययां

अस्यतिवक्तिख्यातिभ्योङः। ५

सि॰ ति॰
॥२२॥

तरू ओकारस्य उः स्यात्सार्वधातुके क्ङिति। उदिति तपरसामर्थ्यान्न गुणः। विदांकुरुतात्। विदांकुरुतां। उतश्चेति हेर्लुक्। आभीयत्वेनलु
कोऽसिद्धत्वादुत्वं। विदांकुरु। विदांकरवाणि। अवेत्। अवित्तां। सिजभ्यस्तेति झेर्जुस्। अविदुः। दश्च। धातोर्दस्य पदान्तस्य सिपि परे रुः
स्याद्वा। अवेः। अवेत्। असभुवि। अस्ति। श्नसोरल्लोपः। श्नस्यास्तेश्चाकारस्य लोपः स्यात्सार्वधातुके क्ङिति। स्तः। संति। तासस्त्यो
रिति सलोपः। असि। स्थः। स्थ। अस्मि। स्वः। स्मः। आर्द्धधातुके इत्यधिकृत्य। अस्तेर्भूः। बभूव। भविता। अस्तु। स्तात्। स्तां। संतु।
घ्वसोरेद्धावभ्यासलोपश्च। घोरस्तेश्चैत्वं स्याद्धौ अभ्यासलोपश्च। आभीयत्वेन एत्वस्यासिद्धत्वाद्धेर्धिः। श्नसोरित्यातो लोपः।
एधि। तातङ्पक्षे एत्वं न। परेण तातङा बाधात्। सकृद्गतौ विप्रतिषेधेन यद्बाधितं तद्बाधितमेवेति न्यायात्। स्तात्। स्तं। स्त। असा
नि। असाव। असाम। अस्तिसिचः पृक्ते। ईट्। आसीत्। श्नसोरित्यल्लोपस्याभीयत्वेनासिद्धत्वादाट्। आस्तां। आसन्। स्यात्।
स्याद्। भूयात्। अभूत्। सिचोऽस्तेश्च विद्यमानत्वेन विशेषणादीत्वं न। उपसर्गप्रादुर्भ्यामस्तिर्यच्परः। उपसर्गेणः प्रादुषश्च पर
स्यास्तेः सस्य षः स्यात् यकारेऽचि परे। निष्यात्। प्रादुःष्यात्। निषंति। प्रादुःषंति। यच्परः किं। अभिस्तः। मृजू शुद्धौ। मृजेर्वृद्धिः॥
मृजेरिको वृद्धिः स्यात् धातुप्रत्यये परे। क्ङित्यजादौ वेष्यते। व्रश्चेति षः। मार्ष्टि। मृष्टः। मृजंति। मार्जंति। ममार्ज। [redacted] ममार्जतुः। म
मृजतुः। ममार्जिथ। ममार्ष्ठ। मार्जिता। मार्ष्टा। मृड्ढि। अमार्ट्। अमार्जं। अमार्जीत्। रुदिर् अश्रुविमोचने। रुदादिभ्यः सार्वधातुके।
रुदस्वपश्वसप्राणजक्षिभ्यो वलादेः सार्वधातुकस्येट् स्यात्। रोदिति। रुदितः। होपरत्वाद्धित्वं न। रुदिहि। रुदश्च पंचभ्यः।
हलादेः पितः सार्वधातुकस्याप्रक्तस्य ईट् स्यात्। अड्गार्ग्यगालवयोः। अरोदीत्। अरोदत्। अरुदितां। अरुदन्। अरोदीः। अ
रोदः। प्रकृतिप्रत्ययविशेषापेक्षाभ्यामडीड्भ्यामंतरंगत्वाद्घासुट्। रुद्यात्। अरुदत्। अरोदीत्। ञिष्वप् शये। स्वपिति। स्वपितः। गत्लेश्च
॥२२॥

सुष्वाप। सुषुपतुः। सुषुपुः। सुष्वपिथ। सुष्वप्थ। सुविनिर्दुर्भ्यः सुपिसूतिसमाः। एभ्यः सुप्यादेः सस्य षः स्यात्। एवं धातुरूपसर्गे
ण युज्यते। क्ङिति लिटि परत्वात्संप्रसारणे षत्वे च कृते द्वित्वं। एवं चासिद्धीयमद्विर्वचने। सुषुषुपतुः। सुषुषुपुः। अकिति तु द्वि
त्वेऽभ्यासस्य संप्रसारणं। षत्वस्यासिद्धत्वात्ततः एवं हलादिःशेषः। निसत्वाच्च। ततः सुपि रूपाभावाच्च षः। सुसुष्वाप। सुस्वप्ता।
अस्वपीत्। अस्वपत्। स्वप्यात्। सुप्यात्। सुषुप्यात्। अस्वाप्सीत्। श्वस प्राणने। श्वसिति। श्वसिता। अश्वसीत्। अश्वसत्।
श्वस्यातां। श्वस्यास्तां। ह्म्यन्तक्षणेति न वृद्धिः। अश्वसीत्। अन च। अनिति। आन। अनिता। आनीत्। आनत्। अनितेः। उ
पसर्गस्थान्निमित्तात्परस्यानितेर्नस्य णः स्यात्। प्राणिति। जक्ष भक्षहसनयोः। जक्षिति। जक्षितः। अदभ्यस्तात्। झस्य अत् स्या
दंतापवादः। जक्षति। सिजभ्यस्तेति जुस्। अजक्षुः। अयमंतस्यादिरिस्कद्वलदत्तोबभ्याम। रुदादयः पंचगताः। जागृ निद्रा
क्षये। जागर्त्ति। जागृतः। जाग्रति। उषविदसाम्वा। जागरांचकार। जजागार। जाग्रोऽविचिण्णल्ङित्सु। जागर्तेर्गुणः स्याद्विचि
णल्ङिद्भ्योन्यस्मिन् वृद्धिविषये प्रतिषेधविषये च॥ जजागरतुः। अजागः॥ अजागृतां। अभ्यस्तत्वाज्जुस्। जुसि च॥
अजादौ जुसीगंतागस्य गुणः स्यात्। अजागरुः। अजादौ किं। जागृयुः। आशिषि तु। जागर्यात्। जागर्यास्तां। जागर्यासुः। लु
ङि। अजागरीत्। जागृ इ स् इ स् त् इत्यत्र यण् प्राप्तस्तं सार्वधातुके गुणो बाधते। तं च विचि वृद्धिः। तां जागर्त्ति गुणः। तत्र रुतेहलंतलक्ष
णप्राप्ता। नेटीति निषिद्धा। ततोऽतो हलादेर्लघोरिति बाधित्वाऽतो ल्रांतस्येति प्राप्ता। ह्म्यंतेति निषिध्यते। तदाहुः। गुणो वृद्धिर्गु
णो वृद्धिः प्रतिषेधो विकल्पने। पुनर्वृद्धिर्निषेधोतो यण् पूर्वाः प्राप्तयो नवेति। दरिद्रा दुर्गतौ। दरिद्राति। इद्दरिद्रस्य। दरिद्राते
रिकारः स्याद्धलादौ क्ङिति सार्वधातुके। दरिद्रितः। श्नाभ्यस्तयोरातः। अनयोरातो लोपः स्यात्। क्ङिति सार्वधातुके। दरिद्रति।
अनेकाच्त्वादाम्। दरिद्रांचकार। आत औ णल इत्यत्र ओ इत्येव सिद्धे औकारविधानं दरिद्रातेरालोपे कृते श्रवणार्थं।

सि॰ कौ॰ ॥२९॥

अत एव ज्ञापकादाम्रेसेके । दद्रिद्रो । ददरिद्रतु इत्यादि । यत्तु एलि दद्रिद्रेति तन्निर्मूलमेव । दरिद्रातेरार्द्धधातुके विव
क्षिते आलोपो वाच्यः । लुङि वा । सनि ण्वुलि ल्युटि च न । दरिद्रिता । अदरिद्रात् । अदरिद्रितां । अदरिद्रुः । दरिद्र्यात् । द
रिद्र्यात् । अदरिद्रीत् । इट्सकौ । अदरिद्रासीत् । चकासृ दीप्तौ । जक्ष्य अत् । चकास्ति । चकासति । चकासांचकार ॥
धिच्चेति लोपः । सिचि एव वेत्येके । चकाद्धि । चकाधीत्येव भाष्यं । तिप्यनस्तेः । पदांतस्य सस्य दः स्यात्तिपि न त्वस्तेः । अचे
कात् । अचकाद् । अचकासुः । सिपि धातो रुर्वा । पदांतस्य धातोः सस्य रुः स्याद्वा । पक्षे दः । अचकाः । अचकात् । शासु अनु
शिष्टौ । शास्ति । शासइदङ्हलोः । शास उपधाया इत्स्यादङि हलादौ क्ङिति च । शासिवसीतिषः । शिष्टः । शासति । शशा
स । शशासतुः । शशासुः । शिष्टात् । शिष्टां । शासतु । शाधि । शास्तेः शादेशः स्याद्धौ परे । तस्याभीयत्वेनासिद्धत्वात् हेर्धिः । शा
धि । अशात् । अशिष्टां । अशासुः । अशाः । अशात् । शिष्यात् । सर्तिशास्त्यर्तिभ्यश्च । अशिषत् । अशासिष्यत् । दीधीङ् दीप्तिदेवन
योः । एतदादयः पंच धातवः छांदसाः । दीधीते । एरनेकाच इति यण् । दीध्याते । यीवर्णयोर्दीधीवेव्योः । एतयोरंसस्य
२६ लोपः स्याद्यकारे इवर्णे च परे । इति लोपं बाधित्वा नित्यत्वादैरेत्वं । दीध्ये । दीधीवेवीटामिति गुणनिषेधः । दीध्यांचक्रे । दीधिता ।
दीधिष्यते । वेवीङ् वेतिना तुल्ये । वीगती । अनेन तुल्येऽर्थे वर्तते इत्यर्थः । अथ त्रयः परस्मैपदिनः । षस सस्ति स्वप्ने । सस्ति ।
सस्तः । ससंति । ससास । सेसतुः । सस्तु । सधि । एवं त्रासिद्धमिति सलोपस्यासिद्धत्वादतो हेरिति लुङ् न । असत् । असस्तां । असः ।
असत् । सस्यात् । असासीत् । अससीत् । संस्ति । संस्तः । संसंति । बहूनां समवाये द्वयोः संयोगसंज्ञा नेत्याश्रित्य स्कोरिति लोपा
भावात् । संस्ति । संस्तः । इत्येके । वश कांतौ । कांतिरिच्छा । वष्टि । उष्टः । उशंति । वक्षि । उष्ठः । उवाश । ऊशतुः । वशिता । वष्टु । उष्टात् ।
उष्टां । उड्ढि । अवट् । औष्टां । औशन् । अवशां । उश्यात् । चर्करीतं च । यङ्लुगंतमदादौ बोध्यं । हुङ् अपनयने । हुते । जुहुवे ।

गणेश
॥२९॥
चकलुङा...मः॥

कुर्वीत। ह्वोषीष्ट। अह्नोष्ट॥ ७४॥ इत्यदादयः॥ हु दानादनयोः। आदाने चेत्येके। प्रीणनेपीति भाष्यं। दानं चेह प्रक्षेपः। स च वैधे
आधारे हविषश्चेति स्याभावाल्लुप्यते। इतश्चत्वारः परस्मैपदिनः। जुहोत्यादिभ्यः श्लुः। शपः श्लुः स्यात्। श्लौ। धातोर्द्वे स्तः।
जुहोति। जुहुतः। अदभ्यस्तादित्यत्। हुश्नुवोरिति यण्। जुह्वति। भीह्रीभृहुवां श्लुवच्च। एभ्यो लिटि आम्वा स्यादामि श्लौ
विव कार्यं च। जुहवांचकार। जुहाव। होता। होष्यति। जुहोतु। जुहुतात्। हेर्धिः। जुहुधि। आटि परत्वाद्गुणः। जुहवा
नि। परत्वाज्जुसि चेति गुणः। अजुहवुः। जुहुयात्। हूयात्। अहौषीत्। ञिभी भये। बिभेति। भियोऽन्यतरस्याम्। इकारः स्या
द्धलादौ क्ङिति सार्वधातुके॥ बिभीतः। बिभितः। बिभ्यति। बिभयांचकार। बिभाय। भेता। ह्री लज्जायां। जिह्रेति। जिह्रीतः। जि
ह्रियति। जिह्रयांचकार। जिह्राय। पॄ पालनपूरणयोः। अर्तिपिपर्त्योश्च। अभ्यासस्य इकारोऽन्तादेशः स्यात् श्लौ। उदोष्ठ्य
पूर्वस्य। अङ्गावयवौष्ठ्यपूर्वो य ॠत् तदन्तस्याङ्गस्य उत् स्यात्। गुणवृद्धी परत्वादिमं बाधेते। पिपर्ति। उत्वं रपरत्वं। हलि चेति
दीर्घः। पिपूर्तः। पिपुरति। पपार। किति लिटि ऋच्छत्यॄतामिति गुणे प्राप्ते। शॄदॄप्रां ह्रस्वो वा। एषां किति लिटि ह्रस्वो वा स्यात्।
पक्षे गुणः। पप्रतुः। पप्रुः। पपरतुः। पपरुः। परिता। परीता। अपिपः। अपिपर्तां। अपिपरुः। पिपूर्यात्। पूर्यात्। अपारीत्। अ
पारिष्टां। ह्रस्वान्तोऽयमिति केचित्। पिपर्ति। पिपृतः। पिप्रति। पिपृयात्। आशिषि। प्रियात्। अपार्षीत्। पाणिनीयमते तु तं रो
दसी पिपृतमित्यादौ छान्दसत्वं शरणं। डुभृञ् धारणपोषणयोः। भृञामित्। भृञ्माङ्ओहाङ्। एषां त्रयाणामभ्यास
स्य इत्स्यात् श्लौ। बिभर्ति। बिभृतः। बिभ्रति। बिभृथ। श्लुवत्त्वादामि द्वित्वेत्त्वे। बिभरामास। बभार। बभर्थ। बभृव। बिभृ
हि। बिभराणि। अबिभः। अबिभृतां। अबिभरुः। बिभृयात्। भ्रियात्। भृषीष्ट। अभार्षीत्। अभृत। माङ् माने। शब्दे च॥
ई हल्यघोः। श्नाभ्यस्तयोरात ईत्स्यात् सार्वधातुके क्ङिति हलि। मिमीते। श्नाभ्यस्तयोरित्यालोपः। मिमाते। मिमते। प्रत्य

सि·ति० ॥३०॥

स्या। ओहाङ् गतौ। जिहीते। जिहाते। जिहते। जहे। हाता। हास्यते। ओहाक् त्यागे परस्मैपदी। जहाति। जहातेश्च इत्याकारस्य हलादौ कि-
ति सार्वधातुके। पक्षे ईत्वं। जहितः। जहीतः। जहति। जहौ। जहातु। जहितात्। जहीतात्। आ च हौ। जहातेर्हौ परे आ स्यात् चादिदीतौ।
जहाहि। जहिहि। जहीहि। अजहात्। अजहुः। लोपो यि। जहातेरालोपः स्यात् यादौ सार्वधातुके। जह्यात्। एर्लिङि। हेयात्। अहासीत्।
डुदाञ् दाने। प्रणिददाति। दत्तः। ददति। दत्ते। ददे। घ्वसोरेद्धावभ्यासलोपश्च। देहि। अददात्। अदत्तां। अददुः। दद्यात्। देयात्। अदात्।
अदातां। अदुः। अदित। डुधाञ् धारणपोषणयोः। दानेप्येके। प्रणिदधाति। दधस्तथोश्च। द्विरुक्तस्य झषन्तस्य धाञो बशो भष् स्या-
त् तथयोः स्ध्वोश्च परतः। वचनसामर्थ्यादालोपो न स्थानिवदिति वामनमाधवौ॥ वस्तुतस्तु पूर्वत्रासिद्धे न स्थानिवत्। धत्तः। दधति।
धत्थः। दध्वः। धत्ते। धत्से। धध्वे। धेहि। अधित। अथ त्रयः स्वरितेतः। णिजिर् शौचपोषणयोः। णिजां त्रयाणां गुणः श्लौ। णिज-
विजिविषामभ्यासस्य गुणः स्यात् श्लौ। नेनेक्ति। नेनिक्तः। नेनिजति। नेक्ता। नेक्ष्यति। नेनेक्तु। नेनिग्धि। नाभ्यस्तस्याचि पिति सार्व-
धातुके। लघूपधगुणो न स्यात्। नेनिजानि। अनेनेक्। अनेनिक्तां। अनेनिजुः। नेनिज्यात्। निज्यात्। अनिजत्। अनैक्षीत्।
अनिक्त। विजिर् पृथग्भावे। वेवेक्ति। वेविक्ते। विवेजिथ। अत्र विज इड् इति ङित्वं न। ओविजी इत्यस्यैव तत्र ग्रहणात्। णिजिविजी
रुधादावपि। विष्लृ व्याप्तौ। वेवेष्टि। वेविष्टे। लृदित्वादङ्। अविषत्। तङि। क्सः। अजादौ क्सस्याचीति अल्लोपः। अविक्षत॥
अविक्षातां। अविक्षन्त। अथ आगणान्ताः परस्मैपदिनः। घृ क्षरणदीप्त्योः। जिघर्ति हवि बाहुतेन। भृञामित्। बहुलं छन्द-
सीतीत्वं। तत्र सत्यकरणे। अयं स्रुवो अभिजिहर्ति होमान्। ऋ सृ गतौ। बहुलं छन्दसीत्येव सिद्धे अर्तिपिपर्त्योश्चेति त्वविधानाद-
यं भाषायामप्यभ्यासस्य सवर्णे इति यङ्। इयर्ति। इयृतः। इयृति। आर। आरः। आरतुः॥ इडत्यर्तीति नित्यमिट्। आरिथ। अर्ता।
अरिष्यति। इयर्तु। इयृहि। ऐयः। ऐयृतां। ऐयरुः। इयृयात्। अर्यात्। आरत्। ससर्ति। भस भर्त्सनदीप्त्योः। बभस्ति। घसिभसोर्हलि गलेश्रा ॥३०॥

वेस्य धालोपः॥ झलो झलि इति सलोपः॥ बब्धः॥ बप्सति। कि ज्ञाने। चिकेति। तुर त्वरणे। तुतोर्ति। तुतूर्तः। तुतुरति। धिष शब्दे। दिधेष्टि।
दिधिष्टः॥ धन धान्ये। दधंति। दधंतः। दधनति। जन जनने। जजंति। जनसनखनां सञ्झलोः॥ एषामाकारोंतादेशः स्यात्सनि झलादौ
सनि झलादौ क्ङिति च। जजातः। जज्ञति। जजंति। जज्ञान। जजन्यात्। आयातो। गा स्तुतौ॥ दवाचिगाति सुम्नयुः॥ जिगीतः। जिगति। जजायात् जजन्यात् ३
॥ इति जुहोत्यादयः ४४ दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकांतिगतिषु॥ इह षंताः परस्मैपदिनः॥ दिवादि
भ्यः श्यन्॥ शपोपवादः॥ हलि चेति दीर्घः॥ दीव्यति। दिदेव। देविता। देविष्यति। दीव्यतु। दीव्या। अदीव्यत्। दीव्येत्। दीव्यात्। अदेवीत्।
अदेविष्यत्। षिवु तंतुसंताने। परिषीव्यति। परिषिषेव। न्यषेवीत्। न्यसेवीत्। स्रिवु गतिशोषणयोः॥ ष्ठिवु निरसने। के चिदिहेमं
न पठंति। ष्णुसु अदने। आदान इत्येके। अदर्शन इत्यपरे। स्नुस्यति। सुष्णोस। ष्णसु निरसने। स्नस्यति। सस्नास। क्नसु ह्वरणदीप्त्योः।
ह्वरणं कौटिल्यं। चक्नास। व्युष दाहे। वुव्योष। प्लुष च॥ नृती गात्रविक्षेपे। नृत्यति। ननर्त। सेसिचि कृतचृतच्छृदतृदनृतः॥ एभ्यः पर तृद ८
स्य सिज्भिन्नस्य सादेरार्धधातुकस्येड् वा स्यात्। नर्तिष्यति। नर्त्स्यति। नृत्येत्। नृत्यात्। अनर्तीत्। त्रसी उद्वेगे। वा भ्राशेति श्यन्वा। त्रस्य
वाज्जृभ्रमुत्रसा
ति। त्रसति। तत्रसतुः। त्रेसतुः॥ कुथ पूतीभावे। पुथ हिंसायां। गुध परिवेष्टने। क्षिप प्रेरणे॥ क्षिप्यति क्षेप्ता। पुष्प विकसने। पुष्प्यति।
पि सेत्वाभ्यासलोपौ
पुपुष्प। तिम ष्टिम ष्टीम आर्द्रीभावे। तिम्यति। स्तिम्यति। स्तीम्यति। व्रीड चोदने लज्जायां च। व्रीड्यति। इष गतौ। इष्यति। षह षुह
पौ ६
ह चक्यर्थे। चक्यर्थस्तृप्तिः। सह्यति। सुह्यति। जॄष् झॄष् वयोहानौ। जीर्यति। जजरतुः। जेरतुः। जरिता। जरीता। जीर्येत्। जीर्यात्।
[illegible]। ऋदृशोऽङि गुणः॥ अजरत्। अजारीत्। अजरिषं। झीर्यति। जझरतुः। अझारीत्। षूङ् प्राणिप्रसवे। सूयते।
सुषुवे। स्वरतिसूतिसूयतिधूञूदितो वा॥ इति विकल्पं बाधित्वा श्र्युकः किति इति निषेधे प्राप्ते। क्रादिनियमान्नित्यमिट्। सुषुविषे। सुषुविवहे। सोता। स
विता। दूङ् परितापे। दूयते। दीङ् क्षये। दीयते। दीङो युडचि क्ङिति॥ दीङः परस्याजादेः क्ङित आर्धधातुकस्य युट् स्यात्। दुग्य

टावुवङ् च ल्योः सिद्धौ । दिङ् दीये । मीनाति मिनोति दीङां ल्यपि च । एषा मात्वं स्यात् ल्यपि चकारादशित्येङर निमित्ते । दाता । दास्यते । अ
दास्त । अदास्थाः । डीङ् विहायसा गतौ । डीयते । धीङ् आधारे । धीयते । दिध्ये । धेता । मीङ् हिंसायां । हिंसात्र प्राणवियोगः । मीयते । रीङ्
श्रवणे । रीयते । लीङ् श्लेषणे । विभाषा लीयतेः । लीयतेरिति यका निर्देशो न तु श्यना । लीलीङोरात्वं वा स्यादेज्विषये ल्यपि च ।
लेता । लाता । लेष्यते । लास्यते । एज्विषय इति किं । लीयते । लिल्ये । व्रीङ् वृणोत्यर्थे । व्रीयते । विव्रिये । स्वादय ओदितः । तत्फलं तु निष्ठानत्वं ॥
पीङ् पाने । पीयते । माङ् माने । मायते । ममे । ईङ् गतौ । ईयते । अयांचक्रे । प्रीङ् प्रीतौ । सकर्मकः । प्रीयते । पिप्रिये । अथ परस्मैपदिन आता
रः । शो तनूकरणे । ओतः श्यनि । लोपः स्यात् । श्यति । श्यतः । श्यंति । [redacted] शाशौ । शाशातुः । शाता । शास्यति । विभाषा घ्राधेङिति सिचो
वा लुक् । लुगभावे । यमरमेतीट् सकौ । अशात् । अशातां । अशुः । अशासीत् । अशासिष्टां । छो छेदने । छ्यति । षो अंतकर्मणि । स्यति । स
सौ । अभिष्यति । अभ्यष्यत् । अभिससौ । दो अवखंडने । द्यति । ददौ । प्रणिदाता । देयात् । अदात् । अथात्मनेपदिनः पंचदश । जनी प्रादु
र्भावे । ज्ञाजनोर्जा । अनयोर्जादेशः स्याच्छिति । जायते । जज्ञे । जज्ञाते । जज्ञिरे । जनिता । जनिष्यते । दीपजनेति वा चिण् । जनिवध्योश्च ॥
अनयोरुपधाया वृद्धिर्न स्यात् चिणि ञ्णिति कृति च । अजनि । अजनिष्ट । दीपी दीप्तौ । दीप्यते । दिदीपे । अदीपि । अदीपिष्ट । पूरी
आप्यायने । पूर्यते । अपूरि । अपूरिष्ट । तूरी गतित्वरणहिंसनयोः । तूर्यते । तुतूरे । धूरी गूरी हिंसागत्योः । धूर्यते । दुधूरे । गूर्यते । जु
गूरे । घूरी जूरी हिंसावयोहान्योः । शूरी हिंसास्तंभनयोः । चूरी दाहे । तप ऐश्वर्ये वा । अयं धातुरैश्वर्ये वा तङ् श्यनौ लभते । अन्यदा
तु शब्विकरणः परस्मैपदी त्वर्थः । केचित्तु । वाग्रहणं वृधुधातोरवयवमिच्छंति । तप्यते । तप्ता । तप्स्यते । पतेति व्यत्यासेन पाठांतरं । घु
तघातानियुक्तः पत्यमानः । वृतु वरणे । वृत्यते । पक्षांतरे । आवृत्यते । तत आवृत्स्यमानास्ता रामशालां न्यवृक्षतेति भट्टिः । क्लिश उपतापे ।
क्लिश्यते । क्लेशिता । काशृ दीप्तौ । काश्यते । वाशृ शब्दे । वाश्यते । ववाशे । अथ पंच स्वरितेतः । मृष तितिक्षायां । मृष्यति । मृष्यते । मम

षे। ममर्षे। ईर्ष्यविर्दती भावो रती भावः क्लेदः। क्नुष्यति। क्नुष्यते। चुक्नोच। चुक्नुचे। अक्नुचत्। अक्नोचीत्। अक्नोचिष्ट। णह बंधने। नह्य-
ति। नह्यते। ननाह। ननद्ध। नेहिथ। नेहे। नद्धा। नत्स्यति। अनात्सीत्। रंज रागे। रज्यति। रज्यते। शप आक्रोशे। शप्यति। शप्यते। अथैकाद-
श अनुदात्तेतः। पद गतौ। पद्यते। पेदे। पत्ता। पद्येत। पत्सीष्ट। चिण् ते पदः। पदश्चिण् स्यात् तशब्दे परे। प्रापादि। अपत्साताम्। अपत्स-
त। खिद दैन्ये। खिद्यते। चिखिदे। खेत्ता। अखित्त। विद सत्तायां। विद्यते। वेत्ता। बुध अवगमने। बुध्यते। बुबुधे। बोद्धा। भोत्स्यते। भुत्सीष्ट॥
अबोधि। अबुद्ध। अभुत्साताम्। युध संप्रहारे। युध्यते। युयुधे। योद्धा। अयुद्ध। कथं युध्यतीति। युद्धमिच्छतीति क्यच्। अनुदात्तेत्त्वलक्षणमा-
त्मनेपदमनित्यमिति वा। अनो रुध कामे। अनुरुध्यते। अण प्राणने। अण्यते। आणे। अणिता। अनेतिदेत्यातो यमित्येके। मन ज्ञाने। मन्यते।
मेने। मंता। युज समाधौ। समाधिश्चित्तवृत्तिनिरोधः। अकर्मकः। युज्यते। योक्ता। सृज विसर्गे। अकर्मकः। संसृज्यते सरसिजैररुणांशुभिन्नैः।
ससृजिषे। स्रष्टा। स्रक्ष्यते। लिङ्सिचावितिकित्वान्न गुणो नापि अम्। सृक्षीष्ट। असृष्ट। असृक्षाताम्। लिश अल्पीभावे। लिश्यते। लेष्टा। लेक्ष्य-
ते। लिक्षीष्ट। अलिक्षत। अलिक्षाताम्। अथ गणांताः परस्मैपदिनः। राधोऽकर्मकाद्वृद्धावेव। एवकारो भिन्नक्रमः। राधो कर्मकादेव श्यन्। उदाह-
रणमाह। वृद्धाविति। यन्मस्यमपराध्यति। कुप्यतीत्यर्थः। विराध्यंतं हे संतकाः। कुप्यंतं। राध्यत्योदनः। सिध्यतीत्यर्थः। कृष्णाय राध्यति। दैवं
पर्यालोचयतीत्यर्थः। दैवस्य धात्वर्थेन्तर्भावाज्जीवत्वादिवदकर्मकत्वं। रराध। रराधतुः। रराधिथ। राधो हिंसायामिति एत्वाभ्यासलोपाविह न।
हिंसार्थस्य सकर्मकत्वात् दैवादिकत्वायोगात्। राद्धा। रात्स्यति। अरात्सीत्। व्यध ताडने। ग्रहिज्या। विध्यति। विव्याध। वि-
विधतुः। विव्यद्ध। विव्यधिथ। व्यद्धा। व्यत्स्यति। विध्येत्। विध्यात्। अव्यात्सीत्। पुष पुष्टौ। पुष्यति। पुपोष। पुपोषिथ। पोष्टा। पोक्ष्यति।
पुषादीसङ्। अपुषत्। शुष शोषणे। अशुषत्। तुष प्रीतौ। दुष वैकृत्ये। श्लिष आलिंगने। श्लिष्यति। [redacted] शिश्लेष। श्लेष्टा। श्लेक्ष्यति। श्लिषः॥ असमासे रत्या श्लिष ... वसः स्यात्। पुषा घडनोपवादो

सि॰ति॰ ननु विरुणः। पुरस्तादपवादन्यायात्। आलिंगने। श्लिष आलिंगन एव क्सो नान्यत्र। योगविभागसामर्थ्यात् इगुपधादिस्यस्या
॥३२॥ यं नियमः। आश्लिक्षत्कन्यां देवदत्तः। आलिंगन एवेति किं। समश्लिषज्जतुकाष्ठं। अङ्। प्रसासत्ता विहश्लिषिः कर्मणि। अनालिं
गने सिद्धेव न तु क्सः। एकवचने चिण्। अश्लेषि। अश्लिक्षातां। अश्लिक्षत। अश्लिष्ठाः। अश्लिड्ढ्वं। शक विभाषितो मर्षणे। विभाषितइ
त्युभयपदीत्यर्थः। शक्यति। शक्यते। हरिं द्रष्टुं शक्तः। शशाक। शेकिथ। शशक्थ। शेके। शक्ता। शक्ष्यति। शक्ष्यते। अशकत्। अशक्त।
स्विदू कोयमिसेके। तन्मतेनानिट्कारिकासु ल्हृदित्पठितः। शकिता। शकिष्यति। ष्विदा गात्रप्रक्षरणे। घर्मस्रुतावित्यर्थः। अ
यं ञीदितिस्यासकारादयः। नेतिङ्इरइत्तादयः। स्विद्यति। सिषेद। सिषेदिथ। स्वेत्ता। अस्विदत्। क्रुध क्रोधे। क्रोद्धा। क्रोत्स्यति। क्षु
ध बुभुक्षायां। क्षोद्धा। कथं क्षुधित इति संपदादिक्विबंतात्तारकादित्वादितच्। इति माधवः। वस्तुतस्तु वसतिक्षुधोरिट्। शु
ध शौचे। शुध्यति। शुशोध। शोद्धा। षिधु संराद्धौ। शुद्धिस्याठः प्रामादिकः। सिध्यति। सेद्धा। सेत्स्यति। असिधत्। रध हिंसासंराध्योः।
रध्यति। रधिजभोरचीति नुम्। ररंध। ररंधतुः। रधादिभ्यश्च। वलादावार्धधातुकस्य वेट् स्यात्। ररंधिथ। ररद्ध। ररंधिव। रेध्व। नेटि
२६ लिटि रधेः। लिड्वर्जे इटि रधेर्नुम् न स्यात्। रधिता। रद्धा। रधिष्यति। रत्स्यति। अङि नुम्। अनिदितामिति न लोपः। अरधत्। णश अदर्शने। न
श्यति। ननाश। नेशतुः। नेशिथ। मस्जिनशोर्झलि। नुम् स्यात्। ननंष्ठ। नेशिव। नेश्व। नेशिम। नेश्म। नशिता। नंष्टा। नशिष्यति।
नङ्क्ष्यति। नश्येत्। नश्यात्। अनशत्। प्रणश्यति। नशेः षांतस्य। णत्वं न स्यात्। प्रनंष्टा। अंतग्रहणं भूतपूर्वप्रतिपत्त्यर्थं। प्रनङ्क्ष्य
ति। तृप प्रीणने। प्रीणनं तृप्तिस्तर्पणं च। नाग्निस्तृप्यति काष्ठानां। पितॄनतार्प्सीत्। दृप्त भय चन्दर्शनात्। ततर्पिथ। ततर्प्थ। तर्पिता। तत्र एथ ३
तर्प्ता। त्रप्ता। तर्प्स्यति। त्रप्स्यति। अतार्प्सीत्। अत्राप्सीत्। अतृपत्। दृप हर्षमोहनयोः। मोहनं गर्वः। दृप्यतीत्यादि। गलोग्रा
रधादित्वादिमो वेट्। कायमर्थमनुदात्तता। द्रुह जिघांसायां। वा द्रुहमुहेति वा घः। पक्षे ढः। दुद्रोग्ध। दुद्रोढ। दुद्रोहिथ। द्रोहिता। द्रोग्धा। ॥३२॥

अनुदात्तस्य चर्दुपधस्यान्यतरस्यां
२ इत्यनेनाम्

द्रोढा। द्रोहिष्यति। ध्रोक्ष्यति। ढत्वधत्वयोः स्त्र ल्यं रूपं। अद्रुहत्। मुह वैचित्त्ये। वैचित्त्यमविवेकः। मुह्यति। मुमोहिथ। मुमोग्ध। मुमोढ।
मोग्धा। मोढा। मोहिता। मोहिष्यति। मोक्ष्यति। अमुहत्। ष्णुह उद्गिरणे। स्नुह्यति। सुष्णोह। सुष्णोहिथ। सुष्णोग्ध। सुष्णोढ। सुष्णुहिव।
सुष्णुहू। स्नोहिता। स्नोग्धा। स्नोढा। स्नोहिष्यति। स्नोक्ष्यति। अस्नुहत्। ष्णिह प्रीतौ। स्निह्यति। सिष्णेह। वृत्ता रधादयः समाप्ता इत्यर्थः।
पुषादयस्त्वागणान्तादिति सिद्धान्तः। शमु उपशमे। शमामष्टानां दीर्घः श्यनि। शमादीनामित्यर्थः। प्रा...शाम्यति। शशाम। शेमतुः। शे
मिथ। शमिता। अशमत्। तमु काङ्क्षायां। ताम्यति। तमिता। अतमत्। दमु उपशमे। उपशमे इति ण्यन्तस्य। तेन सकर्मकोऽयं न तु शा
मिवदकर्मकः। अदमत्। श्रमु तपसि खेदे च। श्राम्यति। अश्रमत्। भ्रमु अनवस्थाने। वा भ्राशेति श्यन्वा। तत्र स्तेषां शमामष्टा
नां दीर्घः। भ्राम्यति। लुङ्यङि। अभ्रमत्। शेषं भ्वादिवत्। क्षमूष् सहने। क्षाम्यति। चक्षमिथ। चक्षंथ। चक्षमिव। चक्षण्व। चक्षमि
म। चक्षण्म। क्षमिता। क्षंता। अयमषित्। भ्वादिस्तु षित्। अषितः क्षाम्यतेः क्षांतिः। क्षमूषः क्षमतेः क्षमा। क्लमु ग्लानौ। क्लाम्य
ति। क्लामति। ष्ठीवश्यस्यपि ष्ठिवुक्लमु ष्विर्वेस्वरे दीर्घे सिद्धे शमामादि पाठो घिणुनर्थः। अङ्। अक्लमत्। मदी हर्षे। माद्यति।
अमदत्। शमादयो गताः। असु क्षेपणे। अस्यति। आस। असिता। असिष्यति। अस्यतेस्थुक्। अङि परे। आस्थत्। अ
स्य पुषादित्वादङि सिद्धे अस्यतिवक्ती तिवचनं तङर्थं। तङ् तूपसर्गादस्यत्यूह्योरिति वक्ष्यते। पर्यास्यत। यसु प्रयत्ने।
यसोऽनुपसर्गात्। संयसश्चेति श्यन्वा स्यात्। यस्यति। यसति। संयस्यति। संयसति। अनुपसर्गात् किं। प्रयस्यति। जसु मोक्षणे।
जस्यति। तसु उपक्षये। दसु च। तस्यति। अतसत्। दस्यति। अदसत्। वसु स्तंभे। वस्यति। ववास। ववसतुः। न शसददेति निषे
धः। वशादिरयमिति मतेन तु। वेसतुः। वेसुः। व्युष विभागे। अयं दाहे पठितः। अर्थभेदेन त्विहार्थं पुनः पठ्यते। अव्युषत्।
श्रो ष्यादिर्दंसोतोयं। प्लुसिती सन्यो। अयकारं पुसरूपयरे। प्लुष दाहे। अप्लुषत्। सर्वत्र पाठः सिद्धार्थ इत्याहुः। तद्भ्वादिपाठे न गतार्थमिति सुवचं।

सि॰ति ॥२३॥

विसप्रेरणे। विस्यति। अविसत्। कुस संश्लेषणे। अकुसत्। बुस उत्सर्गे। मुस खंडने। मसी परिणामे। परिणामो विकारः। समी इत्येके॥ लुठ विलोडने। उच समवाये। उच्यति। उवोच। ऊचतुः। मा भवानुचत्। भृशु भ्रंशु अधःपतने। बभर्श। अभृशत्। अनिदितामिति नलोपः। भ्रश्यति। अभ्रशत्। वृश वरणे। वृश्यति। अवृशत्। कृश तनूकरणे। कृश्यति। ञितृष पिपासायां। हृष तुष्टौ। रुष रिष हिंसायां। तीषसहेति वेट्। रोषिता। रोष्टा। रेषिता। रेष्टा। डिप क्षेपे। कुप क्रोधे। गुप व्याकुलत्वे। युप रुप लुप विमोहने। युप्यति। रुप्यति। लुप्यति। लोपिता। लुप्यतिसेद्धः॥ अनिट्कारिकासु लिपिसाहचर्यात्तौदादिकस्यैव ग्रहणात्। लुभ गार्ध्ये। गार्ध्यमाकांक्षा। तीषसहेति वेट्। लोभिता। लोब्धा। लोभिष्यति। लुभ्येत्। लुभ्यात्। अलुभत्। ण्यादेरवृत्करणात् क्षुभिनभितुभयो द्युतादौ क्र्यादौ च पठ्यंते। तेषां द्युतादित्वात् ङ्ङ् सिद्धः। क्र्यादित्वात् श्ना सिद्ध एव। इह पाठस्तु श्यनर्थः॥ क्लिदू आर्द्रीभावे। क्लिद्यति। विक्लेदिथ। विक्लेत्थ। विक्लिदिव। विक्लिद्व। क्लेदिता। क्लेत्ता॥ ञिमिदा स्नेहने। मिदेर्गुणः। इक्संज्ञकस्याकारादौ प्रत्यये परे। मेद्यति। अमिदत्। द्युतादिपाठादेवामिदत्। अमेदिष्टेति सिद्धे इह पाठो अमेदीदिति माभूदिति। द्युतादिभ्यो बहिरेवात्मनेपदिषु पाठस्तूचितः। ञिक्ष्विदा स्नेहनमोचनयोः। गृधु अभिकांक्षायां। अगृधत्। रुत्। पुषादयो दिवाद्यन्तर्गणाः॥ के चित्तु पुषादिसमाप्त्यर्थमेव वृत्करणं। दिवादिस्तु ण्यादिवृत्कृतिगणः। तेन क्षीयते म्रियते इत्यादिसिद्धिरित्याहुः॥ १४२॥ इति दिवादयः॥ ७७ षुञ् अभिषवे। अभिषवः स्नपनं पीडनं स्नानं सुरासंधानं च। तत्र स्नाने अकर्मकः। स्वादिभ्यः श्नुः। सुनोति सुनुतः। हुश्नुवोरिति यण्। सुन्वंति। सुन्वः। सुनुवः। सुन्वहे। सुनुवहे। सुषाव। सुषुवे। सोता। सुनु। सुनवानि। सुनवै। सुनुयात्। सूयात्। स्तुसुधूञ्भ्य इतीट्। असावीत्। असोष्ट। अभिषुणोति। अ- गणेश

नेः१ भ्यषुणोत्। अभिषुषाव। सुनोतेः स्यसनोः। स्यसनि परे सुनोतेः षो न स्यात्। विसोष्यति। षिञ् बंधने। सिनोति। विसिनोति। सिषाय॥ ॥२३॥

सिष्ये। सेता। शिञ् निशाने। तालव्यादिः। शेता। डुमिञ् प्रक्षेपणे। मीनातिमिनोतीत्यात्वं। ममौ। ममिथ। ममाथ। मिम्ये। माता। मीयात्। मासीष्ट।
अमासीत्। अमासिष्टां। अमास्त। चिञ् चयने। प्रणिचिनोति। विभाषा चेः। अभ्यासात्परस्य चिञः कुत्वं वा स्यात्सनि लिटि च। चिकाय।
चिचाय। चिक्ये। चिच्ये। अचैषीत्। अचेष्ट। स्तृञ् आच्छादने। स्तृणोति। स्तृणुते। गुणोर्तीति गुणः। स्तर्यात्। ऋतश्च संयोगादेः। ऋदन्तात्संयो
गादेः परयोर्लिङ्सिचोरिड्वा स्यात्तङि। स्तरिषीष्ट। स्तृषीष्ट। अस्तरिष्ट। अस्तृत। कृञ् हिंसायां। कृणोति। कृणुते। चकार। चकर्थ। चक्रे।
क्रियात्। कृषीष्ट। अकार्षीत्। अकृत। वृञ् वरणे। बभूथाततन्थजगृम्भववर्थेति निगमे। एषां वेदे इडभावो निपात्यते। तेन भाषायां थ
लीट्। ववरिथ। ववृव। ववृम। ववृढ्वे। वरिता। वरीता। लिङ्सिचोरात्मनेपदेषु। वृङ्वृञ्भ्यामृदन्ताच्च परयोर्लिङ्सिचोरिड्वा स्यात्तङि।। न
लिङि। वृतो लिङ्इटो दीर्घो न स्यात्। वरिषीष्ट। वृषीष्ट। अवारीत्। अवरिष्ट। अवरीष्ट। अवृत। धुञ् कम्पने। धुनोति। धुनुते। अधौषीत्।
अधोष्ट। दीर्घान्तोऽप्ययं। धूनोति। धूनुते। स्वरतिसूतिसूयतिधूञूदितो वा। दुधुविथ। दुधोथ। किति लिटि तु श्र्युकः किति निषेधं बाधित्वा क्रा
दिनियमान्नित्यमिट्। दुधुविव। स्तुसुधूञ्भ्यः परस्मैपदेषु इति नित्यमिट्। अधावीत्। अधविष्ट। अधोष्ट। अथ परस्मैपदिनः। टुदु उपतापे। दुनो
ति। हि गतौ वृद्धौ च। हिनुमीना। उपसर्गस्थान्निमित्तात्परस्य एतयोर्नस्य णः स्यात्। प्रहिणोति। हेरचङि। अभ्यासात्परस्य हिनोते
र्हस्य कुत्वं स्यात् [illegible] न तु चङि। जिघाय। पृ प्रीतौ। पृणोति। पर्ता। स्पृ प्रीतिपालनयोः। प्रीतिचलनयोरित्यन्ये। चलनं जीवनमिति स्वामी।
स्पृणोति। पस्पार। स्मृ इत्येके। स्मृणोति। पृणोत्यादयस्त्रयोऽपि छान्दसा इत्याहुः। आपॢ व्याप्तौ। आप्नुवन्ति। आप्नुवः। आप्त। आप्नुहि।
ॡदित्वादङ्। आपत्। शकॢ शक्तौ। अशकत्। राध साध संसिद्धौ। राध्नोति। राधो हिंसायां। एत्वाभ्यासलोपौ स्तः। किति लिटि सेटि थ
लि च। अपरेधतुः। रेधुः। रेधिथ। राद्धा। साध्नोति। साद्धा। असात्सीत्। असाद्धां। अथ द्वावनुदात्तौ। अशू व्याप्तौ संघाते च। अश्नु
ते। अश्नोतेश्च। दीर्घादभ्यासादवर्णात्परस्य नुट् स्यात्। आनशे। अशिता। अष्टा। अशिष्यते। अक्ष्यते। आक्षवीत। अक्षीष्ट। आशि

चीष। आक्षिष्ट। आष्ट। आक्षातां। चिघ आस्यं द्वे। स्तिघ्नुते। निष्टिघे। स्तेघिता। अथा गणांतासर स्मेपदिनः। तिकतिग वा। चा स्कंद
ने। तिक्नोति। तिग्नोति। षघ हिंसायां। सघ्नोति। त्रिघृषा प्रागल्भ्ये। धृष्णोति। दधर्ष। धर्षिता। दंभु दंभने। दंभनं दंभः। दभ्नोति। ददंभ।
श्नंथि ग्रंथि दंभि स्वंजीनां लिटः कित्वं वेति व्याकरणांतरं। इत्थं व्याख्यीयत इति कृतं। [redacted] अनिदितामिति नलो
पः। तस्याभीयत्वाद सिद्धत्वेन एत्वाभ्यासलोपयोरप्राप्तौ। देभ आ एत्वाभ्यासलोपौ वक्तव्यौ। देभतुः। ददंभतुः। इदं कित्वं विद
ल्पि द्विवचनमिति न्यासकारादयः। तन्मते लिप्सिप्सिप्स्नु। देभ ददंभिथ। देभेति रूपांतरं बोध्यं। अविद्विवचनमिति न्यासकारा आदि
 मतेनु। ददंभ। ददंभिथ। ददंभे स्खेव। दभ्यात्। ऋधु वृद्धौ। तृप प्रीणनइ त्येके। छन्द आदित्वा स्मात्वं नात् त्नोति। छंदसि। आ गणां
तादधिकारोयं। अस्त्याप्तौ। अश्नोति। दघ घातने पालने च। दघ्नोति। चमु भक्षणे। चम्नोति। रिक्षि चिरि जिरि दाश दृ हिंसायां। रिक्ष्णो
ति क्षिणोति। अयं भाषायामपीत्येके। ततघञ। शास्त्रमतं क्षिणोति। ऋक्षी त्येक एवाजादिरित्यन्ये। ऋक्षिणोति। चिरिणोति।
जिरिणोति। दाश्नोति। दृणोति। वृत्। इति स्वादयः। तुदव्यथने। इतः षट्स्वरितेतः। तुदादिभ्यः शः। तुदति तुदते। तुतोद। तुतोदिथ।
तुतुदे। तोत्ता। अतौत्सीत्। अतुत्त। णुद प्रेरणे। नुदति नुदते। नुनोद। नुनुदे। नोत्ता। दिश अतिसर्जने। अतिसर्जनं दानं। दिशति दिक्षीष्ट।
अदिक्षत। अदिक्षत। भ्रस्ज पाके। ग्रहिज्या। सस्वपां त्वेन जशः। शस्य जश्त्वेन जः। भृज्जति। भृज्जते। भ्रस्जोरोपधयोरमन्यतरस्यां।
भ्रस्जेरेकस्योपधायाश्च स्थाने रमागमो वास्यादार्द्धधातुके। मित्वाद्स्याद चः परः। स्थानषष्ठी निर्देशारोतेपधयोर्निवृत्तिः।
बभर्ज। बभर्जिथ। बभर्ष्ठ। बभर्जे। रमभावे। बभ्रज्ज। बभ्रज्जतुः। बभ्रज्जिथ। स्कोरिति लोपः। व्रश्चेति षः। बभ्रष्ठ। बभ्रज्जे। भष्टा।
भ्रक्ष्यति। भर्ज्यतीति कृते रमागमं बाधित्वा संप्रसारणं पूर्वविप्रतिषेधेन। भृज्ज्यात्। भृज्ज्यास्तां भक्षीष्ट। भ्रक्षीष्ट। अभाक्षीत्। अभ्रा
क्षीत्। अभर्ष्ट। अभ्रष्ट। क्षिप [redacted] प्रेरणे। क्षिपति। क्षिपते। क्षेप्ता। अक्षैप्सीत्। अक्षिप्त। कृष विलेखने। कृषति। कृषते। कृष्टा कर्ष्टा।

कृष्यात्। कृक्षीष्ट। स्पृशमृशकृषेति सिज्वा। पक्षे क्सः। खिचिम्रन्वा। अक्राक्षीत्। अकार्क्षीत्। अकृक्षत्। तङि लिङ्सिचावि
ति कित्वादम्न। अकृष्ट। अकृक्षातां। अकृक्षत। अकृक्षता अकृक्षातां। अकृक्षंत। ऋषी गतौ। परस्मैपदी। ऋषति। आनर्ष।
जुषी प्रीतिसेवनयोः। आत्मनेपदिनश्चत्वारः। जुषते। ओविजी भयचलनयोः। प्रायेणायमुत्पूर्वः। उद्विजते। विजइट्।
विज इट् इत्यादिः प्रत्ययोऽङिद्वत्। उद्विजिता। उद्विजिष्यते। ओलजी ओलस्जी व्रीडे। लजते। लेजे। लज्जते। ललज्जे। अथप
रस्मैपदिनः। ओव्रश्चू छेदने। ग्रहिज्या। वृश्चति। ववृश्च। ववृश्चतुः। ववृश्चिथ। ववृष्ठ। लिट्यभ्यासस्येति संप्रसारणं। रेफ
स्य ऋकारः। उरत्। तस्याचः परस्मिन्निति स्थानिवद्भावान्न संप्रसारणे इति वस्योत्वं न। व्रश्चिता। व्रष्टा। व्रश्चिष्यति। व्रक्ष्य
ति। वृश्च्यात्। अव्रश्चीत्। अव्राक्षीत्। व्यच व्याजीकरणे। विचति। विव्याच। विविचतुः। व्यचिता। व्यचिष्यति। विच्यात्। अव्या
चीत्। अव्यचीत्। व्यचेः कुटादित्वमनसीति तु नेह प्रवर्तते। अनसीति पर्युदासेन कृन्मात्रविषयत्वात्। उछि उंछे। उंछ
ति। उछी विवासे। उच्छति। ऋछ गतीन्द्रियप्रलयमूर्तिभावेषु। ऋच्छत्यृतामिति [illegible]गुणः। द्विहल्ग्रहणस्यानेकहलुपल
क्षणत्वान्नुट्। आनर्च्छ। आनर्च्छतुः। ऋच्छिता। मिच्छ उत्क्लेशे। उत्क्लेशः पीडा। मिमिच्छ। अमिच्छीत्। जर्ज चर्च झर्झ परिभा
षणभर्त्सनयोः। त्वच संवरणे। तत्वाच। ऋच स्तुतौ। आनर्च। उब्ज आर्जवे। उज्झ उत्सर्गे। लुभ विमोहने। विमोहनमाकुलीक
रणं। लुभति। लोभिता। तीषसहलुभेति इड्विकल्पः। लोब्धा। लोभिष्यति। रिफ कत्थनयुद्धनिंदाहिंसादानेषु। रिफति। रिरे
६२ फ। रि[illegible]सेके। भिथुंनविप्रामति भौ विहंति। तृप तृंफ तृप्तौ। आद्यः प्रथमांतः द्वितीयो द्वितीयांतः। द्वावपि द्वितीयांता इत्यन्ये।
तृपति। ततर्प। तर्पिता। स्पृशमृशेति सिज्विकल्पः पौषादिकस्यैव। अङ्पवादत्वात्। नात्र सिच्। अतृपीत्। तृंफति॥
१४ शस्याङित्वादनिदितामिति नलोपः। शेतृंफादीनांनुम्वाच्यः। आदिशब्दः प्रकारे। तेन येऽत्र नकारानुषक्ताः ते तृफादयः। तृंफति ×१

सि॰ नि॰
॥३५॥

तृंफ। तृफ्यात्। तुप तुंप तुफ तुंफ हिंसायां। तुपति। तुंपति। तुफति। तुंफति। दृप दृंफ उत्क्लेशे। प्रथमः प्रथमांतः। द्वितीयांत इत्ये
के। दृपति। दृंफति। दृंफति। ऋफ ऋंफ हिंसायां। ऋफति। आनर्फ। ऋंफति। ऋंफांचकार। गुफ गुंफ ग्रंथे। गुफति। जुगोफ।
गुंफति। जुगुंफ। उभ उंभ पूरणे। उभति। उवोभ। उंभति। उंभांचकार। शुभ शुंभ शोभार्थे। शुभति। शुंभति। दृभी ग्रंथे। दृभति। चृती हिं
साग्रंथनयोः। चर्तिता। से सिचीति वेट्। चर्तिष्यति। चर्त्स्यति। अचर्तीत्। विध विधाने। विधति। वेधिता। जुड गतौ। तवर्गपंचमांतमेके।
जुडति। मरुतो जुनंति। मृड सुखने। मृडति। मर्डिता। पृड च। पृडति। पृण प्रीणने। पृणति। पपर्ण। वृण च। वृणति। मृण हिंसायां।
तुण कौटिल्ये। तुतोण। पुण कर्मणि शुभे। पुणति। मुण प्रतिज्ञाने। कुण शब्दोपकरणयोः। शुन गतौ। द्रुण हिंसागतिकौटिल्येषु। घु
ण घूर्ण भ्रमणे। षुर ऐश्वर्यदीप्त्योः। सुरति। सुषोर। आशिषि सूर्यात्। कुर शब्दे। कुरति। कूर्यात्। अत्र नभकुर्छुरामिति निषेधो न। करो
तेरेव ग्रहणादित्याहुः। खुर छेदने। मुर संवेष्टने। क्षुर विलेखने। घुर भीमार्थशब्दयोः। पुर अग्रगमने। वृहू उद्यमने। दंतोष्ठ्यादिः। प
वर्गीयादिरित्यन्ये। तृहू स्तृहू तृंहू हिंसार्थाः। तृहति। ततर्ह। स्तृहति। तस्तर्ह। तर्हिता। तर्ढा। स्तर्हिता। स्तर्ढा। अतृंहीत्। अताङ्क्षीत्। अ
तार्ढ। इष इच्छायां। इषुगमी ति छः। इच्छति। एषिता। एष्टा। एषिष्यति। इष्यात्। ऐषीत्। मिष स्पर्धायां। मिषति। मेषिता। किल श्वैत्यक्रीडनयोः।
तिल स्नेहे। चिल वसने। चल विलसने। इल स्वप्नक्षेपणयोः। विल संवरणे। दं[illegible]तोष्ठ्यादिः। बिल भेदने। ओष्ठ्यादिः। णिल ग
हने। हिल भावकरणे। शिल षिल उंछे। मिल श्लेषणे। लिख अक्षरविन्यासे। लिलेख। कुट कौटिल्ये। गाङ् कुटादिभ्य इति ङित्वं।
चुकुटिथ। चुकोट। चुकुट। कुटिता। पुट संश्लेषणे। कुच संकोचने। गुज शब्दे। गुड रक्षायां। डिप क्षेपे। छुर छेदने। नभकुर्छुरां
मिति न दीर्घः। छुर्यात्। स्फुट विकसने। स्फुटति। पुस्फोट। मुट आक्षेपप्रमर्दनयोः। त्रुट छेदने। वा भ्राशेति श्यन्वा। त्रुट्यति। त्रुट गत्वेत्रा
ति। तुत्रोट। त्रुटिता। तुट कलहकर्मणि। तुटति। तुतोट। तुटिता। चुट छुट छेदने। जुड बंधने। कड मदे। लुट संश्लेषणे॥ ॥३५॥

कुड घनत्वे। घनत्वं सान्द्रता। चकुडे। कुडिता। कुड बाल्ये। पुड उत्सर्गे। घुट प्रतिघाते। तुड तोडने। तोडनं भेदः। थुड स्थुड संवरणे। नु तोड।
तुस्थोड। खुड छुड इत्येके। स्फुर स्फुल संचलने। स्फुर स्फुरणे। स्फुल संचलने। इत्येके। स्फुरति स्फुलत्यो निर्निविभ्यः। षत्वं वा स्यात्।
निःष्फुरति। निःस्फुरति। स्फर इत्यकारोपधं केचित्पठन्ति। पस्फार। स्फुड चुड व्रुड संवरणे। कुड मड निमज्जन इत्येके। गुरी उद्यमने।
अनुदात्तेत्। गुरते। जुगुरे। गुरिता। णू स्तवने। दीर्घान्तः। परिणतगुल्लेदयः। इतः आतामः परस्मैपदिनः। नुवति। अनुवीत्। धू विधून
ने। धुवति। गु पुरीषोत्सर्गे। जुगुविथ। जुगुथ। गुता। गुष्यति। अगुषीत्। ह्रस्वादङ्गात्। अगुतां अगुषुः। ध्रु गतिस्थैर्ययोः। ध्रुव इति
पाठान्तरं। अघस्य ध्रुवती स्वादि गुवतिवत्। द्वितीयस्तु सेट्। दुध्रुविथ। ध्रुविता। ध्रुविष्यति। ध्रूयात्। अध्रुवीत्। अध्रुविष्टां।
कूङ् शब्दे। दीर्घान्त इति कैयटादयः। कुविता। अकुविष्ट। ह्रस्वान्त इति न्यासकारः [redacted] कुता। अकुत। कृत। कुटादयो वृत्ताः। पृङ्
व्यायामे। प्रायेण व्याङ्पूर्वः। म्रिङ्। इयङ्। व्याप्रियते। व्यापप्रे। व्यापप्राते। व्यापृत। व्यापृषातां। मृङ् प्राणत्यागे। म्रियतेर्लुङ्लिङोश्च।
रा ५ लुङ्लिङोः शितश्च प्रकृतिभूता मृङ स्तङ् नान्यत्र। ङित्वं स्वार्थं। म्रियते। ममार। ममर्थ। मम्रिव। मर्तासि। मरिष्यति। मृषीष्ट। अमृत।
५ लघूपधगुणान अथ परस्मैपदिनः सप्त। रिपि गतौ। अन्तरंगत्वादियङ्। रियति। पियति। रेता। पेता। धि धारणे। क्षि निवासगत्योः। षू प्रेरणे। सुव
ति सविता। कॄ विक्षेपे। किरति। किरतः। चकारः। चकरतुः। करितौ करीता। कीर्यात्। अकारीत्। किरतौ लवने। उपात्किरतेः सुडाग
मः स्यात् छेदे। उपस्किरति। अडभ्यासव्यवायेऽपि सुट् कात्पूर्व इति वक्तव्यं। उपाचस्किरत्। उपचस्कार। हिंसायां प्रतेश्च। उपा
त्प्रतेश्च किरतेः सुट् स्यात् हिंसायां। उपस्किरति। प्रतिस्किरति। गृ निगरणे। अचि विभाषा। गिरते रेफस्य लत्वं वा स्यादजादौ॥
गिरति। गिलति। जगार। जगाल। जगरिथ। जगलिथ। गरिता। गरीता। गलिता। गलीता। दृङ् आदरे। आद्रियते। आद्रियेते। आदद्रे।

वृतो वेति दीर्घविकल्पः ४१७

ग्रहिज्येति संप्रसारणं २

ऋदृशोऽस्य ह्रस्वेनैङागमः

सि·ति· आदद्रिषे। आदर्ता आदरिष्यते। आदृषीष्ट। आदृत। आदृषातां। धृङ् अवस्थाने। ध्रियते। अथ परस्मैपदिनः। प्रछ ज्ञीप्सायां।
॥३६॥ पृच्छति। पप्रच्छ। पप्रच्छतुः। पप्रच्छिथ। पप्रष्ठ। प्रष्टा। प्रक्ष्यति। अप्राक्षीत्। वृत। किरादयो वृत्ताः। सृज विसर्गे। विभाषा सृजिदृशोः। स
सर्जिथ। ससृष्ठ। स्रष्टा। स्रक्ष्यति। सृजिदृशोर्झल्यमकिति। अमागमः। सृज्येत्। सृज्यात्। अस्राक्षीत्। टुमस्जो शुद्धौ। मज्जति। ममज्ज।
मस्जिनशोर्झलि। इति नुम्। मस्जेरन्त्यात्पूर्वो नुम्वाच्यः। संयोगादिलोपः। ममङ्क्थ। ममज्जिथ। मङ्क्ता। मङ्क्ष्यति। अमाङ्क्षीत्। अमाङ्क्तां। मा४
अमाङ्क्षुः। रुजो भंगे। रोक्ता। रोक्ष्यति। अरौक्षीत्। अरौक्तां। भुजो कौटिल्ये। रुजिवत्। छुप स्पर्शे। छोप्ता। अच्छौप्सीत्। रुश रिश
हिंसायां। तालव्यान्तौ। रोष्टा। रोक्ष्यति। रेष्टा। रेक्ष्यति। लिश गतौ। अलिक्षत्। स्पृश संस्पर्शने। स्प्रष्टा। स्पर्ष्टा। स्प्रक्ष्यति स्पर्क्ष्यति। अ
स्प्राक्षीत्। अस्पार्क्षीत्। अस्पृक्षत्। विछ गतौ। गुपूधूपविछ्पणिपनिभ्य आयः। आर्धधातुके वा। विच्छायति। विच्छायांचकार। विविच्छ। वि
श प्रवेशने। विशति विवेश। मृश आमर्शने। आमर्शनं स्पर्शः। अम्राक्षीत्। अमार्क्षीत्। अमृक्षत्। णुद प्रेरणे। कर्त्रभिप्राये विकले
परस्मैपदार्थः पुनः पाठः। षद्ऌ विशरणगत्यवसादनेषु। सीदति। सादि भौवादिकवत्। ऌदित्पाठो नुम्विकल्पार्थः। सीदती। सीदन्ती।
ऽवलादौ पाठस्तु फलार्थः। सादः। स्वरार्थश्च। शबनुदात्तः। शस्तूदात्तः। शद्ऌ शातने। स्वरार्थ एव पुनः पाठः। शातानुनासिकादेः शितः
स्यात्मनेपदोक्तेः। अणपदं त्यजितेतः। मिल संगमे। मिलृ संश्लेषणे इति पठितस्य पुनः पाठः कर्त्रभिप्राये तङर्थः। मिलति। मिलते।
मिमेल। मिमिले। मुच्ऌ मोक्षणे। शे मुचादीनां। नुम् स्यात्। मुंचति। मुंचते। मोक्ता। मुच्यात्। मुक्षीष्ट। अमुचत्। अमुक्त। अमुक्षातां।
लुप्ऌ छेदने। लुंपति। लुंपते। अलुपत्। अलुप्त। विद्ऌ लाभे। विंदति। विंदते। विवेद। विविदे। व्याघ्रभूत्यादिमते सेट्। कोयं। वेदिता। गणेश
भाष्यादिमते ऽनिट्। वेत्ता। परिवेत्ता। परिवेदने। ज्येष्ठं परिहृत्य ज्यष्ठदारानग्नीश्चालब्ध्वा निसर्थः। वृन्तवौ। लिप उपदेहे। उपदेहो वृद्धिः। लिं ॥३६॥

पति। लिंपते। लेप्ता। लिपिसिचीत्यङ्। तङि तु वा। अलिपत्। अलिपत। अलिप्त। षिच क्षरणे। सिंचति। सिंचते। असिचत्। असिचत।
असिक्त। अभिषिंचति। अभ्यषिंचत्। अभिषिषेच। अथ त्रयः परस्मैपदिनः। कृती छेदने। कृंतति। चकर्त्त। कर्त्तिता। कर्त्ति
ष्यति। कर्त्स्यति। अकर्तीत्। खिद परिघाते। खिंदति। चिखेद। खेत्ता। अयं दैन्ये दिवादौ रुधादौ च। पिश अवयवे। पिंशति।
पेशिता। अयं दीपनायामपि। त्वष्टा रूपाणि पिंशतु॥ ॥ इति मुचादयः तुदादयश्च॥ ॥ रुधिर् आवरणे। नवस्येति
तङ् इतश्च। रुधादिभ्यः श्नम्। शपोपवादः। मित्वादंत्यादचः परः। नित्यत्वात् गुणं बाधते। रुणद्धि। श्नसोरल्लोपः। णत्व
स्यासिद्धत्वादनुस्वारः। परसवर्णः। तस्यासिद्धत्वाण्णत्वं न। न पदांतेति सूत्रे अनुस्वारसवर्णयोरल्लोपो न स्थानिवत्। रुन्धः।
रुन्धंति। रुरोध। रुरुधे। रोद्धा। रोत्स्यति। रोत्स्यते। रुणद्धु। रुन्धात्। रुन्द्धि। रुणधानि। रुणधै। अरुणत्। अरुंधां। अरुणत्। अरुणः।
अरुणधं। अरुधत्। अरौत्सीत्। अरुद्ध। भिदिर् विदारणे। भिनत्ति। भिन्ते। भेत्ता। भेत्स्यति। भेत्स्यते। अभिनत्। अभिनः।
अभिनदं। अभिंत। अभिदत्। अभैत्सीत्। अभित्त। छिदिर् द्वैधीकरणे। अच्छिदत्। अच्छैत्सीत्। अच्छित्त। रिचिर् विरेचने। रि
णक्ति। रिङ्क्ते। रिरेच। रिरिचे। रेक्ता। अरिणक्। अरिचत्। अरैक्षीत्। अरिक्त। विचिर् पृथग्भावे। विनक्ति। विङ्क्ते। क्षुदिर् संपे
षणे। क्षुणत्ति। क्षुन्ते। क्षोत्ता। अक्षुदत्। अक्षौत्सीत्। अक्षुत्त। युजिर् योगे। योक्ता। उछृदिर् दीप्तिदेवनयोः। छृणत्ति। छृन्ते।
चच्छर्द। सेऽसिचीति वेट्। चच्छर्दिषे। चच्छृत्से। छर्दिता। छर्दिष्यति। छर्त्स्यति। अच्छृदत्। अच्छर्दीत्। अच्छर्दिष्ट। उतृदिर् हिं
सानादरयोः। तृणत्ति। सादि। छृणत्तिवत्। कृती वेष्टने। परस्मैपदी। कृणत्ति। आर्द्धधातुके तौदादिकवत्। ञिइंधी दीप्तौ। त्र
यमात्मनेपदिनः। श्नान्नलोपः। श्नमः परस्य नस्य लोपः स्यात्। श्नसोरल्लोपः। इंधे। इंत्से। इंधिता। इन्धे। ऐंधा। ऐंस्था। B।

सि. ति.
॥३७॥

खिद दैन्ये। खिंत्ते। खेत्ता। विद विचारणे। विंत्ते। वेत्ता। अथ परस्मैपदिनः। शिष्लृ विशेषणे। शिनष्टि। शिंष्टः। शिंषंति। शिशेषिथ॥
शेष्टा। शेक्ष्यति। हेर्धिः। जस्त्वं। छत्वं। झरो झरीति वा ड्लोपः। अनुस्वारपरसवर्णौ। शिण्ड्ढि। शिनषाणि। अशिनट्। लृदि
त्वादङ्। अशिषत्। पिष्लृ संचूर्णने। पिनष्टि। पिंष्टः। पिंषंति। पिपेषिथ। भंजो आमर्दने। भनक्ति। बभंजिथ। बभंक्थ॥०
भंङ्क्ता। भुज पालनाभ्यवहारयोः। भुनक्ति। भोक्ता। भोक्ष्यति। अभुनक्। तृह हिसि हिंसायां। तृणह इम्। तृहः श्न
मि कृते इमागमः स्याद्धलादौ पिति। तृणेढि। तृण्ढः। ततर्ह। तर्हिता। अतृणेट्। हिनस्ति। जिहिंस। हिंसिता। उंदी क्लेदने।
उनत्ति। उन्तः। उंदंति। उंदांचकार। औनत्। औन्तां। औन्दन्। औनः। औनत्। औनदं। अंजू व्यक्तिम्रक्षणगतिकांति
षु। अनक्ति। अंक्तः। अंजंति। आनंज। आनंजिथ। आनंक्थ। अंङ्क्ता। अंजिता। अङ्ग्धि। अनजानि। आनक्।
अंजेः सिचि। अंजेः सिचो नित्यमिट् स्यात्। आंजीत्। तंचू संकोचने। तनक्ति। तङ्क्ता। तंचिता। ओविजी भयचल
नयोः। विनक्ति। विङ्क्तः। विजइडिति ङित्त्वं। विविजिथ। विजिता। अविनक्। अविजीत्। वृजी वर्जने। वृणक्ति। वर्जि
ता। पृची संपर्के। पृणक्ति। पपर्च॥ ॥इति रुधादयः॥ ॥छ॥ अथ सप्त स्वरितेतः। तनु विस्तारे। तनादिकृञ्भ्य उः॥
तनोति। तन्वः। तनुवः। तनुते। ततान। तेने। तनु। अतनीत्। तनादिभ्यस्तथासोः। तनादेः सिचो वा लुक् स्यात् तथासोः।
थासा साहचर्यादेकवचनं तशब्दो गृह्यते। तेनेह न। अतनिषत। अतानिष्ट। अनुदात्तोपदेशेत्यनुनासिकलोपः॥
तङि। अतत। अतनिष्ट। अतथाः। अतनिष्ठाः। षणु दाने। सनोति। सनुते। ये विभाषा। सायात्। सन्यात्। जनसनखनेत्यात्वं। अ गणेश
सात। असनिष्ट। असाथाः। असनिष्ठाः। क्षणु हिंसायां। क्षणोति। क्षणुते। ह्म्यन्तेति न वृद्धिः। अक्षणीत्। अक्षत। अक्षणि ॥३७॥

अतानीत्।

ष्ट। अक्षथाः। अक्षेणिष्ठाः। क्षिणु च। उप्रत्ययनिमित्तो लघूपधगुणः। संज्ञापूर्वकोविधिरनित्य इति न भवतीत्यात्रेयादयः। भवत्येवे
त्यन्ये। क्षिणोति। क्षेणोति। क्षेणिताक्षि। क्षेणितासे। अक्षेणीत्। अक्षित। अक्षेणिष्ठ। ऋणु गतौ। ऋणोति। अर्णोति। अर्णुतः।
अर्णवानि। आनर्ण। आनृणे। अर्णिताक्षि। आर्णीत्। आर्त। आर्णिष्ठ। आर्थाः। आर्णिष्ठाः। तृणु अदने। तृणोति। तर्णोति।
तृणुते। तर्णुते। घृणु दीप्तौ। जघर्ण। जघृणे। अथ द्वौ वनु याचने। वनुते। ववने। चान्द्रमते परस्मैपदी। वनोति व
वान। मनु अवबोधने। मनुते। मेने। डुकृञ् करणे। करोति। अत उत्सार्वधातुके। कुरुतः। यण्। न भकुर्छुरामिति न दीर्घः।
कुर्वन्ति। नित्यं करोतेः। करोतेः प्रत्ययोकारस्य नित्यं लोपः स्यात् म्वोः परयोः। कुर्वः। चकर्थ। चकृव। कर्ता। करिष्यति। ये च। कृ
ञ उलोपः स्याद्यादौ प्रत्यये परे। कुर्यात्। आशिषि किं। क्रियात्। कृषीष्ट। अकार्षीत्। तनादिभ्य इति लुकोऽभावो ह्रस्वादङ्गादि
ति सिचो लोपः। अकृत। अकृथाः। संपरिभ्यां करोतौ भूषणे। समवाये च। संपरिपूर्वस्य करोतेः सुट् स्याद्भूषणे संघे वा
र्थे। संस्करोति। अलंकरोतीत्यर्थः। संस्कुर्वन्ति। संघीभवन्तीत्यर्थः। संपूर्वस्य क्वचिदभूषणेपि सुट्। संस्कृतं भक्षा इति ज्ञा
पकात्। परिनिविभ्यः। परिष्करोति। सिवादीनां वा। पर्यष्कार्षीत्। पर्यस्कार्षीत्। उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु।
उपात्कृञः सुट् स्यादेष्वर्थेषु वा आगुत्क्रयोरर्थयोः। प्रतियत्नो गुणाधानं। विकृतमेव वैकृतं विकारः। वाक्यस्याध्याहारः।
आकांक्षितैकदेशपूरणं। उपस्कृता कन्या। अलंकृतेत्यर्थः। उपस्कृता ब्राह्मणाः समुदिता इत्यर्थः। एधोदकस्योपस्कुरु
ते। गुणाधानं करोतीत्यर्थः। उपस्कृतं भुंक्ते। विकृतमित्यर्थः। उपस्कृतं ब्रूते। वाक्याध्याहारेण ब्रूत इत्यर्थः। सुट्कात्पूर्वः। अड्भ्या
सव्यवायेपीत्युक्तेः संचस्कार। कात्पूर्व इत्यादि भाष्ये प्रत्याख्यातं। तथाहि। पूर्वं धातुरुपसर्गेण युज्यते ततोऽन्तरंगत्वात्सुट्। ततो

सि० ति०
॥ ३८ ॥

त्रितां । एवं च ऋतश्च संयोगादेर्गुणः । संचस्करतुः । ऋस्तस्य सूत्रे ऋतो भारद्वाजस्येति सूत्रे वसस्त्रोऽस्पुट इति वक्तव्यं तेन
स्सस्कृत्वा स्वरस्येट् । संचस्करिथ । संचस्करिव । गुणोर्तिइति सूत्रे नित्यं छंदसीति सूत्राच्चित्यमित्यनुवर्तते । नित्यं यः सं
योगस्तस्ये स्यर्थात्सुटि गुणो न । संस्क्रियात् । ऋतश्च संयोगादेरिति लिङ्सिचोर्नेट् । एकाच उपदेशोदितिसूत्राद्ग्रुप
देशादित्यनुवर्त्य उपदेशे यः संयोगादिरिति व्याख्यानात् । संस्कृषीष्ट । समस्कृत । समस्कृषातां ॥ ॥ इति तनादयः ॥ ॥
डुक्रीञ् द्रव्यविनिमये । क्र्यादिभ्यः श्ना । क्रीणाति । ई हल्यघोः । क्रीणीतः । ईत्वात्पूर्वं श्नारंतादेशः परत्वान्नित्यत्वाद
तरंगत्वाच्च । एवं श्नस्याज्ञावः । श्नाभ्यस्तयोरात्यालोपः । क्रीणंति । क्रिणीते । क्रीणाते । क्रीणते । चिक्राय । चिक्रिय
तुः । चिक्रयिथ । चिक्रेथ । चिक्रियिव । चिक्रियिषे । क्रेता । क्रेष्यति । क्रीयात् । क्रेषीष्ट । अक्रैषीत् । अक्रेष्ट । प्रीञ् तर्पणे
कांतौ च । कांतिः कामना । प्रीणाति । प्रीणीते । श्रीञ् पाके । मीञ् हिंसायां । हिनुमीना । प्रमीणाति । प्रमीणीतः । मीना
ति मिनोतीत्येज्विषये आत्वं । ममौ । मिम्यतुः । ममिथ । ममाथ । मिम्ये । माता । मास्यति । मीयात् । मासीष्ट । अमासी
त् । अमासिष्टां । अमास्त । षिञ् बंधने । सिनाति । सिनीते । सिषाय । सिष्ये । सेता । स्कुञ् आप्रवणे । स्तंभुस्तुंभुस्कंभु
स्कुंभुस्कुभ्यः श्नश्च । चात् श्ना । स्कुनोति । स्कुनुते । स्कुनाति । स्कुनीते । चुस्काव । चुस्कुवे । स्कोता । अस्कौषीत् । अस्को
ष्ट । स्तंभ्वादयश्चत्वारः सौत्राः ॥ सर्वे रोधनार्था इत्येके । माधवस्तु प्रथमतृतीयौ स्तंभार्थौ । द्वितीयो निष्कोषणार्थः । च
तुर्थो धारणार्थ इत्याह । सर्वे परस्मैपदिनः ॥ न्कोपः । विष्टभ्नोति । विष्टभ्नाति । अवष्टभ्नोति । अवष्टभ्नाति । अवतष्टंभ । गणेश
ऽद्दस्तंभि सइ्वा । व्यष्टभत् । व्यष्टंभीत् । स्तभ्नोति स्तभ्नाति । विस्कभ्नाते रिति सः । वेः परस्य स्कभ्नातेः सस्य षः स्यात् । ॥ ३८ ॥

अवाच्चालंबनाविदूर्ययोः ॥

विष्कभ्नोति। विष्कभ्नाति। स्कुभ्नोति। कुभ्नाति। हलः श्नः शानज्झौ। हलः परस्य श्नः शानजादेशः स्याद्धौ परे। स्तभान। स्तुभान।
स्कभान। स्कुभान। पक्षे स्तभ्नुहि। इत्यादि। युञ् बंधने। युनाति। युनीते। योता। क्नूञ् शब्दे। क्नूनाति। क्नूनीते। क्नविता। द्रूञ् हिंसा
यां। द्रूणाति। द्रूणीते। पूञ् पवने। प्वादीनां ह्रस्वः। शिति परे। पुनाति। पुनीते। पविता। लूञ् छेदने। लुनाति। लुनीते। स्तॄञ् आ
च्छादने। स्तृणाति। स्तृणीते। तस्तार। तस्तरतुः। स्तरिता। स्तरीता। स्तृणीयात्। स्तृणीतां। आशिषि स्तीर्यात्। लिङ्सिचोरिति
वेट्। न लिङि। वृतइटो लिङि दीर्घो न स्यात्। स्तरिषीष्ट। उश्चेति कित्वं। स्तीर्षीष्ट। सिचि च परस्मैपदेषु इति न दीर्घः। अ
स्तारीत्। अस्तारिष्टां। अस्तरिष्ट। अस्तरीष्ट। अस्तीर्ष्ट। कॄञ् हिंसायां। कृणाति। कृणीते। चकार। चकरे। वृञ् वरणे॥ ऋच्छत्यॄतां
वृणाति। वृणीते। ववार। ववरे। वरिता। वरीता। आशिषि। उदोष्ठ्यपूर्वस्य। वूर्यात्। वरिषीष्ट। वूर्षीष्ट। अवारीत्। अवा मितिगुणः।
रिष्टां। अवरिष्ट। अवरीष्ट। अवूर्ष्ट। धूञ् कंपने। धुनाति। धुनीते। दुधविथ। दुधोथ। दुधुविव। धोता। धविता। स्तुसुधूञ्भ्य इती
ट्। अधावीत्। अधविष्ट। अधोष्ट। अथ षष्ठ्यन्ताः परस्मैपदिनः। शॄ हिंसायां। शॄदॄप्रां ह्रस्वो वेति ह्रस्वपक्षे यण्। अन्यदा ऋ
च्छत्यृतामिति गुणः। शश्रतुः। शशरतुः। ऋकः किति तिनिषेधस्य ऋदिनियमेन बाधः। शशरिव। शश्रिव। शरिता। श
रीता। शृणीहि। शीर्यात्। अशारिष्टां। पॄ पालनपूरणयोः। पप्रतुः। पपरतुः। आशिषि। पूर्यात्। वॄ वरणे। भरण इत्येके। भॄ
भर्त्सने। भरणे इत्येके। मॄ हिंसायां। मृणाति। ममार। दॄ विदारणे। ददरतुः। दद्रतुः। जॄ वयोहानौ। झॄ इत्येके। धॄ इत्यन्ये। नॄ नये। कॄ
हिंसायां। ऋ गतौ। ऋणाति। आरांचकार। अरिता। अरीता। आर्णात्। आर्णीतां। ईर्यात्। आरीत्। आरिष्टां। गॄ शब्दे। ज्या वयोहानौ।

ग्स. ति. ग्र हिंस्या। हलः। अंगावयवाद्धलः परं यत्संप्रसारणं तदंतांगस्य दीर्घः स्यात्। इति दीर्घे कृते प्वादीनां ह्रस्वः। ज्ञिनाति। जिज्यौ। जिज्यतुः। री
।।३५।। गतिरेषणयोः। रेषणं वृकशब्दः। ली श्लेषणे। विभाषा लीयतेरिति एचि विषये आत्वं वा। लिलौ। लिलाय। लाता। लेता। व्ली वरणे। व्लिनाति।
प्लीगतौ। वृत् ल्वादयो वृत्ताः। प्वादयोपीत्येके। वृ वरणे। भ्री भये। श्रीणाति भेदरित्येके। क्षी हिंसायां। एते त्रयः प्लाणं ह्रस्वः। केचित्तु न।
ज्ञा अवबोधने। ज्ञाजनोर्जा। जानाति। दीर्घनिर्देशसामर्थ्यान्न ह्रस्वः। बंध बंधने। बध्नाति। बबंधिथ। बबंध। बंधा। बंधारौ। भंत्स्य
ति। बधान। अभान्त्सीत्। द्रर्वद्धासिद्धमिति भषभावात्सर्वप्रलिसिद्लोपः। प्रत्ययलक्षणेन स्तादिप्रत्ययमाश्रित्य भषभावो न प्रत्य
यलक्षणं प्रति सिद्लोपस्यासिद्धत्वात्। अबांद्धां। अभांत्सुः। वृङ् संभक्तौ। वृणीते। ववृे। वरषे। ववृढ्वे। वरिता। वरीता। अवरि
त~ ष्ट। अवरीष्ट। अवृ। श्रंथ विमोचन प्रतिहर्षयोः। इतः परस्मैपदिनः। श्रथ्नाति। श्रंथिथ श्रेथीत्यादिना कित्त्वपक्षे एत्वाभ्यासलोपा
वप्यत्र वक्तव्यौ। इति हरदत्तादयः। श्रेथतुः। श्रेथुः। इदं [illegible] त्वं विचिंतामपीति सुधाकरमते। श्रेथिथ। अस्मिन्नपि पक्षे णलि
शश्राथ। उत्तमे तु शश्राथ शश्रथेति माधवः। त त्रयमन्तलं मगयं। मन्थ विलोडने। ग्रंथ ग्रंथ संदर्भे। अर्थभेदात्पुनः पा
ठः। रूपं तूक्तं। कुंथ संश्लेषणे। संक्लेश इत्येके। कुथ्नाति। चुकुंथ। कुथेति दुर्गः। चु[illegible]कोथ। मृद क्षोदे। मृद्नाति। मृदाथ। मृडच। न४
अयं सुखेपि। मृडत्वं। मृड्नाति। गुध रोगे। गुध्नाति। कुष निष्कर्षे। कुष्णाति। कोषिता। निरः कुषः। निरः परात्कुषो वलादेरार्धधातु
कस्य इड्वा स्यात्। निष्कोषिता। निष्कोष्टा। निरकोषीत्। निरकुक्षत्। क्षुभ संचलने। क्षुभ्नादिषु च। क्षुभ्नाति। क्षुभ्नीतः। क्षो गणेश
भिता। क्षुभ्नाण। णभ तुभ हिंसायां। नभ्नाति। तुभ्नाति। नभते। तोभते। इति शपि। नभ्यति। तुभ्यति इति श्यनि। क्लिशू विबाधने। ।।३५।।

श्नादिति भुत्व निषेधः। क्लिश्नाति। क्लेशिता। क्लेष्टा। अक्लेशीत। अक्लिक्षत। अश भोजने। अश्नाति। आश। उध्रस उंछे। उकार इत्।
ध्रस्नाति। [redacted] उकारो धात्वयव इत्येके। उध्रसां चकार। इष आभीक्ष्ण्ये। पौनः पुन्यं भृशार्थो वा आभीक्ष्ण्यं। इष्णाति।
एषिता। तीष सहेत्यत्र सहिना साहचर्यात् इकार विकरणस्य नौ दादिकस्येव इषेर्ग्रहणं। ननु इष्यतीत्यभाष्योदाहृत्य कुः। वस्तुन
स्तु इच्छाते रपि इट् विकल्प उचितः। तथा च वार्तिकं। इषेस्तकारे श्यन् प्रत्ययात् प्रतिषेधः इति। विष विप्रयोगे। विष्णाति॥
वेष्टा। प्रुष प्लुष स्नेहन सेवन पूरणेषु। प्रुष्णाति। प्लुष्णाति। पुष पुष्टौ। पोषिता। मुष स्तेये। मोषिता। खच भूत प्रादुर्भावे। भूत
प्रादुर्भावे इति क्नानेस्त्वक्लिः। खच्नाति। वातोयमित्येके। खवेः अनुनासिके चेत् संतु कस्य च स्य व स्य च क्रमात् श ऊ ठ् एते वादे
शौस्तो ऽनुनासिके क्वौ झलादौ च क्लिति। खौनाति। चखाव। खविता। च्छ न चः परत्वाद् ठिकरु तेलं हेते लाभावा ऊठ्न च। खौ
नीहि। हिठ च। वा छत्वं। हि ठू एण्ति। ग्रह उपादाने। स्वरितेत्। ग्रह्णिज्या गृ ह्णाति। गृह्णीते। ग्रहोऽलिटि दीर्घः। एकाचो यद्दे धेर्ह
तस्येटो दीर्घः स्यान्न तु लिटि। ग्रहीता। लिटि तु। जग्रहिथ। गृह्यात्। ग्रहिषीष्ट। ह्म्यंतेति न वृद्धिः। अग्रहीत्। अग्रहीष्टां। अ
ग्रहीष्ट। अग्रहीषातां। इति क्र्यादयः॥ ॥ चुर स्तेये। सत्याप पाश रूप वीणा तूल श्लोक सेना लोम त्वच वर्म वर्ण चूर्ण चुरा
दिभ्यो णिच्। एभ्यो णिच् स्यात्। चूर्णांतेभ्यः प्रातिपदिकाद्धात्वर्थ इत्येव सिद्धं। तेषामिह ग्रहणं प्रपंचार्थं। चुरादिभ्यस्तु स्वा
र्थे। पुगंते ति गुणः। सनाद्यंता इति धातुत्वं। तिप् शपादि। गुणायादेशौ। चोरयति। णिचश्च। णिजंतादात्मनेपदं स्यात् कर्तृगामिनि
क्रियाफले। चोरयते। चोरयामास। चोरयिता। णेरनिटि। चोर्यात्। चोरयिषीष्ट। णिश्रीति चङ्। णौ चङ्युपधायाः ह्रस्वः। द्वित्वं। हला
दिः शेषः। दीर्घो लघोरित्यभ्यासदीर्घः। अचूचुरत्। अचूचुरत। चिति स्मृत्यां। चिंतयति। [redacted] अचिचिंतत्। चिंतेति पठि

तयोरिद्विकरणं णिचः पाक्षिकत्वे लिंगं तेन चिंत्यात् चिंत्यते इत्यादौ नलोपो न। चिंतति। चिंतेत्। एतच्च ज्ञापकं सामान्यापेक्षमित्ये
के। अत एव कहलइत्यत्र यत्ति कुंत्राङ्गणान्तुः जगणुः इत्युदाहृतत्वात्। विशेषापेक्षमित्यपरे। अत एवाध बाहेत्यस्य न वैयर्थ्यं।
यत्रि संकोचे। यंत्रयति। यंत्रयते। यंत्रेति पठितुं शक्यं। यत्तु इदित्करणं यंत्रतीति माधवेनोक्तं तच्चिंत्यं। एवं कुद्रि तत्रि मत्रि वुं। स्फु
डि परिहासे। स्फुंडयति। इदित्करणं स्फुंडति। स्फुटीति पाठांतरं। स्फुटयति। लक्ष दर्शनांकनयोः। कुद्रि अनृतभाषणे। कुंद्रयति।
लड उपसेवायां। लाडयति। मिदि स्नेहने। मिंदयति। मिंदति। ओलडि उत्क्षेपणे। ओलंडयति। ओलंडति। ओकारइदित्येके। लं
डयति। लंडति। उकारादिरित्यन्ये। जल अपवारणे। लज इत्येके। पीड अवगाहने। पीडयति। भ्राजभासभाषदीपजीवमीलपी
डामन्यतरस्यां। एषामुपधाया ह्रस्वो वा स्याच्चङ्परे णौ। अपीपिडत। अपिपीडत। नट अवस्यंदने। अवस्पंदनं नाट्यं। श्रथ प्रय
त्ने। प्रस्थाने इत्येके। बध संयमने। बाधयति। बंधेति चांद्राः। पॄ पूरणे। पारयति। दीर्घोच्चारणं णिचः पाक्षिकत्वे लिंगं। तद्धि सेट्त्वा
य। एवं च पणति पिपर्ति पिपरिते इत्यादिसिद्धावपि परति परत इत्यादिसिद्धिः फलं। पारयति। ऊर्ज बलप्राणनयोः। पक्ष
परिग्रहे। वर्ण प्रेरणे। वर्णवर्णन इत्येके। प्रथ प्रख्याने। प्राथयति। नान्ये मितोऽहेताविति वक्ष्यमाणत्वान्नास्य मित्त्वं। अत्स्म
हृत्वरप्रथम्रदस्तृस्पशाम्। एषामभ्यासस्य अकारोऽत् आदेशः स्याच्चङ्परे णौ। इत्वापवादः। अपप्रथत्। पृथ प्रक्षेपे। पर्थय
ति। ऊर्जृत उपधाया ऋवर्णस्य स्थाने ऋत्स्याद्वा चङ्परे णौ। इ[illegible]पवादः। अपीपृथत्। अपपर्थत्। पथ इत्येके। पाथय
ति। षंब संबंधने। संबयति। असससंबत्। शंब च। अशशंबत्। सांब इत्येके। भक्ष अदने। कुट्ट छेदनभर्त्सनयोः। पूरण इत्येके।
कुट्टयति। पुट्ट चुट्ट अल्पीभावे। अट्ट षुट्ट अनादरे। अट्टयति। अयं दोपधः। चुलस्याविकृतान्नद्रादिति निषेधः। आट्टिटत्।

ररारामउ

न्द्रा।

लुंठ स्तेये। लुंठयति। लुंठतीति तु लुठि स्तेय इति भौवादिकस्य। शठ श्वठ असंस्कारगत्योः। श्वठि इत्येके। तुजि पिजि हिंसाबला
दाननिकेतनेषु। तुंजयति। पिंजयति। इदित्करणात्तुंजति पिंजति। तुज पिज इति केचित्। लजि लुजि इत्येके। पिस गतौ। पेसयति।
पेसतीति त्वपिगतेः। षांत्व सामप्रयोगे। श्वल्क वल्क परिभाषणे। ष्णिह स्नेहने। स्फिट इत्येके। स्मिट अनादरे। अयोपदेशत्वान्न
षः। असिस्मिटत्। स्मिङ् अनादरे इत्येके। ङित्त्वस्यावयवेऽचरितार्थत्वात् णिजंतात्तङ्। स्माययते। श्लिष श्लेषणे। पथि
गतौ। पंथयति। पंथति। पिच्छ कुट्टने। छदि संवरणे। छंदयति। छंदति। श्रण दाने। प्रायेणायं विपूर्वः। विश्राणयति। तड आ
घाते। ताडयति। खड खडि कडि भेदने। खाडयति। खंडयति। खंडति। कंडयति। कंडति। कुडि रक्षणे। गुडि वेष्टने। रक्षणे
इत्येके। कुठि इत्यन्ये। अवकुंठयति। अवकुंठति। गुठि इत्यपरे। खुडि खंडने। वटि विभाजने। वडि इत्येके। मडि भूषायां ह
र्षे च। भडि कल्याणे। छर्द वमने। पुस्त बुस्त आदरानादरयोः। चुद संचोदने। नक्क धक्क नाशने। णोपदेशलक्षणे पर्यु
दस्तोऽयं। प्रनक्कयति। चक्क चुक्क व्यथने। क्षल शौचकर्मणि। तल प्रतिष्ठायां। तुल उन्माने। तोलयति। अतूतुलत्। कथं तुल
यति। तुलना इत्यादि। अतुलोपमाभ्यामिति निपातनादंतस्य तुलाशब्दस्य सिद्धौ ततो णिच्। दुल उत्क्षेपे। पुल महत्त्वे।
चुल समुच्छ्राये। मूल रोहणे। कल विल क्षेपे। बिल भेदने। तिल स्नेहने। चल भृतौ। पाल रक्षणे। लूष हिंसायां। शुल्ब माने।
शूर्प च। चुट छेदने। मुट संचूर्णने। पडि पसि नाशने। पंडयति। पंडति। पंसयति। व्रज मार्गसंस्कारगत्योः। शुल्क अतिसर्ज
ने। चपि गत्यां। चंपयति। चंपति। क्षपि क्षांत्यां। क्षंपयति। क्षंपति। क्षजि कृच्छ्रजीवने। श्वर्त गत्यां। श्वभ्र च। ज्ञप मिच्च। अयं
ज्ञाने ज्ञापने च वर्तते। मितां ह्रस्वः। मितामुपधाया ह्रस्वः स्याण्णौ परे। ज्ञपयति। यम च परिवेषणे। चान्मित्। परिवेषणमि

ह्वेष्टनं। नतुभोजना। नाविवेष्टना। यमयति चंद्रे। परिवेषवतेइत्यर्थः। चहपरिकल्कने। चहयति। अचीचहत्। कथादीवस्व
मालस्यतु अदंतत्वेनाग्लोपित्वाद्दीर्घसन्वद्भावौन। अचचहत्। चपइत्येके। चपयति। रहत्यागइत्येके। अररहत्। कथा
देरत्व अररहत्। बलप्राणने। बलयति। चिञ्चयने। चिस्फुरोर्णौ। आत्वंवास्यात्। अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातांपुक् णौ।
लघांपुक्स्यात्णौ। चपयति। चययति। त्रिव्रणसामर्थ्यादस्यणिज्विकल्पः। चयति। चयते। प्रणिचययति। प्रणिचपति।
नात्वेमितोहेतौ। अहेतौस्वार्थेणिचिज्ञपादिभ्योऽन्येमितोनस्युः। तेनज्ञामादीनाममेतत्वप्रयुक्तंमित्वंन। घट्टचलने।
मुस्तसंघाते। खट्टसंवरणे। षट्टस्फिट्टचुबिहिंसायां। पलसंघाते। पलंइत्येके। पुलेत्यन्ये। पुंसअभिवर्द्धने। टकिबंधने।
टंकयति। टंकति। धूसकांतिकरणे। दंत्यांतः। मूर्द्धन्यांतइत्येके। तालव्यांतइत्यपरे। कीटवर्णे। चूर्णसंकोचने। पूजपूजा
यां। अर्कस्तवने। तपनेइत्येके। शुठआलस्ये। शुठिशोषणे। शुंठयति। शुंठति। जुडप्रेरणे। गजमार्जशब्दार्थौ। गाजयति। मा
र्जयति। मर्चच। मर्चयति। घृप्रस्रवणे। स्रावणइत्येके। पचिविस्तारवचने। पंचयति। पंचति। पंचतेइतिव्यक्तार्थस्यशापिग
तं। तिजनिशाने। तेजयति। कृतसंशब्दने। उपधायाश्च। धातोरुपधाभूतस्यऋतइत्स्यात्रपरत्वं। उपधायांचेतिदीर्घः। की
र्तयति। उर्द्दत्। अचीकृतत्। अचिकीर्तत्। वर्द्धछेदनपूरणयोः। कुबिछादने। कुंबयति। कुंबति। कुभिइत्येके। लुबितुबि
अदर्शने। अर्दनइत्येके। ह्लपव्यक्तायांवाचि। क्लपइत्येके। चुटिछेदने। इलप्रेरणे। एलयति। ऐलिलत्। म्रक्षम्लेछने। म्लेछअ
व्यक्तायांवाचि। ब्रूसबर्हहिंसायां। केचिदिहगर्जगर्द्दशब्दे। गर्धअभिकांक्षायामितिपठंति। गुर्दपूर्वनिकेतने। जसिरक्ष
णे। मोक्षणइतिकेचित्। जंसयति। जंसति। ईडस्तुतौ। जसुहिंसायां। पिडिसंघाते। हृषरोषे। रुटइत्येके। डिपक्षेपे। ष्टुपसमु

क्षुये। आकुस्मादात्मनेपदिनः। कुस्म नाम्नो वेति वक्ष्यते। तमभिव्याप्येत्यर्थः। अकर्तृगामिफलार्थमिदं। चित संचेतने। चेत
यते। अचीचितत। दशि दंशने। दंशयते। अददंशत। इदित्वान्निज भावे। दंशति। आकुस्मीयमात्मनेपदं णिच्संनियोगे नै
वेति व्याख्यातारः। नलोपे संनिसाहचर्यात्स्वादेरेव ग्रहणं। दशि दर्शनदंशनयोः। दंसयते। दंसति। दसेत्येके। डप डि
प संघाते। तत्रि कुटुंब धारणे। तंत्रयते। वांछाधातुद्वयमिति मत्वा कुटुंबयतेइत्युदाहरंति। मत्रि गुप्तपरिभाषणे। स्पश ग्र
हणसंश्लेषणयोः। तर्ज भर्त्स तर्जने। बस्त गंध अर्दने। बस्तयते। गंधयते। [redacted]। विष्क हिंसायां। हिष्केत्येके। निष्क परिमा
णे। लल ईप्सायां। कूण संकोचने। तूण पूरणे। भ्रूण आशाविशंकयोः। शठ श्लाघायां। यक्ष पूजायां। स्यम वितर्के। गूर
उद्यमने। शम लक्ष आलोचने। नान्येमितइति मित्त्वनिषेधः। शामयते। कुत्स अवक्षेपणे। त्रुट छेदने। कुटइत्येके। गल स्रव
णे। भल आभंडने। कूट आप्रदाने। अवसादइत्येके। कुट्ट प्रतापने। वंचु प्रलंभने। वृष शक्तिबंधने। शक्तिबंधनं प्रजननसाम
र्थ्यं। शक्तिसंबंध आवर्षयते। मद तृप्तियोगे। दिवु परिकूजने। गृ विज्ञाने। गारयते। विद चेतनाख्याननिवासेषु। वेदयते। स
त्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे। विंदते विंदति प्राप्तौ श्यन्लुक्श्नम्शेष्विदं क्रमात्। मन स्तंभे। मानयते। यु जुगुप्सायां।
यावयते। कुस्म नाम्नो वा। कुस्मेति धातुः कुत्सितस्मयने वर्तते। कुस्मयते। अचुकुस्मत। अथवा कुस्मेति प्रातिपदिकं। ततो
धात्वर्थे णिच्। इत्याकुस्मीयाः ४। चर्च अध्ययने। बुक्क भाषणे। शब्द उपसर्गादाविष्कारे च। चाद्भाषणे। प्रतिशब्दयति। प्र
तिश्रुतमाविष्करोतीत्यर्थः। अनुपसर्गाद्वा। आविष्कारे इत्येके। शब्दयति। कण निमीलने। काणयति। णौ चङ्युपधाया
ह्रस्वः। काण्यादीनां वेति विकल्पने। अचीकणत्। अचकाणत्। जभि नाशने। जंभयति। षूद क्षरणे। सूदयति। असूषुदत्।

सि॰ति॰ जसु ताडने। जासयति। जसति। पश बंधने। पाशयति। अम रोगे। आमयति। नान्ये मितइति निषेधः। अम गत्यादो इत्यपि ज्ञातः।
॥४२॥ तस्माद्धेतुमण्णौ आमयति। न कम्यमिचमामितिमि त्वनिषेधः। चट स्फुट भेदने। विकासे ज्ञाज्ञापोः स्फुटति स्फोटते इत्युक्तं। घट
संघाते। घाटयति। हंत्यर्थाश्च। नवगण्यामुक्ता अपि हंत्यर्थाः स्वार्थे णिचं लभंते इत्यर्थः। दिवु मर्दने। कुदित्वाद्देवती स्यपि। अर्द
प्रतियत्ने। अयमर्थांतरेपि। ऽध्यमर्दयति। घुषिर् विशब्दने। घोषयति। घुषिर विशब्दनइति सूत्रेऽविशब्दनइति निषेधाल्लुंगा
द्विस्ये स्यलिच्। घोषति। इरित्वाद्ङा। अघुषत्। अघोषीत्। ल्यंतस्य तु। अजूघुषत्। आङः क्रंद सातत्ये। भौवादिकः क्रंद धातुरा
ना६ ङ्पूर्वकः। स एवाङ्पूर्वो णिचं लभते सातत्ये। आक्रंदयति। अन्ये तु आङ्पूर्वो घुषिः क्रंदसातत्ये इत्याहुः। आघोषयति। ल
स श्लिष्ययोगे। तसि भूष अलंकारे। अवतंसयति। अवतंसति। भूषयति। अर्ह पूजायां। ज्ञा नियोगे। आज्ञापयति। भज विश्रा
णने। श्रृधु प्रहसने। अशशार्धत्। अशीशृधत्। यत निकारोपस्कारयोः। रग लग आस्वादने। रघ इत्येके। रग इत्यन्ये। अंचु विशेष
णे। अंचयति। उदित्वमिह विकल्पार्थं। अत एव विभाषितो णिच्। अंचति। एवं शृधु जसु प्रभृतीनामपि बोध्यं। लिगि चित्रीकर
णे। लिंगयति। लिंगति। मुद संसर्गे। मोदयति। सक्तून् घृतेन। त्रस धारणे। ग्रहणइत्येके। वारणइत्यन्ये। उध्रस उंछे। उकारो
धात्ववयवइत्येके। ध्रासयति। ध्रसति। उध्रासयति। मुच प्रमोचने मोदने च। वस स्नेहच्छेदापहरणेषु। चर संशये। च्यु सहने। हस
ने चेत्येके। च्यावयति। च्युस इत्येके। च्योसयति। भुवोऽवकल्कने। अवकल्कनं मिश्रीकरणमित्येके। चिंतनमित्यन्ये। भावयति। कृपेश्च।
कल्पयति। आस्वदः सकर्मकात्। स्वदिमभिव्याप्य संभवत्कर्मभ्य एव णिच्। ग्रस ग्रहणे। ग्रासयति। फलं। पुष धारणे। पोषयत्या गणेशा
भरणं। दल विदारणे। दालयति। पट पुट लुट तुजि मिजि पिजि लुजि भजि लघि त्रसि पिसि कुसि दसि दंशि कुशि घट घटि बृहि बर्ह ॥४२॥

वल्हगुपधूपविछचीवपुथलोकृलोचृणदकुपतर्कवृतुवृधुभाषार्थाः।पाटयति।पोटयति।लोटयति।तुंजयति।तुंजति।एवंप
रेषां।घाटयति।घंटयति।नाग्लोपिशास्वृदिताम्।णिच्यग्लोपिनः शास्तेः ऋदितां च उपधाया ह्रस्वो न स्याच्चङ्परे णौ।अ
लुलोकत्।वर्तयति।वर्द्धयति।उदित्वाद्वर्त्तति।वर्द्धति।रुट लजि अजि दसि भृशि रुशि शीक नट पुटि जुचि रघि लघि अहि र
न हिमहि च।लडि तड नल च।तरी आप्यायने।ईदित्वं निष्ठायामिण्निषेधाय।अत एव लिङ्गात्।तरयति।तरति।हुज हिंसा
यां।ष्वद स्वोअदने।स्वादद इत्येके।असिष्वदत्।दीर्घस्य लघूपदेशात् स्वादि स्य दत्।आधृषाद्वा।इत ऊर्ध्वं विभाषितणि
चः।धृषधातुमभिव्याप्य।युज पृच संयमने।योजयति।योजति।अयौक्षीत्।पर्चयति।पर्चति।पर्चिता।अपर्चीत्।अर्च
पूजायां।षह मर्षणे।साहयति।सहति।स एवायं नागः सहति कलभेभ्यः परिभवं।ईर क्षेपे।ली द्रवीकरणे।लाययति।लयति।
लेता।वृजी वर्जने।वर्जयति।वर्जति।वृञ् आवरणे।वारयति।वरति।वरते।वरिता।वरीता।जॄ वयोहानौ।जारयति।जर
ति।जरिता।जरीता।ज्रि च।ज्राययति।ज्रयति।ज्रेता।रिच वियोजनसंपर्चनयोः।रेचयति।रेचति।रेक्ता।शिष असर्वो
पयोगे।शेषयति।शेषति।शेष्टा।अशिक्षत्।अयं विपूर्वो ति ज्ञाये।तप दाहे।तापयति।तपति।तप्ता।तृप तृप्तौ।संदीप
ने इत्येके।तर्पयति।तर्पति।तर्पिता।छृदी संदीपने।छर्दयति।छर्दति।छर्दिता।छर्दिष्यति।सेसिचीति विकल्पो न।साहच
र्यात्तत्र शैधादिकस्यैव ग्रहणात्।चुप छृप तृप दृप संदीपन इत्येके।चर्पयति।छर्पयति।दृभी भये।दर्भयति।दर्भति।दर्भिता।
दृभ संदर्भे।अयं तु न दृभादिवत्।श्रथ मोक्षणे।हिंसायामित्येके।मी गतौ।माययति।मयति।मेता।ग्रंथ बंधने।ग्रंथयति।
ग्रंथति।शीक आमर्षणे।शीकच।अर्द हिंसायां।अर्दयति।स्वरितेत्।अर्दति।अर्दते।हिसि हिंसायां।हिंसयति।हिंसति

सि॰वृ॰ ॥४३॥

हिनस्ति। तिङभिगतं। अर्द्द प्रज्ञायां। आङः षद पद्यर्थे। आसादयति। आसीदति। पाघ्रेति सीदादेशः। आसत्ता। आसासीत्।
शुंधशौचकर्मणि। शुंधिता। अशुंधीत्। अशुंधि। छद अपवारणे। स्वरितेत्। जुषपरितर्कणे। परितर्कणमूहो हिंसा
वा। परितर्पण इत्यन्ये। परितर्पणं परितृप्तिक्रिया। जोषयति। जोषति। प्रीतिसेवनयोर्जुषत इति तु दादौ। धूञ् कंपने। णाविस्य
धिकृत्य। धूञ् प्रीञोर्नुग्वक्तव्यः। धूनयति। धवति। धवते। केचित्तु धूञ् प्रीणने इति पठित्वा प्रीणाति साहचर्यात् धुनातेरेव
नुकमाहुः। धावयति। अयं स्वादौ क्र्यादौ तुदादौ च। स्वादौ ह्रस्वश्च। तथा च कविरहस्ये। धुनोति चंपकवनानि धुनोत्यशोकं
चूतं धुनाति धुवति स्फुटितातिमुक्तं। वायुर्विधूनयति चंपकपुष्परेणून् यत्काननेधवति चंदनमंजरीश्च। प्रीञ्
तर्पणे। प्रीणयति। धूञ् प्रीणने इति हरिदत्तपाठे तु। प्रायपति। प्रयति। प्रयते। श्रंथग्रंथसंदर्भे। आप्लृ लंभने। आपयति। आ
पति। आपत्। आपत्। स्वरितेदयमित्येके। आपते। तनु श्रद्धोपकरणयोः। उपसर्गाच्च दैर्घ्ये। तानयति। वितानयति। तनति। चन श्र
द्धोपहरणयोरित्येके। चानयति। चनति। वद संदेशवचने। वादयति। स्वरितेत्। वदति। वदते। अनुदात्तेदित्येके। ववदतुः। ववदिथ।
ववदे। वघात्। वच परिभाषणे। वाचयति। वचति। वक्ता। अवाक्षीत्। मान पूजायां। मानयति। मानति। मानिता। विचारणे तु भौवा
दिको नित्यसन्नंतः। स्तंभे मानयते इत्याकुस्मीयः। मन्यते इति दिवादौ। मनुते इति तनादौ च। भू प्राप्तावात्मनेपदी। भावयते। भवते।
णिच् सन्नियोगे नैवात्मनेपदमित्येके। भवति। गर्हविनिंदने। मार्गअन्वेषणे। कठिश्शोके। उत्कंठापूर्वायमुत्कंठायां। कंठत इत्यात्मनेपदी
गतः। मृज शौचालंकारयोः। मार्जयति। मार्जति। मार्जिता। मार्ष्टि। मृष तितिक्षायां। स्वरितेत्। मर्षयति। मर्षति। मर्षते। मृष्यति।
मृष्यत इति दिवादौ। सेचनेऽपि मर्षति। धृष प्रसहने। धर्षयति। धर्षति। इ साध्वपीयाः। अथादंताः। कथ वाक्यप्रबंधे। [illegible] ॥४३॥

गणेश

अल्लोपस्य स्थानिवत्वान्नवृद्धिः। कथयति। अग्लोपित्वान्न दीर्घसन्वद्भावौ। अचकथत्। वर ईप्सायां। वरयति। धारयती। तिग
तं। गण संख्याने। गणयति। ई च गणः। गणेरभ्यासस्य ई स्याच्चङ्परे णौ। चाद् अत्। अजीगणत्। अजगणत्। शठ श्वठ सम्य
ग्भाषणे। पट वट ग्रंथे। रह त्यागे। अररहत्। स्तन गदी देवशब्दे। स्तनयति। गदयति। अजगदत्। पत गतौ वा। वालिङं
तः। वाऽदंत इत्येके। आद्ये। पतयति। पतां चकार। अपतीत्। द्वितीये। पातयति। अपीपतत्। पष अनुपसर्गात्। गतावित्येव।
पषयति। स्वर आक्षेपे। स्वरयति। रच प्रतियत्ने। रचयति। कल गतौ संख्याने च। चह परिकल्कने। परिकल्कनं दंभः शाठ्यं
च। मह पूजायां। महयति। महतीति गतं चापि। सार कृप श्रथ दौर्बल्ये। सारयति। कृपयति। श्रथयति। स्पृह ईप्सायां।
भाम क्रोधे। अबभामत्। सूच पैशून्ये। सूचयति। अषोपदेशत्वान्न षः। असुसूचत्। खेट भक्षणे। तृतीयांत इत्येके। खो
ट इत्यन्ये। क्षोट क्षेपे। गोमठु[redacted]पेलेने। अजुगोमत्। कुमार क्रीडायां। अचुकुमारत्। शील उपधारणे। उपधारण
मभ्यासः। साम सांत्वप्रयोगे। अससामत्। सांत्वने इत्यतीतस्य तु असीषमत्। वेल कालोपदेशे। वेलयति। काल इति
पृथग्धातुरित्येके। कालयति। पल्पूल लवनपवनयोः। वात सुखसेवनयोः। गतिसुखसेवनयोरित्येके। वातयति। अववातत्। ग
वेष मार्गणे। अजगवेषत्। वास उपसेवायां। निवास आच्छादने। भाज पृथक्कर्मणि। सभाज प्रीतिदर्शनयोः। प्रीतिसेवनयो
रित्यन्ये। सभाजयति। ऊन परिहाणे। ऊनयति। ओः पुयण्जिल्लघु ति सत्रे पवयोरिति वक्तव्ये वर्गप्रत्याहारजकारग्रहणोल्लिंगं णि
चि अच आदेशो न स्यात् द्विर्वचने कर्तव्ये इति। यत्र द्विरुक्तौ अभ्यासोत्तरखंडस्य आद्योऽच् प्रक्रियायां परिनिष्ठितरूपे वाऽव
र्णो लभ्यते तत्रैवायं निषेधः। ज्ञापकस्य सजातीयापेक्षत्वात् तेनाचिकीर्तदिति सिद्धं। प्रकृते तु नशब्दस्य द्वित्वे कृते तु नरखंडेऽल्लो

पः। ओननत। माभवान् ननत। धन शब्दे। अदधनत्। कूट परितापे। परिदाह इत्यन्ये। संकेतग्रामकुणगुणचामन्त्रणे॥
वा कूटोपि। कूटयति। संकेतयति। ग्रामयति। कुणयति। गुणयति। पाठान्तरम्। केत श्रावणे निमन्त्रणे च। केतयति। निकेतय
ति। कुणगुणचामन्त्रणे। चकारात्केत कूणसंकोचनेऽपि। स्तेन चौर्ये। अतिस्तेनत्। आगर्वादात्मनेपदिनः। पद गतौ। अ
पपदत। गृह ग्रहणे। गृहयते। मृग अन्वेषणे। मृगयते। अमृगयत। इत्यादि। कुह विस्मापने। शूर वीर विक्रान्तौ। स्थूल प
रिबृंहणे। स्थूलयते। अतुस्थूलत। अर्थ उपयाच्ञायां। अर्थयते। आर्तथत। सत्र संतानक्रियायां। अससत्रत। अने
कात्त्वान्नषोपदेशः। गर्व माने। गर्वयते। अदंतत्वसामर्थ्याण्णिज्विकल्पः। धातोरंतउदात्तः। लिङ्घाम्ब
फलं। एवमग्रेपि। इत्यागर्वीयाः। सूत्र वेष्टने। सूत्रयति। असुसूत्रत्। मूत्र प्रस्रवणे। मूत्रयति। रूक्ष पारुष्ये। रूक्षतीतित्रा
पि। पार तीर कर्मसमाप्तौ। अपपारत। अतितीरत। पुट संसर्गे। पुटयति। धेक दर्शने इत्येके। अदिधेकत। कत्र शैथिल्ये।
कत्रयति। कर्त इत्यप्येके। कर्तयति। प्रातिपदिका[illegible]द्धात्वर्थे बहुलमिष्ठवच्च। प्रातिपदिकाद्धात्वर्थे णिच् स्यात् इष्ठे यथा
प्रातिपदिकस्य पुंवद्भावरभावटिलोपविन्मतुब्लोपयणादिलोपप्रस्थस्फाद्यादेशभसंज्ञास्तद्वण्णावपि स्युः। पटुमा
चष्टे पटयति। परत्वाद्वृद्धौ सत्यां टिलोपः। अपीपटत्। लोचङोऽत्र भाव्येतु वृद्धेर्लोपो बलीयानिति स्थितं। अपपटत्।
तत्करोति तदाचष्टे। एवं स्थप्रपंचः। करोत्याचष्ट इति धात्वर्थमात्रे णिजर्थः। लड्वर्थत्वविवक्षितः। तेनातिक्रामति। अ
श्वेनातिक्रामति अश्वयति। हस्तिनातिक्रामति हस्तयति। धातुरूपं च। णिच् प्रकृतिर्धातुरूपं प्रतिपद्यते। चशब्दोनु
क्तसमुच्चयार्थः। तथा च वार्तिकं। आख्यानात्कृतस्तदाचष्टे कृल्लुक्प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकमिति॥ कंसव

धमावच्छेकंसंघातयति। इहकंसंहन्नइइतिस्थिते। हनस्तोचिणलोः। हंतेस्तकारोंतादेशःस्याचिणलवर्जे ञ्णिति।
नन्वत्रांगसंज्ञाधातुसंज्ञाचकंसविशिष्टस्यप्राप्तातत्र अङ्गित्वयोर्दोषः। किंचकुत्वतत्वेनस्याताम्। धातोःस्व
रूतग्रहणेतत्प्रत्ययेकार्यविज्ञानात्। सत्यं। प्रकृतिवच्चेतिचकारोभिन्नक्रमः। कारकंच। चात्कार्यहेतुमपि
म ४ चः प्रस्तुतेहन्यादेर्हेतुंगेयाद्दृशंकारकंधातावनंतर्भूतंद्वितीयांतंयादृशंचकार्यंकुत्वतत्वादि तदिहापीत्य
र्थः। कंसमञ्जीघनत्। कर्तृकरणद्धात्वर्थे। कर्तुर्व्यापारार्थयत्करणंनतुचक्षुरादिमात्रमित्यर्थः। असिना
हंति। असयति। वष्कदर्शने। चित्रचित्रकरणे। आलेख्यकरणइत्यर्थः। कदाचिद्दर्शने। चित्रेयमद्भुतद
र्शनेलिंवल्लभते। चित्रयति। अंससमाघाते। वटविभाजने। लजप्रकाशने। वटिलजिइत्येके। वंटयति।
लंजयति। अदंतेषुपाठबलाददंतत्वेदृढिरित्यन्ये। वंटापयति। लंजापयति। शाकटायनस्तुकथादीनां
सर्वेषांपुकमाह। तन्मतेकथापयति। गणापयतीत्यादि। मिश्रसंपर्के। संग्रामयुद्धे। अनुदात्तेत्। अकार
अनुस्तोमत २ प्रश्लेषात्। असससंग्रामत। स्तोमश्लाघायां। छिद्रकर्णभेदने। करणभेदनइत्यन्ये। कर्णेतिधात्वंतरमि
त्यन्ये। अंधदृष्ट्युपघाते। उपसंहारइत्यन्ये। आंदधत्। दंडदंडनिपातने। अंकपदेलक्षणेच। आंचकत्॥

सि॰ त्रि॰
॥४५॥

अंगव। आंजगत्। सुखदुःखतत्क्रियायां। रस आस्वादनस्नेहनयोः। व्यय वित्तसमुत्सर्गे। अवव्ययत्। रूप रू
पक्रियायां। रूपस्य दर्शनं करणं वा रूपक्रिया। छेद द्वैधीकरणे। अचिच्छेदत्। छद अपवारण इत्येके। छदयति।
लाभ प्रेरणे। व्रण गात्रविचूर्णने। वर्ण वर्णक्रियाविस्तारगुणवचनेषु। वर्णक्रिया वर्णीकरणम्। सुवर्णं व
र्णयति। कथां वर्णयति विस्तरेणेत्यर्थः। हरिं वर्णयति। स्तौतीत्यर्थः। बहुलमेतन्निदर्शनम्। अदंतधातुनि
दर्शनमित्यर्थः। बाहुलकादन्येपि बोध्याः। तद्यथा। पर्ण हरितभावे। अपपर्णत्। विष्क दर्शने। क्षप प्रेरणे। व
स निवासे। तुत्थ आवरणे। एवमांदोलयति। प्रेंखोलयति विडंबयति अवधीरयति। इत्यादि। अन्ये तु दशग
णीपाठो बहुलमित्याहुः। तेनापठिता अपि सौत्रलौकिकवैदिका बोध्याः। अपरे तु नवगणीपठितेभ्योपि वि
स्वार्थे णिच्। रामो राज्यमचीकरदिति यथा स्यादित्याहुः। चुरादिभ्य एव बहुलं णिजित्यर्थ इत्यन्ये। सर्वे पक्षाः प्राचां ग्रं
चु ४ थे स्थिताः। णिङंगान्निरसने। अंगवाचिनः प्रातिपदिकान्निरसनेर्थे णिङ् स्यात्। हस्तौ निरस्यति हस्तयते॥
पादयते। श्वेताश्वाश्वतरगालोडिताह्वरकाणामश्वतरेतकलोपश्च। श्वेताश्वादीनां चतुर्णामश्वादयो लुप्यं
ते णिङ् च धात्वर्थे। श्वेताश्वमाचष्टे तेनातिक्रामति वा श्वेतयते। अश्वतरमाचष्टे अश्वयते। गालोडितं वाचां
विमर्शः। तत्करोति गालोडयते। आह्वरयते। केचित्तु णिचमेवानुवर्तयंति। तन्मते परस्मैपदमपि। पुच्छादि

गणेश
॥४५॥

पुधात्वर्थ इत्येव सिद्धं। णिङंतादेव वहुलवचनादात्मनेपदमस्तु। मास्तु पुच्छभांडेति णिङ् विधिः। सिद्धत्वाद्योगोऽयं थांतेमंग
लार्थः॥ ॥ इति चुरादयः॥ ७॥ ॥ तत्प्रयोजको हेतुश्च। कर्तुः प्रयोजको हेतुसंज्ञकः कर्तृसंज्ञश्च स्यात्। हेतुमति च। प्रयोजक
व्यापारे प्रेषणादौ वाच्ये धातोर्णिच् स्यात्। भवंतं प्रेरयति भावयति। णिचश्चेति कर्तृगे फले आत्मनेपदं। भावयते। भाव
य४ यांबभूव। ओःपुयण्ज्यपरे। सनि परे यदंगं तदवयवाभ्यासोकारस्येत्वं स्यात्पवर्गयण्जकारेष्ववर्णपरेषु परतः। अबी
भवत्। अपीपवत्। मूङ्। अमीमवत्। अयीयवत्। अरीरवत्। अलीलवत्। अजीजवत्। स्रवतिशृणोतिद्रवतिप्रवति
प्लवतिच्यवतीनां वा। एषामभ्यासोकारस्य इत्वं वा स्यात्सनि अवर्णपरे धात्वक्षरे परे। असिस्रवत्। असुस्रवत्। ना
ग्लोपीति ह्रस्वनिषेधः। अशशासत्। अडुढौकत्। अचीचकासत्। मतांतरे अचचकासत्। अग्लोपीति सुब्धातुप्रकरणे
उदाहरिष्यते। ण्यंतानां चिच। पूर्वविप्रतिषेधादपवादत्वाद्वा वृद्धिं बाधित्वा णिलोपः। चोरयति। णौ चङीति ह्रस्वः। दीर्घो
लघोः। न चाग्लोपित्वाद्द्वयोरप्यसंभवः। ण्याकृतिनिर्देशात्। अचूचुरत्। णौ च संश्चङोः। सन्परे चङ्परे च णौ श्व
वा यतेः संप्रसारणं स्यात्। संप्रसारणं तदाश्रयं कार्यं च बलवदिति वचनात्संप्रसारणं पूर्वरूपं। अशूशवत्। अलघु
त्वान्न दीर्घः। अशिश्वयत्। स्तंभुसिवुसहां चङि। उपसर्गनिमित्त एषां सस्य षो न स्याच्चङि। अवातस्तंभत्। पर्यसीषि
वत्। न्यसीषहत्। आदिदटत्। आशिशत्। बहिरंगोऽपि पुग्धातूस्थो द्वित्वात्प्रागेव। ओणेर्ऋदित्करणाल्लिंगात्। मा भवा
निदिधत्। एआदावेधतौ विधानान्न वृद्धिः। मा भवानेदिधत्। नन्द्रा इति नदराणां न द्वित्वं। औंदिदत्। आड्डिडत्। आ

सि॰ति॰
॥४६॥ त॰२

र्दिवत्।उद्रुज आर्जवे।उपदेशे दकारोपधः॥ भुजन्युब्जौ पाण्युपतापयोरिति सूत्रे निपातनाद् ह्रस्वः।सर्वान्तरंगत्वाद् वृद्धि
त्वविषये नन्द्राः संयोगादय इति निषेधाञ्जिशब्दस्य द्वित्वे कृते प्रवर्तते। न तु ततः प्राक्। दकारोच्चारणसामर्थ्यात्। औब्जिजत्। अडादेरित्ये
वा नेह। आदिद्रपत्। रभेरशब्लिटोः। रभेर्नुम् स्यादचि न तु शब्लिटोः। लभेश्च। अररंभत्। हरञ्ची तिलकैः कुत्वं ना अल अललंभत्२
हपत्। अ तस्त्र दृत्वर प्रथ म्रद स्तृ स्पशां। अससमरत्। अददरत्। तपरत्वसामर्थ्यादत्र लघोर्न दीर्घः। विभाषा वेष्टिचेष्ट्योः॥
अभ्यासस्य अत्वं वा स्याच्चङ्परे णौ। अववेष्टत्। अविवेष्टत्। अचचेष्टत्। अचिचेष्टत्। भ्राजभासेत्यादिना वोपधा
ह्रस्वः। अबिभ्रजत्। अबभ्राजत्। काण्यादीनां चेति वक्तव्यम्। एवं ताः कण रण भण श्रण लुप हेठः। काण्यादयः प ल
ठ्भाष्ये उक्ताः। क्वचिद् वा णिलोपि लोपयः वत्वा[illegible]रोधिकान्यासे। चाणि लोटी अप्यन्यत्र दृश्यं द्वादश। अचीकणत्। अ
चकाणत्। स्वापेश्चङि। ण्यन्तस्य स्वपेश्चङि संप्रसारणं स्यात्। असूषुपत्। शाछासाह्वाव्यावेपां युक्। एषां युक् स्या
ण्णौ पुकोपवादः। शाययति। ह्रः संप्रसारणम्। सन्परे चङ्परे च णौ ह्रः संप्रसारणं स्यात्। अजूहवत्। लोपः पिबतेरी
च्चाभ्यासस्य। पिबतेरुपधाया लोपः स्यादभ्यासस्य ईदन्तादेशश्चङ्परे णौ। अपीप्यत्। अर्तिह्रीति। अजूहवत्+पुक्।
अर्पयति। ह्रेपयति। ह्लेपयति। रेफयति। यलोपः। क्नोपयति। क्ष्मापयति। स्थापयति। तिष्ठतेरित्। उपधाया इदादेशः स्या
च्चङ्परे णौ परे। अतिष्ठिपत्। जिघ्रतेर्वा। अजिघ्रिपत्। अजिघ्रपत्। ऊर्दित्। अचीकृतत्। अचिकीर्तत्। अवीवृतत्। अ गणेश
ववर्तत्। अमीमृजत्। अममार्जत्। पातेर्णौ लुग्वक्तव्यः। पुकोपवादः। पालयति। वो विधूनने जुक्। वातेर्जुक् स्याण्णौ ॥४६॥

कंपेऽर्थे। वाजयति। कंपे किं। केशान्वापयति। विभाषा लीयतेः॥ ली लो नुग्लुकावन्यतरस्यां स्नेहविपातने। लीयतेर्लीतेश्च
आमान्नुग्लुकावागमौ स्तो वा णौ स्नेहद्रवे। विलीनयति। विलापयति। विलालयति। विलापयति। वा घृतं। ली ईङिति इका
रप्रश्लेषादात्वपक्षे नुग्लुकौ। स्नेहद्रवे किम्। लोहं विलापयति। प्रलंभनाभिभवपूजासु लियो नित्यमात्वमशितिवाच्यम्॥
लियः सम्माननशालीनीकरणयोश्च। लीङ् लियोऽर्थे तयोरात्मनेपदं स्यादकर्तृगेपि फले पूजाभिभवयोः प्रलंभने
वार्थे। जटाभिर्लापयते। पूजामधिगच्छतीत्यर्थः। श्येनो वर्तिकामुल्लापयते। अभिभवतीत्यर्थः। बालमुल्लापयते। वंच ली ५
यतीत्यर्थः॥ विभेतेर्हेतुभये। विभेतेरेच आत्वं वा स्यात्प्रयोजकाद्भयं चेत्। भीस्म्यो र्हेतुभये। आभ्यामात्मनेपदं स्याद्धे
तोर्भये ईषयस्मयो। स्वत्र भयग्रहणं धात्वर्थोपलक्षणं। मुंडो भापयते। भियो हेतुभये षुक्। भीई इती कारः प्रश्लिष्य
ते। ईकारांतस्य भियः षुक् स्यात् णौ हेतुभये। भीषयते। नित्यं स्मयतेः॥ स्मयतेरेचो नित्यमात्वं स्याण्णौ हेतोः स्मये॥
जटिलो विस्मापयते। हेतोश्चेद्भयस्मया विस्मुत्कैनेह। कुंचिकयैनं भाययति। विस्माययति। कथं तर्हि विस्मा
पयन्विस्मितमात्मवृत्ताविति। मनुष्यवाचेतिकरणादेव तेत्रै हि स्मयः। अन्यथा शानजपि स्यात्। सत्यं। विस्मा
ययन्नित्येव पाठ इति सांप्रदायिकाः। यद्वा मनुष्यवाक्प्रयोज्यकर्त्री विस्मापयते तया सिंहो विस्मापयन्निति
ण्यंताच्छानजेति व्याख्येयम्। स्फायो वः॥ णौ। स्फावयति। शदेरगतौ तः॥ शदेर्णौ तोंतादेशः स्यान्न तु गतौ। शातयति। ६
गतौ तु गाः शादयति गोविंदः। गमयतीत्यर्थः। रुहः पोऽन्यतरस्याम्। णौ। रोपयति। रोहयति। क्रीङ्जीनां णौ। ए

सि॰ति॰ ॥४७॥

षामेव॥ आत्वं स्यात् णौ। क्षापयति। अध्यापयति। आपयति। णौ च संश्चङोः॥ सन्परे चङ्परे णौ इङो गाङ् वा स्यात्। अ
ध्यजीगपत्। अध्यापिपत्। सिध्यतेरपारलौकिके। ऐहलौकिकेऽर्थे विद्यमानस्य सिध्यतेरेच आत्वं स्यात् णौ। अन्नं साध
यति। निष्पादयतीत्यर्थः॥ अपारलौकिके किम्। तापसः सिध्यति। तत्त्वं निश्चिनोति। तं प्रेरयति सेधयति। तापसं तपः॥
प्रजने वीयतेः॥ अस्य च आत्वं वा स्यात् णौ प्रजनेऽर्थे। वापयति। वाययति। गाः पुरोवातः॥ गर्भं ग्राहयतीत्यर्थः॥ ऊदुपधाया
गूहः॥ गूहयति। दोषो णौ। दुष इति सुवचम्। दुष्यतेरुपधाया ऊत्स्यात् णौ। दूषयति। वा चित्तविरागे। विरागोऽप्रीतता। चि
त्तं दूषयति दोषयति वा कामः॥ मितां ह्रस्वः॥ घटादौ चुरादौ च मितउक्ताः॥ घटयति। जनी। ज[illegible]यति। ज्ञ्रू। ज्ञणातेरुक्तः। आर
यति। रंजेर्णौ मृगर[illegible]मणे नलोपो वक्तव्यः॥ मृगरमणमाखेटः। रजयति मृगान्। मृगेति किं। रंजयति पक्षिणः॥ रमणाद
न्यत्र तु। रंजयति मृगान् तृणदानेन। चुरादिषु ज्ञपादिश्चिन्त्यः। चिस्फुरोर्णौ। चपयति। चययति। स्फुरं। चिनोतेस्फुचापय
तिं चाययति। स्फारयति। स्फोरयति। अपुस्फरत्। अपुस्फुरत्। उभौ साभ्यासस्य। साभ्यासस्यानितेरुभौ नकारौ णत्वं
प्राप्नुतो निमित्ते सति। प्राणिणत्। णौ गमिरबोधने। इणो गमिः स्यात् णौ। गमयति। बोधने तु। प्रत्याययति। इण्वदिक॥
अधिगमयति। हनस्तोऽचिण्णलोः॥ हो हन्तेरिति कुत्वं। घातयति। ईर्ष्ययति। ईर्ष्यतेस्तृतीयस्येति वक्तव्यं। तृतीयव्यंजनस्या
तृतीयैकाचइतिवार्थः॥ आद्येषकारस्य द्वित्वं वारयितुमिदं। द्वितीये तु अजादेर्द्वितीयस्येत्यस्यापवादतयासंनंते प्रवर्त्तते। गणेश
ऐर्ष्यियत्। ऐर्ष्यिष्यत्। द्वितीयव्याख्यायां णिजंतात् चङि षकारस्याभ्यासे श्रूयते। हलादिःशेषात्। द्वित्वं तु द्वितीयस्ये ॥४७॥

वा तृतीयाभावेन प्रकृतवार्त्तिकाप्रवृत्तेः। निवृत्तप्रेषणाद्धातोर्हेतुमण्णौ भुद्देन तुल्योऽर्थः। तेन प्रार्थयंति शायनो। स्थितं प्रियाः इत्या
दि सिद्धं। एवं सकर्मकेषु सर्वेषूह्यं॥ ॥इति ण्यंतप्रक्रिया॥ ७॥ धातोः कर्मणः समानकर्तृकादिच्छायां वा। इषिकर्मण
धातोः इषिणैककर्तृकात् सन्प्रत्ययो वा स्यादिच्छायाम्। धातोर्विधेरिह सन आर्द्धधातुकत्वम्। इट्। द्वित्वं। सन्यतः। पठितुमि
च्छति पिपठिषति। कर्मणः किम्। गमनेनेच्छति। इति करणान्मा भूत्। समानकर्तृकात्किम्। शिष्याः पठंत्विति इच्छति गुरुः। वा
ग्रहणात्पक्षे वाक्यमपि। लुङ्सनोर्घस्लृ। एकाच उपदेशे इति नेट्। सस्य तत्वम्। अत्तुमिच्छति जिघत्सति। इर्ष्यतेस्तृ
ईर्ष्यिषिषति। स्येचपि तीयस्येति यिसनोर्द्वित्वं। ईर्ष्यियिषति। रुदविदमुषग्रहिस्वपिप्रच्छः संश्च। एभ्यः संश्च क्त्वा च कितोस्तः। रुरुदिषति। विविदि
षति। मुमुषिषति। सनिग्रहगुहोश्च। ग्रहेर्गुहेरुगंताच्च सन इण्न स्यात्। ग्रहिज्येति संप्रसारणं सनः षत्वस्यासिद्धत्वाड्ढष
भावः। जिघृक्षति। जुघुक्षति। किरश्च पंचभ्यः। कॄ गॄ दृङ् धृङ् प्रच्छ एभ्यः सन इट् स्यात्। पिपृच्छिषति। चिकरिषति। जिग
रिषति। जिगलिषति। अत्रेटो दीर्घो नेष्टः। दिदरिषते। दिधरिषते। कथमुद्दिधीर्षुरिति। भौवादिकयोः धृङ् धृञोरि
तिग्रहणात्। इको झल्। इगंताज्झलादिः सन् कित्स्यात्। बुभूषति। दीङः। दातुमिच्छति दिदीषते। एज्विषयत्वाभावान्मीना
ति मिनोतीत्यात्वं न। अत एव सनि मीमेति सूत्रे मा धातोः पृथग्मीग्रहणं कृतम्। हलंताच्च। इक्समीपाद्धलः परो झ
लादिः सन् कित्स्यात्। गुहूँ। जुघुक्षति। बिभित्सति। इकः किम्। यियक्षते। झल् किम्। विवर्द्धिषते। हल्ग्रहणं जातिपरं। तृं
हू। तितृक्षति। तितृंहिषति। अज्झनगमां सनि। अजंतानां हंतेरजादेशगमेश्च दीर्घः स्याज्झलादौ सनि। सन्लिटोर्जेः। जिगी

सि॰ति॰ षति। विभाषा चेः। चिकीषति। चिचीषति। जिघांसति। सनि च। इणो गमिः स्यात्सनि न तु बोधने। जिगमिषति। बोधने तु प्रतीषि-
॥४८॥ षति। इण्वदिकः। अधिजिगमिषति। कर्मणि तङ्। परस्मैपदेष्विसुक्ते नेट्। गुलादौ सनीति दीर्घः। जिगांस्यते। अधिजिगां-
स्यते। अजादेशस्येत्युक्ते र्गमेस्तेर्नेट्। दीर्घः। जिगांस्यते। संजिगंसते। इङश्च। इङो गमिः स्यात्सनि। अधिजिगांसते। रलो व्यु-
पधाद्धलादेः संश्च। उश्च इश्च वी। ते उपधे यस्य तस्माद्धलादेः रलन्तात्परौ क्त्वासनौ सेटौ वा कितौ स्तः। द्युतिस्वाप्योः सं-
प्रसारणं। दिद्युतिषते। दिद्योतिषते। रुरुचिषते। रुरोचिषते। लिलिखिषति। लिलेखिषति। रलः किम्। दिदेविषति।
व्युपधात्किम्। विवर्तिषते। हलादेः किम्। एषिषिषति। इह नित्यमपि द्वित्वं गुणेन बाध्यते। उपधाकार्यं हि द्वित्वात्प्रबलं।
ओणेर्ऋदित्करणस्य सामान्यापेक्षज्ञापकत्वात्। सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्। इवन्तेभ्य ऋधा-
दिभ्यश्च सन इड्वा स्यात्। इडभावे हलन्ताच्चेति कित्त्वं। च्छ्वोः शूडिति वस्य ऊठ्। यण्। द्वित्वम्। दुद्यूषति। दिदेविषति। स्तौतिण्यो-
रेवेति वक्ष्यमाणनियमान्न षः। सुस्यूषति। सिसेविषति। आप्ज्ञप्यृधामीत्। एषामच ईत्स्यात्सादौ सनि। अत्र लोपोऽभ्या-
तू ४ सस्य। सनि मीमेत्यारभ्य यदुक्तं तत्राभ्यासस्य लोपः स्यात्। आप्नुमिच्छति। ईप्सति। अर्धितुमिच्छति। रपरत्वं। चर्त्वम्। ई-
र्त्सति। अर्दिधिषति। बिभ्रज्जिषति। बिभर्ज्जिषति। बिभ्रक्षति। बिभर्क्षति। दम्भ इच्च। दम्भेरच इत्स्याद्दीर्घश्च सादौ सनि। अ-
भ्यासलोपः। हलन्ताच्चे सूत्रे हल्ग्रहणं जातिपरमित्युक्तं। तेन सनः कित्त्वान्नलोपः। धिप्सति। धीप्सति। दिदम्भिष- गणेश
ति। शिश्रीषति। शिश्रयिषति। उदोष्ठ्यपूर्वस्य। सुस्वूर्षति। सिस्वरिषति। युयूषति। यियविषति। ऊर्णुनूषति। ऊर्णुनु- ॥४८॥

ऊर्णुनविषति १

शिश्रिषति । नच परत्वाद्गुणावादेशयोः सतोरभ्यासे उकारो न श्रूयेतेति वाच्यं । द्विर्वचनेऽचीति सूत्रेण द्वित्वे कर्तव्ये स्थानिरूपातिदे वी १
शात् । आदेशनिषेधाद्वा । न च सन्नन्तस्य द्वित्वं प्रति कार्यित्वान्निमित्तता कथमिति वाच्यं । कार्यमनुभवन् हि कार्यी नि-
मित्ततया नाश्रीयते न त्वननुभवन्नपि । न चेह सन् द्वित्वमनुभवति । बुभूर्षति । बिभरिषति । ज्ञपि । गतो मित्संज्ञः पका- पु ३
रान्तश्चौरादिकश्च । इडभावे । इकोऽझलिति कित्वान्न गुणः ॥ अज्झनेति दीर्घः परत्वाण्णिलोपेन बाध्यते । आप्ज्ञपीति ई-
त् । ज्ञीप्सति । जिज्ञपयिषति । अमितस्तु जिज्ञापयिषति । जनसनेत्यात्वं । सिषासति । सिसनिषति । तनिपतिदरिद्रा-
तिभ्यः सनो वा इड्वाच्यः । तनोतेर्विभाषा । अस्योपधाया दीर्घो वा स्याद्धलादौ सनि । तितांसति । तितंसति । तितनि-
षति । आशंकायां सन्वक्तव्यः । श्वा मुमूर्षति । कूलं पिपतिषति । सनि मीमाघुरभलभशकपतपदामच इस् । एषा-
मच इस्स्यात्सादौ सनि । अभ्यासलोपः । स्कोरिति सलोपः । पित्सति । दिदरिद्रिषति । दिदरिद्रासति । डुमिञ् मीञ्
आभ्यां सन् । कृतदीर्घस्य मिनोतेरपि मीरूपाविशेषादिस् । सः सीति तः । मित्सति । मामाने । मित्सति । माङ् मेङोः ।
मित्सते । दो दाणोः । दित्सति । देङ् दित्सते । दाञ् । दित्सति । दित्सते । धेट् । धित्सति । धाञ् । दित्सति । धित्सते । रिप्सते ।
लिप्सते । शक्लृ । शिक्षति । शक मर्षण इति दिवादिः स्वरितेत् । शिक्षति । शिक्षते । पित्सते । राधो हिंसायां सनीस्वाच्यः ।
रित्सति । हिंसायां किम् । आरिरात्सति । मुचोऽकर्मकस्य गुणो वा । सादौ सनि । अभ्यासलोपः । मोक्षते । मुमुक्षते
वावत्सः स्वयमेव । अकर्मकस्य किम् । मुमुक्षति वत्सं कृष्णः । न वृद्भ्यश्चतुर्भ्यः । विवृत्सति । तङि तु विवर्तिषते । से सि

सि॰ ति॰ ॥४९॥

चीतिवेट्। निनर्त्तिषति। निनृत्सति। इट् सनि वा। ऋद्धृ इभ्याम्। दंताच्च सन इट् वा स्यात्। तितरिषति। तितरीषति। तितीर्षति। विवरि
षति। विवरीषति। वुवूर्षति। धृङ्। दुधूर्षते। स्मिपूङ्रंज्वशां सनि। स्मिपूङ् ऋ अंजू अशू एभ्यः सन इट् स्यात्। सिस्मयिष
ते। पिपविषते। अरिरिषति। इह रिसन् शब्दस्य द्वित्वम्। इसन् इति सनो वयव इः कार्यभागिति कार्यिणो निमित्तत्वायोगात् द्वि
र्वचने चीति न प्रवर्त्तते। अंजिजिषति। अशिशिषति। उभौ साभ्यासस्य। प्राणिणिषति। उच्छ्रे स्तेः क्ष्पुत्वं पूर्वत्रासिद्धीयम
द्वित्वे। इति वचनाभ्यां सहितस्येटो द्वित्वं। हलादिः शेषः। उ चिच्छिषति। निमित्तापाये नैमित्तिकस्यापाय इति त्वनित्यं। स्वञ्चो का॰५
रिति सनुभक्तू ग्रहणात् ह्रापकात्। प्रकृति प्रत्यापत्तिवचनाच्च। जो वसंभ्र डोरिति सूत्राभ्यामिड्नेगाङ् भ्य यतेः संप्रसार
णं च वा। अपिपिजिगापयिषति। अध्यापिपयिषति। शिभ्यायिषति। भु शुशावयिषति। क्रूः संप्रसारणम्। ओनुहाव
यिषति। णौ द्वित्वात्प्रागव आदेशो ने त्युक्तत्वा दुकारद्वित्वं। चुक्षावयिषति। ओः पुयण्ज्य परे। पिपावयिषति। बि पुस्फारयिषति इ
भावयिषति। यियावयिषति। रिरावयिषति। लिलावयिषति। जिजावयिषति। पुयण्ज्विकिम्। नुनावयिषति। अ
परे किम्। बुभूषति। स्रवतीति संवा। सिस्रावयिषति। सुस्रावयिषति। इत्यादि। अपरइत्येव। बुभूषते। स्तौतिण्योरेव
षण्यभ्यासात्। अभ्यासेणः परस्य स्तौतिण्यन्तयोरेव सस्य षः स्यात् षभूते सनि नान्यस्य। तुष्टूषति। षूतिस्वाप्योरि
त्युक्तम्। सुष्वापयिषति। सिषाधयिषति। स्तौतिण्योः किम्। सिसिक्षति। उपसर्गात्सुस्यादि षभ्यासेन चेति षत्वम्। परि गणेश
षिषिक्षति। षजि किम्। तिष्ठासति। सुषुप्सति। अभ्यासादित्युक्तेर्नेह निषेधः। इण्। प्रतीषिषति। इक्। अधीषिषति। सः स्यि ॥४९॥

दिस्वदिसहीनां वा। अभ्यासेणः परस्य ण्यंतानामेषां सस्य स एव न षः। षणि परे। सिस्वेदयिषति। सिस्वादयिषति॥ सिसाहयिषति।
स्यादिष्वेवाभ्यासस्येति नियमान्नेह। अभिसुसूषति। तौषिकान्मतुबर्थीयाच्छैषिकान्मतुबर्थिकः॥ सरूपः प्रत्ययो नेष्टः सन्
तान्न सनिष्यते। शैषिकाच्छैषिकः सरूपो न। तेन शालीयेभवइति वाक्यमेव। न तु छांताच्छः। सरूपः किम्। आहिच्छत्रे भवः
आहिच्छत्रीयः। अणंताच्छः। तथा मत्वर्थात्सरूपः स न। धनवान स्यास्ति इह मतुबंतान्मतुप्। विरूपस्तु स्यादेव। दंडि
मती शाला। सरूपइत्यनुषज्यते। अर्थद्वारा सादृश्यं तस्यार्थस्तेनइच्छा सनंतात्सन्न। स्वार्थसनंतात्तु स्यादेव। जुगुप्सि
षते। मीमांसिषते॥ ॥इति सन्प्रक्रिया॥ ॥धातोरेकाचो हलादेः क्रियासमभिहारे यङ्। पौनःपुन्यं भृशार्थश्च क्रियासम
भिहारः तस्मिन्द्योत्ये यङ् स्यात्। गुणो यङ्लुकोः। अभ्यासस्य गुणः स्याद्यङि यङ्लुकि च। सनाद्यंता इति धातुत्वाल्लु
डादयः। ङिदन्तत्वादात्मनेपदम्। पुनःपुनरतिशयेन वा भवति बोभूयते। बोभूयांचक्रे। अबोभूयिष्ट। धातोः किम्। आर्ध
धातुकत्वं यथा स्यात्। तेन ब्रुवो वचिरित्यादि। एकाचः किम्। पुनःपुनर्जागर्ति। हलादेः किम्। भृशमीक्षते। भृशं [redacted]
शोभते रोचते इत्यत्र यङ्ङेति भाष्यम्। पौनःपुन्ये तु स्यादेव। रोरुच्यते। शोशुभ्यते। सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्यो यङ्वा
च्यः। आद्यास्त्रयश्चुरादावदन्ताः। सोसूच्यते। सोसूत्र्यते। मोमूत्र्यते। अनेकाच्त्वेनानुपदेशत्वात्सत्वं न। यस्य हलः।
यस्येति संघातग्रहणम्। हलः परस्य यशब्दलोपः स्यादार्धधातुके परे। आदेः परस्य। अतो लोपः। सोसूचांचक्रे। सोसू
चिता। सोसूत्रिता। मोमूत्रिता। दीर्घोऽकितः। अकितोऽभ्यासस्य दीर्घः स्याद्यङि यङ्लुकि च। अटाट्यते। यङि च। अर्तेः संयोगा

देध्मऋतो गुणः स्याद्यङि। यकारपरस्य रेफस्य न द्वित्वनिषेधः। अरार्यत इति भाष्योदाहरणात्। अरारिता। अशाशिता।
ऊर्णोनूयते। विमिघते। अल्लोपस्य स्थानिवत्त्वान्नोपधागुणः। बेभिदिता। नित्यं कौटिल्ये गतौ। गत्यर्थात्कौटिल्य एव यङ्
स्यान्न तु क्रियासमभिहारे। कुटिलं व्रजति वाव्रज्यते। लुपसदचरजपजभदहदशगृभ्यो भावगर्हायां। एभ्यो धात्वर्थग
र्हायामेव यङ् स्यात्। गर्हितं लुम्पति लोलुप्यते। सासद्यते। चरफलोश्च। अनयोरभ्यासस्यातो नुक् स्यात् यङ्लुकोः।
नुगित्यनेनानुस्वारो लक्ष्यते। स च पदान्तवद्वाच्यः। वा पदान्तस्येति यथा स्यात्। उत्परस्यातः। चरफलोरभ्यासात्परस्या
त उत्स्याद्यङ्लुकोः। हलि चेति दीर्घः। चञ्चूर्यते। चंचूर्यते। पम्फुल्यते। पंफुल्यते। जपजभदहदशभंजपशां च। एषाम
भ्यासस्य नुक् स्याद्यङ्लुकोः। गर्हितं जपति जंजप्यत इत्यादि। ग्रो यङि। गिरते रेफस्य लत्वं स्याद्यङि। गर्हितं गिलति
जेगिल्यते। घुमास्थेतीत्वं। द्वित्वं गुणः। देदीयते। पेपीयते। सेषीयते। विभाषा श्वेः। शोशूयते। शेश्वीयते। यङि च।
सास्मर्यते। रीङृतः। चेक्रीयते। सुट्। संचेस्क्रीयते। सिचो यङि। असिचः सस्य षो न स्याद्यङि। सेसिच्यते। न कवतेर्यङि।
कवतेरभ्यासस्य चुत्वं न स्याद्यङि। कोकूयते। कौतिकुवत्योस्तु चोकूयते। नीग्वंचुस्रंसुध्वंसुभ्रंसुकसपतपदस्कंदां। ए
षामभ्यासस्य नीगागमः स्याद्यङ्लुकोः। अकित इत्युक्तेर्न दीर्घः। नलोपः। वनीवच्यते। सनीस्रस्यते। इत्यादि। नुगतोनुना
सिकान्तस्य। अनुनासिकान्तस्यांगस्य योभ्यासोऽदन्तस्तस्य नुक् स्यात्। नुकानुस्वारो लक्ष्यत इत्युक्तं। यंयम्यते। यंयम्यते। तपर गणेश
त्वसामर्थ्यान्न पूर्वदीर्घस्यापि। भाम क्रोधे। बाभाम्यते। ये विभाषा। जाजायते। जंजन्यते। हन्तेर्हिंसायां यङि घ्नीभावो वाच्यः। ॥५०॥

जेघ्रीयते। हिंसायां किम्। जंघन्यते। रीगृदुपधस्य च। ऋदुपधस्य धातोरभ्यासस्य रीगागमः स्यात् यङ्लुकोः। वरीवृस्यते। [redacted]
[redacted] ऋदन्तादित्यानणः। नरीनृत्यते। जरीगृध्यते। उभयत्र लत्वं। चलीक्लृप्यते। रीगृत्वत इति वक्तव्यम्। वरीवृभ्यते। परी
पृच्छ्यते। स्वपिस्यमिव्येञां यङि। संप्रसारणं स्यात्। सोषुप्यते। सेसिम्यते। वेवीयते। न वशः। वावश्यते। चायः की। चेकी
यते। ई घ्राध्मोः। जेघ्रीयते। देध्मीयते। अयङ् यि क्ङिति। शीङो यङादेशः स्यात् यादौ क्ङिति परे। शाशय्यते। अभ्यासह्र
स्वः। ततो गुणः। डोढौक्यते। तोत्रौक्यते॥ ॥इति यङन्तप्रक्रिया॥ ॥यङोऽचि च। यङोऽच्प्रत्यये लुक् स्याच्चकारात्तं विना
पि बहुलं लुक् स्यात्। अनैमित्तिकोयम्। अंतरंगत्वादादौ भवति। ततः प्रत्ययलक्षणेन यङन्तत्वात्। द्वित्वम्। अभ्यास
कार्यम्। धातुत्वाल्लडादयः। शेषात्कर्त्तरीति परस्मैपदम्। अनुदात्तङित इति तु न। ङित्वस्य प्रत्ययाप्रत्ययसाधारणत्वे
न प्रत्ययलक्षणाप्रवृत्तेः। यत्र हि प्रत्ययस्यासाधारणं रूपमाश्रीयते तत्रैव तत्। अत एव स्नुहृषत्प्रासाद इसत्रात्व
संतस्येति दीर्घो न। येऽपि स्यई शीङादयोऽनुदात्तङितस्तेभ्योपि न। अनुदात्तङित इत्यनुबंधनिर्देशात्। तत्र च श्ति
पाशपेति निषेधात्। अत एव श्यन्नादयो न। गणेन निर्देशात्। किंतु शबेव। चर्करीतं चेत्यदादौ पाठाच्छपो लुक्। ऽ यङो
वा। यङन्तात्सरस्य हलादेः पितः सार्वधातुकस्य ईड्वा। भूसुवोरिति गुणनिषेधो यङ्लुकि भाषायां न। बोभूतु तेतिक्ते
ङ् इति छंदसि निपातनात्। अत एव यङ्लुक् भाषायामपि सिद्धः। नव यङ्लुकि अप्राप्त एव गुणाभावो नियास्यतामिति वा
च्यम्। प्रकृतिग्रहणे यङ्लुकस्तस्यापि ग्रहणात्। द्विःप्रयोगो द्विर्वचनं षाष्ठमिति सिद्धांतात्। बोभवीति। बोभोति। बो

भूतः॥ बोभुवति। बोभवांचकार। बोभविता। अबोभवीत्। अबोभोत्। अबोभूतां। अबोभवुः। बोभूयात्। बोभूयातां। बो
भूयास्ताम्। गातिस्थेति सिचो लुक्। यङो वेतीट्पक्षे गुणं बाधित्वा नित्यत्वाद्वुक्। अबोभूवीत्। अबोभोत्। अबोभूताम्।
अभ्यस्ताद्ययोऽनुस्। नित्यत्वाद्वुक्। अबोभूवुः। अबोभविष्यदित्यादि। पास्पर्द्धीति। पास्पर्द्धि। पास्पर्द्धः। पास्पर्द्धति। पा
स्पर्त्सि। हुझल्भ्यो हेर्द्धिः। पास्पर्द्धि। लङ्। अपास्पर्त्। सिपि। दश्चेति रुत्वपक्षे रोरि। अपास्पाः। जागाढि। जाघात्सि। अजा
घात्। सिपि रुत्वपक्षे। अजाघाः। नाथृ। नानात्ति। नानात्तः। दधा। दादद्धि। दादद्धः। दाधत्सि। अदाधत्। अदादद्धां। अदा
दधुः। अदाधः। अदाधत्। लुङि। अदादाधीत्। चोस्कूंदीति। चोस्कुंत्ति। अचोस्कुन्। अचोस्कुंतां। अचोस्कुंदुः। मोमुदीति।
मोमोत्ति। मोमोदांचकार। मोमोदिता। अमोमुदीत्। अमोमोत्। अमोमुत्तां। अमोमुदुः। अमोमुदीः। अमोमोः। अमो
मोत्। लुङि गुणः। अमोमोदीत्। चोकूर्त्ति। चोकूर्दीति। लङ् तिपि। अचोकूर्त्। सिपि पक्षे। अचोकूः। अचोकूर्दुः। अजो
गूः। वनीवंचीति। वनीवंक्ति। वनीवक्तः। वनीवचति। अवनीवंचीत्। अवनीवन्। जंगमीति। जंगन्ति। अनुदात्तोपदेशेत्य
नुनासिकलोपः। जंगतः। जंग्मति। म्वोश्च। जंगन्मि। जंगन्वः। एकाजग्रहणोक्तत्वान्नेडिन्निषेधः। जंगमिता। अनुना
सिकलोपस्याभीयत्वेनासिद्धत्वान्न हेर्लुक्। जंगहि। मोनो धातोः। अजंगन्। अनुबंधनिर्देशान्नलोपेरङ्। स्न्यंतेति न
वृद्धिः। अजंगमीत्। अजंगमिष्टां। हंतेर्यङ् लुक्। अभ्यासाच्चेति कुत्वम्। यद्यपि होहंतेरित्यतो हंतेरित्यनुवर्त्यं विहितं तथा
पि यङ्लुकि भवत्येवेति न्यासकारः। रितपाशपेति निषेधस्त्वनित्यः। गुणो यङ्लुकोरिति सामान्यापेक्षज्ञापकादिति भा

भावः। जंघनीति। जंघंति। जंघतः। जंघ्नति। जंघनिता। श्तिपा निर्देशान्नादेशो न। जंघहि। अजंघनीत्। अजंघन्। जंघन्यात्। आ
शिषि तु वध्यात्। अवधीत्। अवधिष्टामित्यादि। वधादेशस्य द्वित्वं न भवति। स्थानिवत्त्वेनानभ्यासस्येति निषेधात्। तद्धि समा
नाधिकरणं धातोर्विशेषणं। बहुव्रीहिबलात्। आङ्पूर्वात्तु आङो यमहनः इत्यात्मनेपदम्। आजंघते। इत्यादि। उ स्वरस्ये
ति तपरत्वान्न गुणः। हलि चेति दीर्घस्तु स्यादेव। तस्यासिद्धत्वेन तपरत्वनिवर्त्यत्वायोगात्। चंचूर्ति। चंचुरीति। चंचूर्तः। चं
चुरति। अचंचुरीत्। अचंचूः। चंखनीति। चंखन्ति। जनसनखनां सञ्झलोः। चंखातः। गमहनेत्युपधालोपः। चंख्नति। चंखाहि।
चंखनानि। अचंखनीत्। अचंखन्। अचंखातां। अचंख्नुः। ये विभाषा। चंखायात्। चंखन्यात्। अचंखनीत्। अचं
खानीत्। उतो वृद्धिरित्यत्र नाभ्यस्तस्येत्यनुवर्ततेऽतो वृद्धिर्न। योयोति। योयवीति। अयोयवीत्। अयोयोत्। यो
युयात्। आशिषि दीर्घः। योयूयात्। अयोयावीत्। नोनवीति। नोनोति। जाहेति। जाहाति। ई हल्यघोः। जाहीतः। इह
जहातेश्च आ च हौ लोपो यि घुमास्था एर्लिङि इत्येते पंचापि न भवंति। श्तिपा निर्देशात्। जाहति। जाहासि। जाहेषि।
जाहीथः। जाहीहि। जाहिहि। अजाहेत्। अजाहात्। अजाहीतां। अजाहुः। जाहीयात्। आशिषि जाहायात्। अजा
हासीत्। अजाहासिष्टां। अजाहिषत्। लुका लुप्ते प्रत्ययलक्षणाभावात् स्वपिस्यमीत्युत्वं न। रुदादिभ्य इति गणनि
र्दिष्टत्वादिण्न। सास्वपीति। सास्वप्ति। सास्वप्तः। सास्वपति। असास्वपीत्। असास्वप्। सास्वप्यात्। आशिषि तु। वचिस्व
पीत्युत्वम्। सासुप्यात्। असास्वापीत्। असास्वपीत्। रुग्रिकौ च लुकि। ऋदुपधस्य धातोरभ्यासस्य रुक् रिक् रीक्

सि॰ति॰ एते आगमास्सुर्यङ्लुकि। ऋतश्च। ऋदंत धातोरवितथा। वर्वर्तीति। वरिवर्तीति। वरीवर्तीति। वर्वर्ति। वरिवर्ति। वरीवर्ति। वर्वृतः॥
॥५२॥ वर्वृतति।२ वर्वर्तीमास२ वर्वर्तिता।२ गणनिर्दिष्टत्वान्न वृद्भ्यश्चतुर्भ्य इति न। वर्वर्तिष्यति२। अवर्वर्तीत्२। अवर्वर्तुः२। सिपि।
दश्चेति रुत्वपक्षे रोरि। अवर्वाः।२। गणनिर्दिष्टत्वादङ्। अवर्वर्तीत्।२ चर्करीति२ चर्कर्ति। चरिकर्ति। चरीकर्ति। चर्कृतः।२ चर्क्रति२
चर्करं। चकार२ चर्करिता।२ अचर्करीत२ अचर्कः।२ चर्कृयात्।२ आशिषि रिङ्। चर्क्रियात्।२ अचर्करीत२ ऋतश्चेति न परत्वा
न्नेह। कृ विक्षेपे। चाकर्ति। तातर्ति। तातीर्तः। तातिरति। तातीर्हि। तातराणि। अतातरीत्। अतातः। अतातीर्ताम्। अतातरुः।
अतातारीत्। अतातारिष्टाम् इत्यादि। अर्तेर्यङ्लुकि द्वित्वेऽभ्यासस्योदेर्त्वं रपरत्वम्। हलादिः शेषः। रुक्। रिग्रीकोस्त्वअ
भ्यासस्यासवर्णे इतीयङ्। अरर्ति। अरियर्ति। अररीति। अरियरीति। अरृतः। अरियृतः। ङ्ञि। अरत्। यणः रुकोरोरीति लोपः। न
च तस्मिन्कर्तव्ये यणः स्थानिवत्वं। पूर्वत्रासिद्धेत न्निषेधात्। आरति। अरियति। लिङि। भ्नियां नि ईशा द्गुणोर्तीति गुणो न। रिङ्॥
रलोपः। दीर्घः। आरियात्। अरिरियात्। अरीरियात्। ग्रहू ग्रहणे। जर्गृहीति२ जर्गर्हि२ जर्गृढः२ जर्गृहति२ अजर्घट्२।
ग हलो तेस्त्कः। जाग्रहीति। जाग्राढि। तसादौ। ङ्नित्ति संप्रसारणं। तस्य बहिरंगत्वेनासिद्धत्वान्न रुगादयः। जागृढः। जा
गृहति। जाग्रहीषि। जाघ्रक्षि। लुटि। जाग्रहिता। ग्रहोऽलिटीति दीर्घस्तु न। तत्रैकाच इत्यनुवृत्तेः। माधवस्तु दीर्घमाह। तद्भाष्या
दिविरुद्धम्। जर्गृधीति२ जर्गर्द्धि२ जर्गृद्धः२ जर्गृधति२ जर्गृधीषि। जर्घर्त्सि। अजर्गृधीत्। ईडभावे। गुणः। हल्ङ्याब्भ्यो दिलो गणेश
पः। भष्भावः। जघर्त्। अजर्घर्त्२ अजर्गृद्धाम्। सिपि दश्चेति पक्षे रुत्वं। अजर्घाः।२ अजर्गृधीत्। अजर्गर्धिष्टाम्। पा ॥५२॥

तस्य यत्परमाग्रहायण्यास्तत्राध्येष्यामहे। अध्येतास्महे। लिङ्निमित्ते लृङ् क्रियातिपत्तौ। भविष्यतीत्येव। सुवृष्टिश्चेदभ
विष्यत्तदा सुभिक्षमभविष्यत्। भूते च। पूर्वसूत्रं संपूर्णमनुवर्तते। वोताप्योः। उताप्योरित्यतः प्राग्भूते लिङ्निमित्ते लृङ् त्वधि वाआउइति
क्रियते। पूर्वसूत्रं तु उताप्योरित्यादौ प्रवर्त्तत इति विवेकः। गर्हायां लडपिजात्वोः। आभ्यां योगे लट् स्यात् कालत्रये गर्हायां। लु छेदः २
ङादीनरत्वादयं बाधते। अपिजायांस्त्यजसि जातु गणिकामाधत्से गर्हितमेतत्। विभाषा कथमि लिङ् च। गर्हायामित्येव॥
कालत्रये लिङ्। चाल्लट्। कथं धर्मं त्यजेः त्यजसि वा। पक्षे कालत्रये लकाराः। अत्र भविष्यति नित्यं लृङ्। भूते वा। कथं नाम त
त्रभवान् धर्ममत्यक्ष्यत्। किंवृत्ते लिङ्लृटौ। गर्हायामित्येव। विभाषा तु नानुवर्तते। कः कतरः कतमो वा हरिं निंदेत्। निंदि
ष्यति। लृङ् प्राग्वत्। अनवक्लृप्त्यमर्षयोरकिंवृत्तेपि। गर्हायामिति निवृत्तम्। अनवक्लृप्तिरसंभावना अमर्षोऽक्षमा। नसं
भावयामि न मर्षये वा भवान् हरिं निंदेत। निंदिष्यति वा। कः कतरो वा हरिं निंदेत्। निंदिष्यति वा। लृङ् प्राग्वत्। किंकिलास्त्य
र्थेषु लृट्। अनवक्लृप्त्यमर्षयोरित्येव गर्हायां चेति यावदनुवर्तते। किंकिलेति समुदायः क्रोधद्योतकः उपपदं। अस्त्यर्थाः।
अस्ति भवति विद्यत यः। लिङोपवादः। न श्रद्दधे न मर्षये वा किं किल त्वं श्रघन्नं भोक्ष्यसे। अस्ति भवति विद्यते वा श्रद्धो गमि
ष्यसि। अत्र लृट्। जातु यदोर्लिङ्। यदायद्योरुपसंख्यानं। लृटोपवादः। जातु यद् यदा यदि वा त्वादृशो हरिं निंदेत्। नावक
ल्पयामि न मर्षयामि। लृङ् प्राग्वत्। यच्चयत्रयोः। यच्च यत्र वालमेवं कुर्याः। न श्रद्दधे न मर्षयामि। गर्हायां च। अनवक्लृप्त्यम

सि॰ति॰ र्थयोरिति निवृत्तं। यच्च यत्र योर्योगे गर्हायां लिङेव स्यात्। यच्च यत्र वा त्वं भृद्रं याजयेः। अन्याय्यं तत्। चित्रीकरणे च॥
॥६६॥ यच्च यत्र वा त्वं भृद्रं याजयेः आश्चर्यमेतत्। शेषे लृड् यदौ। यच्चयत्राभ्यामन्यस्मिन्नुपपदे चित्रीकरणे गम्ये धातोर्लृट्
स्यात्। आश्चर्यमंधो नाम कृष्णं द्रक्ष्यति। अयदौ किं। आश्चर्यं यदि स धीयीत। उताप्योः समर्थयोर्लिङ्। बाढमित्यर्थे अनयो सो ३
स्तुल्यार्थता। उत अपि वा हन्याद् घं हरिः। समर्थयोः किं। उत दंडः पतिष्यति। अपिधास्यति द्वारं। प्रश्नः प्रच्छादनं च गम्य
ते। इतः प्रभृति लिङ्ङिमित्तेक्रियातिपत्तौ भूते विनित्यं लृङ्। कामप्रवेदनेकच्चिति। स्वाभिप्रायाविष्करणे गम्यमाने
लिङ् स्यान्न तु कच्चिति। कामो मे भुंजीत भवान्। अकच्चितीति किं। कच्चिज्जीवति। संभावनेलमिति चेत्सिद्धाप्रयोगे।
अ ६ अलमर्थोत्र प्रोटिः। संभावनमिति लमिति च प्रथमया सप्तम्या च विपरिणम्यते। संभावनेर्थे लिङ् स्यात् तच्चेत्संभा
वनमलमिति [stain] अलमि[stain] सिद्धाप्रयोगे सति। अपि गिरिं शिरसा भिंद्यात्। सिद्धाप्रयोगे किं। अलं कृष्णो हस्ति
नं हनिष्यति। विभाषा धातौ संभावनवचनेयदि। पूर्वसूत्रमनुवर्तते। संभावनार्थे धातावुपपदे उक्तेर्थे लिङ् वा स्या
न्न तु यच्छब्देन पूर्वेण नित्ये प्राप्ते वचनं। संभावयामि भुंजीत भोक्ष्यते वा भवान्। अयदि किं। संभावयामि यद्भुंजीथा
स्त्वं। हेतुहेतुमतोर्लिङ्। वा स्यात्। कृष्णं नमेच्चेत्सुखं यायात्। कृष्णं नंस्यति चेत्सुखं यास्यति। न विपर्यासे वेष्यते। नेह। गणेश
हंतीति पलायते। इच्छार्थेषु लिङ्लोटौ। इच्छामि भुंजीत भुंक्तां वा भवान्। एवं कामये प्रार्थये इत्यादि योगे बोध्यम्। का ॥६६॥

मप्रवेदनइतिवक्तव्यम्। नेह। इच्छन्करोति। लिङ्चासमानकर्तृकेषुइच्छार्थेषूपपदेषुलिङ्स्यात्। भुंजीयेतीच्छति। इच्छा
र्थेभ्योविभाषावर्तमाने। लिङ्स्यात्। इच्छेल्लट्। इच्छेत्। इच्छति। कामयेत। कामयते। विधिनिमंत्रणेतिलिङ्। विधौ। यजेत।
निमंत्रणे। इहभुंजीतभवान्। आमंत्रणे। इहासीत। अधीष्टे। पुत्रमध्यापयेद्भवान्। संप्रधारणे। किंभोवेदमधीयीय। उ
ततर्के। प्रार्थने। भोभोजनंलभेय। एवंलोट्। प्रैषातिसर्गप्राप्तकालेषुकृत्याश्च। प्रैषोविधिः। अतिसर्गःकामचारानुज्ञा।
भवतायष्टव्यम्। भवान्यजतां। चकारेणलोटोऽनुकर्षणं। प्राप्तकालार्थे। लिङ्चोर्ध्वमौहूर्तिके। प्रैषादयोऽनुवर्तते। मुहूर्ता
दूर्ध्वंयजेत। यजतां। यष्टव्यं। स्मेलोट्। पूर्वसूत्रस्यविषये। लिङ्कृत्यानांचापवादः। ऊर्ध्वंमुहूर्तात्यजतांस्म। अधीष्टेचास्मे
ऽउपपदेऽधीष्टेलोट्स्यात्। त्वंस्मअध्यापय। लिङ्यदि। यत्शब्देउपपदेकालसमयवेलासुचलिङ्स्यात्। कालःसमयोवेला
वायद्भुंजीतभवान्। अर्हेकृत्यतृचश्च। वाल्लिङ्। त्वंकन्यांवहेः। शकिलिङ्च। शक्तौलिङ्स्यात्चात्कृत्यः। भारंत्वंवहेः। मा
ङिलुङ्। माकार्षीः। कथंमाभवतुमाभविष्यतीति। नायंमाङ्। किंतुमाशब्दः। धातुसंबंधेप्रत्ययाः। धात्वर्थानांसंबंधेयत्रका
लेप्रत्ययाउक्तास्ततोऽन्यत्रापिस्युः। तिङंतवाच्यक्रियायाःप्राधान्यात्तदनुरोधेनगुणनाविक्रियावाचिभ्यःप्रत्ययाः। व
सुन्ददृशा। भूतेलट्। अतीतवासकर्तृकर्तृकंदर्शनमर्थः। सोमयाज्यस्यपुत्रोभविता। सोमेनयक्ष्यमाणोयःपुत्रस्तत्कर्तृ
कंभवनं। क्रियासमभिहारेलोट्लोटोहिस्वौवाचतध्वमोः। पौनःपुन्येभृशार्थेचद्योत्येधातोर्लोट्स्यात्। तस्यचहिस्वौ

सि॰ति॰ ॥६७॥

स्तङ्स्तिङापवादः। तौ च हिस्वौ क्रमेण परस्मैपदात्मनेपदसंज्ञौ स्तः तिङ्संज्ञौ च। तध्वमोर्विषये तु हिस्वौ वा स्तः। पुरुषैक
वचने च संज्ञे तु नानयोरतिदिश्येते। हिस्वविधानसामर्थ्यात्। तेन सकलपुरुषवचनविषये परस्मैपदिभ्यो हि क
र्धि। आत्मनेपदिभ्यः स्वो भावकर्मकर्तृषु। समुच्चयेऽन्यतरस्याम्। अनेकक्रियासमुच्चये द्योत्ये प्रागुक्तं वा स्यात्।
यथाविध्यनुप्रयोगः पूर्वस्मिन्। आद्ये लोड्विधाने लोट्प्रकृतिभूत एव धातुरनुप्रयोज्यः॥ समुच्चये सामान्यव
चनस्य। समुच्चये लोड्विधौ सामान्यार्थस्य धातोरनुप्रयोगः स्यात्। अनुप्रयोगाद्यथायथं लडादयः तिबादयश्च।
ततः संख्याकालयोः पुरुषविशेषार्थस्य चाभिव्यक्तिः। क्रियासमभिहारे द्वे वाच्ये। याहि याहीति याति। पुनः पुनरति
शयेन वा यानं तस्यार्थः। एककर्तृकं वर्तमानं यानं यातीत्यस्य। इति शाब्दभेदान्वये तात्पर्यं ग्राहयति। एवं। यातः।
यान्ति। यासि याथः। या[illegible]थ। यात यातेति सूत्रं याथ। याहि याहीत्ययासीत्। स्येयोतिवा। अधीष्वाधीष्वेत्यधीते।
ध्वं विषये। पक्षे धीध्वमधीध्वमिति सूत्रमधीध्वे। समुच्चये तु सक्तून् पिब धानाः खादेत्यभ्यवहरति। अन्नं भुंक्ष्व द
भ्य ३ धिकमास्वादस्वेत्यभ्यवहरते। तध्वमोस्तु। पिबत खादतेत्यभ्यवहरथ॥ भुंग्ध्वं आस्वादध्वमिति अभ्यवहरध्वे। पक्षे हि
स्वौ। अत्र समुच्चीयमानविशेषाणामनुप्रयोगार्थेन सामान्येनाभेदान्वयः। पक्षे सक्तून् पिबति धानाः खाद गणेश
ति। अन्नं भुंक्ते। दधिकमास्वादते। एतेन। पुरीमवस्कंद लुनीहि नंदनं मुषाण रत्नानि हरामरांगनाः॥ विग्रहयत्स ॥६७॥

क्रेन मुचिद्धिपावलीयइत्थमस्यास्थ्य महर्षिर्णिं शं दिवइतिव्याख्यातं। अवस्कंदनलवनादिरूपाभूतानघतनपरोक्षा
एककर्तृकाग्नस्यास्थ्यक्रियेत्यर्थात्। इह पुनः पुनःवस्कंदेत्यादिरर्थे इतितुव्याख्यानेभ्रमम्लकमेवाद्वितीयसूत्रे
क्रियासमभिहारे इत्यस्यानुवृत्तेः। लोडंतद्वित्वापत्तेश्च। पुरीमवस्कंदेत्यादिमध्यमपुरुषैकवचनमित्यपिकेषांचित्तवि
भ्रम एव। पुरुषवचनसंङ्गेइहतुनेत्युक्तत्वात्॥ ॥छ॥ इतिलकारार्थप्रक्रिया॥ छ॥ छ॥ छ॥ छ॥ छ॥
इतिश्रीमहोजिदीक्षितविरचितायांसिद्धांतकौमुद्यांतिङंतंसमाप्तं॥ ॥छ॥ छ॥ छ॥ छ॥ छ॥ छ॥

सि॰ ति॰
॥६८॥

सं मा

व्याकरण

३६००



गणेश
॥६८

सर्वासु। एवं विभ्रादय आवंताः। विभाषादिकुसमासेवहुव्रीहो। अत्र सर्वनाम ता वा स्यात्। उत्तरपूर्वस्यै। उत्तरपूर्वायै। दिङ्ना
मान्यंतराले इति प्रतिपदोक्तस्य दिकुसमासस्य ग्रहणान्नेह। योत्तरा सा पूर्वस्याः उन्मुग्धायाः। तस्यै उत्तरपूर्वायै। वहुव्रीहिग्र र्वा
हणं स्पष्टार्थं। अंतरस्यै शालायै वा। घायेइत्यर्थः। अपुरी इत्युक्ते नेह। अंतरायै नगर्यै। विभाषा द्वितीयातृतीयाभ्यां। आभ्यां प
रस्य ङितः स्याट् वा आपश्च ह्रस्वः। इदं सत्वे स्यट्कुर्याद्वा नित्यं। तिय स्यादि ङित्स्वरूपं ये स्याना नात्। द्वितीयस्यै। द्वितीयायै। द्वितीयस्याः। द्वितीयायाः।
द्वितीयस्यां। द्वितीयायां। शेषं रमावत्। एवं तृतीया। अंबार्थनद्योर्ह्रस्वः। हे अंब। हे अक्क। हे अल्ल। ञ संयुक्ता येडलका स्तेषां ह्रस्वो
ना हे अंबाडे। हे अंबाले। हे अंबिके। जरा। जरसौ। शी मा वा सर्वत्यांजरसः। आमि नुट् पर त्वाज्जरसां जरसा। जरसामित्यादि। पक्षे रमा
वत्। इह ह[redacted]वं विप्रतिषेधेन शीभावं सन्निपातपरिभाषया अनित्यत्वाज्जरसो इति केचित्। तन्निर्मूलं। पद्यपिज
रसादेशस्य स्थानिवद्भावेनाबंतता मास्त्यस्य। अओ ङ् आपः। आङि चापः। याडापः। ह्रस्वनद्यापः। ङे रामू। इति पंचापि विधयः
प्राप्ताः। एवं न स्यन्निश्चर एवस्तु तथापि अनल्विधाविस्युक्तेर्न भवति। आमा विति प्रश्लिष्य आकाररूपस्यैवापः सवर्णग्रहणात्। ह्रल
ङ्याब्भ्यो इति सूत्रे आ आप् ङी ई इति प्रश्लेषादतिखट्वः। निष्कौशांबिरित्यादि सिद्धेर्दीर्घग्रहणं प्रत्याख्येयं। न चैवमतिखट्वाये
ति अत्र स्याडाशयं आकारत्वं स्थानिवद्भावेनापत्वं चाश्रित्य याट् स्यादिति वाच्यं। आवंतं यदंगं ततः परस्य याड्विधानात्। उपस
सा र्जनस्त्रीप्रत्यये तदादिनियमात्। पद्दन्नितिनासिकायानसे। नसः। नसा। नोभ्यामित्यादि। पक्षे क्षुटिचरमावत्। निशायाः
निश्चः। निशाः। निशा। व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः। व्रश्चादीनां सप्तानां छशांतयोश्च षकारोंतादेशः स्याज्
झलि पदांते च। षस्य जश्त्वेन डः। निड्भ्यां। निड्[illegible]भिः। सुपि ङः सीति पक्षे धुट्। वर्णीं तस्या सिद्धत्वाच्च योर्द्वितीयाइति ट
तयोः ठथो न स्तः। नपदांता ट्टोरिति ष्टुत्वं ना। निट्त्सु। निट्सु। षढोः कः सि। षस्य ढस्य च कः स्यात् सकारे परे। इति तु न भव
ति। जश्त्वं प्रत्यसिद्धत्वात्। केचित्तु व्रश्चेतिसूत्रे दादेर्धातोर्घ इति सूत्राद्धातोरित्यनुवर्तयंति। तन्मते जश्त्वेन डकारेनिड्भ्यां।

सि·सु·
॥९७॥

निक्रोः। निक्रुभ्यां। वोः कुः इति कुत्वं तु न भवति। जश्त्वस्यासिद्धत्वात्। मांसपृतनासानूनां मांस्पृत्स्नुवो वाच्याः। शसादौ वा। पृतः। पृतना।
एभ्यामिमित्यादि। पक्षे सुहृदि चरमावत्। गोपा विश्वपावत्। मतिः प्रायेण हरिवत्। स्त्रीत्वान्नत्वाभावः। मतीः। नात्वं तु। मत्या॥
ङिति ह्रस्वश्च। इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिंगावीदूतौ ह्रस्वौ चेवर्णोवर्णौ स्त्र्याख्यौ यांवा नदीसंज्ञौ स्तो ङिति परे।
आण्नद्याः। मत्यै मतये। मत्याः २। मतेः २। नदीत्वपक्षे औदिति ङे रौत्वे प्राप्ते। इदुद्भ्याम्। नदीसंज्ञकाभ्यामिदुद्भ्यां परस्य ङे राम्स्यात्।
पक्षे अच्च घेः। मत्यां। मतौ। एवं श्रुत्यादयः। त्रिचतुरोः स्त्रियां तिसृचतसृ। स्त्रीलिंगयोरेतयोरेतावादेशौ स्तो विभक्तौ परतः।
अचि र ऋतः। तिसृचतसृ एतयोः ऋकारस्य रेफादेशः स्यादचि। गुणदीर्घोत्वानामपवादः। तिस्रः। तिसृभिः। तिसृभ्यः। आ
मि नुमचिरेति नुट्। न तिसृचतसृ। एतयोर्नामि दीर्घो न स्यात्। तिसृणां। तिसृषु। स्त्रियामिति त्रिचतुरोर्विशेषणं नेह। प्रिया
स्त्रयः स्त्रियो वा यस्य सः प्रियत्रिः। इत्यादि मतिवत्। आमि प्रियत्रयाणामिति विशेषः। प्रियास्तिस्रो यस्येति विग्रहे तु प्रि
यतिसा। प्रियतिसौ। प्रियतिसः। प्रियतिसृमित्यादि। प्रियास्तिस्रो यस्य तत्कुलं प्रियत्रि। अस्य सोर्लुका लुप्तत्वेन प्रत्यय
लक्षणाभावान्नऽतिस्रादेशः। नन्वमतेति निषेधस्यानित्यत्वात्पक्षे प्रियतिसृ। रादेशात्पूर्वविप्रतिषेधेन नुम्। प्रियति
सृणी। प्रियतिसृणि। तृतीयादिषु वक्ष्यमाणपुंवद्भावविकल्पात्। पक्षे रेण नुमभावो। प्रियतिस्रा प्रियतिसृणा इत्यादि।
द्वेरत्वे सति टाप्। द्वे २। द्वाभ्यां ३। द्वयोः २। गौरी। गौर्यौ। गौर्यः। नदीकार्यं। हे गौरि। हे गौर्यौ। गौर्यै इत्यादि। एवं वाणीनद्यादयः॥
प्रातिपदिकग्रहणे लिंगविशिष्टस्य ग्रहणादनङि सिङ्लोपे वेव प्राप्ते विभक्तौ लिंगविशिष्टाग्रहणं। सखी। सख्यौ। सख्यः।
इत्यादि गौरीवत्। अङ्यन्तत्वान्न सुलोपः। लक्ष्मीः। शेषं गौरीवत्। एवं तरीतन्त्र्यादयः। स्त्री। हे स्त्रि। स्त्रियाः। स्त्रीशब्दस्येय
ङ् स्यादजादौ प्रत्यये परे। स्त्रियौ। स्त्रियः। वाम्शसोः। अमि शसि च स्त्रिया इयङ् वा स्यात्। स्त्रियं। स्त्रीं। स्त्रियः। स्त्रीः। स्त्रिया। गलेश
स्त्रियै। स्त्रियाः २। स्त्रियोः २। परत्वान्नुट्। स्त्रीणां। स्त्रियां। स्त्रीषु। स्त्रियमतिक्रान्तोऽतिस्त्रिः। अतिस्त्रियौ। गुणनाभा ॥९७॥

पड्·२

वात्यनुङ्िः परत्वात्सुंस्विंवाध्यते। स्त्री वेनुमा च स्त्री शब्दस्येयङ्स्य व धार्यतां। तुल्लि च। अतिस्त्रियः। हे अतिस्त्रे। वामश्शसोः। अतिस्त्रि
यं। अतिस्त्रिं। अतिस्त्रियः। अतिस्त्रीन्। अतिस्त्रिणा। घेर्ङिति। अतिस्त्रये। अतिस्त्रेः २ अतिस्त्रियोः। अतिस्त्रीणां। अच्च घेः। अतिस्त्रौ।
औत्स्यौ कारे वचनि स्यस्याद मश्शसोस्तु विभाषया। इत्यादेशो वि [redacted] नान्यस्य स्त्रियाः पुंस्त्वपसर्जने। स्त्री वेतनुम्। अतिस्त्रि। २
अतिस्त्रिणी। अतिस्त्रीणि। अतिस्त्रिणे। ङिप्रभृतावजादौ वक्ष्यमाणपुंवद्भावास क्षेप्राग्वद्रूपं। अतिस्त्रये। अतिस्त्रिणः। अतिस्त्रेः २
अतिस्त्रिणोः। अतिस्त्रियोरित्यादि। स्त्रियां तु प्रायेण पुंवत्। हासि अतिस्त्रीः। अतिस्त्रिया। ङितिह्रस्वश्चेति ह्रस्वांतत्वप्रयुक्तो विकल्पः। क ५
अस्त्री तियङुवङ्स्थानावित्यस्यैव पर्युदासत्वात्संबंधस्यैवानुवर्त्तेः। अतिस्त्रियै। अतिस्त्रये। अतिस्त्रियाः २। अतिस्त्रेः २
अतिस्त्रियां। अतिस्त्रौ। इत्यादि। श्रीः। श्रियौ। श्रियः। नेयङुवङ्स्थानावस्त्री। इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्तो
न तु स्त्री। हे श्रीः। श्रिये। श्रियै। श्रियाः २ श्रियः। वामि। इयङुवङ्स्थानौ स्त्र्याख्यौ यू आम्नि वा नदीसंज्ञौ स्तो न तु स्त्री। श्रियां। श्री
णां। श्रियि। ग। धीशब्दस्य तु वृत्तिकारादीनां मते लक्ष्मीवद्रूपं। पदांतरं विनापि स्त्रियां वर्त्तमानत्वं नित्यस्त्रीत्वमिति स्त्रीकारात्
लिंगांतरानभिधायकत्वं नदीति कय्यटमते तु पुंवद्रूपं। [redacted] प्रकृष्टा धीरिति विग्रहे लक्ष्मीवत्।
अभिशासिच प्रध्यं प्रध्य इति विशेषः। सुष्ठु धीर्यस्याः सुष्ठु ध्यायति वेति विग्रहे वृत्तिमते सुधीः। श्रीवत्। मतांतरे पुंवत्। सुष्ठु तु
धीरिति विग्रहे तु श्रीवदेव। ग्रामणीः पुंवत्। ग्राममनयन न स्त्रीत्वं सर्गतः पुंधर्मतया पदांतरं विना स्त्रियाम प्रवृत्तेः। एवं खलपवनादेर
पि पुंधर्मत्वमौत्सर्गिकं बोध्यं। धेनुर्मतिवत्। स्त्रियां च। स्त्रीवाची क्रोष्टुशब्दः तृजंतवद्रूपं लभते। ऋन्नेभ्यो ङीप्। ऋदंतेभ्यो नां
तेभ्यश्च स्त्रियां ङीप् स्यात्। क्रोष्ट्री। क्रोष्ट्र्यौ। क्रोष्ट्र्यः। वध्रूर्गौरीवत्। भ्रूः श्रीवत्। हे सुभ्रूः। कथं तर्हि हा पितः क्वासि हे सुभ्रु इति भट्टिः।
प्रमाद एवायमिति बहवः। खलपूः पुंवत्। पुनर्भूः। दृन्करेति यणादेशः उवङो वाधनान्नेयङुवङिति निषेधो न। हे पुनर्भु। पुनर्भ्वं। पुनर्भ्वौ।
पुनर्भ्वः। एकाजुत्तरपदे णः। एकाजुत्तरपदं यस्य तस्मिन्समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकांतनुम्विभक्तिस्थस्य न

दीर्घस्यायं निषेधो
न तु ह्रस्वस्य ६

तु

सि॰ स्त्रु॰ ॥१८॥

स्यनिसंज्ञत्वं स्यात्। आरं न सामर्थ्यान्निमित्तत्वे सिद्धे पुनर्ग्रहणं स्फुटार्थं। यणं वाधित्वा परत्वान्नुट्। पुनर्भूः यणं। वर्षाभ्वः। नेकत्वातो
निमित्तत्वाभावात् हे वर्षाभूः कथ्यं मते। मतांतरे तु हे वर्षाभु। पुनर्नवा यां तु हे वर्षाभु। नेक्ष्यां पुनर्नवायां स्त्री वर्षाभ्वः दृदृरे पुमान्।
इति यादवः। वर्षाभ्वश्च। वर्षाभ्वौ। वर्षाभ्वः। स्वयंभूः। पुंवत्। न षट्स्वस्रादिभ्यः। षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च ङीप् टाप् न स्तः। स्व
सा तिस्रश्चतस्रश्च [illegible] ननांदा दुहिता तथा॥ याता मातेति सप्तैते स्वस्रादय उदाहृताः॥१॥ अप्तृन्निति दीर्घः। स्वसा। स्वसारौ।
स्वसारः। माता पितृवत्। शसि मातॄः। द्यौर्गोवत्। राः पुंवत्। नौर्ग्लौवत्॥ ॥इत्यजंताः स्त्रीलिंगाः॥७॥ अतोम्। अतो गात्
क्लीबात्स्वमोरम् स्यात्। अमि पूर्वः। ज्ञानं। एङ्ह्रस्वादिति हल्मात्रलोपः। हे ज्ञान। नपुंसकाच्च। क्लीबात्परस्यौङः शी स्या
त्। भसंज्ञायां। यस्येति च। नस्येवर्णावर्णयोर्लोपः स्यादीकारे तद्धिते च परे। इति अकारलोपे प्राप्ते। औङः श्यां प्रतिषेधो
वाच्यः। ज्ञाने। जश्शसोः शिः। क्लीबादनयोः शिः स्यात्। शि सर्वनामस्थानं। शि इत्येतदुक्तं स्यात्। नपुंसकस्य झलचः।
झलंतस्याजंतस्य क्लीबस्य नुमागमः स्यात् सर्वनामस्थाने परे। उपधायादीर्घः। ज्ञानानि। पुनस्तद्वत्। शेषं रामवत्। एवं
धनफलादयः। अद्ड् डतरादिभ्यः पंचभ्यः। एभ्यः क्लीबेभ्यः स्वमोरद्डादेशः स्यात्। टेः। डिति परे भस्य टेर्लोपः स्यात्।
वावसाने। कतरद्। कतरत्। कतरे। कतराणि। टेर्लुप्तत्वात्प्रथमयोः पूर्वसवर्णदीर्घः। एङ्ह्रस्वादिति संबुद्धिलोपश्च न भवति। हे कतरत्।
पुनस्तद्वत्। शेषं पुंवत्। कतमत्। इतरत्। अन्यत्। अन्यतरत्। अन्यतमस्य तु अन्यतममित्येव। एकतरात्प्रतिषेधो वक्तव्यः। एकत
रं। सोरमादेशे कृते संनिपातपरिभाषया न जरस्। अजरं। अजरसी। अजरे। परत्वाज्जरसि कृते हलंतत्वान्नुम्। सांतमहतः
संयोगस्य। सांतसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे। अजरांसि। अमित्युक्तोऽपवादमम् ग्राणेःश
भावं बाधित्वा परत्वाज्जरस्। ततः संनिपातपरिभाषया नलुक्। अजरसं। अजरं। अजरसी। अजरे। अजरांसि। अजरांति। अपदृन्निति ॥१८॥

पदांते किं। स्नस्तं। ध्वस्तं। सहः साड्ः सः। साड्रूपस्य सहेः सस्य मूर्द्धन्यादेशः। तुराषाट्। तुराषाड्। रोतुं सा हो तुरासाहः। तुराषाड्भ्यामित्यादि

तुरं सहत इत्यर्थे छन्दसि सहः इति ण्विः। लौके तु साहयतेः क्विप्। अन्येषामपीति पूर्वपदस्य दीर्घः। दिव औत्। दिविति प्रातिपदिक

स्य औः स्यात् सौ परे। अल्विधित्वेन स्थानिवत्त्वाभावात् हल्ङ्याब्भ्य इति लोपो न। सुद्यौः। सुदिवौ। सुदिवः। सुदिवं। सुदिवौ। दिव उत्।

दिवोंतादेशः उकारः स्यात् पदांते। सुद्युभ्यां। सुद्युभिः। चत्वारः। चतुरः। चतुर्भिः। चतुर्भ्यः। षट्चतुर्भ्यश्च। षट्संज्ञकेभ्यश्चतुरश्चाप

परस्यामो नुडागमः स्यात्। णत्वं। द्वित्वं। चतुर्णां। रोः सुपि। सप्तमी बहुवचने परे रो रेफस्य विसर्गो नान्यस्य। षत्वं। षस्य द्वित्वे प्राप्ते।

शरोचि। अचि परे शरो द्वे न स्तः। प्रियचत्वाः। हे प्रियचत्वः। प्रियचत्वारो। णो णत्वे तु नुट् नेष्यते। प्रियचतुरां। प्राधान्ये तु स्यादेव।

परमचतुर्णां। कमलं कमलौ वा। आचक्षाणः। कमलु। कमलौ। कमलः। षत्वं। कमलुषु। मो नो धातोः। धातोर्मस्य नः स्यात् पदां

ते। नत्वस्यासिद्धत्वान्नलोपो न। प्रशाम्यतीति प्रशान्। प्रशामौ प्रशामः। प्रशान्भ्यामित्यादि। किमः कः। किमः कुः स्यात् विभ

क्तौ। अकच्सहितस्याप्ययमादेशः। कः। कौ। के। कानि त्यादि सर्ववत्। इदमो मः। इदमो मस्य मः स्यात् [redacted]। त्यदाद्य

त्वापवादः। इदोय् पुंसि। इदम इदस्थाने अय् स्यात् सौ पुंसि। सोर्लोपः। अयं। त्यदाद्यत्वं पररूपत्वं। दश्च। इदमो दस्य मः

स्याद्विभक्तौ। इमौ। इमे। त्यदादेः संबोधनं नास्तीत्युत्सर्गः। इमं। इमान्। अनाप्यकः। अककारस्य इदम इदोऽन् स्यादापि

विभक्तौ। आबिति टा इत्यारभ्य सुपः पकारेण प्रत्याहारः। अनेना। हलि लोपः। अककारस्य इदम इदो लोपः स्यादापि हलादौ।

नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे। आद्यंतवदेकस्मिन्। एकस्मिन् क्रियमाणं कार्यमादाविवांतइव स्या

त्। आभ्यां। नेदमदसोरकोः। अककारयोरिदमदसोर्भिस ऐस् न स्यात्। एतौ। एभिः। अत्वं। निसत्वात् ङे स्मे पश्चाल्लोपः।

अस्मै। आभ्यां। एभ्यः। अस्मात्। अस्य। अनयोः। एषां। अस्मिन्। एषु। ककारयोगे तु। अयकं। इमकौ। इमके। इमकेन। इम

चतुर्षु

रेफप

स्त्रो

सि॰सु॥ केन। इमकाभ्यां। ३। इमकैः॥ इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ। अन्वादेशविषयस्येदमोऽनुदात्तोऽश् आदेशः स्यात्तृतीयादौ।
॥२०॥ अश्वचनं साकच्कार्थं। द्वितीयाटौस्स्वेनः॥ द्वितीयायां टौसोश्च परत इदमेतदोरेनादेशः स्यादन्वादेशे। किंचित्कार्यं वि-
धातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः। यथानेन व्याकरणमधीतमेनं छन्दोऽध्यापयेति। अनयोः
पवित्रं कुलमेनयोः प्र[illegible]भूतं स्वमिति। एनं। एनौ। एनान्। एनेन। एनयोः २। गणयतेर्विच्। सुगण्। सुगणौ। सुगणः।
सुगण्ट्सु। सुगण्सु। क्विप्। सुगाण्। सुगाणौ। सुगाणः। परत्वादुपधादीर्घः। हल्ङ्याब्भ्य इति सुलोपः। नलो-
पः। राजा। न ङिसंबुद्ध्योः॥ नस्य लोपो न स्यात् ङौ संबुद्धौ च। हे राजन्। ङौ तु छन्दस्युदाहरणं। सुपां सुलुगिति ङेर्लु-
क्। निषेधसामर्थ्यात् प्रत्ययलक्षणं। परमे व्योमन्। ङावुत्तरपदे प्रतिषेधो वक्तव्यः। चर्मणि तिला अस्य चर्म-
तिलः। ब्रह्मनिष्ठः। राजानौ। राजानः। राजानं। राजानौ। [illegible] अल्लोपोऽनः। श्चुत्वं। न चाल्लोपः स्थानिवत्। पूर्वत्रासिद्धे न स्थानि-
वत्वात्। न च बहिरङ्गतयाऽसिद्धः। यथोद्देशपक्षे षाष्ठीं परिभाषां प्रति चुत्वस्यासिद्धत्वात्तरङ्गाभावे परिभाषाया
अप्रवृत्तेः। ङसोर्ङसः। राजानः। राज्ञा। नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति। सुब्विधौ स्वरविधौ संज्ञाविधौ कृति तुग्विधौ च न-
लोपोऽसिद्धो नान्यत्र राजाश्व इत्यादौ। इत्यसिद्धत्वादात्वमेत्वमैत्वं च न। राजभ्यां ३। राजभिः। राज्ञे। राजभ्यः २। राज्ञः २। राज्ञोः २। राज्ञां।
राज्ञि। राजनि। राजसु। प्रतिदीव्यतीति प्रतिदिवा। प्रतिदिवानौ। २। प्रतिदिवानः। अस्य भविषयेऽल्लोपे कृते। हलि च। रेफवान्त-
स्य धातोरुपधाया इको दीर्घः स्यात् हलि। न वाल्लोपस्य स्थानिवत्त्वं दीर्घविधौ तन्निषेधात्। बहिरङ्गपरिभाषा तु ङ्रू- गणेश
प्रायेण प्रवर्तते। प्रतिदीव्नः। प्रतिदीव्ने इत्यादि। यज्वा। यज्वानौ। न संयोगाद्वमन्तात्। वकारमकारान्तसंयोगात्परस्यानो
कारस्य लोपो न स्यात्। यज्वनः। यज्वना। यज्वभ्यामित्यादि। ब्रह्मणः। ब्रह्मणा। इन्हन्पूषार्यम्णां शौ। एषां [illegible] ॥२०॥

श्नावेवोपधाया दीर्घो नान्यत्र। इति निषेधे प्राप्ते। सौ च। इन्नादीनामुपधाया दीर्घः स्यादसंबुद्धौ सौ परे। वृत्रहा। हे वृत्रहन्। एकाजु
त्तरपदे णः। इति णत्वं। वृत्रहणं। वृत्रहणौ। हो हन्तेर्ञ्णिन्नेषु। ञिति णिति च प्रत्यये नकारे च परे हन्तेर्हस्य कुत्वं स्यात्। हन्तेः। उप
प्रहण्यात् ३ सर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णत्वं स्यात्। अत्पूर्वस्य। हन्तेरत्पूर्वस्यैव नस्य णत्वं नान्यस्य। प्रघ्नन्ति। योगविभागसामर्थ्या
दनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति न्यायं बाधित्वा एकाजुत्तरेति णत्वमपि निवर्त्यते। नकारे च कुत्वविधिसामर्थ्यादल्लो
पो न स्थानिवत्। वृत्रघ्नः। वृत्रघ्ने इत्यादि। यत्तु वृत्रघ्न इत्यादौ वैकल्पिकं णत्वं माधवेनोक्तं तद्भाष्यवार्तिकविरुद्धं। एवं शा
र्ङ्गिन्‌यशस्विन्नर्यमन्पूषन्। यशस्विन् इति विन्प्रत्ययेऽनोऽनर्थकत्वेपि इन्नहन् इत्यत्र ग्रहणं भवत्येव। अनिनस्मन्ग्रहणा
न्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्तीति वचनात्। अर्यम्णि। अर्यमणि। पूष्णि। पूषणि। मघवा बहुलं। मघवन्शब्द
८ स्य वा तृ इत्यन्तादेशः स्यात्। ऋ इत्। उगिदचां सर्वनामस्थानेऽधातोः। अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्या
त्सर्वनामस्थाने परे। उपधादीर्घः। मघवान्। इह दीर्घे कर्तव्ये संयोगान्तलोपस्यासिद्धत्वं न भवति। बहुलग्रहणात्। तथा श्वन्नुक्ष
न्निति निपातनान्मघवशब्दान्मतुपा च भाषायामपि शब्दद्वयसिद्धिमाश्रित्येतत्सूत्रं प्रत्याख्यातमाकरे। हविर्जक्षिति
निःशङ्को मखेषु मघवानसाविति भट्टिः। मघवन्तौ। मघवन्तः। हे मघवन्। मघवन्तं। मघवन्तौ। मघवतः। मघवता। मघवद्भ्या
मित्यादि। तृत्वाभावे। मघवा। छन्दसीवनिपौ वेति वनिबन्तं मध्योदात्तं छन्दस्येव। अन्तोदात्तं तु लोकेपीति विशेषः। मघवा
नौ। मघवानः। सुटि राजवत्। श्वयुवमघोनामतद्धिते। अन्नन्तानां भसंज्ञानामेषामतद्धिते परे संप्रसारणं स्यात्। संप्र
सारणाच्च। आद्गुणः। मघोनः। अन्नन्तानां किं। मघवतः। मघवता। स्त्रियां। मघवती। अतद्धिते किं। माघवनं। मघोना। मघव
द्भ्यामित्यादि। शुनः। शुना। श्वभ्यामित्यादि। युवन्शब्दे वस्योत्वे कृते। न संप्रसारणे संप्रसारणं। संप्रसारणे परतः पूर्वस्य

सि॰ स्तुः ॥२१॥

यणः संप्रसारणं न स्यात्। अत एव ज्ञापकादन्यस्य यणः पूर्वं संप्रसारणं। यूनः। यूना। युवभ्यामित्यादि। अर्वा। हे अर्वन्। अ
र्वणस्त्रसावनञः। नञा रहितस्यार्वन्नन्तस्याङ्गस्य तृ इत्यन्तादेशः न तु सौ। उगित्वान्नुम्। अर्वन्तौ। अर्वन्तः। अर्वन्तं। अर्वन्तौ। अर्व
ता। अर्वद्भ्यामित्यादि। अनञः किं। अनर्वा। अनर्वाणौ। मघवन्वत्। पथिमथ्यृभुक्षामात्। एषां आकारोऽन्तादेशः स्यात् सौ परे॥
आ आदिति प्रश्लेषेण आभुक्षा या एवमत्र विधानान्नानुनासिकः। इतोत्सर्वनामस्थाने। पथ्यादेरिकारस्याकारः स्यात् स
र्वनामस्थाने। थो न्थः। पथिमथोस्थस्य न्थ आदेशः स्यात् सर्वनामस्थाने। पन्थाः। पन्थानौ। भस्य टेर्लोपः। भसंज्ञकस्य
पथ्यादेष्टेर्लोपः स्यात्। पथः। पथा। पथिभ्यामित्यादि। एवं मन्थाः। ऋभुक्षाः। स्त्रियां नान्तलक्षणो ङीपि भत्वाट्टिलो
पः। सुपथी नगरी। ऋभुक्षी सेना। आत्वं नपुंसके न भवति। न लुमतेति प्रत्ययलक्षणनिषेधात्। सुपथि वनं॥
वा संबुद्धौ नपुंसकानां नलोपो वा वक्तव्यः। हे सुपथिन्। हे सुपथि। नलोपः सुप्स्वरेति नलोपस्यासिद्धत्वाद्ध्रस्वस्य गुणो न॥
द्विवचने भत्वाट्टिलोपः। सुपथी। शौ सर्वनामस्थानत्वात् पन्थानि। पुनरपि सुपथि। सुपथी। सुपन्थानि। सुपथा। सु
पथा सुपथे। ष्णान्ता षट्। षान्ता नान्ता च संख्या षट्संज्ञा स्यात्। षड्भ्यो लुक्। पंच। संख्या किं। विप्रुषः। पामानः। शतानि
सहस्राणि। अत्र संनिपातपरिभाषया न लुक्। सर्वनामस्थानसंनिपातेन कृतस्य नुमस्तद्विघातकत्वात्॥
पंचभिः। पंचभ्यः। षट्चतुर्भ्यश्चेति नुट्। नोपधायाः। नान्तस्योपधाया दीर्घः स्यान्नामि। पंचानां। पंचसु। पर
मपंच। परमपंचानां। गौणत्वे तु न लुङ्नुटौ। प्रियपंचा। प्रियपंचानौ। प्रियपंचानः। प्रियपञ्चां। एवं सप्तन्। नवन्। द
शन्। अष्टन आ विभक्तौ। अष्टन आत्वं स्याद्धलादौ विभक्तौ। अष्टाभ्य औश्। कृताकारादष्टनः परयोर्जश्शसो गणेश ॥२१॥
रौश् स्यात्। अष्टभ्य इति वक्तव्ये कृतात्वनिर्देशो जश्शसोर्विषये आत्वं ज्ञापयति। वैकल्पिकं चेदं। अष्टन आत्वं। अष्ट

नोदीर्घोदितिस्त्रदीर्घग्रहणात्क्लापकात्। अप्यौ। २ परमाप्यौ। अब्भिः। अब्भ्यः। २ अपां। अप्सु। आत्वावैभौ। अप् २।
पंचवत्। गोणात्वेतु आत्वाभावे राजवत्। शक्तिप्रियाप्त्रः। इह पर्वस्मा द विधिवल्लोपस्य स्थानिवत्वान्नपुत्वं। कार्यकाल
पक्षेतु बहिरंगस्याल्लोपस्यासिद्धत्वाद्वा। प्रियाप्त्र इत्यादि। जश्शालोरनुमीयमानमात्वं प्राधान्य एव। नतु गौणतायां।
तेप्रिनेयाप्त्रनो हलादावेव वैकल्पिकमात्वं। प्रियाप्यौ। प्रियाप्भ्यां। ३ प्रियाप्भिः। प्रियाप्भ्यः। २ प्रियापां। प्रियाप्सु। प्रियाप्त्रो राजव
त्सर्वं ह्राहाववा पर हलि। नष्भावः। जस्त्रं। जत्वं। मुत्। मुद्। बुधौ। बुधः। बुधा। बुध्भ्यां [redacted] भुत्सु। ऋत्विग्दधृक्स्र
ग्दिगुष्णिगंचुयुजिक्रुंचांच। एभ्यः क्विन्। अलाक्षणिकमपि किंचित्कार्यं निपातनाल्लभ्यते। निरुपपदाद्युजेः क्विन्।
कनावितौ। कृदतिङ्। सन्निहिते धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञः। वेरपृक्तस्य। अपृक्तस्य वस्य लोपः स्यात्। कृ
त्तद्धितेति प्रातिपदिकत्वात्स्यादयः। युजेरसमासे। युजेः सर्वनामस्थाने नुम् स्यादसमासे। संयोगांतस्य
लोपः। क्विन्प्रत्ययस्य कुः। क्विन् प्रत्ययो यस्मात्तस्य कवर्गोंतादेशः स्यात्पदांते। नस्य कुत्वेनानुनासिको ङकारः। युङ्।
नश्चापदांतस्य झलीति नुमोनुस्वारः। परसवर्णः। तस्यासिद्धत्वाच्चोः कुरिति कुत्वं न। युंजौ। युंजः। युंजं। युंजौ। युजः। अ
समासे किं। चोः कुः। चवर्गस्य कवर्गः स्यात् झलि पदांते। वा इति कुत्वं। क्विन्नसमपस्येति कुत्वस्यासिद्धत्वात्। सुयुक्।
सुयुग्। सुयुजौ। सुयुजः। युजेरिति धात्वनुपाठपठितेकारविशिष्टस्यानुकरणं न त्विकारनिर्देशः। तेनेह न। युज्यते समा
धत्ते इति युक्। युजः समाधौ दैवादिक आत्मनेपदी। संयोगांतस्य लोपः। खन्। खंजौ। खंजः। इत्यादि। व्रश्चेति
षत्वं। जश्त्वचर्त्वे। राड्। राट्। राजौ। राजः। राट्सु। राट्त्सु। एवं विभ्राट्। देवेट्। देवेड्। देवेजौ। विश्वसृट्। इह यजिसृ
ज्योः कुत्वं नेति क्षिबे वक्ष्यते। परिमृट्। षत्वविधौ राजिसाहचर्यात्। टुभ्राजृ दीप्तावितिफणादिरेव गृह्यते। य

सि॰ कौ॰ सु॰
॥२२॥

ष्ठः एव च भ्राजादीनामिति तस्य कुत्वमेव। विभ्राक्। विभ्राग्भ्यामित्यादि। परौ व्रजेः षः पदान्ते। परावुपपदे व्रजेः क्विप् दीर्घश्च [redacted] पदान्ते
पदान्ते विषये षत्वं च। परि समन्तात् सर्वं व्रजतीति परिव्राट्। परिव्राजौ। परिव्राजः। विश्वस्य वसुराटोः। विश्वशब्दस्य दीर्घः स्याद्वसु
सौ राट्शब्दे च परे। विश्वं वसु यस्य स विश्वावसुः। राडिति पदान्तोपलक्षणार्थं। चर्त्वमविवक्षितं। विश्वाराट्। विश्वाराड्।
विश्वराजौ। विश्वराजः। विश्वराड्भ्यामित्यादि। स्कोः संयोगाद्योरन्ते च। पदान्ते झलि च परे यः संयोगस्तदाद्योः सकारक
कारयोर्लोपः स्यात्। भृट्। सस्य श्चुत्वेन शः तस्य जश्त्वेन जः। भृज्जौ। भृज्जः। ऋत्विगित्यादिना ऋतावुपपदे युजेः क्विन्।
क्विन्नन्तत्वात्कुत्वं। ऋत्विक्। ऋत्विजौ। ऋत्विजः। रात्सस्येति नियमान्न संयोगलोपः। ऊर्क्। ऊर्ग्। ऊर्जौ। ऊर्जः। त्यदाद्यत्वं पर
रूपत्वं। तदोः सः सावनन्त्ययोः। त्यदादीनां तकारदकारयोरनन्त्ययोः सः स्यात् सौ। स्यः। त्यौ। त्ये। सः। तौ। ते। परमसः। प
रमतौ। परमते। द्विपर्यन्तानामित्येव। नेह। त्वं। न च तकारोच्चारणसामर्थ्यादिति वाच्यं। अतित्यमिति गौणत्वे चरिता
र्थत्वात्। संज्ञायां गौणत्वे चात्यदादित्वेन स्यदो। स्यदः। अतिस्यद्। अतिस्यदौ। अतिस्यदः। यः। यौ। ये। एषः। एतौ। एते।
अन्वादेशे। एनं। एनौ। एनान्। एनेन। एनयोः। ङे प्रथमयोरम्। युष्मदस्मद्भ्यां परस्य ङे इत्येतस्य प्रथमाद्वितीययो
श्च अम् आदेशः स्यात्। मपर्यन्तस्य त्वाधिकरणस। त्वाहौ सौ। अनयोर्मपर्यन्तस्य त्व अह एतावादेशौ स्तः सौ परे। शे
षे लोपः। आत्वयत्वनिमित्तेतरविभक्तौ परतः युष्मदस्मदोरन्त्यस्य लोपः। अतो गुणे। अमि पूर्वः। त्वं। अहं। ननु त्वं
स्त्री। अहं स्त्री। इत्यत्र त्व अम् अह अम् इति स्थिते अमि पूर्वत्वं परमपि बाधित्वा अन्तरङ्गत्वाट्टाप् प्राप्नोति। सत्यं। अलिं
गे युष्मदस्मदी। तेन स्त्रीत्वाभावान्न टाप्। यद्वा शेषे इति सप्तमी स्थानिनो अधिकरणत्वविवक्षया तेन मपर्यन्तात् शे गलोश
षस्य अदूरात् दस्य लोपः। स च परोप्यन्तरङ्गे अतो गुणे कृते प्रवर्तते। अदन्तत्वाभावान्न टाप्। परमत्वं। अतित्वं। पर ॥२२॥

माहं। अस्महं। युवावौ द्विवचने। द्वयोरुक्तौ युष्मदस्मदोर्मपर्यंतस्य युवावौ स्तो विभक्तौ। प्रथमायाश्च द्विवचने भाषा
यां। इह युष्मदस्मदोरेकारांतादेशः स्यात्। औङि। श्येवसुवचनं। भाषायां किं। युवं वस्त्राणि। युवां। आं। वां। मपर्यंत
स्य किं। साकच्कस्य मा भूत्। युवकां। आवकां। त्वया मये यत्र त्व्यान्याइति मा भूत्। युवकाभ्यां। आवकाभ्यां। दुतिवत्
सिध्येत्। एषयवयोजसिस्यंशे। यूयं। वयं। परमयूयं। परमवयं। अतियूयं। अतिवयं। इह शेषेलोपो। सुलोपपक्षे जसः शी प्रा
पः। अंगकार्ये कृते नांगकार्यमिति ङे प्रथमयोरमित्यत्र मकारांतरं प्रश्लिष्य अम् मांत एवादिश्यते न तु विक्रियत इति
वास्यानाद्य। त्वमावेकवचने। एकस्योक्तौ युष्मदस्मदोर्मपर्यंतस्य त्वमौ स्तः। द्वितीयायां च। युष्मदस्मदोराकारः
स्यात्। त्वां। मां। युवां। आवां। शसो न। आभ्यां विभक्तिकं। युष्मदस्मद्भ्यां परस्य शसोनकारस्यादमोपवादः। आदेः परस्य।
संयोगांतस्य लोपः। युष्मान्। अस्मान्। योचि। अनयोर्यकारादेशः स्यादनादेशे जादौ विभक्तौ। त्वया। मया। युष्म
दस्मदोरनादेशे। अनयोराकारः स्यादनादेशे हलादौ। युवाभ्यां। आवाभ्यां। युष्माभिः। अस्माभिः। तुभ्यमह्यौ ङ
यि। अनयोर्मपर्यंतस्य तुभ्यमह्यौ स्तो ङयि। अमादेशः। शेषे लोपः। तुभ्यं। मह्यं। परमतुभ्यं। परममह्यं। अतितुभ्यं। अ
तिमह्यं। युवाभ्यां। आवाभ्यां। भ्यसोभ्यम्। भ्यम्। अभ्यम् वा आदेशः स्यात्। आद्यः शेषे लोपस्य। सुलोपपक्षे एवात
ग त्राङ्ग वृत्ति परिभाषया एत्वं न। अभ्यम् तु पक्षद्वयेपि साधुः। युष्मभ्यं। अस्मभ्यं। एकवचनस्य च। आभ्यां पंचम्येकवच
नस्य अत्स्यात्। त्वत्। मत्। ङसेश्चेति सुवचनं। युवाभ्यां। आवाभ्यां। पंचम्या अत्। आभ्यां पंचम्या भ्यसो अत्स्यात्। युष्मत्।
अस्मत्। तवममौ ङसि। अनयोर्मपर्यंतस्य तवममौ स्तो ङसि। युष्मदस्मद्भ्यां ङसोऽश्। स्पष्टं। तव। मम। युवयोः २ आव
योः २ साम आकं। आभ्यां परस्य साम आकं स्यात्। भाविनः सुटो निवृत्त्यर्थं ससुट्कनिर्देशः। युष्माकं। अस्माकं।
त्वयि। मयि। युष्मासु। अस्मासु। समस्यमाने द्व्येकत्ववाचिनी युष्मदस्मदी। समासार्थोन्यसंख्यश्चेत्स्तो युवावौ त्व

सि॰कौ॰सु॰ मावपि। सुजसङेङ्स्सु परत आदेशाः स्युः सदेवते। त्वाहौ सू यव यौ तु भ्यम् ङ्यौ तव मम मावपि॥ २ एते परत्वाद्बाधन्ते युवा
॥१२३॥ वौ विषये स्थके। त्वमावपि प्रबाधते एवं हि प्रतिषेधतः। ३। एकसंख्यैः समासार्थैर्बहुर्थे युष्मदस्मदी। द्वयोरप्येक त२
३ न्न तार्थत्वात् युवावौ त्वमौ वचन। त्वामावा अतिक्रान्त इति विग्रहे अतित्वं। अत्सहं। अतित्वां। अतिमां। अतियूयं। अतिवयं।
अतित्वां। अतिमां। २ अतित्वान्। अतिमान्। अतित्वया। अतिमया। अतित्वाभ्यां। ३ अतिमाभ्यां। अतित्वाभिः। अ
तिमाभिः। अतितुभ्यं। अतिमह्यं। अतित्वभ्यं। अतिमभ्यं। अतित्वत्। अतिमत्। भ्यसिङसिवत्। अतितव। अति
मम। अतित्वयोः। अतिमयोः। २ अतित्वाकं। अतिमाकं। अतित्वयि। अतिमयि। अतित्वासु। अतिमासु। युवां आ
वां वा अतिक्रान्त इति विग्रहे। सुजसङेङ्स्सु प्राग्वत्। औ अम् औट् सु। अतियुवां। अत्यावां। ३ अतियुवान्। अत्या
वान्। अतियुवया। अत्यावया। अतियुवाभ्यां। अत्यावाभ्यां। ३ अत्यावाभिः। अतियुवाभिः। भ्यसि अतियुवभ्यं।
अत्यावभ्यं। ङसिभ्यसोः। अतियुवत्। अत्यावत्। ओसि। अतियुवयोः। अत्यावयोः। अतियुवाकं। अत्यावाकं।
अतियुवयि। अत्यावयि। अतियुवासु। अत्यावासु। युष्मान् अस्मान् वा अतिक्रान्तः। सुजसङेङ्स्सु प्राग्वत्। औ अम्
औट् सु। अतियुष्मां। ३ अत्यस्मां। ३ अतियुष्मया। अत्यस्मया। अतियुष्माभ्यां। अत्यस्माभ्यां। अतियुष्माभिः।
अत्यस्माभिः। भ्यसि। अतियुष्मभ्यं। अत्यस्मभ्यं। ङसिभ्यसोः। अतियुष्मत्। अत्यस्मत्। ओसि। अतियुष्म
योः। अत्यस्मयोः। २ अतियुष्माकं। अत्यस्माकं। अतियुष्मयि। अत्यस्मयि। अतियुष्मासु। अत्यस्मासु। पदस्य।
पदात्। अनुदात्तं सर्वमपादादौ इत्यधिकृत्य। युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ। पदात्परयोर
पादादौ स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वान्नावित्यादेशौ स्तोऽनुदात्तौ। बहुवचनस्य वस्नसौ। उक्त ग१।१।१
विधयोरनयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः। वांनावोरपवादः। तेमयावेकवचनस्य। उक्तविधयो ॥१२३॥

षष्ठीचतुर्थ्येकवचनांतयोस्ते मे एतौ स्तः। त्वा मौ द्वितीयायाः॥ द्वितीयैकवचनांतयोस्त्वा मा एतौ स्तः। श्रीशस्त्वा
वतु मापीह दत्तात्ते मेपि शर्म सः॥ स्वामी ते मेपि स हरिः पातु वामपि नौ विभुः॥१॥ सुखं वां नौ ददात्वीशः पति
र्वामपि नौ विभुः॥ सोव्याद्वो नः शिवं वो नो दद्यात्सेव्योत्र वः स नः॥२॥ पदात्परयोः किं। वाक्यादौ मा भूत्।
त्वां पातु मां पातु। अपादादौ किं। वेदैरशेषैः संवेद्योऽस्मान्कृष्णः सर्वदावतु। स्थग्रहणात् श्रूयमाणवि
भक्तिकयोरेव। नेह। इति युष्मत्पुत्रो ब्रवीति। इत्यस्मत्पुत्रो ब्रवीति। समानवाक्ये निघातयुष्मदस्म
दादेशा वक्तव्याः। एकतिङ् वाक्यं। तेनेह न। ओदनं पच तव भविष्यति। इह तु स्यादेव। शालीनां ते ओ
दनं दास्यामीति। एते वान्नावादयः आदेशाः अनन्वादेशे वा वक्तव्याः। अन्वादेशे तु नित्यं स्युः। धा
ता ते भक्तोस्ति धाता तव भक्तोस्तीति वा। तस्मै ते नमइत्येव। न चवाहाहैवयुक्ते। चादिपंचकयोगे नैते आ
देशाः स्युः। हरिस्त्वां मां च रक्षतु। कथं त्वां मां वा न रक्षेदित्यादि। युक्तग्रहणात्साक्षाद्योगे एवं निषे
धः। परंपरासंबंधे तु आदेशः स्यादेव। हरो हरिश्च मे स्वामी। पश्यार्थैश्चानालोचने॥ अचाक्षुष
ज्ञानार्थैर्धातुभिर्योगे नैते आदेशा न स्युः। चेतसा त्वां समीक्षते। परंपरासंबंधेप्ययं निषेधः।
भक्तस्तव रूपं ध्यायति। आलोचने तु भक्तस्त्वा पश्यति चक्षुषा। सपूर्वायाः प्रथमाया विभाषा।
विद्यमानपूर्वात्प्रथमांतात्परयोरनयोरन्वादेशेप्येते आदेशा वा स्युः। भक्तस्त्वमप्यहं तेन हरिस्त्वां
त्रायते स मां। त्वा मे ति वा। सामंत्रितं। संबोधने या प्रथमा तदंतमामंत्रितसंज्ञं स्यात्। आमंत्रितं पूर्वम

विद्यमानवत्। स्वपं। अग्ने तव॥ देवास्मान्पाहि। अग्ने नय। अग्न इन्द्र वरुण। इह युष्मदस्मदोरादेशाः स्युः। तिङ्न्त
निघात आमंत्रित निघात अन। समंत्रित रक्ष देवनडत्यत्र तु देवेत्यस्याविद्यमानवत्त्वेऽपि ततः प्राचीनं रक्षेत्ये
तदाश्रित्यादेशाः। एवं इमं मे गंगे यमुने सरस्वतीति इति मंत्रे यमुनेत्यादिभ्यः प्राचीनामंत्रिताविद्यमानवत्त्वे
पि मे शब्दमेवाश्रित्य सर्वेषां निघातः। नामंत्रिते समानाधिकरणे सामान्यवचने विशेष्यसमानाधि
करणे विशेषणे आमंत्रिते परे नाविद्यमानवत्स्यात्। हरे दयालो नः पाहि। अग्ने तेजस्विन्। सुपात्। सुपा
द्। सुपादौ। सुपादः। सुपादं। सुपादौ। पादः पत्। पाच्छब्दान्तं यदंगं भं तदवयवस्य पाच्छब्दस्य पदादेशः
स्यात्। सुपदः। सुपदा। सुपाद्भ्यामित्यादि। अग्निं मथतीति अग्निमत्। अग्निमद्। अग्निमथौ। अग्निमथः।
अग्निमथा। अग्निमद्भ्यामित्यादि। ऋत्विगित्यादिसूत्रेण अंचेः सुप्युपपदे क्विन्। अनिदितां हल उपधा
याः क्ङिति। हलंतानामनिदितामंगानामुपधाया नस्य लोपः स्यात् क्किति ङिति। उगिदचामिति नुम्। संयो
गांतस्य लोपः। नुमो नकारस्य क्विन्प्रत्ययस्य कुरिति कुत्वेन ङकारः। प्राङ्। अनुस्वारपरसवर्णौ। प्रांचौ। प्रा
ञ्चः। प्रांचं। प्रांचौ॥ अचः॥ लुप्तनकारस्यांचतेर्भस्याकारस्य लोपः। चौ। लुप्ताकारनकारे चतौ परे पूर्व
स्याणो दीर्घः स्यात्। प्राचः। प्राचा। प्राग्भ्यामित्यादि। प्रत्यङ्। प्रत्यंचौ। प्रत्यंचः। प्रत्यंचं। प्रत्यंचौ। अ
इति लोपस्य विषये अंतरंगोऽपि यणेन प्रवर्तते। अकृतव्यूहा इति परिभाषया। प्रतीचः। प्रतीचा। अमुमं [illegible] गच्छ
तीति विग्रहे अदस् अंच् इति स्थिते। विष्वग्देवयोश्च टेर [illegible] वतौ वप्रत्यये। अनयोः सर्वनाम्नश्च टेरद्या ॥२४॥

व१ देशः स्यात्प्रत्यये वतौ परे। अदद्रि अद्रू इति स्थिते। अदसोसेर्दादुदोमः। अदसोऽसान्तस्य दासरस्य उ ह्रतौ स्तो दस्य
मः। ऊ इति ह्रस्वदीर्घयोः समाहारद्वंद्वः। आंतरतम्यात् ह्रस्वव्यंजनयोर्ह्रस्वो दीर्घस्य दीर्घः। अमुमुयङ्। अमुमुयञ्चौ।
अमुमुयञ्चः। अमुमुयञ्चं। अमुमुयञ्चौ। अमुमुई चः। अमुमुईचा। अमुमुयग्भ्यामित्यादि। मुत्वं स्यात्सिद्धत्वात्
यण्। अन्त्यबाधेऽन्त्यसदेशस्येति परिभाषामाश्रित्य परस्येव मुत्वं वदतां मते। अदमुयङ्। अन्त्येसेः सकारस्य स्थाने
यस्य सस्य असिरिति व्याख्यानात्। त्यदाद्यत्वविषय एव मुत्वं नान्यत्रेति पक्षे। अदद्र्यङ्। अदद्र्यञ्चौ। उक्तं च॥
लघु अदसोऽद्रेः पृथङ्मुत्वं केचिदिच्छंति लत्ववत्। केचिदन्त्यसदेशस्य नेत्येकेऽसेर्हि दृश्यते॥१॥ विष्वग्देवयोः किं।
अश्व्यावी। अचतौ किं। विष्वग्युक्। वप्रत्यये तु किं। विष्वगंचनं। वप्रत्ययग्रहणात् लापयति अन्यत्र धातुग्रहणे त
दादिविधिरिति। तेनात्र यकारः। उदङ्। उदञ्चौ। उदञ्चः। हासादो अचि। उद ईतो। उदः परस्याः सरस्य लुप्तनकारस्यांच
वतेर्भस्याकारस्य ईः स्यात्। उदीचः। उदीचा। उदग्भ्यामित्यादि। समः समि। वप्रत्ययांते वतौ परे सम् इत्यादेशः स्या
त्। सम्यङ्। सम्यञ्चौ। सम्यञ्चः। समीचः। समीचा। सम्यङ्भ्यामित्यादि। सहस्य सध्रिः। सध्र्यङ्। तिरसस्ति
र्यलोपे। अलुप्ताकारे च तौ वप्रत्ययांते परे तिरसस्तिर्यादेशः स्यात्। तिर्यङ्। तिर्यञ्चौ। तिर्यञ्चः। तिर्यञ्चं। ति
र्यञ्चौ। तिरश्चः। तिरश्चा। तिर्यग्भ्यामित्यादि। नांचेः पूजायां। पूजार्थस्यांचतेरुपधाया नस्य लोपो न स्यात्
अलुप्तनकारत्वान्न नुम्। प्राङ्। प्राञ्चौ। प्राञ्चः। नलोपाभावादकारस्य लोपो न। प्राञ्चः। प्राञ्चा। प्राङ्भ्यां। प्राङ्
क्षु। प्राङ्षु। एवं पूजार्थे प्रत्यङ्ङादयः। क्रुञ्च कौटिल्याल्पीभावयोः। अस्य क्विन्नादिना नलोपाभावो नि
पात्यते। क्रुङ्। क्रुञ्चौ। क्रुञ्चः। क्रुङ्भ्यामित्यादि। यो कुः। पयोमुक्। पयोमुग्। पयोमुचौ। पयोमुचः। इत्यादि॥

वृश्चेति षत्वं। स्कोरिति सलोपः। जस्त्वचर्त्वे। सुवट्। सुवड्। सुवश्चौ। सुवड्सु। सुवट्त्सु। महत्पूजायां। वर्तमाने पृषन्म
हद्बृहज्जगच्छतृवच्च। एते निपात्यंते शतृवच्चैषां कार्यं स्यात्। उगित्वान्नुम्। सांतमहत इति दीर्घः। महत्यत इत
ध्यत इति महान्। महान्तौ। महान्तः। हे महन्। महतः। महता। महद्भ्यामित्यादि। अत्वसंतस्य चाधातोः। अत्व
न्तस्योपधाया दीर्घः स्यादसंबुद्धौ सौ परे। परं नित्यं च नुमं बाधित्वा वचनसामर्थ्यादादौ दी
र्घस्ततो नुम्। धीमान्। धीमंतौ। धीमंतः। हे धीमन्। शशादौ महद्वत्। धातोरप्यत्वंतस्य दीर्घः। गोमंतमिच्छतीति गो
मानिवाचरतीति वा क्यजंतादाचारक्विबंताद्वा कर्तरि क्विप्। उगिदचामिति सूत्रेऽच्ग्रहणं नियमार्थं धातो
श्चेदुगित्कार्यं तर्ह्यंचतेरेवेति। तेन स्रत्। ध्वत्। इत्यादौ न। अधातोरिति च धातुभूतपूर्वस्यापि नुमर्थं। गो
मान्। गोमंतौ। गोमंतः। इत्यादि। भातेर्डवतुः। भवान्। भवंतौ। भवंतः। हे भवन्। शत्रंतस्य त्वत्वं तत्वाभावान्न
दीर्घः। भवतीति भवन्। उभे अभ्यस्तं। षाष्ठद्वित्वप्रकरणे ये द्वे विहिते ते उभे समुदिते अभ्यस्तसंज्ञे स्तः। नाभ्य
स्ताच्छतुः। अभ्यस्तात्परस्य शतुर्नुम् न स्यात्। ददत्। ददतौ। ददतः। जक्षित्यादयः षट्। षड् धातवोऽन्ये जक्षिति
श्च सप्तम एते अभ्यस्तसंज्ञाः स्युः। जक्षत्। जक्षतौ। जक्षतः। एवं जाग्रत्। दरिद्रत्। शासत्। चकासत्। दीधी
वेव्योर्ङित्वेपि छांदसत्वाद्व्यत्ययेन परस्मैपदं। दीध्यत्। वेव्यत्। गुप्। गुब्। गुपौ। गुपः। गुब्भ्यामित्यादि॥
त्यदादिषु दृशोऽनालोचने कञ्च। त्यदादिषूपपदेष्वज्ञानार्थाद्दृशेर्धातोः कञ् स्याच्चात्क्विन्। आस
र्वनाम्नः। सर्वनाम्न आकारोऽन्तादेशः स्याद्दृग्दृशवतुषु। कुत्वस्यासिद्धत्वाद्व्रश्चेति षः। तस्य जस्त्वेन डः।
तस्य कुत्वेन गः। तस्य चर्त्वे न पक्षे कः। तादृक्। तादृग्। तादृशौ। तादृशः। षत्वापवादात्कुत्वेन खकार इति

कष्यष्टहरदत्तादिमतेतु यत्वाभावपक्षे रव[redacted] एवं श्रुतं येन तुगः। असुं प्रति कुत्वस्यासिद्धत्वात्। दिगादिभ्यो यदि
ति निर्देशाच्छानासिध्यत्वमिति बोध्यं। वृश्च्येति षत्वं। जस्य जस्त्वं। विट्। विड्। विशौ विशः। नशेर्वा। नशेः कवर्गोंतादे
शो वा स्यात्सदांते। नक्। नग्। नट्। नड्। नशौ। नशः। नग्भ्यां। नड्भ्यामित्यादि। स्पृशोनुदके क्विन्। अनुदके सु
प्युपपदे स्पृशेः क्विन् स्यात्। घृतस्पृक्। घृतस्पृशौ। घृतस्पृशः। क्विन्प्रत्ययस्य कुरिति बहुव्रीह्याश्रयणा
त् क्विन्यपि कुत्वं। स्पृग्। स्पृक्। षडङ्गकाः स्राग्वत्। त्रिष्टुप्। षाड्गालभ्ये। अस्मादृत्विगादिना क्वि[illegible]न्। द्वित्वमंतोदात्त्वं
निपात्यते। कुत्वाः सर्वे जस्त्वेन डः। गः। कः। धृष्णोतीति दधृक्। दधृग्। दधृषौ। दधृग्भ्यामित्यादि। रत्नानि मुष्णातीति र
त्नमुट्। रत्नमुड्। रत्नमुषौ। रत्नमुषः। रत्नमुड्भ्यामित्यादि। षड्भ्यो लुक्। षट्। षड्। षड्भिः। षड्भ्यः। षट्चतुर्भ्य
श्चेति नुट्। अनामिति पर्युदासान्न ष्टुत्वनिषेधः। यरोनुनासिके इति विकल्पं बाधित्वा प्रत्यये नित्यं वचना
न्नित्यमनुनासिकः। षण्णां। षट्सु। षट्त्सु। तदंतविधिः। परमषट्। परमषण्णां। गौणत्वे प्रियषषः। प्रियषषां।
ससजुषोरुरिति रुत्वं। र्वोरुपधाया दीर्घ इकः। रेफवांतस्य धातोरुपधाया इको दीर्घः स्यात्पदांते। पिप
ठीः। पिपठिषौ। पिपठिषः। पिपठीर्भ्यां। वा शरीति वा विसर्जनीयः। नुम्विसर्जनीयशर्व्यवायेपि। एतैः प्रत्येकं
व्यवधानेपि इण्कुभ्यां परस्य सस्य मूर्धन्यादेशः स्यात्। ष्टुत्वेन पूर्वस्य षत्वं। पिपठीष्षु। पिपठीःषु। प्रत्ये
कमिति व्याख्यानादनेकव्यवधाने न षत्वं। निस्सु। निस्से। नुम्ग्रहणं नुम्स्थानिकानुस्वारोपलक्षणार्थं
व्याख्यानात्। तेनेह न। सुहिन्सु। पुंसु। अत एव नशग्रहणं नगतार्थता। रात्सस्येति सलोपो विसर्गः। चिकीः।
चिकीर्षौ। चिकीर्षः। रोः सुपीति नियमान्न विसर्गः। चिकीर्षु। दमेर्डोसः। डित्वसामर्थ्याद्दिलोपः। रुत्वविसर्गौ।।

दोः। दोषौ। दोषः। पद्दन्निति वा दोषन्। दोष्णः। दोषः। दोष्णा। दोषा। विश् प्रवेशने। स नञ्ता क्विप्। षत्वस्यासिद्धत्वात्संयो
गांतस्य लोपः। व्रश्चेति षः। जश्त्वचर्त्वे। विविट्। विविड्। विविक्षौ। विविक्षः। स्कोरिति स लोपः। तट्। तड्। तक्षौ। तक्षः।
गोरट्। गोरड्। गोरक्षौ। गोरक्षः। तक्षिरक्षिभ्यां ण्यन्ताभ्यां क्विपि तु स्कोरिति न प्रवर्त्तते णिलोपस्य स्थानिवद्भा
वात्। पूर्वत्रासिद्धीये न स्थानिवदिति तु तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति निषिद्धः। तस्मात्संयोगांतलो
प एव। तक्। तग्। गोरक्। गोरग्। स्कोरिति कलोपप्रतिबोः कुरिति कुत्वस्यासिद्धत्वात्संयोगांतलोपः। पिपक्। वि
पग्। पिपक्षौ। पिपक्षः। एवं विवक्। विवग्। विवक्षौ। विवक्षः। दिधक्। पिस गतौ। सुष्ठु पेसतीति सुपीः। सुपिसौ।
सुपिसः। सुपिसा। सुपीर्भ्यां। सुपीःषु। सुपीःषु। एवं सुतूः। तुस खंडने। विद्वान्। विद्वांसौ। विद्वांसः। हे विद्वन्।
विद्वांसं। विद्वांसौ। वसोः संप्रसारणं। वस्वंतस्य भस्य संप्रसारणं स्यात्। पूर्वरूपत्वं। षत्वं। विदुषः। विदुषा।
वसुस्रंस्विति दत्वं। विद्वद्भ्यामित्यादि। सेदिवान्। सेदिवांसौ। सेदिवांसः। सेदिवांसं। सेदिवांसौ। अंतरंगोपी
डागमः संप्रसारणविषये न प्रवर्त्तते। अकृतव्यूहाः इति परिभाषया। सेदुषः। सेदुषा। सेदिवद्भ्यामित्यादि। सांतम
हतः स्यत्र सांतसंयोगोपि प्रातिपदिकस्यैव गृह्यते न तु धातोः। महत्साहचर्यात्। सुष्ठु हिनस्तीति सुहिन्।
सुहिंसौ। सुहिंसः। सुहिन्भ्यां। सुहिन्सु। ध्वत्। ध्वसौ। ध्वसः। एवं स्रत्। पुंसो सुङ्। सर्वनामस्थाने विवक्षिते
सुङ् स्यात्। उकार उच्चारणार्थः। बहुपुंसी स्यत्र उगितश्चेति ङीबर्थकृतेन एओडुमे सुन् इति प्रत्ययस्योगित्त्वे
नैवं नुम सिद्धेः। पुमान्। हे पुमन्। पुमांसौ। पुमांसः। पुंसः। पुंसा। पुम्भ्यां। पुंसु। अदुशने स्यनङ्। उशना। उशन
सौ। उशनसः। अस्य संबुद्धौ वानङ् नलोपश्च वा वाच्यः। हे उशनन्। हे उशन। हे उशनः। उशनोभ्यामित्यादि। अ

नेहा। अनेहसौ। अनेहसः। हे अनेहः। वेधाः। वेधसौ। वेधसः। हे वेधः। वेधोभ्यामित्यादि। अधातोरित्युक्तेर्न दीर्घः। सुष्ठु व
स्ते सुवः। सुवसौ। सुवसः। पिंडग्रसते पिंडग्रः। पिंडग्लः। अमु। ग्लसुः। अदनो। अदसः। ओ सुलोपश्च। अदस ओ कारान्ता
देशः स्यात् सौ परे। सुलोपश्च। त्यदोः सः साविति दस्य सः। असौ। ओत्वप्रतिषेधः साकच्कस्य वा वक्तव्यः। सादुत्व
या प्रतिषेधः सन्नियोगशिष्टमुत्वं तदभावेन प्रवर्तते। असकौ। असुकः। त्यदाद्यत्वं पररूपत्वं वृद्धिः। अदसो सेरि
ति मत्वोत्वे। अमू। जसः शी। आद्गुणः। एत ईद्बहुवचने। अदसो दात्सरस्येत ईत्स्यात् दस्य च मो बहुर्थोक्तौ। अमी। पू
र्वत्रासिद्धमिति विभक्तिकार्यं प्राक् पश्चादुत्वमत्वे। अमुं। अमू। अमून्। उत्वमत्वे कृते घिसंज्ञायां नाभावः। न मु ने। नाभा
वे कर्तव्ये कृते च मुभावो नासिद्धः स्यात्। अमुना। अमूभ्यां। अमीभिः। अमुष्मै। अमूभ्यां। अमीभ्यः। अमुष्मात्। अ
मुष्य। अमुयोः। अमीषां। अमुष्मिन्। अमीषु॥ ॥इति हलन्ताः पुल्लिंगाः॥ ॥नहो धः। नहो हस्य धः स्यात् झलि पदान्ते॥
उपानत्। उपानद्। उपानहौ। उपानहः। उपानद्भ्यामित्यादि। उपानत्सु। उत्पर्वात् क्विहि हसीतादिस्समाद्झलिमा
दिना क्विन्। निपातनाद्दलोपषत्वे क्विन्नन्तत्वात्कुत्वेन हस्य घः। तस्य वर्त्वे उष्णिक्। उष्णिग्। उष्णिहौ। उष्णिहः। उ
ष्णिग्भ्यां। उष्णिक्षु। द्यौः। दिवौ। दिवः। द्युभ्यां। द्युषु। गीः। गिरौ। गिरः। एवं पूः। चतुरश्च तस्यादेशः। चतस्रः। २ चतसृ
णां। किमः कादेशो टाप्। का के। काः। सर्ववत्। यः सौ इदमो दस्य यः स्यात् सौ। इदमो मः। इयम्। त्यदाद्यत्वं टाप् दश्च अतिमः।
इमे। इमाः। इमां। इमे। इमाः। अनया। हलि लोपः। आभ्यां। आभिः। अस्यै। अस्याः २। अनयोः। आसां। अस्यां। आ
सु। अन्वादेशे तु एनां। एने। एनाः। एनया। एनयोः। २ अर्थ। त्विगादिना स्रजेः क्विन्। अमागमश्च निपातितः। स्रक्। स्र
जौ। स्रजः। स्रग्भ्यां। स्रक्षु। त्यदाद्यत्वं टाप्। स्या। त्ये। स्याः। एवं तत्। यद्। एतद्। वाक्। वाग्। वाचौ। वाचः। वाग्भ्यां। वाक्षु।

सि॰ मु अप् शब्दो नित्यं बहुवचनांतः। अप्तृन्निति दीर्घः। आपः। अपः। अपो भि। अपस्तकारः स्याद्भादौ प्रत्यये परे। अद्भिः।
॥२७॥ अद्भ्यः। अपां। अप्सु। दिक्। दिग्। दिशौ। दिशः। दिग्भ्यां। दिक्षु। त्यदादिषु दृशेः किन्विधानादन्यत्रापि कुत्वं। दृक्।
दृग्। दृशौ। दृशः। त्विट्। त्विड्। त्विषौ। त्विषः। त्विड्भ्यामित्यादि। त्विट्सु। त्विट्त्सु। सह जुषते इति सजूः। सजुषौ।
सजुषः। सजूर्भ्यां। सजूःषु। षत्वस्यासिद्धत्वात् रुत्वं। आशीः। आशिषौ। आशिषः। असौ। त्यदाद्यत्वं टाप्। औङः
शी। उत्वमत्वे। अमू। अमूः। अमूं। अमू। [redacted] अमूः। अमुया। अमूभ्यां। अमूभिः। अमुष्यै। अमुष्याः २ अमू
षां। अमुष्यां। अमूषु॥ ॥ इति हलंताः स्त्रीलिंगाः॥ स्वमोर्लुक्। दत्वं। स्वनडुत्। स्वनडुद्। स्वनडुही। चतुरनडु
होरित्याम्। स्वनड्वांहि। पुनस्तद्वत्। दिव उत्। अहर्विमलद्यु। अंतर्वर्तिनीं विभक्तिमाश्रित्य पूर्वपदस्य वोत्तरस्य
डस्यापि पदसंज्ञायां प्राप्तायां उत्तरपदत्वे चापदादिविधौ प्रतिषेध इति प्रत्ययलक्षणं न। तेन दिव उदित्युत्वं न।
विमलदिवी। विमलदिवि। अपदादिविधौ किं। दधिसेचौ। इह षत्वनिषेधे कर्तव्ये पदत्वमस्त्येव। कुत्वे तु न।
वाः। वारी। वारि। अझलंतत्वान्न नुम्। चत्वारि। न लुमतेति कादेशो न। किं। के। कानि। इदं। इमे। इमानि। अन्वादेशे
एनत्। एने। एनानि। एनेन। एनयोः। ब्रह्म। ब्रह्मणी। ब्रह्माणि। हे ब्रह्मन्। हे ब्रह्म। रोऽसुपि। अहन्निति। विभाषा
ङिश्योः। अह्नी। अहनी। अहानि। अहन्। अहन्नित्यस्य रुः स्यात् पदांते। अहोभ्यां। अहोभिः। इह अहः। अहोभ्या
मित्यादौ रत्वरुत्वयोरसिद्धत्वान्नलोपे प्राप्ते अहन्निति सावर्ण्येन नलोपाभावं निपातयंति द्वितीयेन रुर्विधेयः। तदंत
स्यापि रुत्वरत्वे। दीर्घाण्यहानि यस्मिन् स दीर्घाहाः निदाघः। इह हल्ङ्यादिलोपे प्रत्ययलक्षणेन असुपीति निषे गणेश
धाद्रत्वाभावेन रुः। तस्यासिद्धत्वान्नांतलक्षण उपधादीर्घः। संबुद्धौ तु हे दीर्घाहो निदाघ। दीर्घाहानौ। दीर्घाहानः। ॥२७॥

दंडि। दंडिनी। दंडीनि। स्रग्वि। स्रग्विणी। स्रग्वीणि। वाग्मि। वाग्मिनी। वाग्मीनि। बहुवृत्रहाणि। बहुपूषाणि। बहु
र्यमाणि। असृजः पदांते कुत्वं स्याद्वेः। क्विन्नो विधानात्। विश्वसृड्। देनः। सृजिदृशोर्झल्यमकितीति सूत्रे रज्जुसृड्भ्यामिति भा
ष्यप्रयोगात्। यद्वा वृश्चादिसूत्रे सृजियज्योः पदांते षत्वं कुत्वापवादः। सृग्लृत्विक् इति शब्दयोस्तु निपातनादेव कुत्वं।
असृक्शब्दस्तु असृज्शब्दस्य तेरोण्यादिके अजप्रत्यये बोध्यः। असृक्। असृग्। असृजी। असृंजि। पद्दन्निति वा असन्।
असानि। असना। असभ्यां। असभ्यामित्यादि। ऊर्क्। ऊर्ग्। ऊर्जी। ऊर्ञ्जि। नरजानां संयोगः। बहूर्जि नुम्प्रतिषेधः। अ
न्यास्त्वेवानुम्। बहूर्जि। बहूर्ञ्जि कुलानि। यत्। यद्। ये। यानि। तत्। तद्। ते। तानि। यत्। यद्। ये। यानि। एतत्। एते। ए
तानि। एनत्। बेभिद्यतेः क्विप्। बेभित्। बेभिद्। शोअल्लोपस्य स्थानिवत्त्वाद् झलंतत्वान्न नुम्। अजंतलक्षण
स्तु नुम् स्वविधौ स्थानिवत्त्वाभावात्। बेभिदि। ब्राह्मणकुलानि। वेभिदि। गवाक्शब्दस्य रूपाणि क्लीबे
वीगतिभेदितः। असंध्यवङ्पूर्वरूपैर्नवाधिकशतं मतं। स्वमसुप्सु नवषट्। भादौ षट्के स्युः त्रीणि तु शसा
सः। चत्वारि शेषे दशके रूपाणीति विभावय॥२॥ तथाहि गामंचतीति विग्रहे ऋत्विगादिनां क्विन्। गतौ नलो
पः। अवङ्स्फोटायनस्येत्यनङ्। गवाक्। गवाग्। सर्वत्र विभाषेति प्रकृतिभावे गोअक्। गोअग्। पूर्वरूपे गो
क्। गोग्। पूजायां। नस्य कुत्वेन ङः। गवाङ्। गोअङ्। गोङ्। अम्यप्येतान्येव। औङः शी। भत्वादच इत्यल्लोपः। गो
ची। पूजायां तु। गवाञ्ची। गोअञ्ची। गोञ्ची। जश्शसोः शिः। सर्वनामस्थानत्वान्नुम्। गवाञ्चि। गोअञ्चि। गो
ञ्चि। गतिपूजनयोस्त्रीण्येव। गोचा। गवाञ्चा। गोअञ्चा। गोञ्चा। गवाग्भ्यां। गोअग्भ्यां। गोग्भ्यां। गवाङ्भ्यां।
१ गोङ्भ्यां गोअङ्भ्यां इत्यादि। सुपि तु गांतानां पक्षे ङ्णोः कुक्टुगिति कुक्। गवाङ्क्षु। गोअङ्क्षु। गोङ्क्षु। गवाङ्षु। गोअ

सि॰सु॰ ॥२८॥

दृक्षु। गोदृक्षु। गवाक्षु। गोऽक्षु। गोक्षु। न चेह र्वयोर्द्वित्वे यादिति पक्षे ककारस्य खकारेण षत्वमाधिक्यं शंक्यं।
वैर्त्वस्यासिद्धत्वात्। कुक्पक्षे तु तस्यासिद्धत्वाज्जस्याभावे पक्षे द्वित्वे यादेशात् त्रीणि रूपाणि वर्द्धंत एव।
कृत्स्नमेषां द्विर्वचनोऽनुनासिकविकल्पनात्। रूपाण्यष्टाक्षिभूतानि। पं२७। भवंतीति मनीषिभिः॥ तिर्यक्।
तिरश्ची। तिर्यञ्चि। पूजायां तु तिर्यङ्। तिर्यञ्ची। तिर्यञ्चि। यकृत्। यकृती। यकृंति। यकानि। शकानि। शक्रा।
शकृता। ददत्। ददती। वा नपुंसकस्य। अभ्यस्तात्परो यः शता तदंतस्य क्लीबस्यांगस्य नुम्वा स्यात्सर्व
नामस्थाने परे। द[illegible]दंति। ददति। तुदत्। आच्छीनद्योर्नुम्। अवर्णांतादंगात्परो यः शतुरवयवस्तदंतांग
स्य नुम्वा स्यात् शीनद्योः परतः। तुदंती। तुदती। तुदंति। भात्। भांती। भाती। भांति। पचत्। शप्श्यनोर्नित्यं। शप
श्यनोरात्परो यः शतुरवयवस्तदंतस्य नित्यं नुम्स्यात् शीनद्योः परतः। पचंती। पचंति। दीव्यत्। दीव्यंति। दीव्यं
ति। स्वप्। स्वब्। स्वपी। निस्तासरादपि नुमः प्राक् अप्तृन्निति दीर्घः प्रतिपदोक्तत्वात्। स्वांपि। निरवकाशत्वं
प्रतिपदोक्तत्वमिति पक्षे तु स्वपकते तद्धि[illegible]नुमे स्वंपि। स्वपा। अपो भि। स्वद्भ्यां। स्वद्भिः। अतीसादिना ऽस
र्धत्वं। धनुः। धनुषी। सांतेति दीर्घः। नुम्विसर्जनीयेति षत्वं। धनूंषि। धनुषा। धनुर्भ्यां। एवं चक्षुर्हविरादयः।
पिपठीः। पिपठिषी। अल्लोपस्य स्थानिवत्त्वात् झलंतलक्षणो न नुम्। स्थानिवद्योऽस्थानिवत्त्वाभावादजंतलक्ष
णोऽपि न। पिपठिषि। पिपठीर्भ्यां। इत्यादि। पयः। पयसी। पयांसि। पयसा। पयोभ्यामित्यादि। सुपुम्। सुपुंसी।
सुपुमांसि। अदः। विभक्तिकार्यं उत्वमत्वे। अमू। अमूनि। शेषं पुंवत्॥ ॥इति हलंता नपुंसकलिंगाः॥ ४॥
स्वरादिनिपातमव्ययं। स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः। स्वर्। अंतर्। प्रातर्। पुनर्। सनुतर्। उच्चैस्। गणेशः।
नीचैस्। शनैस्। ऋधक्। ऋते। युगपत्। आरात्। पृथक्। ह्यस्। श्वस्। दिवारात्रौ। सायं। चिरं। मनाक्। ईषत्। ॥२८॥

रहो॰व॰१

दोषां। तूष्णीं। बहिस्। अवस्। समया। निकषा। स्वयं। वृथा। नक्तं। न। नञ्। हेतौ। इद्धा। अद्धा। सामि। ब्राह्मणवत्। क्षत्रिय
वत्। सना। सनुत्। उपधा। सनत्। सनात्। तिरस्। अंतरा। अंतरेण। ज्योक्। कं। शं। सहसा। विना। नाना। स्वस्ति। स्वधा। अलं।
वौषट्। श्रौषट्। वषट्। अन्यत्। अस्ति। उपांशु। क्षमा। विहायसा। दोषा। मृषा। मिथ्या। मुधा। पुरा। मिथो। मिथ
स्। प्रायस्। मुहुस्। प्रवाहुकं। प्रवाहिका। आर्यहलं। अभीक्ष्णं। साकं। सार्द्धं। नमस्। हिरुक्। धिक्। अथ। अम्। आम्।
प्रताम्। प्रशान्। प्रतान्। मा। माङ्। आकृतिगणोऽयं। वा। ह। अह। एव। एवं। नूनं। शश्वत्। युगपत्। भूयस्। कूपत्।
सूपत्। कुवित्। नेत्। चेत्। चण्। किंचित्। कच्चित्। यत्र। नह। हंत। माकिः। माकीं। नकिः। नकीं। आकीं। माङ्। नञ्।
यावत्। तावत्। त्वै। न्वै। द्वै। रै। श्रौषट्। वौषट्। वषट्। स्वाहा। स्वधा। तुम। तथाहि। खलु। किल। अथ। अथो। सुष्ठु।
स्म। आदह। उपसर्गविभक्तिस्वरप्रतिरूपकाश्च। अवदत्तं। अहंयुः। अस्तिक्षीरा। अ। आ। इ। ई। उ। ऊ। ए। ऐ। ओ।
औ। पशु। स्म। शुकं। यथा। कथा च। पाट्। प्याट्। अंग। है। हे। भोस्। अये। द्य। विषु। एकपदे। युत्। आतः। चादिरप्या
कृतिगणः। तद्धितश्चासर्वविभक्तिः। यस्मात्सर्वविभक्तेर्नोत्पद्यंते स तद्धितांतोऽव्ययं स्यात्। परिगणनं
कर्तव्यं। तसिलादयः प्राक् पाशपः। शस्प्रभृतयः प्राक् समासांतेभ्यः। अम्। आम्। कृत्वोर्थाः। तसिवती। नानाञौ
नाविति। तेनेह न। पचतिकल्पं। पचतिरूपं। कृन्मेजंतः। कृद्यो मांत एजंतश्च तदंतमव्ययं स्यात्। स्मारं स्मा
रं। जीवसे। पिबध्यै। क्त्वातोसुन्कसुनः। एतदंतमव्ययं स्यात्। कृत्वाउदेतोः। विसृपः। अव्ययीभावश्च। अ
धिहरि। अव्ययादाप्सुपः। अव्ययाद्विहितस्यापः सुपश्च लुक् स्यात्। तत्र शालायां। अथ विहितविशेषणा
न्नेह। अस्क्रव्यैसो। अव्ययसंज्ञायां यद्यपि तदंतविधिरस्ति तथापि न गौणे। आबृग्रहणं व्यर्थं। अलिंगत्वात्॥

सि॰ सु॰ ॥२६॥

सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययं॥ इति प्रकृतिर्लिंगकारकसंख्याऽभावप
रा॥ वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः। आपं चैव हलन्तानां यथा वाचा निशा दिशा॥१॥ अवगाहः। वगाहः।
अपिधानं। पिधानं॥ इत्यव्ययानि॥ ४॥ स्त्रियां। अधिकारोऽयं॥ समर्थानामिति यावत्। अजाद्यतष्टाप्। अजा
दीनामकारान्तस्य च वाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाप् स्यात्। अजाद्युक्ति ङीषो ङीपश्च बाधनाय। अजा। अतः।
खट्वा। अजादिभिः स्त्रीत्वविशेषणान्नेह। पंचाजी। अत्र समासार्थसमाहारनिष्ठं स्त्रीत्वं। अजा। एडका। अश्वा।
चटका। मूषिका। एषु जातिलक्षणो ङीष् प्राप्तः। बाला। वत्सा। होडा। मंदा। विलाता। एषु वयसि प्रथम इति ङीप्
प्राप्तः। संभस्त्राजिनशणपिंडेभ्यः फलात्। संफला। भस्त्रफला। ङ्याप्योरिति ह्रस्वः। सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात्।
सत्पुष्पा। प्राक्पुष्पा। प्रत्यक्पुष्पा। शूद्रा चामहत्पूर्वा जातिः। पुंयोगे तु शूद्री। अमहत्पूर्वा किं। महाशूद्री। क्रुंचा।
उष्णिहा। देवविशा। ज्येष्ठा। कनिष्ठा। मध्यमेति पुंयोगेपि। कोकिला जातावपि। मूलान्नञः। अमूला। ऋन्नेभ्यो ङी
प्। कर्त्री। दण्डिनी। उगितश्च। उगिदन्तात्प्रातिपदिकात्स्त्रियां ङीप् स्यात्। भवती। पचन्ती। शप्श्यनोर्नित्यमिति नुम्। उ
गिदचामिति सूत्रेऽग्रहणेन धातोश्चेदुगित्कार्यं तर्ह्यंचतेरेवेति नियम्यते। तेनेह न। उखास्रत्। क्विप्। अनि
दितामिति नलोपः। पर्णध्वत्। अंचतेस्तु स्यादेव। प्राची। प्रतीची। वनो र च। वन्नन्तात्तदन्ताच्च प्रातिपदिका[illegible]
स्त्रियां ङीप् स्याद्रश्चान्तादेशः। वन्निति ङ्वनिप्क्वनिब्वनिपां सामान्यग्रहणं [illegible]। प्रत्ययग्रहणे यस्मात्स वि
हितस्तदादेस्तदन्तस्य ग्रहणं। तेन प्रातिपदिकविशेषणात्तदन्तान्तमपि लभ्यते। सुत्वानमतिक्रान्ता अतिसु गणेश
त्वरी। अतिधीवरी। शर्वरी। वनो न हश इति वक्तव्यं। हशन्ताद्धातोर्विहितो यो वन् तदन्तात्तदन्तान्ताच्च प्रातिपदि ॥२६॥

कातङ्डीप्रत्यये स्वार्थः। ओणृ अपनयने। वनिप्। विड्वनोरित्यात्वं। अवावा। आत्मनी। राजयुध्वा। बहुव्रीहौ वा। बहुधी
वरी। बहुधीवा। पक्षे डाप् वक्ष्यते। पादोऽन्यतरस्यां। पा॥ द्ध्वदः कृतसमासांतस्य तदंतात् प्रातिपदिकात् ङीप् वा स्यात्। द्वि
पदी। द्विपदा। टाबृचि। ऋचि वाच्यायां पादंतात् टाप् स्यात्। द्विपदा ऋक्। एकपदा। न षट्स्वस्रादिभ्यः। पंचो यतस्त्रः। पंचे
त्यत्र नलोपे कृते पि स्थानिवत्त्वात् षडिति षट्संज्ञां प्रति नलोपः सुप्स्वरेति नलोपस्यासिद्धत्वान्न षट्स्वस्रादिभ्य इति न टाप्। मनः।
मन्नंतान्न ङीप्। सीमा। सीमानौ। सीमानः। अनो बहुव्रीहेः। अन्नंताद्बहुव्रीहेर्न ङीप्। बहुयज्वा। बहुयज्वानौ। डाबुभाभ्या
६८ मन्यतरस्यां। सूत्रद्वयोपात्ताभ्यां डाप् वा स्यात्। सीमा। सीमे। दामा। दामानौ। दामे। नपुंसि दामेत्यमरः। बहुयज्वा। बहु
यज्वे। अन उपधालोपिनोऽन्यतरस्यां। अन्नंताद्बहुव्रीहेरुपधालोपिनो वा ङीप् स्यात्। पक्षे डाप्निषेधौ। बहुराज्ञी। बहु
को०८ राज्ञ्यौ। बहुराजे। बहुराजानौ। प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः। प्रत्ययस्थात्ककारात्पूर्वस्याकारस्येकारः स्या
दापि परे स चेदाप् सुपः परो न चेत्। सर्विका। कारिका। अतः किं। नौका। प्रत्ययस्थात् किं। शक्नोतीति शका। असुपः किं।
बहुपरिव्राजका नगरी। कात् किं। नंदना। पूर्वस्य किं। परस्य मा भूत्। कटुका। तपरः किं। राका। आपि किं। कारकः। मा
मकनरकयोरुपसंख्यानं। मामिका। नरान् कायतीति नरिका। त्यक्त्यपोश्च। दाक्षिणात्यिका। इहत्यिका।
न यासयोः। यत्तदोरस्येत्त्वं न स्यात्। यका। सका। यकां। तकां। त्यकनश्च निषेधः। उपत्यका। अधित्यका। आशिषि वुनश्च
न। जीवका। भवका। उत्तरपदलोपे न। देवदत्तिका। देवका। क्षिपकादीनां च। क्षिपका। ध्रुवका। कन्यका। चटका।
तारका ज्योतिषि। अन्यत्र तारिका। वर्णका तांतवे। अन्यत्र वर्णिका। वर्तका शकुनौ प्राचां। उदीचां तु वर्तिका। अष्टका
पितृदेवत्ये। अन्यत्र अष्टिका। सूतकापुत्रिकावृंदारकाणां वेति वक्तव्यं। ईवा अ इति छेदः। कासर्वस्य अकारादेशो
ह२

सांकाश्यिकेति। संकाशेननिर्वृत्तंनगरंसांकाश्यं वुञ्छण्णादिसूत्रेणसंकाशादिभ्योण्यः ततोभवार्थेधन्वयोपधाद्वुञ्अकादेशः सचसांकाश्यप्रभृतिभ्योयमाहेतिनाका
रस्यापिइत्वंविकल्प्येतेतस्मात्तदसुक्तं ३

वत्सार्थः। तेनपुत्रिकाशब्देङीनइत्वर्णस्यपक्षेअकारः। अन्यत्रेत्वबाधनार्थपक्षेअकारस्यैवअकारः। सूतका। सूतिका।
सिं॰ सु॰ ॥३०॥ इत्यादि। पुत्रिकाया मातःस्थानेयकपूर्वीयाः। यकपूर्वस्यस्त्रीप्रत्ययाकारस्यस्थानेयोकारस्तस्यकात्पूर्वस्येद्वास्या
दापिपरे। केणइतिह्रस्वः। आर्यका। आर्यिका। चटकका। चटकिका। आतः किं। सांकाश्येभवा सांकाश्यिका। यके
ति ४ ति किं। अश्विका। स्त्रीप्रत्ययः किं। शुभंयातीशुभंयाः। अज्ञाताशुभंयाः शुभंयिका। धात्वंतयकोस्त्वनित्यं। सुनयि
का। भस्त्रैषाजाज्ञाद्वास्वानञ्पूर्वाणामपि। स्वेस्वंतस्तुपस्पष्टीकृपदं। एषामतइद्वास्यात्। तदंतविधिनैवसिद्धेनञ् आंगत्वादिति भाव:५
सुपाकिका। पूर्वाणामपीतिस्पष्टार्थं। भस्त्राग्रहणमुपसर्जनार्थं। अन्यस्यतूत्तरसूत्रेणसिद्धं। एषाद्वाएतको
स्त्वस्यपूर्वयोर्नेत्वं। अंतवर्तिनीविभक्तिमाश्रित्यसासुपइतिप्रतिषेधात्। अनेषका। परमैषका। अद्भके। परमद्भ
के। स्वशब्दग्रहणंसंज्ञोपसर्जनार्थं। इहहि आतःस्थानइत्यनुवृत्तंस्वशब्दस्यातोविशेषणं। ननुद्वेषयोरसंभवा
त्। नाप्यन्येषामव्यभिचारात्। स्वशब्दस्त्वनुपसर्जनमात्मीयवाची अकेजहेः। अर्थान्तरेतुनस्त्री। संज्ञो
क६ पसर्जनीभूतस्तु प्रत्ययांतत्वाद्भवस्कदाहरणं। एवंचात्मीयायांस्विका परमस्विकेतिनित्यमेवेत्वं। निर्भस्त्र
का। निर्भस्त्रिका। एषका। एषिका। कृतषत्वनिर्देशान्नेहविकल्पः। एतिके। एतिकाः। अजका। अजिका। ज्ञका
ज्ञिका। द्वके। द्विके। निःस्वका। निःस्विका। अभाषितपुंस्काच्च। एतस्माद्विहितस्यातःस्थानेअतइद्वास्यात्। गं
गका। गंगिका। बहुव्रीहेर्भाषितपुंस्कत्वान्नतोहिविंतस्य [redacted] नित्यं। अज्ञाताःखट्वा। अखट्विका। शो
भिकेकपितुविकल्पएव। आदाचार्याणां। पूर्वसूत्रविषयेआद्वास्यात्। गंगाका। युक्तपुंस्कात्तुशुभ्रिका। अनु ॥गणेश॥
पसर्जनात्। अधिकारोयंयूनस्तिरित्यभिव्याप्य। अयमेवस्त्रीप्रत्ययेषुतदंतविधिंज्ञापयति। टिड्ढाणञ्द्वयस ॥३०॥

ज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः। अनुपसर्जनं यट्टिद्ढाणञादि तदंतं यददंतं प्रातिपदिकं ततः स्त्रियां ङीप्स्यात्। कु
रुचरी। उपसर्जनत्वान्नेह। बहुकुरुचरा। नदट्। नदी। वक्ष्यमाणो यत्र टित्त्वादुगित्त्वाद्वा ङीप्प्राप्तः। यासुटो ङित्त्वेन लाश्रय
मनुबंधकार्यं नादेशानामिति ज्ञापनान्न भवति। भ्रः श्रानचः शित्त्वेन केचिदनुबंधकार्यमान त्विधावितिनिषेध
ज्ञापनाड्डा। सौपर्णेयी। ऐंद्री। औत्सी। ऊरुद्वयसी। ऊरुदघ्नी। ऊरुमात्री। पंचतयी। आक्षिकी। लावणिकी। यादृशी।
ता५ इत्वरी। ष्ठीलिकेत्यपि। यौरी। नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानं। स्त्रैणी। पौंस्नी। शाक्तीकी। आढ्यं
करणी। तरुणी। तलुनी। यञश्च। यञंतात्स्त्रियां ङीप्स्यात्। अकारलोपे कृते। हलस्तद्धितस्य। हल उत्तरस्य तद्धित
यकारस्योपधाभूतस्य लोपः स्यात् ईति परे। गार्गी। अनपत्याधिकारस्थान्न ङीप्। द्वीपे भवा द्वैप्या। अधिकारग्र
हणाद् द्वैपस्यापत्यं द्वैप्या। देवाघञ्ञाविति हि प्राग्दीव्यतीयो न त्वपत्याधिकारपठितः। प्राचां ष्फ तद्धितः। यञंतात्फो
वास्यात्स्त्रियां स च तद्धितः। षः प्रत्ययस्य। प्रत्ययस्यादिः ष इत्स्यात्। आयनेयीनीयियः फढखछघां प्रत्ययादीनां।
प्रत्ययादिभूतानां फादीनां क्रमादायनादय आदेशाः स्युः। तद्धितांतत्वात्प्रातिपदिकत्वं। षित्सामर्थ्यात् ष्फेनोक्ते
वि४ पित्त्वे सिद्धे ङीरेति वक्ष्यमाणो ङीष्। गार्ग्यायणी। सर्वत्र लोहितादिकतंतेभ्यः। लोहितादिभ्यः कतशब्दांतेभ्यो यञंते
भ्यो नित्यं ष्फः स्यात्। लौहित्यायनी। कात्यायनी। कौरव्यमाण्डूकाभ्यां च। आभ्यां ष्फः स्यात्। क्रमेणाटाप्ङीपोरपवादः।
कुर्वादिभ्यो ण्यः। कौरव्यायणी। ढक् मंडूकादित्यण्। माण्डूकायनी। आसुरेरुपसंख्यानं। आसुरायणी। वयसि प्रथमे। प्रथ
मवयोवाचिनोऽदंतात्स्त्रियां ङीप्स्यात्। कुमारी। वयस्यचरम इति वाच्यं। वधूटी। चिरंटी। वधूटचिरंटशब्दौ यौवनवाचिनौ।
अतः किं। शिशुः। कन्यायाः न। कन्यायाः कनीन चेति निर्देशात्। द्विगोः। अदंताद्द्विगोर्ङीप्स्यात्। त्रिलोकी। अजादित्वात्त्रि

सि·सु· फला। त्र्यनीका सेना। ओ परिमाणाद्विस्ताचितकंबल्येभ्यो न तद्धितलुकि। अपरिमाणान्ताद्विस्ताद्यन्ताच्च द्विगोर्ङीप् न स्यात् तद्धि-
॥३१॥ तलुकि सति। पंचभिः अश्वैः क्रीता पंचाश्वा। आर्हीयष्टक्। अध्यर्द्धेति लुक्। द्वौ बिस्तौ पचति द्विबिस्ता। द्व्याचिता। द्विकंबल्या।
परिमाणात्तु द्व्याढकी। तद्धितलुकि सति किं। समाहारे पंचाश्वी। काण्डान्तात्क्षेत्रे। क्षेत्रे यः काण्डान्तो द्विगुस्ततो न ङीप् तद्धितलु-
कि सति। द्वे काण्डे प्रमाणमस्याः द्विकाण्डा क्षेत्रभक्तिः। प्रमाणे द्वयसज्दघ्नञ्मात्रचः इति विहितस्य मात्रचः प्रमाणे लो द्विगोर्नित्यमिति
लुक्। क्षेत्रे किं। द्विकाण्डी रज्जुः। पुरुषात्प्रमाणेऽन्यतरस्यां। प्रमाणे यः पुरुषस्तदन्ताद्द्विगोर्ङीप् वा स्यात् तद्धितलुकि स-
ति। द्वौ पुरुषौ प्रमाणमस्याः द्विपुरुषी द्विपुरुषा परिखा। ऊधसोऽनङ्। ऊधोन्तस्य बहुव्रीहेरनङ् आदेशः स्यात् स्त्रियां। इत्य-
नङि कृते डाप्डाप्ङीप्प्रतिषेधेषु प्राप्तेषु। बहुव्रीहेरूधसो ङीष्। ऊधोन्ताद्बहुव्रीहेर्ङीष् स्यात् स्त्रियां। कुण्डोध्नी। स्त्रियां किं। कुण्डो-
धो धेनुकं। इह नङपि न। तद्धितयोऽस्त्रियामिति स्पष्टसंख्याव्ययादेर्ङीप्। [illegible] बोर्ङीपवादः। द्व्यूध्नी। अत्यूध्नी।
बहुव्रीहेरित्येव। ऊधो अतिक्रान्ता अत्यूधाः। दामहायनान्ताच्च। संख्यादेर्बहुव्रीहेर्दामान्ताद्धायनान्ताच्च ङीप् स्यात्
दामतिडाप्। प्रतिषेधयोः प्राप्तयोः हायनान्ते टापि प्राप्ते वचनं। द्विदाम्नी। अव्ययग्रहणं नानुवर्त्तते ऽदामावडुवयस्त्र डाप्प्रति-
षेधावपि पक्षे स्तः। द्विहायनी बाला। त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यं। वयोवाचकस्यैव हायनस्य ङीप् णत्वं चेष्यते। त्रिहा-
यणी। चतुर्हायणी। वयसोन्यत्र विहायना चतुर्हायना शाला। नित्यसंज्ञाछन्दसोः। अन्नन्ताद्बहुव्रीहेरुपधालोपिनो
नागरी २ ङीप् स्यात्। सुराज्ञी नाम [illegible]ः। अन्यत्र एवं वेणविकल्प एव। वेदे शतमूर्ध्नी। केवलमामकभागधेयपापापरसमाना-
र्यकृतसुमंगलभेषजाच्च। एभ्यो नवभ्यो नित्यसंज्ञा छन्दसोः। अथोतइन्द्रः केवली विशः। भागधेयी। पापी। [illegible]
अपरी। समानी। आर्यकृती। सुमंगली भेषजी। अन्यत्र केवलाइत्यादि। मामकग्रहणं नियमार्थं अणन्तत्वादिवसिद्धेः ॥३१॥

तेन लोके असंज्ञायां मामिका। अन्तर्वत्पतिवतोर्नुक्। एतयोर्नुक् स्यात् स्त्रियां। अनेभ्यो ङीप्। गर्भिण्यां जीवद्भर्तृका
यां च प्रकृतिभागौ निपात्येते। तत्रान्तरस्त्यस्यां गर्भ इति विग्रहे अन्तःशब्दस्य अधिकरणशक्तिप्रधानतया अस्तिसा
मानाधिकरण्याभावादप्राप्तो मतुप् निपात्यते। पतिवत्नीत्यत्र तु वत्वं निपात्यते। अन्तर्वत्नी। पतिवत्नी। प्रत्युदाहरणं
तु। अन्तरस्त्यस्यां शालायां घटः। पतिमती पृथिवी। पत्युर्नो यज्ञसंयोगे। पतिशब्दस्य नकारादेशः स्याद्यज्ञेन सं
बन्धे। वसिष्ठस्य पत्नी। तत्कर्तृकयज्ञस्य फलभोक्त्रीत्यर्थः। दम्पत्योः सहाधिकारात्। विभाषा सपूर्वस्य। पतिशब्दां
तस्य सपूर्वस्य प्रातिपदिकस्य नो वा स्यात्। गृहस्य पतिः। गृहपतिः। गृहपत्नी। अनुपसर्जनस्येति होत्तरार्थमनु
वृत्तमपि न पत्यर्थविशेषणं। किंतु तदन्तस्य। तेन बहुव्रीहावपि। दृढपत्नी। दृढपतिः। स्थूलपत्नी। स्थूलपतिः। अथ
वृषलस्य पत्नीति व्यस्ते कथमिति चेत्। पत्नीव पत्नीत्युपचारात्। यद्वा आचारक्विबन्तात्कर्तरि क्विप्। अस्मिन्न
पक्षे पत्न्यौ पत्न्यः इतीयङ्विषये विशेषः। सपूर्वस्य किं। गवां पतिः स्त्री। नित्यं सपत्न्यादिषु। पूर्वविकल्पा
पवादः। समानस्य सभावो निपात्यते। समानः पतिर्यस्याः सा सपत्नी। एकपत्नी। एतक्रतोरै च। इयं त्रिसूत्री पुंयो
ग एवेष्यते। एतक्रतोः स्त्री एतक्रतायी। यया तु क्रतवः एताः एतक्रतुरेव सा। वृषाकप्यग्निकुसितकुसिदाना
मुदात्तः। एषामुदात्त ऐ आदेशः स्यात् ङीप् च। वृषाकपेः स्त्री वृषाकपायी। हरिविष्णू वृषाकपी स्यमरः। वृषाकपायी श्री
गौर्योरिति च। अग्नायी। कुसितायी। कुसिदायी। कुसिदशब्दो ह्रस्वमध्यो न तु दीर्घमध्यः। मनोरौ वा। मनुशब्द
स्यौकारादेशः स्यात् उदात्तैकारादेशश्च वा। ताभ्यां सन्नियोगशिष्टो ङीप् च। मनाः स्त्री मनायी। मनावी। मनुः। वर्णादनु
ता दात्तोपधात्तो नः। वर्णवाची योऽनुदात्तान्तस्तोपधस्तदन्तादनुपसर्जनात्प्रातिपदिकाद्वा ङीप् स्यात्तकारस्य नकारादे

सि॰ सु॰ ॥३२॥ शब्दः। एता। एनी। रोहिता। रोहिणी। वर्णानां तणतिनितांतानामिति फिट्सूत्रेणाद्युदात्तः। त्र्येतपा वशालल्ये गृते स्वं।
त्री। त्येतान्यस्या इति बहुव्रीहिः। अनुदात्तात्किं। श्वेता। घृतादीनां चेत्यंतोदात्तोयं। अतद्व्येवा शितिः स्त्री। पिशंगादु
पसंख्यानं। पिशंगी। असितपलितयोर्न। असिता। पलिता। छंदसि क्रमेके। असिक्नी। पलिक्नी। अवदातशब्दस्तु
बि॰४ ने॰४ न वर्णवाची किंतु शुद्धिवाची तेनावदाता इव। अन्यतो ङीष्। तोपधाभिन्नाद्वर्णवाचिनोनुदात्तांतात्प्रातिपदिकात् स्त्रियां
ङीष्स्यात्। कल्माषी। सारंगी। लघावंते द्वयोश्च बह्वषो गुरुरिति मध्योदात्तावेतौ। अनुदात्तांतात्किं। कृष्णा। कपिला।
षिद्गौरादिभ्यश्च। षिद्भ्यो गौरादिभ्यश्च ङीष्स्यात्। नर्तकी। गौरी। अनडुही। अनड्वाही। पिप्पल्यादयश्च। आकृतिगणोयं।
सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः। अंगस्योपधाया यस्तस्य लोपः स्यात् स चेत्सूर्याद्यवयवः। मत्स्यस्य ङ्यां। सूर्या
गस्त्ययोश्छे च ङ्यां च। तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यं। मत्सी। मातरि पित्रेति पित्वादेव सिद्धे गौरादिषु मा
तामहीशब्दस्य पाठादनित्यः षित्तां ङीषा दृष्टा। जानपदकुंडगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्य
मत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु। एकादशभ्यः प्रातिपदिकेभ्यः क्र
माद्वृत्त्यादिष्वर्थेषु ङीष्स्यात्। जानपदी वृत्तिश्चेत्। अन्या तु जानपदी। उत्सादित्वादञंतत्वेन हि ङीप्याद्युदात्तः।
कुंडी। अमत्रं चेत्। कुंडान्या। कुडि दाहे। गुरोश्च हल इति अप्रत्ययः। यस्तु अमत्रे जारजः कुंड इति मनुष्यजातिव
चनस्ततो जातिलक्षणो ङीष् भवत्येव। अमत्रं हि स्त्रीविषयत्वादप्राप्तो ङीष् विधीयते न तु नियम्यते। गोणी। आवपनं
चेत्। गोणान्या। स्थली अकृत्रिमा चेत्। स्थलान्या। भाजी श्राणा चेत्। भाजान्या। नागी स्थूला चेत्। नागान्या। गज ॥ गहोश ॥
वाची नागशब्दः स्थौल्ययोगादन्यत्र प्रयुक्त उदाहरणं। सर्पवाची तु दैर्घ्यगुणादन्यत्र प्रयुक्तः प्रत्युदाहरणं। का ॥३२॥

नीवस्त्रेश्चेत्। कालान्या। नीली अनाच्छादनं चेत्। नीलान्या। नील्या रक्तशाटीत्यर्थः। नील्या अनुवक्तव्य इत्सन्। अनाच्छा
ने२ दनेपि सर्वत्रा किं तु नीलादोषधौ। नीली। प्राणिनि च। नीली गौः। संज्ञायां वा। नीली। नीला। कुशी अयो विकारश्चेत्। कुशान्या।
कामुकी। मैथुनेच्छा चेत्। कामुकान्या। करीबकेशानां संन्निवेशश्चेत्। कबरान्या। चित्रेत्यर्थः। शोणात्प्राचां। शोणी। शोणा।
वोतो गुणवचनात्। उदन्तात् गुणवाचिनो वा ङीष् स्यात्। मृद्वी। मृदुः। उः किं। शुचिः। गुणेति किं। आखुः। खरुसंयोगोपधान्न।
खरुः। पतिंवरा कन्या। पाण्डुः। बह्वादिभ्यश्च। एभ्यो वा ङीष् स्यात्। बह्वी। बहुः। कृदिकारादक्तिनः। रात्रिः। रात्री। सर्वतोक्ति
न्नर्थादित्येके। शकटी। शकटिः। अक्तिन्नर्थात् किं। अजननिः। क्तिन्नन्तत्वादप्रवृत्ताविप्यर्थं पद्धतिशब्दो गणे पठ्यते। पद्धती। पद्धतिः
हिमकाषिहतिषु चेति पद्भावः। पुंयोगादाख्यायां। या पुमाख्या पुंयोगात्स्त्रियां वर्तते ततो ङीष् स्यात्। गोपस्य स्त्री। गोपी।
पालकान्तान्न। गोपालिका। अश्वपालिका। सूर्याद्देवतायां चाप् वक्तव्यः। सूर्यस्य स्त्री सूर्या देवता। देवतायां किं। सूरी
कुंती मानुषीयं। इंद्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्। एषामानुगागमः स्यात् ङीष् च
यां। इंद्रादीनां षण्णां मातुलाचार्ययोश्च पुंयोग एवेष्यते। तत्र ङीषि सिद्धे आगममात्रं विधीयते। इतरेषां चतुर्णां तु उभयं। इं
द्रस्य स्त्री इंद्राणी। हिमारण्ययोर्महत्त्वे। महद्धिमं हिमानी। अरण्यानी। यवाद्दोषे। दुष्टो यवो यवानी। यवनाल्लिप्यां। यवना
ल्लिपिर्यवनानी। मातुलोपाध्याययोरानुग्वा। मातुलानी मातुली। उपाध्यायानी। उपाध्यायी। या तु स्वयमेवाध्यापिका
तत्र वा ङीष् वाच्यः। उपाध्यायी। उपाध्याया। आचार्यादणत्वं वाच्यं। आचार्यस्य स्त्री आचार्यानी। पुंयोग इत्येव। आचार्या।
स्वयं व्याख्यात्री। अर्यक्षत्रियाभ्यां वा स्वार्थे। अर्याणी। अर्या। स्वामिनी वैश्या वेत्यर्थः। क्षत्रियाणी। क्षत्रिया। पुंयोगे तु अ
र्यी। क्षत्रियी। कथं ब्रह्माणीति। ब्रह्माणमानयति जीवयतीति कर्मण्यण्। क्रीतात्करणपूर्वात्। क्रीतान्तादन्तात्करणादेः

सि॰ सु॰ स्त्रियां ङीष् स्यात् । वस्त्रक्रीती । क्वचिन्न । धनक्रीता । क्तादल्पाख्यायाम् ॥ करणादेः क्तान्तात् ङीष् स्यात् अल्पत्वे द्योत्ये । अ
॥३३॥ भ्रविलिप्ती द्यौः । बहुव्रीहेश्चान्तोदात्तात् । बहुव्रीहेः क्तान्तादन्तोदात्तात् स्त्रियां ङीष् स्यात् । जातिपूर्वादिति वक्तव्यम् । तेन बहुन
न्नसुकालसुखादिपूर्वान्न । ऊरुभिन्नी । नेह बहुकृता । जातान्तान्न । दन्तजाता । पाणिगृहीती भार्यायाम् । पाणिगृहीतान्या । अस्वाङ्ग
पूर्वपदाद्वा । पूर्वेण नित्ये प्राप्ते विकल्पोऽयम् । सुरापीती । सुरापीता । अन्तोदात्तात् किम् । वस्त्रच्छन्ना । अनाच्छादनादित्यस्य दात्तनिषे
धः । अत एव पूर्वेण विनिङीप् । स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् । असंयोगोपधमुपसर्जनं यत्स्वाङ्गं तदन्ताददन्तात्प्राति
पदिकात् वा ङीष् । केशानतिक्रान्ता अतिकेशी । अतिकेशा । चन्द्रमुखी । चन्द्रमुखा । संयोगोपधात्तु । सुगुल्फा । उपसर्जना
त्किम् । शोभनाशिखा सुशिखा । स्वाङ्गं त्रिधा । अद्रवं मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजम् । सुस्वेदा द्रवत्वात् । सुज्ञाना अमू
र्तत्वात् । सुमुखा शाला । अप्राणिस्थत्वात् । सुशोफा । विकारजत्वात् । अतत्स्थं तत्र दृष्टं च । सुकेशी । सुकेशा वा रथ्या ।
अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात् । तेन चेत्तथा युतम् । सुस्तनी । सुस्तना वा प्रतिमा । प्राणिवत्प्राणिसदृशे स्थित
त्वात् । नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च । एभ्यो वा ङीष् । आद्ययोर्बह्वज्लक्षणो निषेधो बाध्यते । पुरस्ता
दपवादन्यायात् । ओष्ठादीनां तु पञ्चानाम् असंयोगोपधादिति बाध्यते । मध्येऽपवादन्यायात् । सहनञ्लक्षणस्तु
प्रतिषेधः परत्वादस्य बाधकः । तुङ्गनासिकी । तुङ्गनासिका इत्यादि । नेह । सहनासिका । अनासिका । अत्र वृत्तिः ।
अङ्गगात्रकण्ठेभ्यो वक्तव्यम् । स्वङ्गी । स्वङ्गेत्यादि । एतच्चानुक्तसमुच्चयार्थेन चकारेण संग्राह्यमिति केचित् । भाष्याद्य
नुक्तत्वादप्रमाणमिदमिति प्रामाणिकाः । अत्र वार्त्तिकानि । पुच्छाच्चेति वक्तव्यम् । उलूकपक्षी शाला । उलूकपुच्छी गणेश
क १ सेना । नक्रोडादिबह्वचः । क्रोडादेर्बह्वचश्च स्वाङ्गान्न ङीष् । कल्याणक्रोडा । अश्वानामुरः क्रोडा । आकृतिगणोऽयम् । सुज ॥३३॥
× सुपुच्छी । सुपुच्छा । कबरमणिविषशरेभ्यो नित्यम् । कबरं चित्रं पुच्छं यस्याः सा कबरपुच्छी । उपमानात्पक्षाच्च पुच्छाच्च । २

घना। सहनञ्विद्यमानपूर्वाच्च। सहेत्येवं दित्रिकपूर्वान्ङीष। सकेशा। अकेशा। विद्यमाननासिका। नखमुखात्संज्ञायां।
नङीष् स्यात्। शूर्पणखा। गौरमुखा। संज्ञायां किं। ताम्रमुखी कन्या। दिक्पूर्वपदान्ङीप्। दिक्पूर्वपदात्स्वांगान्तात्प्रातिपदि
कात्सरस्यङी बोङीबादेशः स्यात्। प्राङ्मुखी। आद्युदात्तं पदं। वाहः। वाहन्तात्प्रातिपदिकात् ङीष्। ङीब्वानुवर्त्तते ङीप्रा न २
दिस्ववादृवमो दित्यौहीवमो। सख्यशिश्वीति भाषायां। इति शब्दः प्रकारे भाषायामिसस्यानन्तरं दृश्यः। तेन छंदस्यपि क्वचि
त्। सखी। अशिश्वी। आधेनवो धुनयंता मशिश्वीः। जातेरस्त्रीविषयादयोपधात्। जातिवाचि यन्नच स्त्रियां नियतमयोपधं या ५
ततः स्त्रियां ङीषु स्यात्। आकृतिग्रहणा जातिः। अनुगतसंस्थानव्यंग्येत्यर्थः। तटी। लिंगानां च न सर्वभाक्। सकृदाख्या
तनिर्ग्राह्या। असर्वलिंगत्वे सत्येकस्यां व्यक्तौ कथनाद्व्यक्त्यंतरे कथनं विनापि सुग्रहा जातिरिति लक्षणांतरं। वृषली।
ससर्वतः किं। शुक्ला। सकृदित्यादि किं। देवदत्ता। गोत्रं च चरणैः सह। अपत्यप्रत्ययांतः शाखाध्येतृवाची च शब्दो जातिकार्यं ल
भतइत्यर्थः। औपगवी। कठी। बह्वृची। ब्राह्मणी सत्रतु शार्ङ्गरवादि पाठात् ङीनाङीपूबाध्यते। जातेः किं। मुंडा। अस्त्रीविष
यात्किं। बलाका। अयोपधात्किं। क्षत्रिया। योपधप्रतिषेधे गवयह[illegible]यमुकयमनुष्यमत्स्यानामप्रतिषेधः। गवयी। ह
यी। मुकयी। हल [redacted] स्तद्धितस्येति यलोपः। मनुषी। मत्स्यस्यङ्यां। मत्सी। पाककर्णपर्णपुष्पफलमूलबालोत्तर
पदाच्च। पाकाद्युत्तरपदाज्जातिवाचिनः स्त्रीविषयादपि ङीष् स्यात्। ओदनपाकी। शंकुकर्णी। शंखपुष्पी। दासी
फली। दर्भमूली। गोवाली। ओषधिविशेषे रूढा एते। इतो मनुष्यजातेः। ङीष् स्यात्। दाक्षी। योपधादपि। उदमेयस्याप
त्यमौदमेयी। मनुष्येति किं। तित्तिरिः। ऊङुतः। उकारांतादयोपधान्मनुष्यजातिवाचिनः स्त्रियामूङ् स्यात्। कुरूः। कुरु
नादिभ्यो ण्यः। तस्य स्त्रियामवंति इत्यादिना लुक्। अयोपधात्किं। अध्वर्युः ब्राह्मणी। अप्राणिजातेश्चारज्वादीनामु

× सहितसहाभ्यां चेति वक्तव्यं। हितेन सहितोरू यस्याः सा सहितोरूः ६

सि॰सु॰ पसंख्यानं। रज्वादिपर्युदासाद्वर्णितेभ्य एव। अलर्बूः। कर्कंधूः। अनयोर्दीर्घान्तत्वेपि नोङ्‌धात्वोरिति विभक्त्युदात्तत्व
॥३४॥ प्रतिषेधः कुण्डुः फलं। प्राणिजातेः किं। कुकवाकुः। रज्वादेः किं। रज्जुः। हनुः। बाह्वन्तात्संज्ञायां। स्त्रियामूङ्‌। भद्रबाहूः। संज्ञा
यां किं। वृत्तबाहुः। पङ्गोश्च। पङ्गूः। श्वशुरस्योकाराकारलोपश्च। वा॰ श्वश्रूः। पुंयोगलक्षणस्य ङीषोऽपवादः। लिंगविशिष्टपरिभाषया
श्वादयः। श्वश्रूः। ऊरूत्तरपदादौपम्ये। उपमानवाचिपूर्वपदमूरूत्तरपदं यत्प्रातिपदिकं तस्मादूङ्‌ स्यात्। करभोरूः। संहित
शफलक्षणवामादेश्च। अनौपम्यार्थं सूत्रं। संहितोरूः। सैव शफोरूः। शफौ खुरौ ताविव संश्लिष्टत्वादुपचारात्। लक्षण
शब्दादर्श आद्यच्। लक्षणोरूः। वामोरूः। सहहेतइति सहितोरूः। यस्याः सा सहोरूः। यच्चाविद्यमानवचनस्य सहेत्यस्य
कुर्वतीति ज्ञापनप्रतिपादनाय प्रयोगः। संज्ञायां। कद्रुकमंडल्वोः संज्ञायां स्त्रियामूङ्‌। कद्रूः। कमंडलूः। संज्ञायां किं। कद्रुः। क
मंडलुः। छन्दसीत्यर्थवचनं। शार्ङ्गरवाद्यञो ङीन्। शार्ङ्गरवादेरञो योकारस्तदन्ताच्च जातिवाचिनो ङीन् स्यात्। शार्ङ्गरवी।
बैदी। जातेरित्यनुवृत्तेः पुंयोगे ङीषेव। नृनरयोर्वृद्धिश्चेति गणसूत्रं। नारी। यङश्चाप्। यङन्तात्स्त्रियां चाप् स्यात्। अयङ्ष्यङोः
सामान्यग्रहणं। आवट्या। कारीषगंध्या। षाच्च। यञश्चाप् वाच्यः। पौतिमाष्या। आवट्याच्च। अस्मात् चाप् स्यात्। यञश्चेति
ङीपोऽपवादः। अवटशब्दो गर्गादिः। आवट्या। तद्धिताः। आ पंचमसमाप्तेरधिकारोऽयं। यूनस्तिः। युवन्शब्दात्तिप्रत्ययः
स्यात्। स च तद्धितः। लिंगविशिष्टपरिभाषया सिद्धे तद्धिताधिकार उत्तरार्थः। युवतिः। अनुपसर्जनादित्येव। बहवो युवानो
यस्यां सा बहुयुवा। युवतीति तु यौतेः शत्रन्तान्ङीपि बोध्यं॥ ॥छ॥ इति श्री स्त्रीप्रत्ययाः॥ कक्रतुंड॥ गणेश॥ शिव॥ छ॥
थ॰२ प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे प्रथमा। नियतोपस्थितिकः प्रातिपदिकार्थः। मात्रशब्दस्य प्रत्येकं योगः। प्रातिप गणेश
दिकार्थमात्रे लिंगमात्राद्याधिक्ये संख्यामात्रे च प्रथमा स्यात्। उच्चैः। नीचैः। कृष्णः। श्रीः। ज्ञानं। अलिंगा नियतलिंगा ॥३५॥

अ प्रातिपदिकार्थमात्रे इत्यस्योदाहरणं। अनियतलिंगास्तु लिंगमात्राधिक्यस्य। तटः। तटी। तटं। परिमाण
मात्रे। द्रोणो व्रीहिः। द्रोणरूपं यत्परिमाणं तत्परिच्छिन्न इत्यर्थः। प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशे
षणं। प्रत्ययार्थः परिच्छेद्यपरिच्छेदकभावेन व्रीहौ विशेषणमिति विवेकः। वचनं संख्या। एकः। द्वौ। बहवः। इहोक्तार्थ
त्वाद्विभक्तेरप्राप्तौ वचनं। संबोधने च। इह प्रथमा स्यात्। हे राम। कारके इत्यधिकृत्य। कर्तुरीप्सिततमं कर्म। कर्तुः क्रि
यया यदाप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्। कर्तुः किं। माषेष्वश्वं बध्नाति। कर्मण ईप्सिता माषा न तु कर्तुः। तमब्ग्रह
णं किं। पयसा ओदनं भुंक्ते। कर्मेत्यनुवर्तौ कर्मग्रहणमाधारनिवृत्त्यर्थं। अन्यथा गेहं प्रविशतीत्यत्रैव स्यात्। अन
भिहिते इत्यधिकृत्य। कर्मणि द्वितीया। अनुक्ते कर्मणि द्वितीया स्यात्। हरिं भजति। अभिहिते तु कर्मणि प्रातिप
दिकार्थमात्र इति प्रथमैव। अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैः। तिङ् हरिः सेव्यते। कृत् लक्ष्म्या सेवितः। तद्धि कृत ८
तः शतेन क्रीतः। शत्यः। शतिकः। समासः। प्राप्तानंदो यं प्राप्तानंदः। क्वचिन्निपातेनाभिधानं। यथा। विषवृक्षोपि सं
वर्ध्य स्वयं छेत्तुमसांप्रतं। सांप्रतं इत्यस्य हि युज्यत इत्यर्थः। तथायुक्तं चानीप्सितं। ईप्सिततमवत् क्रियया युक्तं अ
नीप्सितं कारकं कर्मसंज्ञं स्यात्। ग्रामं गच्छन्तृणं स्पृशति। विषं भुंक्ते। अकथितं च। अपादानादिविशेषैरविवक्षि
तं कारकं कर्मसंज्ञं स्यात्। दुह्याच्पच्दंड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषां। कर्मयुक् स्यादकथितं तथा स्यान्नी
हृकृष्वहां। दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्युज्यते तदेवाकथितं कर्मेति परिगणनं क
र्तव्यमित्यर्थः। गां दोग्धि पयः। बलिं याचते वसुधां। अविनीतं विनयं याचते। तंडुलानोदनं पचति। गर्गान् शतं दंडयति।
व्रजमवरुणद्धि गां। माणवकं पंथानं पृच्छति। वृक्षमवचिनोति फलानि। माणवकं धर्मं ब्रूते। शास्ति वा। शतं जयति

सि॰ सु॰
॥३५॥

देवदत्तं। सुधां क्षीरनिधिं मथ्नाति। देवदत्तं शतं मुष्णाति। ग्राममजां नयति। हरति कर्षति वहति वा। अर्थनिबन्धनेयं संज्ञा। बलिं भिक्ष
ते वसुधां। माणवकं धर्मं भाषते। अभिधत्ते वक्तीत्यादि। कारकं किं। माणवकस्य पितरं पन्थानं पृच्छति। अकर्मकधातुभिर्योगे
देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यं। कुरून्स्वपिति। मासमास्ते। गोदोहमास्ते। क्रोशमास्ते। गतिबुद्धिप्रत्य
वसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ। गत्याद्यर्थानां शब्दकर्मकाणामकर्मकाणां चाणौ यः कर्ता स णौ कर्मसं
ज्ञः स्यात्। शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत्। आशयच्चामृतं देवान्वेदमध्यापयद्विधिं। आसयत्सलिले पृथ्वीं यः स
मे श्रीहरिर्गतिः। गतीत्यादि किं। पाचयत्योदनं देवदत्तेन। अण्यन्तानां किं। गमयति देवदत्तो यज्ञदत्तं तमपरः प्रयुंक्ते गमय
ति देवदत्तेन यज्ञदत्तं विष्णुमित्रः। नीवह्योर्न। नाययति वाहयति वा भारं भृत्येन। नियन्तृकर्तृकस्य वहेरनिषेधः। वाह
यति रथं वाहान्सूतः। आदिखाद्योर्न। आदयति खादयति वान्नं बटुना। भक्षेरहिंसार्थस्य न। भक्षयत्यन्नं बटुना। अ
हिंसार्थस्य किं। भक्षयति बलीवर्दान्सस्यं। जल्पतिप्रभृतीनामुपसंख्यानं। जल्पयति भाषयति वा धर्मं देवदत्तः। दृशे पुत्रं
श्च। दर्शयति हरिं भक्तान्। सूत्रे ज्ञानसामान्यार्थानामेव ग्रहणं न तु तद्विशेषार्थानामित्यनेन ज्ञाप्यते। तेन स्मरति जिघ्रति
इत्यादीनां न। स्मारयति घ्रापयति देवदत्तेन। शब्दायतेर्न। शब्दाययति देवदत्तेन। धात्वर्थसंगृहीतकर्मकत्वेनाकर्मक
त्वात्प्राप्तिः। येषां देशकालादिभिन्नं कर्म न संभवति तेऽत्राकर्मकाः। न त्वविवक्षितकर्माणोऽपि। तेन मासमासयति देवद
त्तमित्यादौ कर्मत्वं भवति। देवदत्तेन पाचयतीत्यादौ तु न। हृक्रोरन्यतरस्यां। हृक्रोरणौ कर्ता णौ वा कर्म स्यात्। हारयति
कारयति वा भृत्यं भृत्येन वा कटं। अभिवादिदृशोरात्मनेपदे वेति वाच्यं। अभिवादयते दर्शयते देवं भक्तं भक्तेन वा। अधि गणेश
शीङ्स्थासां कर्म। अधिपूर्वाणामेषामाधारः कर्म स्यात्। अधिशेते। अधितिष्ठति। अध्यास्ते वा वैकुण्ठं हरिः। अभिनिवि ॥३५॥

१।४७। अभिनिविशश्च। अभिनिपूर्वस्य विशतेराधारः कर्म स्यात्। अभिनिविशते सन्मार्गं। परिक्रयणे संप्रदानमिति सूत्रादिह मं
डूकप्लुत्यान्यतरस्यांग्रहणमनुवर्त्य व्यवस्थितविभाषाश्रयणात् क्वचिन्न। पापेऽभिनिवेशः। उपान्वध्याङ्वसः। उपा
दिपूर्वस्य वसतेराधारः कर्म स्यात्। उपवसति अनुवसति अधिवसति आवसति वा वैकुंठं हरिः। अभुक्त्यर्थस्य न। वने उ
पवसति। उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते। उभयतः कृष्णं गोपाः।
सर्वतः कृष्णं। धिक् कृष्णाभक्तं। उपर्युपरि लोकं हरिः। अध्यधि लोकं। अधोऽधो लोकं। अभितःपरितःसमयानिकषाहाप्रति
योगेऽपि। अभितः कृष्णं। परितः कृष्णं। ग्रामं समया निकषा। हा कृष्णाभक्तं। तस्य शोच्यतेत्यर्थः। बुभुक्षितं न प्रति भाति
किंचित्। अन्तरान्तरेण युक्ते। आभ्यां योगे द्वितीया स्यात्। अन्तरा त्वां मां हरिः। अन्तरेण हरिं न सुखं। कर्मप्रवचनीयाः। इत्यधि
कृत्य। अनुर्लक्षणे। लक्षणे द्योत्ये अनुरुक्तसंज्ञः स्यात्। गत्युपसर्गसंज्ञापवादः। कर्मप्रवचनीययुक्ते द्वितीया।
एतेन योगे द्वितीया स्यात्। जपमनु प्रावर्षत्। हेतुभूतजपोपलक्षितं वर्षणमित्यर्थः। परापि हेतौ तृतीयानेन
बाध्यते। लक्षणेत्थंभूतेत्यादिना सिद्धे पुनः संज्ञाविधानसामर्थ्यात्। तृतीयार्थे। अस्मिन्द्योत्ये अनुरुक्तसंज्ञः स्या
त्। नदीमन्ववसिता सेना। नद्या सह संबद्धेत्यर्थः। षिञ् बंधने क्तः। हीने। हीने द्योत्येऽनुः प्रागुक्तसंज्ञः स्यात्। अनु ह
रिं सुराः। हरेर्हीना इत्यर्थः। उपोऽधिके च। अधिके हीने च द्योत्ये उपेत्यव्ययं प्राग्वत्संज्ञः स्यात्। अधिके सप्तमी वक्ष्यते।
हीने उप हरिं सुराः। लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः। एष्वर्थेषु विषयभूतेषु प्रत्यादय उक्तसंज्ञाः स्युः। लक्षणे
वृक्षं प्रति परि अनु वा द्योतते विद्युत्। इत्थंभूताख्याने। भक्तो विष्णुं प्रति परि अनु वा। भागे। लक्ष्मीर्हरिं प्रति परि अनु वा। हरे
र्भाग इत्यर्थः। वीप्सायां। वृक्षं वृक्षं प्रति परि अनु वा सिंचति। अत्रोपसर्गत्वाभावान्न षत्वं। एषु किं। परिषिंचति। अभिर

सि॰ सु॰ ॥३६॥

भागे। भागवृत्तैर्लक्षणादावभिरुक्तसंज्ञः स्यात्। हरिमभिवर्त्तते। भक्तो हरिमभि। देवंदेवमभिसिंचति। अभागे किं। यदत्र
ममाभिष्यात्तद्दीयतां। अधिपरी अनर्थकौ। उक्तसंज्ञौ स्तः। कुतोध्यागच्छति। कुतः पर्यागच्छति। गतिसंज्ञाबाधाद्गतिर्गतावितिनि
घातो न। सुः पूजायां। सुसिक्तं। सुस्तुतं। अनुपसर्गत्वान्न षः। पूजायां किं। सुषिक्तं किं तवात्र। क्षेपोयं। अतिरतिक्रमणे च। अ
तिक्रमणे पूजायां चातिः कर्मप्रवचनीयः स्यात्। अतिदेवान्कृष्णः। अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु। एषु द्यो
त्येष्वपिरुक्तसंज्ञः स्यात्। सर्पिषोपि स्यात्। संभावनायां लिङ्। स्यादिति एवंविषयभूते भवने कर्तृदौर्लभ्यप्रयुक्तं दौर्लभ्यं द्यो
तयन्नपिशब्दः स्यादित्यनेन संबध्यते। अनुपसर्गत्वान्न षः। सर्पिष इति षष्ठी तु अपिशब्दबलेन गम्यमानबिंदोरवयवावय
विभावसंबंधे। इयमेव ह्यपिशब्दस्य पदार्थद्योतकता नाम। द्वितीया तु नेह प्रवर्तते। सर्पिषो बिंदुना योगो न त्वपिनेत्युक्तत्वा
तृ त्। अनुपसर्गत्वान्न षः। अपि स्तुयाद्विष्णुं। संभावनं शक्त्युत्कर्षमाविष्कर्तुमत्युक्तिः। अपि स्तुहि। अन्ववसर्गः कामचारानुज्ञा।
धिग्देवदत्तं। अपि स्तुयाद्वृषलं। गर्हा। अपि सिंच। अपि स्तुहि। समुच्चये। कालाध्वनोरत्यंतसंयोगे। इह द्वितीया स्यात्। मासं
कल्याणी। मासमधीते। मासं गुडधानाः। क्रोशं कुटिला नदी। क्रोशमधीते। क्रोशं गिरिः। अत्यंतसंयोगे किं। मासस्य द्विरधीते।
क्रोशस्यैकदेशे पर्वतः। स्वतंत्रः कर्ता। क्रियायां स्वातंत्र्येण विवक्षितोर्थः कर्ता स्यात्। साधकतमं करणं। क्रियासिद्धौ
प्रकृष्टोपकारकं करणसंज्ञं स्यात्। तमब्ग्रहणं किं। गंगायां घोषः। कर्तृकरणयोस्तृतीया। अनभिहिते कर्तरि करणे च तृ
तीया स्यात्। रामेण बाणेन हतो वाली। प्रकृत्यादिभ्य उपसंख्यानं। प्रकृत्या चारुः। प्रायेण याज्ञिकः। गोत्रेण गार्ग्यः॥ समेनैति
विषमेणैति। द्विद्रोणेन धान्यं क्रीणाति। सुखेन दुःखेन याति। इत्यादि। दिवः कर्म च। दिवः साधकतमं कर्मसंज्ञं स्यात्। चा गणेशः
त्करणसंज्ञं। अक्षैरक्षान्वा दीव्यति। अपवर्गे तृतीया। अपवर्गः फलप्राप्तिस्तस्यां द्योत्यायां कालाध्वनोरत्यंतसंयोगे तृतीया ॥३६॥

स्यात्। अहाक्रोशेनवा अनुवाकोधीतः। फलप्राप्तिः किं। मासमधीतोनायातः। सहयुक्तेऽप्रधाने। सहार्थेनयुक्तेऽप्रधानेतृतीयास्या
त्। पुत्रेणसहागतःपिता। एवंसाकंसार्द्धंसमंयोगेपि। विनापिएतद्योगेतृतीया। वृद्धोयूनेतिनिर्देशात्। येनांगविकारः। येनांगे
नविकृतेनांगिनोविकारोलक्ष्यतेतेनतृतीयास्यात्। अक्ष्णाकाणः। अक्षिसंबन्धिकारणत्वविशिष्टइत्यर्थः। अंगविका
रः किं। अक्षिकाणमस्य। इत्थंभूतलक्षणे। कंचित्प्रकारंप्राप्तस्यलक्षणेतृतीयास्यात्। जटाभिस्तापसः। जटाज्ञाप्यतापस
त्वविशिष्टः। संज्ञोन्यतरस्यांकर्मणि। संपूर्वस्यजानातेःकर्मणितृतीयावास्यात्। पित्रापितरंवासंजानीते। हेतौ। हेत्वर्थेतृ
तीयास्यात्। इत्यादिसाधारणंनिर्व्यापारसाधारणंहेतुत्वं। करणत्वंतुक्रियामात्रविषयंव्यापारनियतंच। दंडेनघटः।
पुण्येनदृष्टोहरिः। फलमपीहहेतुः। अध्ययनेनवसति। गम्यमानापिक्रियाविभक्तौप्रयोजिका। अलंश्रमेण। श्रमेणसा
ध्यंनास्तीत्यर्थः। इहसाधनक्रियांप्रतिश्रमःकरणं। शतेनशतेनवत्सान्पाययतिपयः। शतेनपरिछिद्येत्यर्थः। अशिष्टव्यव
हारेदाणःप्रयोगेचतुर्थ्यर्थेतृतीया। दास्यासंयच्छतेकामुकः। धर्म्येतुभार्यायैसंयच्छति। कर्मणायमभिप्रैतिससंप्रदानं। दा
म ६ नस्यकर्मणायमभिप्रैतिससंप्रदानसंज्ञःस्यात्। चतुर्थीसंप्रदाने। विप्रायगांददाति। अनभिहितइत्येव। दानीयोविप्रः। क्रिययायमभिप्रै
तिसोपिसंप्रदानं। पत्येशेते। कर्मणःकरणसंज्ञासंप्रदानस्यचकर्मसंज्ञा। पशुनारुद्रंयजते। पशुंरुद्रायददातीत्यर्थः। रुच्यर्थानां
प्रीयमाणः। रुच्यर्थानांधातूनांयोगेप्रीयमाणोर्थःसंप्रदानसंज्ञःस्यात्। हरयेरोचतेभक्तिः। अन्यकर्तृकोभिलाषोरुचिः। हरिनि
ष्ठप्रीतेर्भक्तिःकर्त्री। प्रीयमाणःकिं। देवदत्तायरोचतेमोदकःपथि। श्ला। श्लाघह्नुङ्स्थाशपांज्ञीप्स्यमानः। एषांप्रयोगेबो
धयितुमिष्टःसंप्रदानंस्यात्। गोपीस्मरात्कृष्णायश्लाघते। ह्नुतेतिष्ठतेशपतेवा। ज्ञीप्स्यमानःकिं। देवदत्तायश्लाघतेप
थि। धारेरुत्तमर्णः। धारयतेःप्रयोगेउत्तमर्णउक्तसंज्ञःस्यात्। भक्तायधारयतिमोक्षंहरिः। उत्तमर्णःकिं। देवदत्तायश

सि·सु· ग्रामे तं धारयतीत्यर्थः। स्पृहेरीप्सितः। स्पृहयतेः प्रयोगे इष्टः संप्रदानसंज्ञः स्यात्। पुष्पेभ्यः स्पृहयति। ईप्सितः किं। पुष्पेभ्यो वने स्पृहयति।
॥३७॥ ईप्सितमात्रे इयं संज्ञा। प्रकर्षविवक्षायां तु परत्वात् कर्मसंज्ञा। पुष्पाणि स्पृहयति। क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः। क्रु-
धाद्यर्थानां प्रयोगे यं प्रति कोपः स उक्तसंज्ञः स्यात्। हरये क्रुध्यति द्रुह्यति ईर्ष्यति असूयति। यं प्रति कोपः किं। भार्यामीर्ष्यति मै-
नामन्यो द्राक्षीदिति। क्रोधोऽमर्षः। द्रोहोऽपकारः। ईर्ष्या अक्षमा। असूया गुणेषु दोषाविष्करणं। द्रोहादयोऽपि कोपप्रभवा
एव गृह्यन्ते। अतो विशेषणं सामान्येन यं प्रति कोप इति। क्रुधद्रुहोरुपसृष्टयोः कर्म। सोपसर्गयोरनयोः यं प्रति कोपः तत्का-
रकं कर्मसंज्ञं स्यात्। क्रूरमभिक्रुध्यति। अभिद्रुह्यति। राधीक्ष्योर्यस्य विप्रश्नः। एतयोः कारकं संप्रदानं स्यात्। यदीयो वि-
विधः प्रश्नः क्रियते। कृष्णाय राध्यति ईक्षते। पृष्टो गर्गः शुभाशुभं पर्यालोचयतीत्यर्थः। प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता। आभ्यां
परस्य शृणोतेर्योगे पूर्वस्य प्रवर्तनरूपव्यापारस्य कर्ता संप्रदानं स्यात्। विप्राय गां प्रतिशृणोति। आशृणोति वा। विप्रेण
मह्यं देहीति प्रवर्तितः प्रतिजानीत इत्यर्थः। अनुप्रतिगृणश्च। आभ्यां गृणातेः कारकं पूर्वव्यापारस्य कर्तृभूतमुक्तसंज्ञं स्यात्।
होत्रेऽनुगृणाति। प्रतिगृणाति। होता प्रथमं शंसति तमध्वर्युः प्रोत्साहयतीत्यर्थः। परिक्रयणे संप्रदानमन्यतरस्यां। नियत
कालं भृत्या स्वीकरणं परिक्रयणं तस्मिन् साधकतमं कारकं संप्रदानसंज्ञं स्यात्। शतेन शताय वा परिक्रीतः। तादर्थ्ये चतुर्थी
वाच्या। मुक्तये हरिं भजति। क्लृपि संपद्यमाने च। भक्तिर्ज्ञानाय कल्पते संपद्यते जायत इत्यादि। उत्पातेन ज्ञापिते च। वाताय क-
पिला विद्युत्। हितयोगे च। ब्राह्मणाय हितं। क्रियार्थोपपदस्य च कर्मणि स्थानिनः। क्रियार्था क्रिया उपपदं यस्य तस्य स्था-
निनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात्। फलेभ्यो याति। फलान्याहर्तुं यातीत्यर्थः। नमस्कुर्मो नृसिंहाय। नृसिंह- गणेश
मनुकूलयितुमित्यर्थः। एवं स्वयंभुवे नमस्कृत्येत्यादावपि। तुमर्थाच्च भाववचनात्। भाववचनाच्चेति सूत्रेण यो विहित ॥३७॥

सत्यं दत्ताच्चतुर्थी स्यात्। पाणाय याति यष्टुं यातीत्यर्थः। नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च। एभिर्योगे चतुर्थी स्यात्। हरये नमः।
उपपदविभक्तेः कारकविभक्तिर्बलीयसी। नमस्करोति देवान्। प्रजाभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा। अलमिति पर्या
य्यर्थग्रहणं तेन दैत्येभ्यो हरिरलं प्रभुः समर्थः शक्त इत्यादि। प्रभ्वादियोगे षष्ठ्यपि साधुः। तस्मै प्रभवति स एषां ग्रामणीः।
इति निर्देशात्। तेन प्रभुर्बुभुक्षुर्भुवनत्रयस्येति सिद्धं। वषडिन्द्राय। चकारः पुनर्विधानार्थः। तेनाशीर्विवक्षायां परामपि चतुर्थी बाधि
षष्ठीति षष्ठीं वा बाधित्वा चतुर्थ्येव भवति। स्वस्ति गोभ्यो भूयात्। मन्यकर्मण्यनादरे विभाषाऽप्राणिषु। प्राणिवर्जे मन्यतेः कर्मणि चतुर्थी
वा स्यात् तिरस्कारे। न त्वां तृणं मन्ये तृणाय वा। श्यना निर्देशात् तानादिकयोगे न। न त्वां तृणं मन्वे। अप्राणिष्विति अपनीय नौकाकान्नशुक
शृगालवर्जेष्विति वक्तव्यं। तेन न त्वां नावमन्नं मन्ये इत्यत्र अप्राणित्वेऽपि चतुर्थी न। न त्वां शुने मन्ये इत्यत्र प्राणित्वेऽपि भवत्येव। गत्यर्थक प्रा १
र्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि। अध्वभिन्ने गत्यर्थानां कर्मणि एते स्तश्चेष्टायां। ग्रामं ग्रामाय वा गच्छति। चेष्टायां किं।
मनसा हरिं व्रजति। अनध्वनीति किं। पन्थानं गच्छति। गन्त्राधिष्ठितेऽध्वन्येवायं निषेधः। यदा तु उत्पथात् पन्था एवाक्रमितुमिष्यते
तदा चतुर्थी भवत्येव। उत्पथेन पथे गच्छति। ध्रुवमपायेऽपादानं। अपायो विश्लेषस्तस्मिन् साध्ये ध्रुवमवधिभूतं कारकम
पादानं स्यात्। अपादाने पञ्चमी। ग्रामादायाति। धावतोऽश्वात् पतति। कारकं किं। वृक्षस्य पर्णं पतति। जुगुप्साविरामप्रमादार्था
नामुपसंख्यानं। पापाज्जुगुप्सते विरमति। धर्मात् प्रमाद्यति। भीत्रार्थानां भयहेतुः। भयार्थानां त्राणार्थानां च योगे भयहेतुर
पादानं स्यात्। चोराद्बिभेति। चोरात् त्रायते। भयहेतुः किं। अरण्ये बिभेति। त्रायते वा। पराजेरसोढः। पराजेः प्रयोगेऽसह्योऽर्थोऽपा
दानं स्यात्। अध्ययनात् पराजयते ग्लायतीत्यर्थः। असोढः किं। शत्रून् पराजयते। अभिभवतीत्यर्थः। वारणार्थानामीप्सितः।
प्रवृत्तिविघातो वारणं। वारणार्थानां प्रयोगे ईप्सितोऽर्थोऽपादानं स्यात्। यवेभ्यो गां वारयति। ईप्सितः किं। यवेभ्यो गां वारयति

२ल्यब्लोपेकर्मण्यधिकरणेच।प्रासादात्प्रेक्षते।आसनात्प्रेक्षते।प्रासादमारुह्यआसनेउपविश्यप्रेक्षतइत्यर्थः॥५

सि०सु० क्षते।अन्तर्धौयेनादर्शनमिच्छति।व्यवधानेसतियत्कर्तृकस्यात्मनोदर्शनस्याभावमिच्छतितदपादानंस्यात्।मातुर्निलीयतेकृ
॥३८॥ ष्णः।अन्तर्धौकिं।चौरान्नदिदृक्षते।इच्छतिग्रहणंकिं।अदर्शनेच्छायांसत्यांसत्यपिदर्शनेयथास्यात्।आख्यातोपयोगे।
नियमपूर्वकविद्यास्वीकारेवक्ताप्राक्संज्ञःस्यात्।उपाध्यायादधीते।उपयोगेकिं।नटस्यगाथांशृणोति।जनिकर्तुःप्रकृतिः।
जायमानस्यहेतुरपादानंस्यात्।ब्रह्मणःप्रजाःप्रजायन्ते।भुवःप्रभवः।भवनंभूः।भूकर्तुःप्रभवस्तथा।हिमवतोगंगाप्रभवति।
तत्रप्रकाशतइत्यर्थः।श्वशुराज्जिह्रेति।श्वशुरंवीक्ष्येत्यर्थः।गम्यमानापिक्रियाकारकविभक्तीनांनिमित्तं।कस्मात्त्वंनद्याः।
यतःअध्वकालनिर्माणंतत्रपंचमी।तद्युक्तादध्वनःप्रथमासप्तम्यौ।कालात्सप्तमीचवक्तव्या।वनात्ग्रामोयोजनंयोज
नेवा।कार्तिक्याआग्रहायणीमासे।अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते।एतैर्योगेपंचमी।अन्यइत्यर्थग्रहणं।
इतरग्रहणंप्रपंचार्थं।अन्योभिन्नइतरोवाकृष्णात्।आराद्वनात्।ऋतेकृष्णात्।पूर्वोग्रामात्।दिशिदृष्टःशब्दोदिक्शब्दस्तेनसं
प्रतिदेशकालवृत्तिनायोगेपिभवति।चैत्रात्पूर्वःफाल्गुनः।अवयववाचियोगेतुन।तस्यपरमाम्रेडितमितिनिर्देशात्।पूर्वंकाय
स्य।अञ्चूत्तरपदस्यदिक्शब्दत्वेपिषष्ठ्यतसर्थेतिषष्ठींबाधितुंपृथग्ग्रहणं।प्राक्प्रत्यग्वाग्रामात्।आच्।दक्षिणाग्रामात्।
आहि।दक्षिणाहिग्रामात्।अपादानेपंचमीतिकार्तिक्याःप्रभृतीतिभाष्यप्रयोगात्प्रभृत्यर्थयोगेपंचमी।भवात्प्रभृति
आरभ्यवासेव्योहरिः।अपपरिबहिरितिसमासविधानात्ज्ञापकात्।बहिर्योगेपंचमी।ग्रामाद्बहिः।अपपरीवर्जने।एतौ
वर्जनेकर्मप्रवचनीयौस्तः।आङ्मर्यादावचने।आङ्मर्यादायामुक्तसंज्ञःस्यात्।वचनग्रहणादभिविधावपि।पंचम्यपाङ्
परिभिः।एतैःकर्मप्रवचनीयैर्योगेपंचमीस्यात्।अपहरेःपरिहरेःसंसारः।परिरत्रवर्जने।लक्षणादौतुहरिंपरि।आमुक्तेःसं गणेश
सारः।आसकलात्ब्रह्म।प्रतिःप्रतिनिधिप्रतिदानयोः।एतयोरर्थयोःप्रतिरुक्तसंज्ञःस्यात्।प्रतिनिधिप्रतिदानेच ॥३८॥

यस्मात्। अत्र कर्मप्रवचनीययोगे पंचमी स्यात्। प्रद्युम्नः कृष्णात्प्रति। तिलेभ्यः प्रतियच्छति माषान्। अकर्तर्य्यृणे पंचमी। कर्तृव
र्जितं यदृणं हेतुभूतं ततः पंचमी स्यात्। शतात्बद्धः। अकर्तरि किं। शतेन बंधितः। विभाषा गुणेऽस्त्रियां। गुणे हेतावस्त्रीलिंगे
न३ पंचमी वा स्यात्। जाड्यात् जाड्येन वा बद्धः। गुणे किं। धनेन कुलं। अस्त्रियां किं। बुद्ध्या मुक्तः। विभाषेति योगविभागात् अगुणे
स्त्रियां च क्वचित्। धूमादग्निमान्। नास्ति घटोऽनुपलब्धेः। पृथग्विनानानाभिस्तृतीयान्यतरस्यां। एभिर्योगे तृतीया स्या
त् पंचमीद्वितीये च। अन्यतरस्यां ग्रहणं समुच्चयार्थं। पंचमीद्वितीये अनुवर्तेते। पृथक् रामेण रामात् रामं वा। एवं विना
नाना। करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य। एभ्योऽद्रव्यवचनेभ्यः करणे तृतीयापंचम्यौ स्तः। स्तोकेन स्तोका
द्वा मुक्तः। द्रव्ये तु स्तोकेन विषेण हतः। दूरान्तिकार्थेभ्यो द्वितीया च। एभ्यो द्वितीया स्यात् चात् पंचमीतृतीये। प्रातिपदि
म८ कार्थमात्रे विधिरयं। ग्रामस्य दूरं दूरात् दूरेण वा। अंतिकमंतिकात् अंतिकेन वा। असत्त्ववचनस्येत्यनुवृत्तेर्नेह। दूरः पंथाः।
षष्ठी शेषे। कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिः शेषस्तत्र षष्ठी। राज्ञः पुरुषः। कर्मादीनामपि संबंधमा
त्रविवक्षायां षष्ठ्येव। सतां गतं। सर्पिषो जानीते। मातुः स्मरति। एधोदकस्योपस्कुरुते। भजे शंभोश्चरणयोः। फलानां
तृप्तः। षष्ठी हेतुप्रयोगे। हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात्। अन्नस्य हेतोर्वसति। सर्वनाम्नस्तृतीया च। सर्वनाम्नो हेतुशब्दस्य
च प्रयोगे हेतौ द्योत्ये तृतीया स्यात् षष्ठी च। केन हेतुना वसति कस्य हेतोः। निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनं। किं निमित्तं
वसति केन निमित्तेन कस्मै निमित्ताय इत्यादि। एवं किं कारणं को हेतुः किं प्रयोजनमित्यादि। प्रायग्रहणादसर्वनाम्नः प्रथमा
द्वितीये न स्तः। ज्ञानेन निमित्तेन हरिः सेव्यः। ज्ञानाय निमित्ताय इत्यादि। षष्ठ्यतसर्थप्रत्ययेन। एतद्योगे षष्ठी स्यात्। दिक्शब्देति
पंचम्यपवादः। ग्रामस्य दक्षिणतः पुरः पुरस्तात् उपरि उपरिष्टात्। एनपा द्वितीया। एनबंतेन योगे द्वितीया स्यात्। एनेपति यो

सि॰ सु॰ ॥ ३६ ॥

प्रपतिः २

गविभागात् षष्ठ्यपि । दक्षिणेन ग्रामं ग्रामस्य वा । एवमुत्तरेण । दूरान्तिकार्थैः षष्ठ्यन्यतरस्यां । एतैर्योगे षष्ठी पंचमी च । दूरं नि
कटं वा ग्रामस्य ग्रामाद्वा । ज्ञोऽविदर्थस्य करणे । जानातेरज्ञानार्थस्य करणे शेषत्वेन विवक्षिते षष्ठी स्यात् । सर्पिषो ज्ञानं ।
अधीगर्थदयेशां कर्मणि । एषां कर्मणि शेषे षष्ठी स्यात् । मातुः स्मरणं । सर्पिषो दयनं ईशनं वा । कृञः प्रतियत्ने । कृञः
कर्मणि शेषे षष्ठी गुणाधाने । एधोदकस्योपस्करणं । रुजार्थानां भाववचनानामज्वरेः । भावकर्तृकाणां ज्वरिवर्जि
तानां रुजार्थानां कर्मणि शेषे षष्ठी । चौरस्य रोगस्य रुजा । अज्वरिसंताप्योरिति वाच्यं । रोगस्य चौरज्वरः । चौरसं
तापो वा । रोगकर्तृकं चौरसंबन्धि ज्वरादिकमित्यर्थः । आशिषि नाथः । आशीरर्थस्य नाथतेः शेषे कर्मणि षष्ठी । सर्पि
षो नाथनं । आशिषीति किं । माणवकनाथनं । तत्संबन्धिनी याच्ञेत्यर्थः । जासिनिप्रहणनाटक्राथपिषां हिंसायां । हिं
सार्थानामेषां कर्मणि षष्ठी । चौरस्योज्जासनं । निप्रौ संहतौ विपर्यस्तौ व्यस्तौ वा । चौरस्य निप्रहणनं । प्रणिहननं ।
निहननं । प्रहणनं वा । नट अवस्पन्दने चुरादिः । चौरस्योन्नाटनं । चौरस्य क्राथनं । वृषलस्य पेषणं । हिंसायां किं । धानापेषणं । व्यवहृप
णोः समर्थयोः । शेषे कर्मणि षष्ठी स्यात् । द्यूते क्रयविक्रयव्यवहारे चानयोस्तुल्यार्थता । शतस्य व्यवहरणं पणनं वा । समर्थ
योः किं । शलाकाव्यवहारः । गणनेत्यर्थः । ब्राह्मणपणनं स्तुतिरित्यर्थः । दिवस्तदर्थस्य । द्यूतार्थस्य क्रयविक्रयव्यवहारार्थस्य
दिवः कर्मणि षष्ठी स्यात् । शतस्य दीव्यति । तदर्थस्य किं । ब्राह्मणं दीव्यति स्तौतीत्यर्थः । विभाषोपसर्गे । पूर्वयोगापवादः । शत
स्य शतं वा प्रतिदीव्यति । प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने । देवतासंप्रदानकेऽर्थे वर्तमानयोः प्रेष्यब्रुवोः कर्मणो हविर्विशेषस्य
वाचकात् शब्दात् षष्ठी स्यात् । अग्नये छागस्य हविषो वपाया मेदसः प्रेष्य अनुब्रूहि वा । कृत्वोऽर्थप्रयोगे कालेऽधिकरणे । कृ
त्वोऽर्थानां प्रयोगे कालवाचिन्यधिकरणे शेषे षष्ठी । पंचकृत्वोऽह्नो भोजनं । शेषे किं । द्विरह्न्यध्ययनं । कर्तृकर्मणोः कृति । क

गणेश ॥ ३६ ॥

योगे कर्त्तरि कर्मणि च षष्ठी स्यात्। कृष्णस्य कृतिः। जगतः कर्त्ता कृष्णः। गुणकर्मणि वेष्यते। नेताश्वस्य स्रुघ्नं स्रुघ्नस्य वा। कृति किं। त
द्धिते मा भूत्। कृतपूर्वी कटं। उभयप्राप्तौ कर्मणि। उभयोः प्राप्तिर्यस्मिन् कृति तत्र कर्मण्येव षष्ठी स्यात्। आश्चर्यो गवां दोहोऽगो
पेन। स्त्रीप्रत्यययोरकाकारयोर्नायं नियमः। भेदिका बिभित्सा वा रुद्रस्य जगतः। शेषे विभाषा। स्त्रीप्रत्यय इत्येके। विचित्रा
जगतः कृतिर्हरेर्हरिणा वा। केचिदविशेषेण विभाषामिच्छंति। शब्दानामनुशासनमाचार्येणाचार्यस्य वा। क्तस्य च वर्त्त
माने। वर्त्तमानार्थस्य क्तस्य योगे षष्ठी स्यात्। नलोकेति निषेधस्यापवादः। राज्ञां मतो बुद्धः पूजितो वा। अधिकरणवाचिन
श्च। क्तस्य योगे षष्ठी स्यात्। इदमेषामासितं। नलोकाव्ययनिष्ठाखलर्थतृनां। एषां योगे षष्ठी न। लादेशाः। कुर्वन् कुर्वाणो वा सृ
ष्टिं हरिः। उ। हरिं दिदृक्षुः। अलंकरिष्णुर्वा। उक। दैत्यान् घातुको हरिः। कमेरनिषेधः। लक्ष्म्याः कामुकः। अव्ययं। जगत् सृष्ट्वा।
सुखं कर्तुं। निष्ठा। दैत्यान् हतवान्। विष्णुना हता दैत्याः। खलर्थः। ईषत्करः प्रपंचो हरिणा। तृन्निति प्रत्याहारः। शतृशानचाविति
तृशब्दादारभ्यतृनो नकारात्। शानन्। सोमं पवमानः। चानश्। आत्मानं मंडयमानः। शतृ। वेदमधीयन्। तृन्। कर्त्ता लोका
न्। द्विषः शतुर्वा। मुरस्य मुरं वा द्विषन्। सर्वोयं कारकषष्ठ्याः प्रतिषेधः। शेषे षष्ठी तु स्यादेव। ब्राह्मणस्य कुर्वन्। नरकस्य जि
ष्णुः। अकेनोर्भविष्यदाधमर्ण्ययोः। भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थेनश्च योगे षष्ठी न स्यात्। सतः पालकोवतरति।
व्रजं गामी। शतं दायी। कृत्यानां कर्त्तरि वा। षष्ठी वा स्यात्। मया मम वा सेव्यो हरिः। कर्त्तरीति किं। गेयो माणवकः साम्नां। भव्य
गेयेति कर्त्तरि यद्विधानादनभिहितं कर्म। अत्र योगो विभज्यते। कृत्यानां। उभयप्राप्ताविति नेति चानुवर्त्तते। तेन नेतव्या व्र
जं गावः कृष्णेन। ततः कर्त्तरि वा। उक्तोर्थः। तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यां। तुल्यार्थैर्योगे तृतीया वा स्यात् पक्षे षष्ठी।
तुल्यः सदृशः समो वा कृष्णस्य कृष्णेन वा। अतुलोपमाभ्यां किं। तुला उपमा वा कृष्णस्य नास्ति। चतुर्थी चाशिष्यायुष्यमद्रभ

सि॰सु॰ द्रकुशलसुखार्थहितैः॥ एतदर्थैर्योगे चतुर्थी स्यात् पक्षे षष्ठी। आयुष्यं चिरंजीवितं कृष्णाय कृष्णस्य वा भूयात्। एवं म
॥४०॥ द्रं भद्रं कुशलं निरामयं सुखं शमर्थः प्रयोजनं हितं पथ्यं भूयात्। आशिषि किं। देवदत्तस्यायुष्यमस्ति। व्याख्यानात् स
र्वत्रार्थग्रहणं। मद्रभद्रयोः पर्यायत्वादन्यतरो न पठनीयः॥ आधारोऽधिकरणं। कर्तृकर्मद्वारा तन्निष्ठक्रियाया आ
धारः कारकमधिकरणसंज्ञं स्यात्। सप्तम्यधिकरणे च। अधिकरणे सप्तमी स्यात् चकाराद् दूरान्तिकार्थेभ्यः। औ
कोवैषयि५ पश्लेषिकोऽभिव्यापकश्चेत्याधारस्त्रिधा। कटे आस्ते। स्थाल्यां पचति। मोक्षे इच्छास्ति। सर्वस्मिन्नात्मास्ति। वनस्य दूरे अं
तिके वा। दूरान्तिकार्थेभ्य इति विभक्तित्रयेण सह चतस्रोऽत्र विभक्तयः फलिताः॥ क्तस्येन्विषयस्य कर्मण्युपसंख्यानं॥
अधीती व्याकरणे। अधीतमनेनेति विग्रहे इष्टादिभ्यश्चेति कर्तरि इनिः। निमित्तात् कर्मयोगे। निमित्तमिह फलं। योगः संयोगस
मवायात्मकः। चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुंजरं। केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः॥ हेतौ तृतीयात्र प्राप्ता।
सीमा अंडकोशः। पुष्कलको गंधमृगः। योगविशेषे किं। वेतनेन धान्यं लुनाति। यस्य च भावेन भावलक्षणं। यस्य क्रियया
क्रियांतरं लक्ष्यते ततः सप्तमी स्यात्। गोषु दुह्यमानासु गतः। साध्वसाधुप्रयोगे च। साधुः कृष्णो मातरि। असाधुर्मा
तुले। अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च। सत्सु तरत्सु असन्त आसते। असत्सु तिष्ठत्सु संतस्तरंति।
सत्सु तिष्ठत्सु असंतस्तरंति। असत्सु तरत्सु संतस्तिष्ठंति। षष्ठी चानादरे। अनादराधिके भावलक्षणे षष्ठीसप्त
म्यौ स्तः॥ रुदति रुदतो वा प्राव्राजीत्। रुदंतं पुत्रादिकमनादृत्य संन्यस्तवानित्यर्थः। स्वामीश्वराधिपतिदायाद
साक्षिप्रतिभूप्रसूतैश्च। एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः। षष्ठ्यामेव प्राप्तायां पाक्षिकसप्तम्यर्थं वचनं। गवां गणेश
गोषु वा स्वामी। गवां गोषु वा प्रसूतः। गा एवानुभवितुं जात इत्यर्थः। आयुक्तकुशलाभ्यां चासेवायां। आभ्यां ॥१४०॥

योगे षष्ठीसप्तम्यौ स्तस्तात्पर्ये। आयुक्तो व्यापारितः। आयुक्तः कुशलो वा हरिपूजने हरिपूजनस्य वा। आसेवायां किं। आयुक्तो गौः श
कटे ईषद्युक्त इत्यर्थः। यतश्च निर्द्धारणं। जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्द्धारणं यतस्ततः ष
ष्ठीसप्तम्यौ स्तः। नृणां नृषु वा द्विजः श्रेष्ठः। गवां गोषु वा कृष्णा बहुक्षीरा। गच्छतां गच्छत्सु वा धावन्तः शीघ्राः। छात्राणां छात्रे
षु वा मैत्रः पटुः। पंचमी विभक्ते। विभागो विभक्तं। निर्द्धार्यमाणस्य यत्र भेद एव तत्र पंचमी स्यात्। माथुराः पाटलिपुत्रकेभ्य आ
ढ्यतराः। साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः। आभ्यां योगे सप्तमी स्यादर्चायां न तु प्रतेः [redacted] योगे। मातरि साधुर्निपुणो
वा। अर्चायां किं। निपुणो राज्ञो भृत्यः। इह तत्त्वकथने तात्पर्यं। अप्रत्यादिभिरिति वक्तव्यं। साधुर्निपुणो वा मातरं प्रति परि
अनु वा। प्रसितोत्सुकाभ्यां तृतीया च। आभ्यां योगे तृतीया स्याच्चात्सप्तमी। प्रसित उत्सुको वा हरिणा हरौ वा। नक्षत्रे च लु
पि। नक्षत्रे प्रकृत्यर्थे सति यो लुप्संज्ञया लुप्यमानस्य प्रत्ययस्यार्थस्तत्र वर्त्तमानात् तृतीयासप्तम्यौ स्तोऽधिकरणे। मूले ना
वाहयेद्देवीं श्रवणेन विसर्जयेत्। मूले श्रवणे इति वा। लुपि किं। पुष्ये शनिः। सप्तमीपंचम्यौ कारकमध्ये। शक्तिद्वयम
ध्ये यौ कालाध्वानौ ताभ्यामेते स्तः। अद्य भुक्त्वायं द्व्यहे द्व्यहाद्वा भोक्ता। कर्तृशक्त्योर्मध्येऽयं कालः। इहस्थोऽयं क्रो
शे क्रोशाद्वा लक्ष्यं विध्येत्। कर्तृकर्मशक्त्योर्मध्येऽयं देशः। अधिकशब्देन योगे सप्तमीपंचम्याविष्येते। तदस्मिन्नधि
मितिध कमिति यस्मादधिकमिति च सूत्रनिर्देशात्। लोके लोकाद्वाधिको हरिः। अधिरीश्वरे। स्वस्वामिसंबंधेऽधिः कर्मप्रवचनीयसं
ज्ञः स्यात्। यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी [redacted]। अत्र कर्मप्रवचनीययुक्ते सप्तमी स्यात्। उपपरार्द्धे हरेर्गुणाः। प
रार्द्धादधिका इत्यर्थः। ऐश्वर्ये तु स्वस्वामिभ्यां पर्यायेण सप्तमी। अधि भुवि रामः। अधि रामे भूः। सप्तमी शौण्डैरिति समा
सपक्षे तु रामाधीना। अषडक्षेत्यादिना खः। विभाषा कृञि। अधिः करोतौ प्राक्संज्ञो वा स्यादीश्वरेऽर्थे। यदत्र मामधि करिष्य

सि॰ सु॰
॥४२॥

न्ति। विनियोक्ष्यत इत्यर्थः। इह विनियोक्तुरीप्सितत्वं गम्यते। आगतिवान्तिङ्वो दात्तवतीति निघातो न॥ इति विभक्त्यर्थाः॥
समर्थः पदविधिः॥ पदसंबन्धी यो विधिः स समर्थाश्रितो बोध्यः॥ प्राक्कडारात्समासः॥ कडाराः कर्मधारय इत्यतः
प्राक् समास इत्यधिक्रियते॥ सह सुपा॥ सह इति योगो विभज्यते। सुबन्तं समर्थेन सह समस्यते। योगविभागस्येष्ट
सिद्ध्यर्थत्वात् लोकेति पयतिङ् तोत्तरपदोयं समासः। स्ववच्छन्दस्येव। पर्यभूषयत्। अनुव्यचलत्॥ सुपा। सुप् सुपास
ह समस्यते। समासत्वात् प्रातिपदिकत्वं। सुपो धातुप्रातिपदिकयोः॥ एतयोरवयवस्य सुपो लुक् स्यात्। भूत
पूर्वं चरडिति निर्देशात् पूर्वनिपातः। पूर्वं भूतो भूतपूर्वः। इवेन समासो विभक्त्यलोपश्च। जीमूतस्येव। अव्ययी
भावः॥ अधिकारोयं। अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानु
पूर्व्य योगपद्यसादृश्यसंपत्तिसाकल्यान्तवचनेषु॥ अव्ययमिति योगो विभज्यते। अव्ययं समर्थेन सह समस्यते सोव्ययीभा
वः॥ प्रथमानिर्दिष्टं समास उपसर्जनं॥ समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात्॥ उपसर्जनं पूर्वं॥ समासे उपस
र्जनं प्राक् प्रयोज्यं। एकविभक्ति चापूर्वनिपाते॥ विग्रहे यन्नियतविभक्तिकं तदुपसर्जनं स्यात् न तु तस्य पूर्वनिपातः। गोस्त्रि
योरुपसर्जनस्य॥ उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्वः स्यात्॥ अव्ययीभावश्चेत्यव्ययत्वं।
नाव्ययीभावादतोम्त्वपञ्चम्याः॥ अदन्तादव्ययीभावात्सुपो न लुक् तस्य पञ्चमीं विनाम्भावः॥ दिशयोर्मध्यमपदिशं॥
क्लीबेव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियां मिरमरः॥ तृतीयासप्तम्योर्बहुलं॥ अदन्तादव्ययीभावात् तृतीयासप्तम्यो
र्बहुलमम्भावः स्यात्। अपदिशं। अपदिशेन। अपदिशे। बहुलग्रहणात्सुमद्रमुन्मत्तगङ्गमित्यादौ सप्तम्या नित्यमम् गणेश
भावः॥ विभक्तौ सादेरयमर्थः। विभक्त्यादिषु वर्त्तमानमव्ययं सुबन्तेन समस्यते सोव्ययीभावः॥ विभक्तौ। तावत्। हरौ इत्य ॥४२॥

धिहरि। सप्तम्यर्थस्यैवात्र द्योतकोऽधिः। हरि ङि अधि इत्यलौकिकं विग्रहवाक्यं। अत्र निपातेनाभिहितेप्यधिकरणे क्वचन
सामर्थ्यात्सप्तमी॥ अव्ययीभावश्च। अयं नपुंसकं स्यात्। ह्रस्वो नपुंसके प्रातिपदिकस्य। गोपायतीति गाः पातीति वा
गोपाः। तस्मिन्नित्यधिगोपं। समीपे। कृष्णस्य समीपं उपकृष्णं। कृष्णं समया ग्रामं निकषा लंकां आराद्वनादित्यत्र
तु नाव्ययीभावः। अभितः परितः अन्यारादितिद्वितीयापंचम्योर्विधानसामर्थ्यात्। मद्राणां समृद्धिः सुमद्रं। यवना
नां व्यृद्धिः दुर्यवनं विगता ऋद्धिः व्यृद्धिः। मक्षिकाणामभावो निर्मक्षिकं। हिमस्यात्ययोऽतिहिमं। अत्ययो ध्वंसः। नि
द्रा संप्रति न युज्यत इत्यतिनिद्रं। हरिशब्दस्य प्रकाश इति इतिहरि। विष्णोः पश्चादनुविष्णु। पश्चाच्छब्दस्य तु नायं स
मासः। ततः पश्चात् स्रंस्यत इति भाष्यप्रयोगात्। योग्यता वीप्सा पदार्थानतिवृत्तिः सादृश्यानि यथार्थाः। अनुरूपं
रूपस्य योग्यमित्यर्थः। अर्थमर्थं प्रति प्रत्यर्थं। प्रतिशब्दस्य वीप्सायां कर्मप्रवचनीयसंज्ञाविधानसामर्थ्यात्स द्वि
तीयागर्भं वाक्यमपि। शक्तिमनतिक्रम्य यथाशक्ति। हरेः सादृश्यं सहरि। वक्ष्यमाणेन सहस्य सः। ज्येष्ठस्यानुपूर्व्ये
णेत्यनुज्येष्ठं। चक्रेण युगपदिति विग्रहे। अव्ययीभावे चाकाले। सहस्य सः स्यादव्ययीभावे न तु काले। सचक्रं। काले तु स
हपूर्वाह्णं। सदृशः सख्या ससखि। यथार्थत्वेनैव सिद्धे पुनः सादृश्यग्रहणं गुणभूतेऽपि सादृश्ये यथा स्यादित्येवमर्थं। क्षत्राणां
स४ संपत्तिः सक्षत्रं। ऋद्धेराधिक्यं समृद्धिः। अनुरूप आत्मभावः संपत्तिरिति भेदः। तृणमप्यपरित्यज्य सतृणमत्ति। साकल्येनेत्य
र्थः। न त्वत्र तृणभक्षणे तात्पर्यं। अन्तो अग्निग्रंथपर्यंतमधीते साग्नि। यथासादृश्ये। असादृश्ये एव यथाशब्दः समस्यते।
तेन नेह न तु यथा हरिस्तथा हरः। हरेरुपमानत्वं यथाशब्दो द्योतयति तेन सादृश्ये इति वा यथार्थे इति वा प्राप्तं निषिध्यते।
यावदवधारणे। यावंतः श्लोकास्तावंतोऽच्युतप्रणामा यावच्छ्लोकं। सुप्प्रतिना मात्रार्थे। शाकस्य लेशः शाकप्रति। मा

तं। ग्नि३

सि·कौ· त्रार्थे किं। वृक्षं प्रति विद्योतते विद्युत्। अक्षशलाकासंख्याः परिणा। द्यूतव्यवहारे पराजये एवायं समासः। अक्षेण विपरीतं वृत्तम्
॥४२॥ का मक्षपरि। शलाकापरि। एकपरि। विभाषा। अधिकारोऽयं। एतत्सामर्थ्यादेव प्राचीनानां नित्यसमासत्वे सुप्सुपेति तु न नित्यस
मासः। अव्ययमित्यादिसमासविधानात् ज्ञापकात्। अपपरिबहिरंचवः पंचम्या। अपविष्णु संसारः। अपविष्णोः॥
परिविष्णु। परिविष्णोः। बहिर्वनं बहिर्वनात्। प्राग्वनं। प्राग्वनात्। आङ् मर्यादाभिविध्योः। एतयोराङ् पंचम्यंतेन वा सम
स्यते सोऽव्ययीभावः। आमुक्ति संसारः। आमुक्तेः संसारः। आबालं हरिभक्तिः। आबालेभ्यः। लक्षणेनाभिप्रती आभिमुख्ये।
आभिमुख्यद्योतकौ अभिप्रती चिह्नवाचिना सह प्राग्वत्। अभ्यग्नि शलभाः पतंति। अग्निमभि। प्रत्यग्नि। अग्निं प्रति। अ
नुर्यत्समया। यं पदार्थं समया तेन लक्षणभूतेन अनुः समस्यते सोऽव्ययीभावः। अनुवनमशनिर्गतः। वनस्य समीपं
गत इत्यर्थः। यस्य चायामः। यस्य दैर्घ्यमनुना द्योत्यते तेन लक्षणभूतेनानुः समस्यते। अनुगंगं वाराणसी। गंगाया अ
नुगंगादैर्घ्यसदृशदैर्घ्योपलक्षितेत्यर्थः। तिष्ठद्गुप्रभृतीनि च। एतानि निपात्यंते। तिष्ठंति गावो यस्मिन्काले सति तिष्ठद्गु।
दोहनकालः। आयती गवं। इह शत्रादेशः पुंवद्भावविरहः समासांतश्च निपात्यते। इत्यादि। पारे मध्ये षष्ठ्या वा। पारमध्य
शब्दौ षष्ठ्यंतेन सह वा समस्येते। एदंतत्वं चानयोर्निपात्यते। पक्षे षष्ठीतत्पुरुषः। पारेगंगोदानय। गंगापारात्। मध्येगंगात्।
गंगामध्यात्। महाविभाषया वाक्यमपि। गंगायाः पारात्। गंगायाः मध्यात्। संख्या वंश्येन। वंशो द्विधा। विद्यया जन्मना च।
तत्र भवो वंश्यः। तद्वाचिना सह संख्या वा समस्यते। द्वौ मुनी वंश्यौ द्विमुनि। व्याकरणस्य। त्रिमुनि। विद्यातद्वतामभेदवि
वक्षायां त्रिमुनिव्याकरणं। एकविंशतिभारद्वाजं। नदीभिश्च। नदीभिः संख्या प्राग्वत्। समाहारे चायमिष्यते। सप्तगंगं। गणेश
द्वियमुनं। अन्यपदार्थे च संज्ञायां। अन्यपदार्थे विद्यमानं सुबंतं नदीभिः सह समस्यते संज्ञायां। विभाषाधिकारेपि ॥४२॥

वाक्येन संज्ञानवगमादिहनित्यसमासः। उन्मत्तगंगं नाम देशः। लोहितगंगं। समासांता इत्यधिकृत्य। अव्ययीभावे शरत्प्रभृतिभ्यः॥
शरदादिभ्यः टच् स्यात्। समासांतोऽव्ययीभावे। शरदः समीपमुपशरदं। प्रतिविपाशं। शरद्। विपाश्। अनस्। मनस्। उपानह्। दिव्। हि
मवत्। अनडुह्। दिश्। दृश्। विश्। चेतस्। चतुर्। त्यद्। तद्। यद्। कियत्। जराया जरस्च। उपजरसं। प्रतिपरसमनुभ्योऽक्ष्णः। चस्येति। प्र
त्यक्षं अक्ष्णः परमिति विग्रहे समासांतविधानसामर्थ्यादव्ययीभावः। परोक्षे लिटि तिनिपातनात् परस्यौकारादेशः। परोक्षे। परोक्षा क्रि
येत्यादि लुरीश्राघयि। समक्षं। अन्वक्षं। अनश्च। अन्नंतादव्ययीभावाट्टच् स्यात्। नस्तद्धिते। नांतस्य भस्य टेर्लोपः स्यात्तद्धिते। उपरा
जं। अध्यात्मं। नपुंसकादन्यतरस्यां। अन्नंतं यत्क्लीबं तदंतादव्ययीभावाट्टज्वा। उपचर्मं। उपचर्म। नदीपौर्णमास्याग्रहायणीभ्यः।
वा टच्। उपनदं। उपनदि। उपपौर्णमासं। उपपौर्णमासि। झयः। झयंतादव्ययीभावाट्टज्वा। उपसमिधं। उपसमित्। गिरेश्च सेनक
स्य। गिर्यंतादव्ययीभावाट्टज्वा। सेनकग्रहणं पूजार्थं। उपगिरं। उपगिरि। इत्यव्ययीभावः॥छ॥ तत्पुरुषः। अधिकारोऽयं प्राग्बहुव्री
हेः। द्विगुश्च। द्विगुरपि तत्पुरुषसंज्ञः स्यात्। इदं सूत्रं सप्तलुशक्यं। संख्यापूर्वो द्विगुश्चेति पठित्वा चकारबलेन संज्ञासमावेशस्य
सुवचत्वात्। समासांतः प्रयोजनं। पंचराजं। द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः। द्वितीयांतं श्रितादिप्रकृतिकैः सुबंतैः स
स५ ह समस्यते वा स तत्पुरुषः। कष्टं श्रितः कष्टश्रितः। दुःखातीतः। गम्यादीनामुपसंख्यानं। ग्रामं गमी। ग्रामगमी। अन्नं बुभुक्षुः। स्वयं
क्तेन। द्वितीयेति न संबध्यते। योग्यत्वात्। स्वयंकृतस्यापत्यं स्वायंकृतिः। खट्वा क्षेपे। खट्वाप्रकृतिकं द्वितीयांतं क्तांतप्रकृतिकेन सु
बंतेन समस्यते निंदायां। खट्वारूढो जाल्मः। नित्यसमासोऽयं। नहि वाक्येन निंदा गम्यते। सामि। सामिकृतं। कालाः। क्तेनेत्येव। अन
त्यंतसंयोगार्थवचनं। मासप्रमितः प्रतिपच्चंद्रः। मासं परिच्छेत्तुमारब्धवान्। अत्यंतसंयोगे च। कालाद्व्येव। अक्तांतार्थवचनं॥
मुहूर्तसुखं। मुहूर्तसुखं। तृतीया तत्कृतार्थेन गुणवचनेन। तत्कृते तिलुप्त तृतीयाकं। तृतीयांतं तृतीयातार्थकृतगुणवचनेन।

सि॰कौ॰ ।।४३।।

थेशब्देन च सह प्राग्वत्। शंकुलया खंडः शंकुलाखंडः। धान्येनार्थो धान्यार्थः। तत्कृतेति किं। अक्ष्णा काणः। पूर्वसदृशसमोनार्थकलहनि
पुणमिश्रश्लक्ष्णैः। तृतीयांतमेतैः प्राग्वत्। मासपूर्वः। मातृसदृशः। पितृसमः। माषोनं कार्षापणं। माषविकलं वा। वाक्कलहः। आचार कृतार्थ २
निपुणः। गुडमिश्रः। आचारश्लक्ष्णः। मिश्रग्रहणे सोपसर्गस्यापि ग्रहणं। मिश्रं चानुपसर्गमसंधावित्यत्रानुपसर्गग्रहणात्।।
गुडसंमिश्रा धानाः। अवरस्योपसंख्यानं। मासेनावरो मासावरः। कर्तृकरणे कृता बहुलं। कर्तरि करणे च तृतीयांतं कृदंतेन प्राग्वत्। बहुलं ४
हरिणा त्रातो हरित्रातः। नखैर्भिन्नो नखभिन्नः। कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं। नखनिर्भिन्नः। कृता किं। काष्ठैः पचतितरां।
कृत्यैरधिकार्थवचने। स्तुतिनिंदाफलकमर्थवादवचनमधिकार्थवचनं। तत्र कर्तरि करणे च तृतीया कृत्यैः सह प्राग्वत्। का
कपेया नदी। वातच्छेद्यं तृणं। अन्नेन व्यंजनं। संस्कारकद्रव्यवाचकं तृतीयांतमन्नेन प्राग्वत्। दध्ना ओदनो दध्योदनः। इह
तर्भूतोपसेकक्रियाद्वारा सामर्थ्यं। भक्ष्येण मिश्रीकरणं। गुडेन धानाः। गुडधानाः। मिश्रणक्रियाद्वारा सामर्थ्यं। चतुर्थी तदर्था
र्थबलिहितसुखरक्षितैः। चतुर्थ्यंतार्थाय यत्तद्वाचिनाऽर्थादिभिश्च चतुर्थ्यंतं वा प्राग्वत्। तदर्थेन प्रकृतिविकृतिभाव एव। बलि
रक्षितग्रहणात् ज्ञापकात्। यूपाय दारु यूपदारु। नेह। रंधनाय स्थाली। अश्वघासादयस्तु षष्ठीसमासाः। अर्थेन नित्यसमा
सो विशेष्यलिंगता चेति वक्तव्यं। द्विजाय अयं द्विजार्थः सूपः। द्विजार्था यवागूः। द्विजार्थं पयः। भूतबलिः। गोहितं। गोसुखं।।
गोरक्षितं। पंचमी भयेन। चोराद्भयं चोरभयं। भयभीतभीतिभीभिरिति वाच्यं। वृकभीतः। अपेतापोढमुक्तपतितापत्रस्तैरल्पशः।
एतैः सहाल्पं पंचम्यंतं समस्यते स तत्पुरुषः। सुखापेतः। कल्पनापोढः। चक्रमुक्तः। स्वर्गपतितः। तरंगापत्रस्तः। अल्पशः किं।
प्रासादात्पतितः। स्तोकांतिकदूरार्थकृच्छ्राणि क्तेन। स्तोकान्मुक्तः। अल्पान्मुक्तः। अंतिकादागतः। अभ्याशादागतः।। गणेश्रा
दूरादागतः। विप्रकृष्टादागतः। कृच्छ्रादागतः। पंचम्याः स्तोकादिभ्यः इत्यलुक्। षष्ठी। राज्ञः पुरुषो राजपुरुषः। याजकादिभि ।।४३।।

॥भ्या॥एभिः षष्ठ्यंतं समस्यते॥तृजकाभ्यां कर्तरि॥ तृजकप्रतिप्रसवोयं॥ ब्राह्मणयाजकः॥देवपूजकः॥गुणात्तरेण तरलोप
श्चेतिवक्तव्यं॥ तरबंतं यत्तद्गुणवाचितेन न समासः॥ ननिर्धारणे इति प्रसक्ते गुणोत्तरेति वा निषेधस्य प्रतिप्रसवोयं॥ सर्वेषां श्वे
ततरः सर्वश्वेतः॥ सर्वेषां महत्तरः सर्वमहान्॥ क्तयोगा च षष्ठी समस्यत इति वाच्यं॥इध्मप्रव्रश्चनः॥ ननिर्धारणे॥ निर्धारणे
या षष्ठी सा न समस्यते॥ नृणां द्विजः श्रेष्ठः॥ प्रतिपदविधाना षष्ठी न समस्यत इति वाच्यं॥ सर्पिषो ज्ञानं॥ पूरणगुणसुहि
तार्थसदव्ययतव्यसमानाधिकरणेन॥ पूरणाद्यर्थैः सदादिभिश्च षष्ठी न समस्यते॥ पूरणे॥ सतां षष्ठः॥ गुणे॥ काकस्य
कार्ष्ण्यं॥ ब्राह्मणस्य शुक्लाः॥ यदा प्रकरणादिना दंता इति विशेष्यं ज्ञातं तदेदमुदाहरणं॥ अनित्योयं गुणेन निषेधः॥ संज्ञा
प्रमाणत्वादिस्यादि निर्देशात्॥ तेनार्थगौरवं बुद्धिमांद्यमित्यादि सिद्धं॥ सुहितार्थास्तृप्त्यर्थाः॥ फलानां सुहितः॥ तृतीया
समासस्तु स्यादेव॥ स्वरे विशेषः॥ सदिति शतृशानचौ॥ द्विजस्य कुर्वन्॥ कुर्वाणो वा॥ किंकरः इत्यर्थः॥ अव्ययं ब्राह्मणस्य कृत्वा॥ एवं न रसाह
वर्धीत्कदव्ययमेव गृह्यते॥ तेन तदुपरीत्यादि सिद्धमिति दीक्षिताः॥ तव्या॥ ब्राह्मणस्य कर्त्तव्यं॥ तव्यतातु भवत्येव॥ स्वकर्त्तव्यं॥
क१ स्वरे भेदः॥ समानाधिकरणे॥ तक्षकस्य सर्पस्य॥ विशेषणसमासस्त्विह बहुलग्रहणान्न॥ गोर्धेनोरित्यादिषु पोटायुव
तीत्यादिना विभाष्यते रेव यदि ता र्थिनापरत्वात् क्वाधकः षष्ठीसमासः॥ प्राप्तः सोप्यनेन वार्यते॥ क्तेन च पूजायां॥ मतिबु
न४ द्धीतिसूत्रेण विहितो यः क्तस्तदंतेन षष्ठी न समस्यते॥ राज्ञां मतो बुद्धः पूजितो वा॥ राजपूजित इत्यादौ तु भूते क्तांतेन सह तृती
यांतस्य समासः॥ अधिकरणवाचिना च॥ क्तेन षष्ठी न समस्यते॥ इदमेषामासितं गतं भुक्तं वा॥ कर्मणि च॥ उभयप्राप्तौ कर्मणि
ति या षष्ठी सा न समस्यते॥ आश्चर्यो गवां दोहोऽगोपालेन॥ तृजकाभ्यां कर्तरि॥ कर्त्रर्थतृजकाभ्यां षष्ठ्या न समासः॥ अप
पां स्रष्टा॥ वज्रस्य भर्ता॥ ओदनस्य पाचकः॥ कर्तरि किं॥ इक्षूणां भक्षणमिक्षुभक्षिका॥ पत्यर्थभर्तृशब्दस्य याजकादित्वा

सि॰ सु॰ त्समासः॥ हरभक्ती॥ कथं तर्हि घटानां निर्मातुस्त्रिभुवनविधातुश्च कलहः इति। शेषषष्ठ्या समास इति कैयटः। कर्तरि च। कर्तृ-
॥४४॥ षष्ठ्या अकेन न समासः। भवतः शायिका। नेह तृजनुवर्तते। तद्योगे कर्तुरभिहितत्वेन कर्तृषष्ठ्या अभावात्। नित्यं क्रीडाजी-
विकयोः। एतयोरर्थयोरकेन नित्यं षष्ठी समस्यते। उद्दालकपुष्पभञ्जिका। क्रीडाविशेषस्य संज्ञा। संज्ञायामिति भावे ण्वु-
त्र४ ल्। जीविकायां दन्तलेखकः। तत्र क्रीडायां विकल्पे जीविकायां तृजकाभ्यां कर्तरीति निषेधे प्राप्ते वचनं। पूर्वापराधरोत्तरमेक-
देशिनैकाधिकरणे। अवयविना सह पूर्वादयः समस्यन्ते एकत्वसंख्याविशिष्टश्चेदवयवी। षष्ठीसमासापवादः। पू-
र्वं कायस्य पूर्वकायः। एकदेशिना किं। पूर्वं नाभेः कायस्य। एकाधिकरणे किं। पूर्वं छात्राणां। सर्वोप्येकदेशोऽ-
ह्ना सह समस्यते। संख्याविसायेति ज्ञापकात्। मध्याह्नः। सायाह्नः। केचित्तु सर्व एकदेशः कालेन समस्यते। न त्वह्नैव।
ज्ञापकस्य सामान्यापेक्षत्वात्। तेन मध्यरात्रः। उपारताः पश्चिमरात्रगोचरा इत्यादि सिद्धमित्याहुः। अर्धं नपुंसकं।
समांशवाच्यर्धशब्दो नित्यं क्लीबे स प्राग्वत्। एकविभक्तावषष्ठ्यन्तवचनं। एकदेशिसमासविषयकोयमुपसर्ज-
नसंज्ञानिषेधः। तेन पंचखट्वी इत्यादि सिध्यति। अर्धं पिप्पल्या अर्धपिप्पली। क्लीबे किं। ग्रामार्धः। द्रव्यैक्य एव। अर्ध-
त्य४ पिप्पलीनां। द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्यां। एतान्येकदेशिना सह प्राग्वत् वा। द्वितीयं भिक्षाया द्वितीयभि-
क्षा। एकदेशिना किं। द्वितीयं भिक्षाया भिक्षुकस्य। अन्यतरस्यांग्रहणसामर्थ्यात् पूरणगुणेति निषेधं बाधित्वा पक्षे ष-
ष्ठी समासः। भिक्षाद्वितीयं। प्राप्तापन्ने च द्वितीयया। पक्षे द्वितीयाश्रितेति समासः। प्राप्तो जीविकां प्राप्तजीविकः। जीवि- गणेश
कां प्राप्तः। आपन्नजीविकः जीविकापन्नः। इह सूत्रे द्वितीयया अ इति छित्वा अकारोपि विधीयते। तेन जीविकां प्राप्ता ॥४४॥

स्त्रीप्राप्तजीविका। आपन्नजीविका। कालाः परिमाणिना। परिच्छेद्यवाचिना सह वर्तते तेन सह कालाः समस्यंते। मासो जातस्यय
२ द्व्यहजातः स्य समासजातः। द्व्यहरहोः समाहारो द्व्यहः। द्व्यहो जातस्येति विग्रहे द्व्यहजातः। उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां तत्पु
रुषस्योपसंख्यानं। द्वे अहनी जातस्य यस्य द्व्यहजातः। अह्नोऽह्न इति वक्ष्यमाणेऽह्नादेशः। पूर्वत्र तु न संख्यादेः समाहारे इति
तन्निषेधः। सप्तमी शौंडैः। सप्तम्यंतं शौंडादिभिर्वा प्राग्वत्। अक्षेषु शौंडो अक्षशौंडः। अधिशब्दोऽत्र पठ्यते। अध्युत्तरपदा
दिति खः। ईश्वराधीनः। सिद्धशुष्कपक्वबंधैश्च। एतैः सप्तमी प्राग्वत्। सांकाश्ये सिद्धः। आतपशुष्कः। स्थालीपक्वः। चक्रब
द्धः। ध्वांक्षेण क्षेपे। ध्वांक्षवाचिना सह सप्तम्यंतं प्राग्वन्निंदायां। तीर्थे ध्वांक्ष इव तीर्थध्वांक्षः। तीर्थकाकः। कृत्यैर्ऋणे। सप्त
म्यंतं कृत्यप्रत्ययांतैः सह प्राग्वत्। आवश्यके। मासे देयमृणं। पूर्वाह्णे गेयं साम। संज्ञायां। सप्तम्यंतं सुपा प्राग्वत् संज्ञायां।
वाक्येन संज्ञानवगमात् नित्यसमासोयं। अरण्येतिलकाः। वनेकसेरुकाः। हलदंतात्सप्तम्याः संज्ञायामलुक्। क्तेनाहोरात्राव
यवाः। अहोरात्रेऽवयवाः। सप्तम्यंताः क्तांतेन सह प्राग्वत्। पूर्वाह्णे कृतं। अपररात्रकृतं। अवयवग्रहणं किं। अहनि दृष्टं।
तत्र। तत्रेत्येतत्सप्तम्यंतं क्तांतेन सह प्राग्वत्। तत्रभुक्तं। क्षेपे। सप्तम्यंतं क्तांतेन सह प्राग्वन्निंदायां। अवतप्तेनकुलस्थितं
त एतत्। पात्रेसमितादयश्च। एते निपात्यंते क्षेपे। पात्रेसमिताः। भोजनसमय एव संगताः। न तु कार्ये। गेहेशूरः। गेहेन
र्दी। आकृतिगणोयं। चकारोऽवधारणार्थः। तेनैषां समासांतरे घटकतया प्रवेशो न। पूर्वकालैकसर्वजरत्पुराणनव
केवलाः समानाधिकरणेन। विशेषणं विशेष्येणेति सिद्धे पूर्वनिपातनियमार्थं सूत्रं। एकशब्दस्य दिक्संख्ये संज्ञाया
मिति नियमबाधनार्थं च। पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः। एकनाथः। सर्वयाज्ञिकाः। जरन्नैयायिकाः।

सि·कु· पुराणमिमांसकाः।नवपाठकाः।केवलवैयाकरणः।दिक्संख्येसंज्ञायां।समानाधिकरणेनेत्यापादसमाप्तेरधिकारः। परि
।।४५।। संज्ञायामेवेतिनियमार्थंसूत्रं।पूर्वेषुकामशमी।सप्तर्षयः।नेह।उत्तरावृक्षाः।पंचब्राह्मणाः।तद्धितार्थोत्तरपदसमा
हारेचातद्धितार्थेविषयेउत्तरपदेचपरतःसमाहारेचवाच्येदिक्संख्येवाप्राग्वत्।पूर्वस्यांशालायांभवःपौर्वशा
लः।समासेकृतेदिक्पूर्वपदादसंज्ञायांञइतिञः।सर्वनाम्नोवृत्तिमात्रेपुंवद्भावः।आपरशालः।पूर्वाशाला
प्रियायस्येतित्रिपदेबहुव्रीहौकृतेप्रियायाशब्दउत्तरपदेपूर्वयोःतत्पुरुषः।तेनशालाशब्दआकारउदात्तः।पूर्वशाला
प्रियः।दिक्समाहारोनास्त्यनभिधानात्।संख्यायास्तद्धितार्थेषण्णांमातॄणामपत्यंषाण्मातुरः।पंचगावोधनं
यस्येतित्रिपदेबहुव्रीहाववांतरतत्पुरुषस्यविकल्पेप्राप्ते।द्वंद्वतत्पुरुषयोरुत्तरपदेनित्यसमासवचनं।गोरतद्धितलुकि।।तत्पुरुषत्तरपदे
गोंतात्तत्पुरुषाट्टच्स्यात्समासांतोनतुतद्धितलुकि।पंचगवधनः।पंचानांगवांसमाहारः।संख्यापूर्वोद्विगुः।तद्धि
तार्थेत्यत्रोक्तःसंख्यापूर्वोद्विगुसंज्ञःस्यात्।द्विगुरेकवचनं।द्विग्वर्थःसमाहारएकवत्स्यात्।सनपुंसकमितिनपुं
सकत्वं।पंचगवं।कुत्सितानिकुत्सनैः।कुत्स्यमानानिकुत्सनैःसहप्राग्वत्।वैयाकरणखसूचिः।मीमांसक
५ ए दुर्दुरूढः।पापाणकेकुत्सितैः।पूर्वसूत्रापवादः।पापनापितः।अणककुलालः।उपमानानिसामान्यवचनैः।घनइवश्यामः। ना ४
इहपूर्वपदंतत्सदृशेलाक्षणिकमितिसूचयितुंलौकिकविग्रहेइवशब्दःप्रयुज्यते।पूर्वनिपातनियमार्थंसूत्रं।
उपमितंव्याघ्रादिभिःसामान्याप्रयोगे।उपमेयंव्याघ्रादिभिःसहप्राग्वत्साधारणधर्मस्याप्रयोगेसतिविशेष्यस्य गणेश
पूर्वनिपातनियमार्थंसूत्रं।पुरुषव्याघ्रः।नरसिंहः।व्याघ्रादिराकृतिगणः।सामान्यप्रयोगेतुकिं।पुरुषोव्याघ्रइव ।।४५।।

भ्ररः। विशेषणं विशेष्येणैव बहुलं। भेदकं समानाधिकरणेन भेद्येन बहुलं प्राग्वत्। नीलमुत्पलं नीलोत्पलं। बहुलग्रहणात् क्वचि
न्नित्यं। कृष्णसर्पः। क्वचिन्न। रामो जामदग्न्यः। एवं पूर्वापरप्रथमचरमजघन्यसमानमध्यममध्यमवीराश्च। एवं निपातं निय
मार्थमिदं। एवं वैयाकरणः। अपरोध्यापकः। अपरस्यार्द्धे पश्चभावो वक्तव्यः। अपरश्चासौ अर्द्धश्च पश्चार्द्धः। कथमेक
वीर इति। एवं कालेके ति बाधित्वा परत्वादनेन समासे वीरैक इति किं स्यात्। बाहुलकाद्भविष्यति। श्रेण्यादयः कृतादि
भिः। श्रेण्यादिषु च्व्यर्थवचनं कर्तव्यं। अश्रेणयः श्रेणयः कृताः श्रेणिकृताः। क्तेन नञ्विशिष्टेनानञ्। कृतं च तदकृतं
च कृताकृतं। शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानं। शाकप्रियः पार्थिवः शाकपार्थिवः। देवपूजको
ब्राह्मणो देवब्राह्मणः। सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः। सद्वैद्यः। महावैयाकरणः। वक्ष्यमाणेन महत आका
रः। पूज्यमानैः किं। उत्कृष्टो गोः। पंकादुद्धृत इत्यर्थः। वृन्दारकनागकुंजरैः पूज्यमानं। गोवृन्दारकः। व्याघ्रादेराकृतिग
णत्वादेव सिद्धे सामान्यप्रयोगार्थं वचनं। कतरकतमौ जातिपरिप्रश्ने। कतरकठः। कतमकलापः। गोत्रं च चरणैः सहे
ति जातित्वं। किं क्षेपे। कुत्सितो राजा किंराजा। यो न रक्षति। पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्वष्कयणी
प्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः। तत्पुरुषः समानाधिकरणः कर्मधारयः। पुंवत्कर्मधारयजातीयदेशीये
षु। कर्मधारये जातीयदेशीययोश्च परतो भाषितपुंस्कादनूङ् भावो यस्मिंस्तथाभूतं पूर्वं पुंवत्। पूरणीप्रियादिष्व
प्राप्तः पुंवद्भावोऽनेन विधीयते। महानवमी। कृष्णचतुर्दशी। महाप्रिया। तथा कोपधादेः प्रतिषिद्धः पुंवद्भावः कर्मधारया
दौ प्रतिप्रसूयते। पाचकस्त्री। दत्तभार्यः। पंचमभार्यः। स्त्रौघ्नभार्यः। सुकेशभार्यः। एवं पाचकजातीया। पाचकदेशीयेत्यादि।

इभपोटा। पोटा स्त्रीपुं[illegible]सलक्षणा। इभयुवतिः। अग्निस्तोकः। उदश्वित्कतिपयं। गृष्टिः सकृत्प्रसूता। गोगृष्टिः। धेनुर्नवप्रसू
तिका। गोधेनुः। वशा वंध्या। गोवशा। वेहत् गर्भघातिनी। गोवेहत्। बष्कयणी तरुणवत्सा। गोबष्कयणी। कठप्रवक्ता। क
ठश्रोत्रियः। कठाध्यापकः। कठधूर्तः। प्रशंसावचनैश्च। एतैः सह जातिः प्राग्वत्। गोमतल्लिका। गोमचर्चिका। गोप्रका
ण्ड। गवोद्धः। गोतल्लजः। प्रशस्ता गौरित्यर्थः। मतल्लिकादयो नियतलिंगाः। न तु विशेष्यविघ्नाः। जातिः किं। कुमारीमत
ल्लिका। युवा खलतिपलितवलिनजरतीभिः। एवं निपातनियमार्थमिदं सूत्रं। लिंगविशिष्टपरिभाषया युवतिशब्दो
पि समस्यते। युवा खलतिः युवखलतिः। युवतिः खलती युवखलती। युवजरती। युवत्यामेव जरती धर्मोपलंभेन तद्रू
पारोपात्सामानाधिकरण्यं। कृत्यतुल्याख्या अजात्या। भोज्योष्णं तुल्यश्वेतः। अजात्या किं। भोज्य ओदनः। प्रतिषेध
सामर्थ्याद्विशेषणसमासोपि न। वर्णो वर्णेन। समानाधिकरणेन सह प्राग्वत्। कृष्णसारंगः। कडाराः कर्मधारये।
कडारादयः शब्दाः कर्मधारये वा पूर्वं प्रयोज्याः। कडारजैमिनिः। जैमिनिकडारः। कुमारः श्रमणादिभिः। [illegible] कुमारी
श्रमणा कुमारश्रमणा। इह गणे श्रमणा प्रव्रजिता गर्भिणीत्यादयः स्त्रीलिंगाः पठ्यन्ते। लिंगविशिष्टपरिभाषया
एतदेवत्तापकबोध्यं। चतुष्पादो गर्भिण्या। चतुष्पाज्जाति[illegible]वाचिनो गर्भिणीशब्देन सह प्राग्वत्। गोगर्भिणी।
मयूरव्यंसकादयश्च। एते निपात्यंते। मयूरो व्यंसकः मयूरव्यंसकः। व्यंसको धूर्तः। उदक् च अवाक् च उच्चावचं। निश्चि
तं च प्रचितं च निश्चप्रचं। नास्ति किंचन यस्य स अकिंचनः। आख्यातमाख्यातेन क्रियासातत्ये। अश्नीतपिबतेत्येवं सततं
यत्राभिधीयते सा अश्नी[illegible]तपिबता। पचतभृज्जता। खादतमोदता। एहीडादयोन्यपदार्थे। एहीड इति यस्मिन्क
पि

मित्यात दहीडं। एहि वैयो गुडूरको प्रादु[illegible]स्तन्तु देहीति यस्यां क्रियायां सा गुडूरोत्सृज्ञा। गुद्धमविधमा। अस्तातसोर्थमिहपा
ठः। ज[illegible]हिकर्मणा बहुलमाभीक्ष्ण्ये कर्तरी चाभिदधाति। जहीस्तेतल्कर्मणा बहुलं समस्यते आभीक्ष्ण्ये गम्ये समासे न चैक
त३ तोभि[illegible]चीयं ह्यस्यार्थः। जहिजोडः। जहिस्तंबः। नास्ति कुतो भयं यस्य स अकुतोभयः। अन्यो राजा राजान्तरं। चिदेव चिन्मात्रं। इव
दकता। इषसिगलः। इषत्कुत्वा वचने नेति वाच्यं। इषद्रक्तं। नञ्। नञ् सुपा सह समस्यते। नलोपो नञः। नञो नस्य लोपः स्यादु
त्तरपदे। अब्राह्मणः। तस्मान्नुडचि। लुप्तनकारान्नञ उत्तरपदस्याजादेर्नुडागमः स्यात्। अनश्वः। अर्थाभावे व्ययीभावेन स
हायं विकल्प्यते। रक्षोहागमलघ्वसंदेहाः प्रयोजनमिति। अदुतायामसंहितमिति च भाष्यवार्तिकप्रयोगात्। तेनानुपलब्धि
रविवादो ऽविघ्नमित्यादि सिद्धं। नञो नलोपस्तिङि क्षेपे। अपचसि त्वं जाल्म। नैकधेत्यादौ तु नशब्देन सह सुप्सुपेति स
मासः। नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या। पादिति शात्रंतः। वृत्तद्वय सु
नतः। नसत्याः असत्याः नञसत्या नासत्याः। न मुञ्चतीति नमुचिः। नकुलमस्य। नखमस्य। न स्त्री पुमान्। स्त्रीपुंसयोः पुं
सकभावो निपातनात्। न क्षरतीति नक्षत्रं। क्षीयतेः क्षरते वी ष्ट्रन्मिति निपातनं। नक्रामतीति नक्रः। क्रमेर्डः। नञ् अकम
स्मिन्नस्तीति नाकः। नगोऽप्राणिष्वन्यतरस्यां। नगाइत्यत्र नञ् प्रकृत्या न गाः अगाः पर्वताः। अप्राणिषु किं। अगो वृषलः शी
तेन। निष्क्रीडेत्युक्तो निर्वासिस्यनुवर्तमाने। कुगतिप्रादयः। एते समर्थेन नित्यं समस्यन्ते। कुत्सितः पुरुषः कुपुरुषः। गतिश्च
त्यनुवर्तमाने। ऊर्यादिच्विडाचश्च। एते क्रियायोगे तिसंज्ञाः स्युः। ऊरीकृत्य शुक्लीकृत्य। पटपटाकृत्य। कारिकाशब्दस्योपसंख्या
नं। कारिकाक्रिया। कारिकाकृत्य। अनुकरणं चानितिपरं। खाट्कृत्य। अनितिपरं किं। खाडिति कृत्वा निरष्ठीवत्। आदरा

ग२

सि॰ स्तु॰ ॥६अ॥

नादरयोः। सदसती। सत्कृत्य। असत्कृत्य। भूषणेऽलं। अलंकृत्य। भूषणे किं। अलंकृत्वौदनं गतः। पर्याप्तमित्यर्थः। अनुकरणमि-
ति त्रिसूत्री स्वभावात्कृञ्विषया। अन्तरपरिग्रहे। अन्तर्हत्य म[illegible]ध्ये हत्वेत्यर्थः। अ[illegible]परिग्रहे किं। अन्तर्हत्वा गतः। हतं परिगृह्य
प्रादे ४ गत इत्यर्थः। कणेमनसी श्रद्धाप्रतीघाते। कणेहत्य पयः पिबति। मनोहत्य। कणेशब्दः सप्तमीप्रतिरूपको निपातोऽभिलाषातिशये
वर्तते। मनःप्यत्रैव। पुरोऽव्ययं। पुरस्कृत्य। अस्तं च। अस्तमिति मान्तमव्ययं गतिसंज्ञं स्यात्। अस्तंगत्य। अच्छगत्यर्थवदेषु। अव्य-
स्वे ५ यमित्येव। अच्छगत्य। अच्छोद्य। अभिमुखं गत्वोक्त्वा चेत्यर्थः। अव्ययं किं। जलमच्छं गच्छति। अदोऽनुपदेशे। अदःकृत्यादःकृ-
त्वा। परं प्रत्युपदेशे प्रत्युदाहरणं। तिरोऽन्तर्धौ। तिरोभूय। विभाषा कृञि। तिरस्कृत्य। तिरः कृत्वा। तिरःकृत्वा। उपाजेऽन्वाजे।
एतौ कृञि वा गतिसंज्ञौ स्तः। उपाजेकृत्य। उपाजे कृत्वा। [redacted] अन्वाजेकृत्य। अन्वाजेकृत्वा। दुर्बलस्य बलमाधा-
येत्यर्थः। साक्षात्प्रभृतीनि च। कृञि वा गतिसंज्ञा मिस्युः। च्व्यर्थ इति वक्तव्यं। साक्षात्कृत्य। साक्षात्कृत्वा। लवणंकृत्य। लवणं
कृत्वा। मान्तत्वं निपातनात्। अनत्याधान उरसिमनसी। उरसिकृत्य। उरसि कृत्वा। अभ्युपगम्येत्यर्थः। मनसिकृत्य। मन-
सि कृत्वा। निश्चित्येत्यर्थः। अत्याधानमुपश्लेषस्तत्र न। उरसि कृत्वा पाणिं शेते। मध्येपदेनिवचने च। एते कृञि वा गतिसं-
ज्ञाः स्युरनत्याधाने। मध्येकृत्य। मध्ये कृत्वा। पदेकृत्य। पदे कृत्वा। निवचनेकृत्य। निवचने कृत्वा। वाचं नियम्येत्यर्थः। नित्यं ह-
स्ते पाणावुपयमने। कृञि। उपयमनं विवाहः। स्वीकारमात्रमित्येके। हस्तेकृत्य। पाणौकृत्य। प्राध्वं बन्धने। प्राध्वमित्यव्ययं।
प्राध्वंकृत्य। बन्धनेनानुकूलं कृत्वेत्यर्थः। प्रार्थनादिना त्वानुकूल्यकरणे। प्राध्वं कृत्वा। जीविकोपनिषदावौपम्ये। जीवि-
कामिव कृत्वा जीविकाकृत्य। उपनिषदमिव कृत्वा। उपनिष[illegible]त्कृत्य। औपम्ये किं। जीविकां कृत्वा। प्रादिग्रहणमगत्यर्थं॥ गणेश ॥६७॥

सुपुरुषः॥ अत्रवार्त्तिकानि। प्रादयोगताद्यर्थे प्रथमया। प्रगतः आचार्यः प्राचार्यः। अत्यादयः क्रांताद्यर्थे द्वितीयया। अतिक्रां य॰
तो मालामतिमालः। अवादयः क्रुष्टाद्यर्थे तृतीयया। अवक्रुष्टः कोकिलया ऽवकोकिलः। पर्यादयो ग्लानाद्यर्थे चतुर्थ्या।
परिग्लानो ऽध्ययनाय पर्यध्ययनः। निरादयः क्रांताद्यर्थे पंचम्या। निष्क्रांतः कौशांब्याः निष्कौशांबिः। कर्मप्रवचनीया
नां प्रतिषेधः। वृक्षं प्रति। तत्रोपपदं सप्तमीस्थं। सप्तम्यंते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं कुंभादि तद्वाचकं पदमुपप
दसंज्ञं स्यात्। तस्मिंश्च सत्येव वक्ष्यमाणः प्रत्ययः। उपपदमतिङ्। उपपदं सुबंतं समर्थेन नित्यं समस्यते। अतिङंतश्चायं समा
सः। कुंभं करोतीति कुंभकारः। इह कुंभ अस् कार इत्यलौकिकं प्रक्रियावाक्यं। अतिङ् किं। मा भवान् भूत्। माङि लुङिति स
प्तमीनिर्देशात् माङ् उपपदं। अतिङ्ग्रहणं ज्ञापयति सुपेति तन्नेहानुवर्त्तत इति। एवं सत्र्येपि गतिग्रहणं पृथक् कृतसा
तिङ्ग्रहणं ताभ्यां पदेष्यते। सुपेति चेन्निवृत्तं तथा च गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति
सिद्धं। व्याघ्री। अश्वक्रीती कच्छपी। अमैवाव्ययेन। अमैव तुल्यविधानं यदुपपदं तदेवाव्ययेन सह समस्यते। स्वादुं
कारं। नेह। कालसमयवेलासु तुमुन्। कालः समयो वेला वा भोक्तुं। अग्रेवेति किं। अग्रेभोजं। अग्रे भुक्त्वा। विभाषाग्रेप्रथम
पूर्वेषु इति क्त्वाणमुलौ। अमाचान्येन तुल्यविधानमेतत्। तृतीयाप्रभृतीन्यन्यतरस्यां। उपदंशस्तृतीयायां। इत्युपपदान्यम
तेनाव्ययेन सह वा समस्यते। मूलकेनोपदंशं भुंक्ते मूलकोपदंशं। क्त्वा च। तृतीयाप्रभृतीन्युपपदानि क्त्वांतेन वा समस्यंते। स्य ४
उच्चैः कृत्य। उच्चैः कृत्वा। नीचैः कृत्य। नीचैः कृत्वा। अव्यये यथाभिप्रेतेति क्त्वा। तृतीयाप्रभृतीनीति किं। अलं कृत्वा। खलु कृत्वा।
तत्पुरुषस्यांगुलेः संख्याव्ययादेः। संख्याव्ययादेः अंगुल्यंतस्य तत्पुरुषस्य समासांतो ऽच् स्यात्। द्वे अंगुली प्रमाणमस्य द्व्यंगुलं।

दाः॥ निर्गतमंगुलिभ्यो निरंगुलं। अह्नः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः। एभ्यो रात्रेरच् स्यात् चात्संख्याव्ययादेः। अह
ग्रहणं द्वंद्वार्थं। अहश्च रात्रिश्च अहोरात्रः। सर्वा रात्रिः सर्वरात्रः। पूर्वं रात्रेः पूर्वरात्रः। संख्यातरात्रः। पुण्यरात्रः। द्वयो रात्र्योः
समाहारो द्विरात्रं। अतिक्रांतो रात्रिमतिरात्रः। राजाऽहःसखिभ्यष्टच्। एतदंतात्तत्पुरुषाट्टच् स्यात्। परमराजः। अति
राजो। कृष्णसखः। अह्नष्टखोरेव। टिलोपः स्यान्नान्यत्र। उत्तमाहः। द्वे अहनी भृतो द्व्यहीनः। तद्धितार्थो द्विगुः। तमधीष्ट
इत्यधिकारे द्विगोर्वेत्यनुवृत्तौ। द्व्यहः संवत्सरा चेति खः। लिंगविशिष्टपरिभाषाया अनित्यत्वान्नेह। मद्राणां राज्ञी मद्ररा
ज्ञी। अह्नोऽह्न एतेभ्यः। सर्वादिभ्यः परस्याहन्नह्न इत्यादेशः स्यात्समासांतेपरे। अह्नोऽदंतात्। अदंतपूर्वपदस्थाद्रेफात्
रस्याह्नो नस्य णः स्यात्। सर्वाह्णः। पूर्वाह्णः। संख्याताह्नः। द्वयोरह्नोर्भवो द्व्यह्नः। कालाट्ठञ्। द्विगोर्लुगनपत्ये इति ठञो
लुक्। द्व्यह्नः। स्त्रियामदंतत्वाट्टाप्। द्व्यह्ना। द्व्यह्नप्रियः। अत्यह्नः। क्षुभ्नादिषु च। एषु णत्वं न स्यात्। दीर्घाह्नी प्रावृट्।
एवं चैतदर्थमह्न इत्यदंतानुकरणं क्लेशाय न कर्तव्यं। प्रातिपदिकांतेति णत्वविकल्प क्षुभ्नादिषु पाठस्यावकाशत्वात्।
अदंतादिति तपरकरणान्नेह। परागतमहः पराहः। न संख्यादेः समाहारे। समाहारे वर्तमानस्य संख्यादेरह्नादेशो
न स्यात्। संख्या[redacted]दे इति स्पष्टार्थं। द्वयोरह्नोः समाहारो द्व्यहः। त्र्यहः। उत्तमैकाभ्यां च। आभ्यामह्नादेशो न उत्तमशब्दो न य
न्त्यार्थः पुण्यशब्दमाह। पुण्यैकाभ्यामित्येव सूत्रयितुमुचितं। पुण्याहं। एकाहः। उत्तमग्रहणमुपांत्यस्यापि ग्रहणार्थमि
त्येके। संख्याताहः। अग्राख्यायामुरसः। टच् स्यात्। अश्वानामुर इवाश्वोरसं मुख्योश्व इत्यर्थः। अनोऽश्मायःसरसां गरणेशा
जातिसंज्ञयोः। टच् स्यात्। उपानसं। अमृताश्मः। कालायसं। मंडूकसरसमिति जातिः। महानसं। अमृताश्मः। लोहितायसं। ॥४८॥

अलुसरस्समितिसंज्ञा। ग्रामकौटाभ्यां च तक्ष्णः। ग्रामस्य तक्षा ग्रामतक्षः। साधारण इत्यर्थः। कुट्यां भवः कौटः। स्वतंत्रः
सचासौ तक्षा च कौटतक्षः। अतेः शुनः। अतिश्वो वराहः। अतिश्वी सेवा। उपमानादप्राणिषु। अप्राणिविषयकोपमा
नवाचिनः शुनष्टच् स्यात्। आकर्षः श्वेवाकर्षश्वः। अप्राणिषु किं। वानरः श्वेव वानरश्वा। उत्तरमृगपूर्वाच्च सक्थ्नः।
चादुपमानात्। उत्तरसक्थं। मृगसक्थं। पूर्वसक्थं। फलकमिव सक्थि फलकसक्थं। नावो द्विगोः। नौशब्दान्ताद्द्विगो
ष्टच् स्यात्। न तु तद्धितलुकि। द्वाभ्यां नौभ्यां आगतो द्विनावरूप्यः। द्विगोर्लुगनपत्य इत्यत्राचीत्यस्यापकर्षणाद्धला
दे नलुक्। पंचनावप्रियः। द्विनावं। त्रिनावं। अतद्धितलुकीति किं। पंचभिर्नौभिः क्रीतः पंचनौः। अर्द्धाच्च। अर्द्धान्नाव
ष्टच् स्यात्। नावः अर्द्धं अर्द्धनावं। क्लीबत्वं लोकात्। खार्याः प्राचां। द्विगोरर्द्धाच्च खार्याष्टच् वा स्यात्। द्विखारं द्विखा
रि। अर्द्धखारं। अर्द्धखारी। द्वित्रिभ्यामंजलेः। टज्वा स्याद्द्विगौ। द्व्यंजलं। द्व्यंजलि। अतद्धितलुकीत्येव। द्वाभ्यामंजलि
भ्यां क्रीतः द्व्यंजलिः। ब्रह्मणो जानपदाख्यायां। ब्रह्मान्तात्तत्पुरुषाट्टच् स्यात्। समासेन जानपदत्वमाख्यायते चेत्।
सुराष्ट्रे ब्रह्मा सुराष्ट्रब्रह्मः। कुमहद्भ्यामन्यतरस्यां। आभ्यां ब्रह्मणो टच् स्यात्तत्पुरुषे। कुत्सितो ब्रह्मा कुब्रह्मः।
कुब्रह्मा। आन्महतः समानाधिकरणजातीययोः। महत आकारोन्तादेशः स्यात्समानाधिकरणे जातीये च परे।
महाब्रह्मः। महाब्रह्मा। महादेवः। महाजातीयः। समानाधिकरणे किं। महतः सेवा। महत्सेवा। लाक्षणिकं विहाय प्र
तिपदविहितः सन्महदिति समासो गृह्यते इतीह महाबाहुर्न स्यात्। तस्माल्लक्षणप्रतिपदोक्तयोः प्रतिपदोक्त
स्यैवेति परिभाषा तु नेह प्रवर्त्तते। समानाधिकरणसामर्थ्यात्। आदिति योगविभागोदात्वं। आ गेकादशभ्य इति निर्देशा

सि॰ क्त
॥४६॥

षा। एकादशा। महतीशब्दस्य पुंवत्कर्मधारयेति पुंवद्भावे कृते आत्वं। महाजातीया। महदात्वं घासकरविशिष्टेषूपसंख्या-
नं पुंवद्भावश्च। असमानाधिकरणार्थमिदं। महतो महत्या वा घासो महाघासः। महाकरः। महाविशिष्टः। अष्टनः क-
पाले हविषि। अष्टाकपालं। गवि च युक्ते। गोशब्दे परे युक्त इत्यर्थे ष्टन आत्वं वक्तव्यमित्यर्थः। अष्टागवं शकटं। अ-
ष्टग्रहस्य चावेत्यस्य आङ्गितीति योगविभागाद्बहुव्रीहावप्यत्वं। अष्टानां गवां समाहारे अष्टगवं। तत्पु[illegible]रुषत्वाट्टकटमप्याग-
वमिति वा। द्व्यष्टनः संख्यायामबहुव्रीह्य[illegible]शीत्योः। आत्स्यात्। द्वौ च दश च द्वादश। अधिकादशेति वा। द्वाविंशतिः।
अष्टादश। अष्टाविंशतिः। अबहुव्रीह्यशीत्योः किं। द्वित्राः। द्व्यशीतिः। प्राक्शताद्वक्तव्यं नेह। द्विशतं। द्विसहस्रं। त्रेस्त्रयः।
त्रिशब्दस्य त्रयस्स्यात्पूर्वविषये। त्रयोविंशतिः। बहुव्रीहौ तु। त्रिदशास्त्रिदशाः। सुजर्थे बहुव्रीहिः। अशीतौ तु त्र्यशीतिः। प्राक्
शतादित्येव। त्रिशतं। त्रिसहस्रं। विभाषा चत्वारिंशत्प्रभृ[illegible]तौ सर्वेषां। द्व्यष्टनोस्त्रेश्च प्रागुक्तं वा स्याच्चत्वारिंशदादौ परे।
द्वाचत्वारिंशत्। द्विचत्वारिंशत्। अष्टाचत्वारिंशत्। अष्टचत्वारिंशत्। त्रयश्चत्वारिंशत्॥ [illegible]चत्वारिंशत्। त्रिचत्वारि-
शत्। एवं पंचाशत्प्रभृतिसप्ततिनवतिषु। एकादिश्चैकस्य चादुक्। एकादिर्नञ् प्रकृत्या स्यादेक[illegible]स्य चादुगागम-
श्च। नञो विंशत्या समासे कृते एकश[illegible]ब्देन सह तृतीयेति योगविभागात्समासः। अनुनासिकविकल्पः। एकेनन
विंशतिः एकान्नविंशतिः। एकाद्नविंशतिः। एकोनविंशतिरित्यर्थः। षष उत्वं दतृदशधासूत्तरपदादेः ष्टुत्वं च धासु वे-
ति वाच्यं। षोडन्। षोडश। षोढा षड्धा। परवल्लिंगं द्वन्द्वतत्पुरुषयोः। एतयोः परपदस्येव लिंगं स्यात्। कुक्कुटमयूर्यौ
इमे। मयूरीकुक्कुटाविमौ। अर्द्धं पिप्पली। द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः। पंचसु कपालेषु

गणेशा
॥४६॥

संस्कृतः पंचकपालः पुरोडाशः। प्राप्तोजीविकां प्राप्तजीविकः। अलं कुमार्यै अलंकुमारिः। अत एव ज्ञापकात्समासः। निष्कौशां-
बिः। पूर्ववदश्ववडवौ। द्विवचनमतंत्रं। अश्ववडवौ। अश्ववडवान्। अश्ववडवैः। रात्राह्नाहाः पुंसि। एतदंतौ द्वंद्वतत्पुरुषौ पुं-
स्येव। अनंतरत्वात्परवल्लिंगतापवादोऽप्ययं परत्वात्समाहारनपुंसकतां बाधते। अहोरात्रः। रात्रेः पूर्वभागः पूर्वरात्रः। पूर्वाह्णः।
व्यहः। संख्यापूर्वं रात्रं क्लीबं। द्विरात्रं। त्रिरात्रं। गणरात्रं। अपथं नपुंसकं। तत्पुरुष इत्येव। अन्यत्र तु अपथो देशः। कृतसमा-
२५ सांतनिर्देशान्नेह। अपथाः। अर्द्धर्चाः पुंसि। अर्द्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः। अर्द्धर्चः। अर्द्धर्चं। ध्वजः। ध्वजं। एवं
तीर्थशरीरमंडपयूषदेहांकुशकुलिशाइत्यादि। जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यां। एकोप्यर्थो वा ब-
हुवद्भवति। ब्राह्मणाः पूज्याः। ब्राह्मणः पूज्यः। अस्मदो द्वयोश्च। एकत्वे द्वित्वे च विवक्षिते अस्मदो बहुवचनं वा स्यात्। व-
यं ब्रूमः। पक्षे अहं ब्रवीमि। आवां ब्रूव इति वा। सविशेषणस्य प्रतिषेधः। पटुरहं ब्रवीमि। फल्गुनीप्रोष्ठपदानां च नक्ष-
त्रे। द्वित्वे बहुत्वप्रयुक्तं कार्यं वा स्यात्। पूर्वे फल्गुन्यौ। पूर्वाः फल्गुन्यः। पूर्वे प्रोष्ठपदे। पूर्वाः प्रोष्ठपदाः। नक्षत्रे किं।
फल्गुन्यौ माणविके। तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वे बहुवचनस्य द्विवचनं नित्यं। बहुत्वं द्वित्ववद्भवति। तिष्यश्च पुनर्वसू च
तिष्यपुनर्वसू। तिष्येति किं। विशाखानुराधाः। नक्षत्रेति किं। तिष्यपुनर्वसवो माणवकाः। स नपुंसकं। समाहारे द्विगुर्द्वं-
द्वश्च नपुंसकं स्यात्। परवल्लिंगापवादः। पंचगवं। दंतोष्ठं। अकारांतोत्तरपदो द्विगुः स्त्रियामिष्टः। पंचमूली। आबंतो वा।
पंचखट्वं। पंचखट्वी। अनो नलोपश्च वा च द्विगुः स्त्रियां। पंचतक्षं। पंचतक्षी। पात्राद्यंतस्य न। पंचपात्रं। त्रिभुवनं। चतुर्यु-
गं। पुण्यसुदिनाभ्यामह्नः क्लीबतेष्टा। पुण्याहं। सुदिनाहं। सुदिनशब्दोऽत्र प्रशस्तवाची। पथः संख्याव्ययादेः॥

सि॰ सु॰
॥५०॥

संख्याव्ययपत्पादेः परः कृतसमासांतः पुंथशब्दः क्लीबमित्यर्थः। त्रयाणां पंथा त्रिपथं। विरूपः पंथाः विपथं। कृतसमासांतग्रह
णान्नेह। सुपंथाः। अतिपंथाः। सामान्ये नपुंसकं। मृदु पचति। प्रातः कमनीयं। तत्पुरुषो नञ्कर्मधारयः। अधिकारोयं। सं
ज्ञायां कंथोशीनरेषु। कंथांतस्तत्पुरुषः क्लीबं स्यात्सा चेदुशीनरदेशोत्पन्नायाः कंथायाः संज्ञा। सुशमस्यापत्यानि सौश
मयः तेषां कंथा सौशमिकंथं। संज्ञायां किं। वीरणकंथा। उशीनरेषु किं। दाक्षिकंथा। उपज्ञोपक्रमं तदाद्याचिख्या
सायां। उपज्ञांतउपक्रमांतश्च तत्पुरुषो नपुंसके स्यात् तयोरुपज्ञायमानोपक्रम्यमाणयोरादिः प्राथम्यं चेदाख्या
तुमिष्यते। पाणिनेरुपज्ञा पाणिन्युपज्ञं ग्रंथः। नंदोपक्रमं द्रोणः। छाया बाहुल्ये। छायांतस्तत्पुरुषो नपुंसकं स्यात् सं
वपदार्थबाहुल्ये। इक्षूणां छाया इक्षुच्छायं। विभाषासेनेति विकल्पस्यापवादः। इक्षुच्छायानिषादिन्य इति तु आ
समंतान्निषादि न्य इत्याङ् प्रश्लेषो बोध्यः। सभा राजाऽमनुष्यपूर्वा। राजपर्यायपूर्वोऽमनुष्यपूर्वश्च सभांतस्तत्पुरुषः क्लीबं
स्यात्। इनसभं। ईश्वरसभं। पर्यायस्यैवेष्यते। नेह। राजसभा। चंद्रगुप्तसभा। अमनुष्यशब्दो रूढ्या रक्षःपिशाचादीना
ह। रक्षःसभं। पिशाचसभं। अशाला च। संघातार्थसभांतस्तत्पुरुषः क्लीबं स्यात्। स्त्रीसभं। स्त्रीसंघ इत्यर्थः। अशा श्रीपतय
ला किं। धर्मसभा। धर्मशालेत्यर्थः। विभाषा सेनासुराच्छायाशालानिशानां। एतदंतस्तत्पुरुषः क्लीबं स्याद्वा। ब्रा
ह्मणसेनं। ब्राह्मणसेना। यवसुरं। यवसुरा। कुड्यच्छायं। कुड्यच्छाया। गोशालं। गोशाला। श्वनिशं। श्वनिशा।
ते तत्पुरुषो नञ्कर्मधारय इत्यनुवृत्तेर्नेह। दृढसेनो राजा। असेना। परमसेना॥ इति तत्पुरुषः॥ छ॥ शेषो बहुव्री ग॰ ला॰ श॰
हिः। अधिकारोयं। द्वितीयाश्रितेत्यादिना यस्य त्रिकस्य विशिष्य समासो नोक्तः स शेषः प्रथमांतमित्यर्थः। ॥५०॥

अनेकमन्यपदार्थे। अनेकं प्रथमान्तमन्यपदार्थे वर्तमानं वा समस्यते स बहुव्रीहिः। अप्रथमाविभक्त्यर्थे बहुव्रीहिरिति समाना
धिकरणानामिति च फलितं। प्राप्तमुदकं यं प्राप्तोदको ग्रामः। ऊढरथोनड्वान्। उपहृतपशू रुद्रः। उद्धृतौदना स्थाली। पीतां
बरो हरिः। वीरपुरुषको ग्रामः। प्रथमार्थे तु न। वृष्टे देवे गतः। व्यधिकरणानामपि न। पंचभिर्भुक्तमस्य। प्रादिभ्यो धातुजस्य वा
च्यो वा चोत्तरपदलोपः। प्रपतितपर्णः प्रपर्णः। नञोस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः। अविद्यमानपुत्रः अपुत्रः। अस्तीति विभक्ति
प्रतिरूपकमव्ययं। अस्तिक्षीरा गौः। स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु। भा
षितपुंस्कादनूङ् ऊङोभावोस्यामिति बहुव्रीहिर्निपातनात् पंचम्या अलुक् षष्ठ्याश्चालुक्। तुल्ये प्रवृत्तिनिमित्ते यदु
क्तपुंस्कं तस्मात्पर ऊङभावो यत्र तथाभूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं स्यात्समानाधिकरणे स्त्रीलि
ङ्गे उत्तरपदे न तु पूरण्यां प्रियादौ च परतः। गोस्त्रियोरिति ह्रस्वः। चित्रा गावो यस्येति लौकिकविग्रहे चित्रा अस् गो अ
स् इत्यलौकिके विग्रहे चित्रगुः। जरती चित्रा गुर्वी। एवं दीर्घा तन्वीजंघः। तन्वीदीर्घाजंघः। त्रिपदे बहुव्रीहौ प्रथमं
न पुंवत्। उत्तरपदस्य मध्यमेन व्यवधानात्। द्वितीयमपि न पुंवत्। पूर्वपदत्वाभावात्। उत्तरपदशब्दो हि समास
स्य चरमावयवे रूढः। पूर्वपदशब्दस्तु प्रथमावयवे इति वदंति। वस्तुतस्तु नेह पूर्वपदमाक्षिप्यते। आनङृत
इ सूत्रे यथा। तेन तु पांसस्य पुंवदेव। चित्राजरद्गुरित्यादि। अत एव चित्राजरत्यो गावो यस्येति द्वंद्वगर्भेपि चित्राजर
द्गुरिति भाष्यं। कर्मधारयपूर्वपदे तु द्वयोरपि पुंवत्। जरच्चित्रगुः। कर्मधारयोत्तरपदे तु चित्रजरद्गवीकः। स्त्रियाः किं।
ग्रामणिकुलं दृष्टिरस्य ग्रामणिदृष्टिः। भाषितपुंस्कात् किं। गंगाभार्यः। अनूङ् किं। वामोरूभार्यः। समानाधिकरणे किं।
४ रूपवद्भार्यः। चित्राजरतीगोर्यस्येति विग्रहे अनेकोक्तेर्बहूनां बहुव्रीहिः। अत्र केचित्। चित्राजरतीगुः। ६

कल्याण्या माता कल्याणीमाता। स्त्रियां किं। कल्याणी प्रधानमस्य स कल्याणीप्रधानः। पूरण्यां तु। अप्पूरणीप्रमा
ण्योः। पूरणार्थप्रत्ययांतं यत्स्त्रीलिंगं तदंतात् प्रमाण्यंताच्च बहुव्रीहेरप् स्यात्। कल्याणी पंचमी यासां रात्रीणां
ताः कल्याणीपंचमा रात्रयः। स्त्री प्रमाणी यस्य स स्त्रीप्रमाणः। पुंवद्भावनिषेधोऽप्प्रत्ययश्च प्रधानपूरण्यामेव।
रात्रिः पूरणी वाच्येसु कोदाहरणमुख्या। अन्यत्र तु। न पूतमञ्च। न घुतरप दाद्यंतौ नैरपदाद्यबहुव्रीहेः कप् स्यात्।
पुंवद्भावः। केणः। के परे णो ह्रस्वः स्यात्। इति प्राप्ते। नेकपि। कपि परे ह्रस्वो न। कल्याणीपंचमीकः पक्षः। अत्र तिथी हि
तावयवत्वेनेदस्य पक्षस्यान्यपदार्थत्वया रात्रिरप्रधानं बहुकनीकः। अप्रियादिषु किं। कल्याणीप्रियः। प्रिया मनो
ज्ञा। कल्याणी। सुभगा। दुर्भगा। भक्तिः। सचिवा। स्वसा। कांता। क्षांता। समा। चपला। दुहिता। वामा। अबला। तनया।
सामान्येन नपुंसकं। दृढंभक्तिर्यस्य दृढभक्तिः। स्त्रीत्वविवक्षायां तु दृढाभक्तिः। तसिलादिष्वाकृत्वसुचः। तसिलादि
षु कृत्वसुजंतेषु परेषु स्त्रियाः पुंवत्स्यात्। परिगणनं कर्त्तव्यं। अव्याप्यतिव्याप्तिपरिहाराय। त्रतसौ। तरप्तमपौ।
चरट्। जातीयरौ। कल्पप्देशीयरौ। रूपप्पाशपौ। थाल्। तिलुथ्यनौ। बह्वीषु बहुत्र। बहुतः। दर्शनीयतरा। दर्शनीय
तमा। घरूपेति वक्ष्यमाणेन ह्रस्वः। परत्वात्पुंवद्भावो बाध्यते। पट्वितरा। पट्वितमा। पटुचरी। पटुजातीया। दर्शनीयक
ल्पा। दर्शनीयदेशीया। दर्शनीयरूपा। दर्शनीयपाशा। बहुधा। प्रशस्तायां रवीत्यवृत्कृतिः। अजाभ्यो हिता अजथ्या।
शालिबहुल्यार्थस्य पुंवद्भावो वक्तव्यः। बह्वीभ्यो देहि बहुशः। अल्पशः। त्वतलोर्गुणवचनस्य। शुक्लाया भावः गतोश
शुक्लत्वं शुक्लता। गुणवचनस्य किं। कर्त्र्याः भावः कर्त्रीत्वं। शरदः कृता धनसा दोतु सामान्ये नपुंसकं। भस्या ॥५२॥

हेतुकृतो। हस्तिनीनां समूहो हास्तिकं। अढे किं। रोहिणेयः। स्त्रीभ्यो ढगिति ढो ऽत्र गृह्यते। आग्नेये ढगिति तु पुंवदेव। आग्नायी
देवतास्य स्थालीपाकस्याग्नेयः। सपत्नीशब्दस्त्रिधा। शत्रुपर्यायात् सपत्नशब्दात् ङीप्। शार्ङ्गरवादित्वात् ङीनिति एकः।
समानः पतिर्यस्या इति विग्रहे नित्यं सपत्न्यादिषु इति सपत्नीति स्त्रीलिङ्गो द्वितीयः। स्वामिपर्यायपतिशब्देन भाषितपुं
स्कस्तृतीयः। आद्ययोर्द्वयोर्ग्रहणं। सपत्न्या अपत्यस्य सापत्नेः। तृतीयान्तु लिङ्गविशिष्टपरिभाषयापस्मुतरपदलक्षणएव ए
वानत्वं। शिवादेरुद्धरणात्। सापत्नः। ठक्छसोश्च। भवत्याश्छात्रा भावत्काः। भवदीयाः। एतद्वार्तिकमेकत
द्धितइति सूत्रं च न कर्तव्यं। सर्वनाम्नो वृत्तिमात्रे इति भाष्यकारेष्ट्या गतार्थत्वात्। सर्वमयः। सर्वकाम्यति। सर्विका भार्या यस्य
सर्वकभार्यः। सर्वप्रिय इत्यादि। पूर्वस्येवेदं न स्त्रीपाठ इति लिङ्गात्। तेनाकविश्कशेषवृत्तौ चन। सर्विका। सर्वाः। कुक्कुट्यादी
नामण्डादिषु। कुक्कुट्या अण्डं कुक्कुटाण्डं। मृग्याः पदं मृगपदं। मृगक्षीरं। काकशावः। क्यङ्मानिनोश्च। एतयोः परतः पुंवत्।
एनीवाचरति एतायते। श्येनीवाचरति श्येतायते। स्वभिन्नां कांचिद्दर्शनीयां मन्यते दर्शनीयमानिनी। दर्शनीयां स्त्रियं
मन्यते दर्शनीयमानी चैत्रः। न कोपधायाः। कोपधायाः स्त्रिया न पुंवत्। पाचिकाभार्यः। रसिकाभार्यः। मद्रिकायते।
मद्रिकामानिनी। कोपधप्रतिषेधे तद्धितवुग्रहणं नेह। पाकाभार्या यस्य सपाकभार्यः। संज्ञापूरण्योश्च। अनयो
र्न पुंवत्। दत्ताभार्यः। दत्तामानिनी। दानक्रियानिमित्तः स्त्रियां पुंसि च संज्ञाभूतो ऽयमिति भाषितपुंस्कत्वमस्ति। पञ्च
मीपाशा। वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे। वृद्धिशब्देन विहिता या वृद्धिस्तद्धेतुर्यस्तद्धितः तदन्तारक्तवि
कारार्थस्तदन्ता स्त्री न पुंवत्। स्रौघ्नीभार्यः। माथुरीयते। माथुरीमानिनी। वृद्धिनिमित्तस्य किं। मध्यमभार्यः।

सि॰कु॰
॥५२॥

तद्धितस्य किं। कांडलावभार्यः। वृद्धिशब्देन किं। लावभार्यः। काषायीकंथा यस्य स काषायकंथः। विकारे तु। हैमी मुद्रिका
यस्य स हैममुद्रिकः। वृद्धिशब्देन वृद्धिप्रतिफलोपधानाऽभावादिह पुंवत्। वैयाकरणभार्यः। सौवश्वभार्यः। स्वांगा
च्चेतः। स्वांगाद्या ईकारस्तदंता स्त्री न पुंवत्। सुकेशीभार्यः। स्वांगात् किं। पटुभार्यः। ईतः किं। अकेशभार्यः। अमानिनी
ति वक्तव्यं। सुकेशमानी। सुकेशमानिनी। जातेश्च। जातेः परो यः प्रत्ययस्तदंतं न पुंवत्। शूद्राभार्यः। ब्राह्मणीभार्यः।
सौत्रस्यैवायं निषेधः। तेनु हस्तिनीनां समूहो हास्तिकं। भस्याढे इति भवत्येव। संख्ययाऽव्ययासन्नादूराधिकसं
ख्याः संख्येये। संख्येयार्थया संख्ययाऽव्ययादयः समस्यंते स बहुव्रीहिः। दशानां समीपे ये संति ते उपदशाः। नव एका
दश वेत्यर्थः। बहुव्रीहौ संख्येये डजिति वक्ष्यमाणो डच्। ति विंशतेर्डिति। विंशतेर्भस्य तिशब्दस्य लोपः स्यात् डिति। आसन्न
विंशाः। विंशतेरासन्ना इत्यर्थः। अदूरत्रिंशाः। अधिकचत्वारिंशाः। द्वौ त्रयो वा द्वित्राः। द्विरावृत्ता दश द्विदशाः। वि
शतिरित्यर्थः। दिङ्नामान्यंतराले। दिशो नामान्यंतराले वाच्ये प्राग्वत्। दक्षिणस्याः पूर्वस्याश्च दिशोंतरालं द
क्षिणपूर्वा। नामग्रहणाद्यौगिकानां न। ऐंद्र्याश्च कौवेर्याश्चांतरालं। तत्र तेनेदमिति सरूपे। सप्तम्यंते ग्रहणविष
ये सरूपे पदे तृतीयांते च प्रहरणविषये इदं युद्धं प्रवृत्तमित्यर्थे समस्येते कर्मव्यतिहारे स बहुव्रीहिः। इति शब्दाद
यं विषयविशेषो लभ्यते। अन्येषामपि दृश्यते इति दीर्घः इत्यनुवर्तते। इति कर्मव्यतिहारबहुव्रीहौ पूर्वपदांतस्य दीर्घः। इच्
समासांतो वक्ष्यते। तिष्ठद्गुप्रभृतिषु च प्रसंगस्य पाठादव्ययीभावत्वमव्ययत्वं च। केशेषु केशेषु गृहीत्वा इदं युद्धं गणेश
प्रवृत्तं केशाकेशि। दंडैश्च दंडैश्च प्रहृत्येदं युद्धं प्रवृत्तं दंडादंडि। मुष्टीमुष्टि। ओर्गुणः। उवर्णांतस्य भस्य गुणः स्या ॥५२॥

तद्धिते। अत्र वादेशः बाहुबाहवि। ओरोदिति वक्तव्ये गुणोक्तिः संज्ञापूर्वको विधिरनित्य इति ज्ञापयितुं। तेन स्वायंभुव इत्यादि सिद्धं। स
रूपे किं। हलेन मुसलेन। तेन सहेति तुल्ययोगे। तुल्ययोगे वर्त्तमानं सहेत्येतत्तृतीयांतेन सह प्राग्वत्। वोपसर्जनस्य। बहुव्रीह्यवयव न२
स्य सहस्य सः स्याद्वा। पुत्रेण सह सपुत्रः। सहपुत्रो वा गतः। तुल्ययोगवचनं प्रायिकं। सकर्मकः। सलोमकः। प्रकृत्याशिषि। सहश
ब्दः प्रकृत्या स्यादाशिषि। स्वस्ति राज्ञे सहपुत्राय सहामात्याय। अगोवत्सहलेष्विति वाच्यं। सगवे सवत्साय सहलाय। ब
हुव्रीहौ संख्येये डजबहुगणात्। संख्येये यो बहुव्रीहिस्तस्मात् डच् स्यात्। उपदशाः। अबहुगणात् किं। उपबहवः। उपग
णाः। अत्र स्वरे विशेषः। संख्यायास्तत्पुरुषस्य वाच्यः। निर्गतानि त्रिंशतो निस्त्रिंशानि वर्षाणि चैत्रस्य। निर्गतस्त्रिंश
तोंगुलिभ्यो निस्त्रिंशः खड्गः। बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात् षच्। व्यत्ययेन षष्ठी। स्वांगवाचिसक्थ्यक्ष्यंतात् बहुव्रीहेः
षच् स्यात्। दीर्घे सक्थिनी यस्य स दीर्घसक्थः। जलजाक्षी। स्वांगात् किं। दीर्घसक्थि शकटं। स्थूलाक्षा वेणुयष्टिः।
अक्ष्णोऽदर्शनादित्यच्। अंगुलेर्दारुणि। अंगुल्यंतात् बहुव्रीहेः षच् स्याद्दारुण्यर्थे। पंचांगुलयो यस्य तत् पंचांगुलं दा
रु। अंगुलीसदृशावयवं धान्यादिविक्षेपकं काष्ठमुच्यते। बहुव्रीहेः किं। द्वे अंगुली प्रमाणमस्य द्व्यंगुला यष्टिः। तद्धितार्थे
ति तत्पुरुषे तत्पुरुषस्यांगुलेरित्यच्। दारुणि किं। पंचांगुलिर्हस्तः। द्वित्रिभ्यां ष मूर्द्ध्नः। आभ्यां मूर्द्ध्नः षः स्याद्बहुव्रीहौ।
द्विमूर्द्धः। त्रिमूर्द्धः। नेतुर्नक्षत्रे अप् एव वक्तव्यः। मृगो नेता यासां ता मृगनेत्राः रात्रयः। पुष्यनेत्राः। अंतर्बहिर्भ्यां च लोम्नः। आ
भ्यां लोम्नोऽप् स्यात् बहुव्रीहौ। अंतर्लोमः। बहिर्लोमः। अन्नासिकायाः संज्ञायां नसं चास्थूलात्। नासिकांताद्बहुव्रीहे
रच् स्यात् नासिकाशब्दश्च नसं प्राप्नोति न तु स्थूलपूर्वात्। पूर्वपदात्संज्ञायामगः। पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्या[त्] स्प१

संज्ञायां नुगकारस्य च धाने। द्रुघ्विनासिकायस्य द्रुघ्णसः। अग्रः किं। ऋचामयनं ऋगयनं। अण्गयनादिभ्य इति निपा-
तनात् णत्वाभावमाश्रित्य अग्र इति प्रत्याख्यातं भाष्ये। अस्थूलः। किं। स्थूलनासिकः। खुरखराभ्यां वा नस्। खुरणाः। ख-
रणाः। पक्षे अजपीष्यते। खुरणसः। खरणसः। उपसर्गाच्च। प्रादेर्यो नासिकाशब्दः तदन्ताद्बहुव्रीहेरच् नासिकायान-
सादेशश्च। असंज्ञार्थं वचनं। उन्नता नासिका अस्य उन्नसः। उपसर्गादनोत्परः इति सूत्रं न इदं त्वका भाष्यकार आह। उप-
सर्गाद्बहुलं। उपसर्गस्थान्निमित्तात्परस्य नसो नस्य णः स्याद्बहुलं। प्रणसः। वैग्रीवकष्यः। विगता नासिकायस्य विग्रः।
ख्यश्च। विख्यः। कथं तर्हि विनसा हतबान्धवेति भट्टिः। विगतया नासिकयोपलक्षितेति व्याख्येयं। सुप्रातसुश्वसुदि-
वशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः। एते बहुव्रीहौ अच्प्रत्ययान्ता निपात्यन्ते। शोभनं प्रातरस्य सुप्रातः। शो-
भनं श्वोऽस्य सुश्वः। शोभनं दिवाऽस्य सुदिवः। शारेरिव कुक्षिरस्य शारिकुक्षः। चतस्रोऽश्रयोऽस्य चतुरश्रः। एण्या
इव पादावस्य एणीपदः। अजपदः। प्रोष्ठो गौः तस्येव पादावस्य प्रोष्ठपदः। नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्यां।
अच् स्यात्। अहलः। अहलिः। असक्थः। असक्थिः। एवं दुःसुभ्यां। शक्त्योरिति पाठान्तरं। अशक्तः। अशक्तिः। नित्यम-
सिच् प्रजामेधयोः। नञ्दुःसुभ्य इत्येव। अप्रजाः। दुष्प्रजाः। सुप्रजाः। अमेधाः। दुर्मेधाः। धर्मादनिच् केवलात्। केवला-
त्पूर्वपदात्परो यो धर्मशब्दस्तदन्ताद्बहुव्रीहेरनिच् स्यात्। कल्याणधर्मा। केवलात् किं। परमः स्वो धर्मो यस्येति त्रिपदे बहु-
व्रीहौ माभूत्। स च शब्दो हि इह न केवलं पूर्वपदं किं तु मध्यमत्वादपेक्षितं। संदिग्धसाध्यधर्मेत्यादौ तु कर्मधारयपू- गणेश
र्वपदो बहुव्रीहिः। एवं तु परमस्वधर्मेत्यपि साध्वेव। निवृत्तिधर्मा अनुवृत्तिधर्मेत्यादिवत्। पूर्वपदं बहुव्रीहिणा क्षिप्य ॥५३॥

तो। जंभा स्य हरितत्तृणसोमेभ्यः। जंभेति कृ समासांतं अनिजंतं निपात्यते। जंभो भक्ष्ये दंते च। शोभनो जंभोऽस्य सुजंभा। तृणं भ- + हरितजंभाः
क्ष्यं यस्य तृणजंभा। एवं सोमजंभा। स्वादिभ्यः किं। पतितजंभः। दक्षिणेर्मा लुब्धयोगे। दक्षिणे ईर्म
व्रणं यस्य दक्षिणेर्मा मृगः। व्याधेन कृतव्रण इत्यर्थः। इच् कर्मव्यतिहारे। कर्मव्यतिहारे यो बहुव्रीहिस्तस्मादिच् स्या-
त्समासांतः। केशाकेशि। मुसलामुसलि। द्विदंड्यादिभ्यश्च। तादर्थ्ये चतुर्थ्येषा। एषां लिप्यर्थे इच् प्रत्ययः स्यात्। द्विद-
[redacted] यस्मिन्प्रहरणे तद् द्विदंडि। द्विमुसलि। उभाहस्ति। उभयाहस्ति। प्रसंभ्यां जानुनोर्ज्ञुः। आभ्यां परयोः जानुशब्द-
योर्ज्ञुरादेशः स्यात् बहुव्रीहौ। प्रगते जानुनी अस्य प्रज्ञुः। संज्ञुः। ऊर्ध्वाद्विभाषा। ऊर्ध्वज्ञुः। ऊर्ध्वजानुः। धनुषश्च। धनुरंतस्य
बहुव्रीहेरनङादेशः स्यात्। शार्ङ्गधन्वा। वा संज्ञायां। शतधन्वा। शतधनुः। जायाया निङ्। जायांतस्य बहुव्रीहेर्निङा-
देशः स्यात्। लोपो व्योर्वलि। वकारस्य कारयोर्लोपः स्याद्वलि। पुंवद्भावः। युवतिर्जाया यस्य युवजानिः। गंधस्येदुत्पूतिसु-
सुरभिभ्यः। एभ्यो गंधस्य इकारोंऽतादेशः स्यात्। उद्गंधिः। पूतिगंधिः। सुगंधिः। सुरभिगंधिः। गंधस्यत्वे तदेकांतग्रहणं
एकांतमेकदेश एव। अविभागेन लक्ष्यमाण इत्यर्थः। सुगंधि पुष्पं। सलिलं च। सुगंधिर्वायुः। नेह। शोभना गंधाः द्र-
व्याण्यस्य सुगंध आपणिकः। अल्पाख्यायां। सूपस्य गंधो लेशो यस्मिन् तत् सूपगंधि भोजनं। घृतगंधि। गंधो गंधक आ-
मोदे लेशे संबंधगर्वयोरिति विश्वः। उपमानाच्च। पद्मस्येव गंधोऽस्य पद्मगंधिः। पादस्य लोपोऽहस्त्यादिभ्यः। हस्त्यादिव-
र्जितादुपमानात्परस्य पादशब्दस्य लोपः स्याद्बहुव्रीहौ। स्खा निह्वारेण यं समासांतः। व्याघ्रस्येव पादावस्य व्याघ्रपा-
त्। अहस्त्यादिभ्यः किं। हस्तिपादः। कुसूलपादः। कुंभपदीषु च। कुंभपद्यादिषु पादस्य लोपो ङीप् च निपात्यते स्त्रियां। पा

भर

सि॰ सु॰ दः पत्। कुंभपदी॥ स्त्रियां किं। कुंभपादः॥ संख्यासुपूर्वस्य। पादस्य लोपः स्यात्समासांते बहुव्रीहौ। द्विपात्। सुपात्॥ वयसि
॥५४॥ दंतस्य दतृ। संख्यासुपूर्वस्य दंतस्य दतृ इत्यादेशः स्याद्वयसि। द्विदन्। चतुर्दन्। षड्दन्॥ अस्य षोडन्। सुदन्। सुदती॥ व
यसि किं। द्विदंतः करी। सुदंतः॥ स्त्रियां संज्ञायां। दंतस्य दतृ स्यात्समासांते बहुव्रीहौ। अयोदती। फालदती। संज्ञायां
किं। समदंती॥ विभाषा श्यावारोकाभ्यां। दंतस्य दतृ स्याद्बहुव्रीहौ। श्यावदन्। श्यावदंतः। अरोकदन्। अरोकदंतः॥ अ
ग्रांतशुद्धशुभ्रवृषवराहेभ्यश्च। एभ्यो दंतस्य दतृ वा। कुड्मलाग्रदन्। कुड्मलाग्रदंतः॥ ककुदस्यावस्थायां लोपः॥
अजातककुत्। पूर्णककुत्॥ त्रिककुत्पर्वते॥ त्रीणि ककुदान्यस्य त्रिककुत्। संज्ञैषा पर्वतविशेषस्य। त्रिककुदो
न्यः॥ उद्विभ्यां काकुदस्य। लोपः। उत्काकुत्। विकाकुत्। तालु॥ पूर्णाद्विभाषा॥ पूर्णकाकुत्। पूर्णकाकुदः॥ सुहृद्दुर्हृदौ
मित्रामित्रयोः॥ सुदुर्भ्यां हृदयस्य हृद्भावो निपात्यते। सुहृन्मित्रं। दुर्हृदमित्रः। अन्यत्र तु सुहृदयः। दुर्हृदयः॥ उरःप्रभृ
तिभ्यः कप्। व्यूढोरस्कः। प्रियसर्पिष्कः। इह पुमान्। अनड्वान्। पयः। नौः। लक्ष्मीरिति एकवचनांतानि पठ्यंते। द्विवचनबहु
वचनांतेभ्यस्तु शेषाद्विभाषेति विकल्पेन कप्। द्विपुमान्। द्विपुंस्कः॥ अर्थान्नञः। अनर्थकः। नञः किं। अपार्थं। अपार्थकं॥
इनः स्त्रियां। बहुदंडिका नगरी॥ अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदंतविधिं प्रयोजयंति। बहुवाग्मिका। स्त्रियां
किं। बहुदंडी। बहुदंडिको ग्रामः॥ शेषाद्विभाषा। अनुक्तसमासांताच्छेषाधिकारस्थबहुव्रीहेः कब्वा स्यात्। महायश
स्कः। महायशाः। अनुक्तसमासादिति किं। व्याघ्रपात्। सुगंधिः॥ प्रियपथः। शेषाधिकारस्थात्किं। उपबहवः। उत्तरपूर्वा। सपुत्रः॥ गलेशा
शेष१ तंत्रादिनां शब्दोऽर्थद्वयपरः॥ आपोऽन्यतरस्यां। कपि आबंतस्य ह्रस्वो वा स्यात्। बहुमालाकः। बहुमालकः। कबभा ॥५४॥

वेबहुमालः ॥ नसंज्ञायां ॥ शेषादितिप्राप्तः कप् न स्यात्संज्ञायां । विश्वे देवा अस्य विश्वदेवः ॥ ईयसश्च ॥ ईयसंतोत्तरपदान्नकप् ।
बहवः श्रेयांसोऽस्य बहुश्रेयान् । गोस्त्रियोरिति ह्रस्वप्राप्ते । ईयसो बहुव्रीहेर्नेति वाच्यं । बह्व्यः श्रेयस्योऽस्य बहुश्रेयसी ।
बहुव्रीहेः किं । अतिश्रेयसिः ॥ वंदिते भ्रातुः ॥ पूजितेर्थे यो भ्रातृशब्दस्तदंतान्न कप् स्यात् । प्रशस्तो भ्राता यस्य प्रशस्तभ्रा
ता । नपूजनादिति निषेधस्तु बहुव्रीहौ सक्थ्यक्ष्णोरित्यतः प्रागेवेति वक्ष्यते । वंदिते किं । मूर्खभ्रातृकः ॥ नाडीतंत्र्योः स्वां
गे ॥ स्वांगे यौ नाडीतंत्रीशब्दौ तदंतात्कप् न स्यात् । बहुनाडिः कायः । बहुतंत्री ग्रीवा । तंत्रीर्धमनी । स्त्रीप्रत्ययांतत्वाभा
वात् ह्रस्वो न । स्वांगे किं । बहुनाडीकः स्तंभः । बहुतंत्रीका वीणा । निष्प्रवाणिश्च ॥ कबभावोऽत्र निपात्यते । प्रपूर्वाद्व
यतेर्ल्युट् । प्रवाणी तंतुवायशलाका । निर्गता प्रवाणी अस्य निष्प्रवाणिः पटः ॥ समाप्तवानः नव इत्यर्थः ॥ सप्तमी
विशेषणे बहुव्रीहौ ॥ सप्तम्यंतं विशेषणं च पूर्वं प्रयोज्यं । कंठेकालः ॥ अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्री
हिः ॥ चित्रगुः ॥ सर्वनामसंख्ययोरुपसंख्यानं ॥ सर्वश्वेतः । द्विशुक्लः ॥ मिथोऽनयोः समासे संख्या पूर्वा शब्दपरविप्र
तिषेधात् । द्व्यन्यः ॥ संख्याया अल्पीयस्याः ॥ द्वित्राः ॥ द्वंद्वेपि । द्वादश । वा प्रियस्य ॥ गुडप्रियः । प्रियगुडः ॥ गड्वादेः परा
सप्तमी ॥ गडुकंठः ॥ क्वचिन्न । वहेगडुः ॥ निष्ठा ॥ निष्ठांतं बहुव्रीहौ पूर्वं स्यात् । कृतकृत्यः ॥ जातिकालसुखादिभ्यः परा
निष्ठा वाच्या ॥ सारंगजग्धी । मासजाता । सुखजाता । प्रायिकं चेदं । कृतकटः । पीतोदकः ॥ वाहिताग्न्यादिषु ॥ आहिताग्निः ।
अग्न्याहितः ॥ आकृतिगणोयं । प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ ॥ अस्युद्यतः ॥ दंडपाणिः ॥ क्वचिन्न । विवृतासिः ॥ छ घ२
इति बहुव्रीहिः ॥ छ ॥ चार्थे द्वंद्वः ॥ अनेकं सुबंतं चार्थे वर्तमानं वा समस्यते स द्वंद्वः । समुच्चयान्वाचयेतरेतरयोगसमा

हाराश्चार्थाः॥ परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः। अन्यतरस्यानुषंगिकत्वेऽन्वाचयः। मिलिता
नामन्वय इतरेतरयोगः। समूहः समाहारः। तत्रेश्वरं गुरुं च भजस्वेति समुच्चये भिक्षामट गां चानयेत्यन्वाचये च न समा
सोऽसामर्थ्यात्। धवखदिरौ। संज्ञापरिभाषं। अनेकोक्तेः होतृपोतृनेष्टोद्गातारः। द्वयोर्द्वयोर्द्वन्द्वं कृत्वा पुनर्द्वन्द्वे
तु होतापोतानेष्टोद्गातारः। राजदन्तादिषु परं। एषु पूर्वप्रयोगार्हं परं स्यात्। दन्तानां राजा राजदन्तः। धर्मादिष्वनियमः।
अर्थधर्मौ। धर्मार्थौ। जंपती। दंपती। जायापती। जायाशब्दस्य जंभावो दंभावश्च वा निपात्यते। आकृतिगणोयं। द्वन्द्वे घि।
द्वन्द्वे घिसंज्ञं पूर्वं स्यात्। हरिश्च हरश्च हरिहरौ। अनेकप्राप्तावेकत्र नियमोऽनियमः शेषे। हरिगुरुहराः। हरिहरगुर
वः। अजाद्यदन्तं। इदं द्वन्द्वे पूर्वं स्यात्। ईशकृष्णौ। बहुष्वनियमः। अश्वरथेन्द्राः। इन्द्राश्वरथाः। घ्यन्तादजाद्यदन्तं विप्रतिषे
धेन। इन्द्राग्नी। अल्पाच्तरं। शिवकेशवौ। ऋतुनक्षत्राणां समाक्षराणामानुपूर्व्येण। हेमन्तशिशिरवसन्ताः। कृ
त्तिकारोहिण्यौ। समाक्षराणां किं। ग्रीष्मवसन्तौ। लघ्वक्षरं पूर्वं। कुशकाशं। अभ्यर्हितं च। तापसपर्वतौ। वर्णानामा
नुपूर्व्येण। ब्राह्मणक्षत्रियविट्शूद्राः। भ्रातुर्ज्यायसः। युधिष्ठिरार्जुनौ। द्वन्द्वश्च प्राणितूर्यसेनांगानां। एषां द्वन्द्व ए
कवत्स्यात्। पाणिपादं। मार्दंगिकपाणविकं। रथिकाश्वारोह[illegible] समाहारस्यैकत्वादेकत्वे सिद्धे नियमार्थं प्रकर
णं। प्राण्यंगादीनां समाहार एव यथा स्यात्। अनुवादे चरणानां। चरणानां द्वन्द्व एकवत् सिद्धस्योपन्यासे। स्थे
णोर्लुङीति वक्तव्यं। उदगात्कठकालापं। प्रत्य[illegible]ष्ठात्कठकौथुमं। अध्वर्युक्रतुरनपुंसकं। यजुर्वेदे विहितो यः क्रतु गणेश
स्तद्वाचिनामनपुंसकलिंगानां द्वन्द्व एकवत्स्यात्। अर्काश्वमेधं। अध्वर्युक्रतुः किं। इषुवज्रौ। सामवेदे विहितौ। ॥५५॥

अनपुंसकं किं। राजसूयवाजपेये। अर्द्धर्चादि॥ अध्ययनतो विप्रकृष्टाख्यानां। अध्ययनेन प्रत्यासन्ना आख्या येषां तेषां
द्वन्द्व एकवत्स्यात्। पदकक्रमकं। जातिरप्राणिनां। प्राणिवर्ज्यजातिवाचिनां द्वन्द्व एकवत्स्यात्। धाना[stain]ष्कुलि। प्राणिनां
तु। विट्शूद्राः। द्रव्यजातीयानामेवेह। रूपरसौ गमनाकुंचने। जातिप्राधान्य एवायमेकवद्भावः। द्रव्यविशेषविव शा२
क्षायां तु। बदरामलकानि। विशिष्टलिंगो नदीदेशोऽग्रामाः। ग्रामवर्ज्जनदीदेशवाचिनां भिन्नलिंगानां समाहारे द्वन्द्वः स्या
त्। उद्ध्यश्चेरावती च उद्ध्येरावति। गंगाशोणं। कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रं। भिन्नलिंगानां किं। गंगायमुने। म
द्रकेकयाः। अग्रामाः किं। जाम्बवं नगरं। शालूकिनी ग्रामः। जाम्बवशालूकिन्यौ। क्षुद्रजंतवः। एषां समाहारे द्वन्द्वः स्यात्।
यूकालिक्षं। आनकुलात्क्षुद्रजंतवः। येषां च विरोधः शाश्वतिकः। एषां प्राग्वत्। अहिनकुलं। गोव्याघ्रं। काकोलू
कमित्यादौ परत्वाद्विभाषामगत् एणधान्येति प्राप्ते चकारेण बाध्यते। शूद्राणामनिरवसितानां। अबहिष्कृतानां शू
द्राणां प्राग्वत्। तक्षायस्कारं। पात्राद्बहिष्कृतानां तु। चांडालमृतपाः। गवाश्वप्रभृतीनि च। यथोच्चारितानि साधूनि।
गवाश्वं। दासीदासमित्यादि। विभाषा वृक्षमृगतृणधान्यव्यंजनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणां। वृ
क्षादीनां सप्तानां द्वन्द्वः अश्ववडवेत्यादि द्वन्द्वत्रयं च प्राग्वत्। वृक्षादौ विशेषाणामेव ग्रहणं। प्लक्षन्यग्रोधं[stain]। रुरुपृषतं।
रुरुपृषताः। कुशकाशं। कुशकाशाः। व्रीहियवं। व्रीहियवाः। दधिघृतं। दधिघृते। गोमहिषं। गोमहिषाः। शुकबकं।
शुकबकाः। अश्ववडवं। अश्ववडवौ। पूर्वापरं। पूर्वापरे। अधरोत्तरं। अधरोत्तरे। फलसेनावनस्पतिमृगशकुंतिक्षु
द्रजंतुधान्यतृणानां बहुप्रकृतिरेव द्वन्द्व एकवदिति वाच्यं। बदराणि चामलकानि च बदरामलकं। जा[stain]तिर प्राणिना
२१

सि॰ कौ॰ मित्येकवद्भावः। नेह। बदरामलके। रथिकाश्वारोहौ। प्लक्षन्यग्रोधावित्यादि। विभाषा वृक्षेति सूत्रेऽप्राणिनसेषां ग्र
॥५६॥ हणं जातिरप्राणिनामिति नित्ये प्राप्ते विकल्पार्थं। पशुग्रहणं हस्त्यश्वादिषु सेनाङ्गत्वान्नित्ये प्राप्ते। मृगाणां मृगैरेव
शकुनीनां तैरेवोभयत्र द्वन्द्वः। अन्येषां सहेतरेतरयोगएवेति नियमार्थं मृगशकुनिग्रहणं। एवं पूर्वापरेऽधरोत्त म३
रमित्यपि। अश्ववडवग्रहणं तु पक्षेनपुंसकार्थं। अन्यथा परत्वात् पूर्ववदश्ववडवाविति स्यात्। विप्रतिषिद्धं चानधिक
रणवाचि॥ विरुद्धार्थानामद्रव्यवाचिनां द्वन्द्व एकवत्था[illegible]द्वा स्यात् विक॰। त्रिकः समाहारे द्वन्द्वश्चार्थे द्वन्द्व इति सुखदुःखं शी
सूत्रेण प्राप्तः। स विरुद्धार्थानां यदि भवति तर्ह्यद्रव्यवाचिनामेवेति नियमार्थमिदं। तेन द्रव्यवाचिनामितरेतरयो तोष्णं ५
गएव। शीतोष्णे उदके स्तः। विप्रतिषिद्धं किं। नन्दकपाञ्चजन्यौ। इह पाक्षिकः समाहारद्वन्द्वो भवत्येव। न दधिपयआ
दीनि। एतानि नैकवत्स्युः। दधिपयसी। इध्माबर्हिषी। निपातनाद्दीर्घः। ऋक्सामे। वाङ्मनसे। अधिकरणैतावत्त्वे च।
द्रव्यसङ्ख्यावगमे एकवद्भावेति नियमो न स्यात्। दशदन्तोष्ठाः। विभाषा समीपे। अधिकरणैतावत्त्वस्य सामीप्ये
न परिच्छेदे समाहारएवेत्येवंरूपो नियमो वा स्यात्। उपदशं दन्तोष्ठं। उपदशाः दन्तोष्ठाः। आनङ् ऋतो द्वन्द्वे। विद्या
योनिसम्बन्धवाचिनामृदन्तानां द्वन्द्वे आनङ् स्यादुत्तरपदे परे। होतापोतारौ। होतृपोतृनेष्टोद्गातारः। मातापित
रौ। पुत्रेऽन्यतरस्यां। इत्यतो मण्डूकप्लुत्या पुत्रे इत्यनुवर्तते। पितापुत्रौ। देवताद्वन्द्वे च। इहोत्तरपदे आनङ्। मित्रावरुणौ।
वायुशब्दप्रयोगे प्रतिषेधः। अग्निवायू। वाय्वग्नी। पुनर्द्वन्द्वग्रहणं प्रसिद्धसाहचर्यस्य परिग्रहार्थं। तेन ब्रह्मप्रजा गणेशौ
पती इत्यादौ नानङ्। एतद्धि नैकहविर्भागित्वेन श्रुतं। नापि लोके प्रसिद्धसाहचर्यं। ईदग्नेः सोमवरुणयोः। देव ॥५६॥

ताद्वंद्वे इत्येव। अग्नेः स्तुत्स्तोमसोमाः। अग्नेः परेषामेषां सस्य षः स्यात्समासे। अग्निष्टुत्। अग्निष्टोमः। अग्नीषोमौ। अग्नीव
रुणौ। इद्वृद्धौ। वृद्धिमत्युत्तरपदे अग्नेरिदादेशः स्याद्देवताद्वंद्वे। अग्नामरुतौ देवते अस्य आग्निमारुतं कर्म। अग्नीवरु
णौ देवते अस्य आग्निवारुणं। देवताद्वंद्वे चेत्युभयपदवृद्धिः। अलौकिके वाक्ये आनङ् ईत्वं च बाधित्वा इः। वृद्धौ
किं। आग्नेन्द्रः। नेन्द्रस्य परस्य इत्युत्तरपदवृद्धिप्रतिषेधः। विष्णौ न। आग्नावैष्णवं। दिवो द्यावा। देवताद्वंद्वे उत्तरपदे।
द्यावाभूमी। द्यावाक्षामा। दिवसश्च पृथिव्यां। दिव इत्येव। द्यावा वा। आदेशे अकारोच्चारणं सकारस्य रुत्वं माभू
दित्येतदर्थं। द्यौश्च पृथिवी च दिवस्पृथिव्यौ। द्यावापृथिव्यौ। छंदसि दृष्टानुविधिः। द्यावा चिदस्मै पृथिवी। दिवस्पृथि
व्योररतिं इत्यत्र पदकाराः विसर्गं पठंति। उषासोषसः। उषस्शब्दस्य उषासा आदेशो देवताद्वंद्वे। उषासासूर्यं। मातरपि
तरावुदीचां। उदीचां किं। मातापितरौ। द्वंद्वाच्चुदषहांतात्समाहारे। चवर्गांताद्दषहांतात् द्वंद्वाट्टच् स्यात् समाहारे
वाक्त्वचं। त्वक्स्रजं। शमीदृषदं। वाक्त्विषं। छत्रोपानहं। समाहारे किं। प्रावृट्शरदौ। इति द्वंद्वः॥ अथैकशेषः।
सरूपाणां। रामौ। रामाः। विरूपाणामपि समानार्थानां। वक्रदंडश्च कुटिलदंडश्च वक्रदंडौ। कुटिलदंडौ। वृद्धो यू
ना तल्लक्षणश्चेदेव विशेषः। यूना सहोक्तौ गोत्रं शिष्यते गोत्रयुवप्रत्ययमात्रकृतं चेत्तयोः कृत्स्नं वैरूप्यं स्यात्। गार्ग्यश्च
गार्ग्यायणश्च गार्ग्यौ। वृद्धः किं। गर्गगार्ग्यायणौ। यूना किं। गर्गगार्ग्यौ। तल्लक्षणः किं। भागवित्तिभागवित्तिकौ। कृत्स्नं किं। गार्ग्य
वात्स्यायनौ। स्त्री पुंवच्च। यूना सहोक्तौ वृद्धा स्त्री शिष्यते तदर्थश्च पुंवत्। गार्गी च गार्ग्यायणश्च गार्ग्यौ। अस्त्रियामित्यनुवर्त्त
माने। यत्रयोश्चेति लुक्। दाक्षी च दाक्षायणश्च दाक्षी। पुमान् स्त्रिया। स्त्रिया सहोक्तौ पुमान् शिष्यते तल्लक्षण एव वि

सि॰कौ॰ शेषश्चेत्। हंसी च हंसश्च हंसौ। भ्रातृपुत्रौ स्वसृदुहितृभ्यां। भ्राता च स्वसा च भ्रातरौ। पुत्रश्च दुहिता च पुत्रौ। नपुंसकमनपुं
॥५७॥ सकेनैकवच्चास्यान्यतरस्यां। अक्लीबेन सहोक्तौ क्लीबं शिष्यते तच्च वा एकवत्स्यात् तल्लक्षणश्चेदेव विशेषश्चेत्। शुक्लः
पटः। शुक्ला पटी। शुक्लं वस्त्रं। तदिदं शुक्लं। तानि इमानि शुक्लानि। पिता मात्रा। मात्रा सहोक्तौ पिता वा शिष्यते। माता च पि
ता च पितरौ। श्वशुरः श्वश्र्वा। श्वश्र्वा सहोक्तौ श्वशुरो वा शिष्यते। श्वशुरौ। त्यदादीनां मिथः सहोक्तौ यत्परं तत् शिष्य
ते इति वाच्यं। स च यश्च यौ। पूर्वशेषोऽपि दृश्यत इति [illegible] भाष्यं। स च यश्च तौ। २ श्वश्रूश्च श्वशुरो। त्यदादीनि सर्वैर्नित्यं। सर्वैः
सहोक्तौ त्यदादीनि नित्यं शिष्यन्ते। स च देवदत्तश्च तौ। ४ त्यदादितः शेषे पुंनपुंसकतो लिङ्गवचनानि। सा च देवदत्तश्च
तौ। तत् च देवदत्तश्च यज्ञदत्ता च तानि। पुंनपुंसकयोस्तु परत्वान्नपुंसकं शिष्यते। तत् च देवदत्तश्च ते। अद्वन्द्वतत्पुरु
षविशेषणानामिति वक्तव्यं। कुक्कुटमयूर्याविमे। मयूरीकुक्कुटाविमौ। तत् च सा च अर्द्धपिप्पल्यौ ते। ग्राम्यपशुसंघेषु
तरुणेषु स्त्री। एषु सहविवक्षायां स्त्री शिष्यते। पुमान् स्त्रिया इत्यस्यापवादः। गाव इमाः। ग्राम्येति किं। रुरव इमे। पशुग्रहणं
२४ किं। ब्राह्मणाः। संघेषु किं। एतौ गावौ। अतरुणेषु किं। वत्सा इमे। अनेकशफेष्विति वक्तव्यं। अश्वा इमे। इह सर्वत्र एक
शेषे कृते अनेकाभावाद् द्वन्द्वो न। तेन शिंसौ शिरांसी स्यादौ समासस्य सुंतोऽन्तः प्राण्यंगत्वादेकवद्भावश्च न। पंथा नौ
पंथानः इत्यादौ समासो नो न॥॥६ इत्येकशेषः॥७॥ कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पंच वृत्तयः। परा
शिव र्थाभिधानं वृत्तिः। वृत्त्यर्थावबोधकं वाक्यं विग्रहः। स द्विधा। लौकिको अलौकिकश्च परिनिष्ठितत्वात्साधुर्लौकि गणेश
कः। प्रयोगानर्हः साधुरलौकिकः। यथा राज्ञः पुरुषः। राजन् अस् पुरुष सु इति। अविग्रहो नित्यसमासोऽस्वपदवि ॥५७॥
स१

समासस्य

ग्रयाहो । समासश्चतु[hole]र्धेति प्राच्यो वादः । अव्ययीभाव तत्पुरुष बहुव्रीहि द्वंद्वाधिकारबहिर्भूतानामपि सह सुपेति विधा
नात् । पूर्वपदार्थप्रधानोऽव्ययीभावः । उत्तरपदार्थप्रधानस्तत्पुरुषः । अन्यपदार्थप्रधानो बहुव्रीहिः । उभयपदार्थप्रधानो द्वंद्वः । इ
त्यपि प्राचां प्रवादः प्रायोभिप्रायः । सूपप्रतिन्यूनमशगंगमित्याद्यव्ययीभावे अतिमालादौ तत्पुरुषे द्वित्रा इत्यादि बहुव्रीहौ दंतोष्ठमि
त्यादि द्वंद्वे चाभावात् । तत्पुरुषविशेषः कर्मधारयः । तद्विशेषो द्विगुः । अनेकपदत्वं द्वंद्वबहुव्रीह्योरेव तत्पुरुषस्य क्वचिदेवेत्युक्तं ।
किंच । सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा । सुबंतेनेति विज्ञेयः समासः षड्विधो बुधैः ॥१॥ सुपा । राजपुरुषः । तिङा । पर्यभू
षत् । नाम्ना । कुंभकारः । धातुना । कटप्रूः । अजस्रं । तिङां तिङा । पिबतखादता । तिङा सुपा । कृंतविचक्षणेतियस्यां क्रियायां सा
कृंतविचक्षणा एहीडादयोऽन्यपदार्थ इति मयूरव्यंसकादौ पाठात्समासः ॥ छ ॥ इति सर्वसमासशेषः ॥ छ ॥ ऋक्पूरब्धूःपथा
मानक्षे [hole] ऋगाद्यंतस्य अप्रत्ययोंतावयवः स्यात् अक्षे [hole] पाधूःस्त्वदंतस्य न । अर्द्धर्चः । अनृचबह्वृचाव
ध्येतर्येवानेह । अनृक्साम । बह्वृक्सूक्तं । विष्णोः पूः विष्णुपुरं । क्लीबत्वं लोकात् । विमलापसं सरः । द्व्यंतरुपसर्गेभ्योऽप ईत् । अप
इति कृतसमासांतस्यानुकरणं । षष्ठ्यर्थे प्रथमा । एभ्यो अपस्य ईः स्यात् । द्विर्गता आपो अस्मिन्निति द्वीपं । अंतरीपं । प्रती
पं । समीपं । समापो देवयजनमिति तु समाप्त्या आपोऽस्मिन्निति बोध्यं । कृतसमासांतग्रहणान्नेह । स्वपः स्वपी । अवर्णांताद्वा ।
प्रेपं । प्रापं । परापं । ऊदनोर्देशे । अनोः परस्यापस्य ऊ स्याद्देशे । अनूपो देशः ॥६॥ राजधुरा । अक्षेतु अक्षधूः । दृढधूः । अ
क्षः । सखिपथोरप्यपथो देशः । प्रत्यन्ववपूर्वात्सामलोम्नः । एतत्पूर्वाल्लोम्नः सामलोम्नोतात्समासादः स्यात् । प्रतिसामं । अनु
सामं । अवसामं । प्रतिलोमं । अनुलोमं । अवलोमं । कृष्णोदक्पांडुसंख्यापूर्वाया भूमेरजिष्यते । कृष्णभूमः । उदग्भूमः । पांडुभू
मः । द्विभूमः । त्रिभूमः प्रासादः । संख्याया नदीगोदावरीभ्यां च । पंचनदं । सप्तगोदावरं । अजिति योगविभागादन्यत्रापि । पद्म

सि॰ सु॰ नाभः ॥ अक्ष्णोऽदर्शनात् । अचक्षुःपर्यायादक्ष्णोऽच् स्यात् समासांतः । गवामक्षीव गवाक्षः ॥ अचतुरविचतुरसुचतुरस्त्रीपुंस
॥५८॥ धेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्या
युषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः ॥ एते पंचविंशतिरजंता निपात्यंते । आद्यास्त्रयो बहुव्रीहयः ॥ अविद्य
मानानि चत्वार्यस्याचतुरः । विचतुरः । सुचतुरः । सुपाभ्यां चतुरो लिप्यते । त्रिचतुराः । चतुर्णां समीपे उपचतुराः । ततः एका
दश द्वंद्वाः । स्त्रीपुंसौ । धेन्वनडुहौ । ऋक्सामे । वाङ्मनसे । अक्षिणी च भ्रुवौ च अक्षिभ्रुवं । दाराश्च गावश्च दारगवं । ऊरू च
अष्ठीवंतौ च ऊर्वष्ठीवं । निपातनाट्टिलोपः । पदष्ठीवं । निपातनात्पादशब्दस्य पद्भावः । नक्तं च दिवा च नक्तंदिवं । रात्रौ च दिवा
च रात्रिंदिवं । रात्रेर्मांतत्वं निपात्यते । अहनि च दिवा च अहर्दिवं । वीप्सायां द्वंद्वो निपात्यते । अहन्यहनीत्यर्थः । सरजसं सम
ति साकल्येऽव्ययीभावः । बहुव्रीहौ तु सरजः पंकजं ॥ निश्चितं श्रेयो निःश्रेयसं । तत्पुरुष एव । नेह निःश्रेयान् पुरुषः । पुरुषस्या
युः पुरुषायुषं । ततो द्विगू । द्व्यायुषं । त्र्यायुषं । ततो द्वंद्वः ॥ ऋग्यजुषं । ततस्त्रयः कर्मधारयाः । जातोक्षः । महोक्षः । वृद्धोक्षः ॥
शुनः समीपमुपशुनं । टिलोपाभावः संप्रसारणं च निपात्यते । गोष्ठश्वा गोष्ठश्वः ॥ ब्रह्महस्तिभ्यां वर्चसः ॥ अच् स्यात् । ब्रह्म
वर्चसं । हस्तिवर्चसं । पल्यराजभ्यां चेति वक्तव्यं । पल्यवर्चसं । राजवर्चसं । अवसमंधेभ्यस्तमसः ॥ अवतमसं । संतमसं । अं
धयतीत्यंधं पचाद्यच् । अंधंतमः । अंधतमसं । श्वसो वसीयःश्रेयसः ॥ वसुशब्दः प्रशस्तवाची । तत ईयसुनि वसीयः ।
श्वसशब्द उत्तरपदार्थप्रशंसामाशास्ति विषयमाह । मयूरव्यंसकादित्वात्समासः । श्वोवसीयसं । श्वःश्रेयसं ते भूयात् । अन्व
वतप्ताद्रहसः ॥ अनुरहसं । अवरहसं । तप्तरहसं । प्रतेरुरसः सप्तमीस्थात् ॥ उरसि प्रत्युरसं । विभक्त्यर्थेऽव्ययीभावः । अनु गरोशा
गवमायामे । एतन्निपात्यते दीर्घत्वे अनुगवं यानं । यस्य चायाम इति समासः ॥ द्विस्तावा । त्रिस्तावा वेदिः ॥ अच्प्रत्ययष्टिलो ॥ ५८ ॥

पः [redacted] समासश्च निपात्यते। यावती पृच्छतो वेदिस्ततो द्विगुणा त्रिगुणा वाऽमेध्यादौ तत्रेदं निपातनं। वेदिरिति किं। द्विस्तावती वि
स्तावती रज्जुः। उपसर्गादध्वनः। प्रगतो ऽध्वानं प्राध्वो रथः। न पूजनात्। पूजनार्थात्परेभ्यः समासांता न स्युः। सुराजा। अतिराजा।
स्वतिभ्यामेव। नेह परमराजः। पूजनात्किं। गामतिक्रांतो ऽतिगवः। बहुव्रीहौ सक्थ्यक्ष्णोरित्यतः प्रागेवायं निषेधः। नेह। सुस
क्थ्यः। स्वक्षः। किमः क्षेपे। क्षेपे यः किंशब्दस्ततः परं यत्तदंतात्समासांता न स्युः। कुत्सितो राजा किंराजा। क्षेपे किं। किंराजः। किं
सखः। किंगवः। नञस्तत्पुरुषात्। समासांतो न। अराजा। असखा। तत्पुरुषात्किं। अधुरं शकटं। पथो विभाषा। नञ्पूर्वात्स किं
थो वा समासांतः। अपथं। अपंथाः। तत्पुरुष इत्येव। अपथो देशः। अपथं वर्त्तते॥ ७॥ इति समासांताः॥ ७॥ अलुगुत्तरप
दे। अलुगधिकारः प्रागानङः। उत्तरपदाधिकारस्त्वापादपरिसमाप्तेः। पंचम्याः स्तोकादिभ्यः। एभ्यः पंचम्या अलुक् स्या
दुत्तरपदे। स्तोकान्मुक्तः। एवमंतिकार्थदूरार्थकृच्छ्रेभ्यः। उत्तरपदे किं। निष्क्रांतः स्तोकान्निस्तोकः। ब्राह्मणाच्छंसि न तूपसं
ख्यानं। ब्राह्मणविहितानि शस्त्राण्युपचाराद्ब्राह्मणानि तानि शंसतीति ब्राह्मणाच्छंसी। ऋत्विग्विशेषः। द्वितीया
र्थे पंचम्युपसंख्यानादेव। ओजःसहोंभस्तमसस्तृतीयायाः। ओजसाकृतमित्यादि। अंजसउपसंख्यानं। अंजसाकृ
तं। आऽवे[illegible]नकृतमित्यर्थः। पुंसानुजो जनुषांध इति च। यस्याग्रजः पुमान्स पुंसानुजः। जनुषांधो जात्यंधः। मनसः संज्ञा
यां। मनसागुप्ता। आज्ञायिनि च। मनइत्येव। मनसा आज्ञातुं शीलमस्य मनसाज्ञायी। आत्मनश्च। आत्मनस्तृतीयाया अ
लुक् स्यात्। पूरण इति वक्तव्यं। पूरणप्रत्ययांते उत्तरपदे परत इत्यर्थः। आत्मनापंचमः। जनार्दनस्त्वात्मचतुर्थ एवेति बहुव्री
हिर्बोध्यः। पूरणे किं। आत्मकृतं। वैयाकरणाख्यायां चतुर्थ्याः। आत्मनइत्येव। आत्मनेभाषा। आत्मनेपदं। तादर्थ्ये

सि॰कौ चतुर्थी। चतुर्थीति योगविभागात्समासः। परस्य च। परस्मैपदं। परस्मैभाषा। हलदन्तात्सप्तम्याः संज्ञायां। हलदन्तादन्ताच्च सप्तम्या
॥५८॥ अलुक् स्यात्संज्ञायां। त्वचिसारः। गवियुधिभ्यां स्थिरः। आभ्यां स्थिरस्य सस्य षः स्यात्। गविष्ठिरः। अत्र गवीति वचनादेवालुक्। युधि
ष्ठिरः। अरण्येतिलकः। अत्र संज्ञायामिति सप्तमीसमासः। हृद्द्युभ्यां च। हृदिस्पृक्। दिविस्पृक्। कारनाम्नि च प्राचां हलादौ। प्राचां देशे
९८ यत्कारस्य नाम तत्र हलादावुत्तरपदे हलन्तात्सप्तम्या अलुक्। मुकुटेकार्षापणं। दृषदिमाषकः। पूर्वेण सिद्धे नियमार्थं। कारनाम्न्येव
प्राचामेव हलादावेवेति। कारनाम्नि किं। अभ्याहितपशुः। कारादन्यस्येतद्देयस्य नाम। प्राचां किं। यूथपशुः। हलादौ किं। अविकटोरणः।
हलदन्तात्किं। नद्यां दोहो नदीदोहः। मध्याद्गुरौ। मध्येगुरुः। अन्तात्। अन्तेगुरुः। अमूर्धमस्तकात्स्वाङ्गादकामे। कण्ठेकालः। उरसि
लोमा। अमूर्धमस्तकात्किं। मूर्द्धशिखः। मस्तकशिखः। अकामे किं। मुखकामोऽस्य मुखकामः। बन्धे च विभाषा। हलदन्तात्स
प्तम्या अलुक्। हस्तेबन्धः। हस्तबन्धः। हलेति किं। गुप्तिबन्धः। तत्पुरुषे कृति बहुलं। स्तम्बेरमः। कर्णेजपः। क्वचिन्न। कुरुचरः। प्रा
वृट्शरत्कालदिवां जे। प्रावृषिजः। शरदिजः। कालेजः। दिविजः। एवं स्यादयं प्रपञ्चः। विभाषा वर्षक्षरशरवरात्। एभ्यः सप्तम्या अलुक् जे।
वर्षेजः। वर्षजः। क्षरेजः। क्षरजः। शरेजः। शरजः। वरेजः। वरजः। घकालतनेषु कालनाम्नः। सप्तम्या विभाषा अलुक् स्यात्। घे। पू
र्वाह्णेतरे। पूर्वाह्णतरे। पूर्वाह्णेतमे। पूर्वाह्णतमे। काले। पूर्वाह्णेकाले। पूर्वाह्णकाले। तने। पूर्वाह्णेतने। पूर्वाह्णतने। शयवास
वासिष्वकालात्। खेशयः। खशयः। ग्रामेवासः। ग्रामवासः। ग्रामेवासी। ग्रामवासी। अपो योनियन्मतुषु। अप्सुयोनिरुत्प
त्तिर्यस्य सोऽप्सुयोनिः। अप्सु भवोऽप्सव्यः। अप्सुमन्तावाज्यभागौ। नेन्सिद्धबध्नातिषु च। इन्नन्तादिषु सप्तम्या अलुक् न॥
स्थण्डिलशायी। सांकाश्यसिद्धः। चक्रेबन्धः। स्थे च भाषायां। समस्थः। भाषायां किं। कृष्णोऽस्यास्वरेष्ठः। षष्ठ्या आक्रोशे। गणेश
चौरस्यकुलं। आक्रोशे किं। ब्राह्मणकुलं। वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु। वाचोयुक्तिः। दिशोदण्डः। पश्यतोहरः। आमुष्या ॥५८॥

यण्। आमुष्यपुत्रिकामुष्यकुलिकेति च। अमुष्यापत्यं आमुष्यायणः। नडादित्वात्फक्। अमुष्यपुत्रस्य भावः आमुष्यपुत्रिका। मनोज्ञा
दित्वाद्वुञ्। एवमामुष्यकुलिका। देवानांप्रिय इति च मूर्खे। अन्यत्र देवप्रियः। शेपपुच्छलांगूलेषु शुनः। शुनःपुच्छः। शुनःशेपः।
शुनोलांगूलः। दिवश्च दासे। दिवोदासः। पुत्रेन्यतरस्यां। अमुष्याः पुत्रे परे अलुग्वा। निंदायां। दास्याःपुत्रो दासीपुत्रः। निंदा
यां किं। आत्मनः पुत्रः। ऋतो विद्यायोनिसंबंधेभ्यः। विद्यायोनिबंधवाचिन ऋदंतात्षष्ठ्या अलुक्। होतुरंतेवासी। होतुःपु स४
त्रः। पितुरंतेवासी। पितुःपुत्रः। विद्यायोनिसंबंधेभ्यस्तत्पूर्वोत्तरपदग्रहणं। नेह। होतृधनं। पितृगृहं। विभाषा स्वसृपत्योः।
ऋदंतात्षष्ठ्या अलुग्वा स्वसृपत्योः परयोः। मातुःपितुर्भ्यामन्यतरस्यां। आभ्यां स्वसुः सस्य षो वा स्यात्समासे। मातुःष्व
सा। मातुःस्वसा। पितुःष्वसा। पितुःस्वसा। लुक्पक्षे तु। मातृपितृभ्यां स्वसा। आभ्यां परस्य स्वसुः सस्य षः स्यात्समासे। मातृ
ष्वसा पितृष्वसा। असमासे तु। मातुःस्वसा। पितुःस्वसा। इत्यलुक्समासः॥ घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योने
काचो ह्रस्वः। भाषितपुंस्काद्घोङीतदंतस्यानेकाचो ह्रस्वः स्याद्घरूपकल्पप्रत्ययेषु परेषु चेलडादिषूत्तरपदेषु। ब्रा
स५ ह्मणितरा। ब्राह्मणितमा। ब्राह्मणिरूपा। ब्राह्मणिकल्पा। ब्राह्मणिचेली। ब्राह्मणिब्रुवा। ब्राह्मणिगोत्रेत्यादि। ब्रूत्रः पद्या
घञि व्याद्रेश गुणे यार भावो निपात्यते। चेलडादीनि त्रीणि विषये कुत्सितवाचीनि। तैः कुत्सितानि कुत्सनैरिति समासः।
ङ्यः किं। दत्तातरा। भाषितपुंस्कात् किं। आमलकीतरा। कुवलीतरा। न घाः शेषस्यान्यतरस्यां। अङ्यंतेन घाः ङ्यंतेकाव
श्च घादिषु ह्रस्वो वा स्यात्। ब्रह्मबंधुतरा। ब्रह्मबंधूतरा। स्त्रीतरा। स्त्रितरा। ऋत्र घा च लक्ष्मीतरा। उगितश्च। उगितः
परा या नदी तदंतस्य घादिषु ह्रस्वो वा स्यात्। विदुषितरा। ह्रस्वाभावपक्षे तसिलादिष्विति पुंवत्। विद्वत्तरा। इत्यादिषु

सिस
।।९६।।

तु विदुषीतरे सुपा हतं तन्निरस्तं। हृदयस्य हृल्लेखयदण्लासेषु। हृदयं लिखतीति हृल्लेखः। हृदयस्य प्रियं हृद्यं। हृदयस्ये
दं हार्दं। हृल्लासः। लेखे स्यल्लत स्य ग्रहणं। घञन्ते तु हृदयलेखः। लेखग्रहणमेव ज्ञापकमुत्तरपदाधिकारे तदन्तविधिर्नास्ती
ति। वा शोकष्यञ्रोगेषु। हृच्छोकः। हृदयशोकः। सौहार्द्यं। सौहृदय्यं। हृ[illegible]रोगः। हृदयरोगः। हृदयशब्दपर्यायो हृच्छब्दोऽप्य
स्ति। तेन सिद्धे प्रपंचार्थमिदं। पादस्य पदाज्यातिगोपहतेषु। एषूत्तरपदेषु पादस्य पद् इत्यादेशः। पादाभ्यामजतीति
पदाजिः। पदातिः। अजेतिभ्यां पादे चेति इण्प्रत्ययः। अजेर्व्यभावो निपातनान्न। पदगः। पदोपहतः। पद्यत्यतदर्थे। पादस्य
पत्स्यात्तदर्थे यति परे। पादौ विध्यन्तीति पद्याः शर्कराः। अतदर्थे किं। पादार्थमुदकं पाद्यं। घञ्कृत्वे चरतावुपसंख्यानं। पादाभ्यां च
रतीति पदिकः। पर्पादिभ्यष्ठन्। हिमकाषिहतिषु च। पद्धिमं। पत्काषी। पद्धतिः। ऋचः शे। ऋचः पादस्य पत्स्यात्तच्छे परे। गाय
त्री पच्छः शंसति। पादं पादमित्यर्थः। ऋचः किं। पादशः का[illegible]र्षापणं ददाति। वा घोषमिश्रशब्देषु। पादस्य पत्। पद्घोषः। पाद
घोषः। पन्मिश्रः। पादमिश्रः। पच्छब्दः। पादशब्दः। निष्के चेति वाच्यं। पन्निष्कः। पादनिष्कः। उदकस्योदः संज्ञायां। उदमेघः। उत्तरपदस्य चेति वक्त
व्यं। क्षीरोदः। पेषंवासवाहनधिषु च। उदपेषं पिनष्टि। उदवासः। उदवाहनः। उदधिर्घटः। समुद्रे तु परत्वेन सिद्धं। एकहलादौ पूरयितव्ये
ऽन्यतरस्यां। उदकुंभः। उदककुंभः। एके इति किं। उदकस्थालं। पूरयितव्ये किं। उदकपर्वतः। मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहे
षु च। उदमन्थः। उदकमन्थः। उदौदनः। उदकौदनः। इको ह्रस्वोऽङ्यो गालवस्य। इगन्तस्याङ्यन्तस्य ह्रस्वो वा स्यादुत्तरपदे। ग्रामणिपुत्रः। ग्राम
णीपुत्रः। इकः किं। रमापतिः। अङ्यः किं। गौरीपतिः। गालवग्रहणं पूजार्थं। अन्यतरस्यामित्यनुवृत्तेः। इयङुवङ्भाविनामव्ययानां
च नेति वाच्यं। श्रीमदः। भ्रूभगः। शुक्लीभावः। अभ्रुकुंसादीनामिति वक्तव्यं। [illegible] भ्रुकुंसः। भ्रुकुटिः। भ्रूकुंसः। भ्रूकुटिः।। गावोय
अकारोऽनेन विधी[illegible]यते इति व्याख्यानान्तरे। भ्रकुंसः। भ्रकुटिः। भ्रुवा कुंसो भाषणं शोभा [illegible] वा यस्य स भ्रू[illegible]वे[illegible]ब ।९६।।

धारीनत्रीकः। भ्रुवः कुटी कौटिल्यं। एकतद्धिते च। एकशब्दस्य ह्रस्वः स्यात्तद्धिते उत्तरपदे च। एकस्या आगतं एकरूप्यं। ए
कक्षीरं। ङ्यापोः संज्ञाछन्दसोर्बहुलं। रेवतिपुत्रः। अजक्षीरं। त्वे च। त्वप्रत्यये ङ्यापोर्वा ह्रस्वः। अजत्वं। रोहिणित्वं। ष्य
ङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे। ष्यङस्तस्य पूर्वपदस्य संप्रसारणं स्यात्पुत्रपत्योरुत्तरपदयोस्तत्पुरुषे। संप्रसारण
स्य। संप्रसारणस्य दीर्घः स्यादुत्तरपदे परे। कौमुदगंध्यायाः पुत्रः कौमुदगंधीपुत्रः। कौमुदगंधीपतिः। व्यवस्थितविभाष
या ह्रस्वो न। स्त्रीप्रत्यये चानुपसर्जने नेति। तदादिनियमप्रतिषेधात्। परमकारीषगंधीपुत्रः। उपसर्जने तु तदादिनियमा
न्नेह। अतिकारीषगंध्यपुत्रः। बन्धुनि बहुव्रीहौ। बन्धुशब्दे उत्तरपदे ष्यङः संप्रसारणं स्याद्बहुव्रीहौ। कारीषगंध्याब
न्धुरस्येति कारीषगंधीबन्धुः। बहुव्रीहाविति किं। कारीषगंध्यायाः बन्धुः कारीषगंध्याबन्धुः। क्लीबनिर्देशः स्वरूपशब्द
रूपापेक्षया। मातच्मातृकमातृषु वा। कारीषगंधीमातः। कारीषगंध्यामातः। कारीषगंधीमातृकः। कारीषगंध्यामा
तृकः। कारीषगंधीमाता। कारीषगंध्यामाता। अस्मादेव निपातनात् मातृशब्दस्य मातजादेशः। केचित्त्वस्य। ब
हुव्रीहावेवेदं। नेह। कारीषगंध्यायाः माता कारीषगंध्यामाता। चित्सामर्थ्याद्विहितस्य तद्बहुव्रीहिस्वरं बाधते। इष्टके
षीकामालानां चिततूलभारिषु। इष्टकादीनां तदन्तानां च पूर्वपदानां चितादिषु क्रमादुत्तरपदेषु ह्रस्वः स्यात्। इष्टक
चितं। पक्वेष्टकचितं। इषीकतूलं। मुञ्जेषीकतूलं। मालभारी। उत्पलमालभारी। कारे सत्यागदस्य। मुम् स्यात्। सत्यंकारः।
अगदंकारः। अस्तोश्चेति वक्तव्यं। अस्तंकारः। धेनोर्भव्यायां। धेनुंभव्या। लोकस्य पृणे। लोकंपृणः। एतगति मूलवि
भुजादिपालकः। इत्यनभ्याशस्य। अनभ्याशमित्यः दूरतः परिहर्तव्य इत्यर्थः। भ्राष्ट्राग्न्योरिन्धे। भ्राष्ट्रमिन्धः। अग्निमिन्धः।
गिलेऽगिलस्य। तिमिंगिलः। अगिलस्य किं। गिलगिलः। गिलगिले च। तिमिंगिलगिलः। उष्णभद्रयोः करणे। उष्णं

सि॰ सु॰ ति॰ करणं। भद्रंकरणं। रात्रेः कृति विभाषा। रात्रिंचरः। रात्रिचरः। रात्रिमटः। रात्र्यटः। अखिल[?]दर्थमिदं सूत्रं। खिति तु अरुर्द्विषदि
॥ ९६ ॥ ति नित्यमेव वक्ष्यते। रात्रिंमन्यः। सहस्य सः संज्ञायां। उत्तरपदे। सपलाशं। संज्ञायां किं। सहयुध्वा। ग्रन्थान्ताधिके च। अनयो
रर्थयोः सहस्य सः उत्तरपदे। समुहूर्तं ज्योतिषमधीते। सद्रोणं खारी। द्वितीये चानुपाख्ये। अनुमेये द्वितीये सहस्य सः। स
राक्षसीका निशा। राक्षसी साक्षादनुपलभ्यमाना निशयानुमीयते। समानस्य छन्दस्यमूर्द्धप्रभृत्युदर्केषु। समानस्य
सः स्यादुत्तरपदे न तु मूर्द्धादिषु। अनुभ्राता सगर्भ्यः। अनुसखा सयूथ्यः। यो नः सनुत्यः। तत्र भव इत्यर्थे सगर्भसयूथ
सनुताद्यत्। अमूर्द्धादिषु किं। समानमूर्द्धा। समानप्रभृतयः। समानोदर्काः। समानस्य यो गो विभज्यते। तेन सपक्षः। सा ति॰ ६
धर्म्यं। सजातीयमित्यादि सिद्धमिति काशिका। अथवा सहशब्दः सदृशवचनोऽस्ति। सदृशः सख्या ससखीति यथा। तेना
यमस्वपदविग्रहो बहुव्रीहिः। समानः पक्षो यस्येत्यादि। ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु।
एषु द्वादशसूत्तरपदेषु समानस्य सः स्यात्। सज्योतिः। सजनपद इत्यादि। चरणे ब्रह्मचारिणि। ब्रह्मचारिण्युत्तरपदे समानस्य
सः स्यात् चरणे समानत्वेन गम्यमाने। चरणः शाखा। ब्रह्म वेदः। तदध्ययनार्थं व्रतमपि ब्रह्म तच्चरतीति ब्रह्मचारी। समानस्य
सः सब्रह्मचारी। तीर्थे ये। तीर्थे उत्तरपदे यादौ प्रत्यये विवक्षिते समानस्य सः स्यात्। + अस्य + सतीर्थ्यः। एकगुरुकः। समान
तीर्थे वासीति यत्प्रत्ययः। विभाषोदरे। यादौ प्रत्यये इत्येव। सोदर्यः। समानोदर्यः। दृग्दृशवतुषु। सदृक्। सदृशः। दृक्षे चेति वक्तव्यं।
सदृक्षः। वतुरुत्तरार्थः। इदंकिमोरीश्की। दृग्दृशवतुषु इदम ईश् किमः की स्यात्। ईदृक्। ईदृशः। कीदृक्। कीदृशः। वतूदाह
रणं वक्ष्यते। दृक्षे च। ईदृक्षः। कीदृक्षः। आ सर्वनाम्नः। तादृक्। तादृशः। तावान्। तादृक्षः। दीर्घः मत्वोत्वे। अमरदृक्। अमरदृ गणेश
शः। अमरदृक्षः। समासेऽङ्गुलेः सङ्गः। अङ्गुलिशब्दात् सङ्गस्य सस्य मूर्द्धन्यः स्यात् समासे। अङ्गुलिषङ्गः। समासे किं। अ ॥ ९६ ॥

गुडेः संगः। भीरोः स्थानं। भीरुशब्दात् स्थानस्य सस्य मूर्द्धन्यः समासे। भीरुष्ठानं। असमासे तु। भीरोः स्थानं। ज्योतिरायुषः स्तोमः। आ
युषः स्तोमस्य मूर्द्धन्यः समासे। ज्योतिष्टोमः। आयुष्टोमः। समासे किं। ज्योतिषः स्तोमः। सुषामादिषु च। सस्य मूर्द्धन्यः। शोभनं साम
यस्य सुषामा। सुषंधिः। एति संज्ञायामगात्। सस्य मूर्द्धन्यः। हरिषेणः। एति किं। हरिसक्थं। संज्ञायां किं। पृथुसेनः। अगकारात् किं। विष्व
सेनः। इणकोः इत्येव। सर्वसेनः। नक्षत्राद्वा। एति संज्ञायामगकारात् सस्य मूर्द्धन्यो वा। रोहिणीसेनः। रोहिणीषेणः। अगकारात् किं।
शतभिषक्सेनः। आकृतिगणोयं। अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु। अन्यशब्द
स्य दुगागमः स्यादाशीरादिषु परेषु। अन्यदाशीः। अन्यदाशा। अन्यदास्था। अन्यदास्थितः। अन्यदुत्सुकः। अन्यदूतिः। अन्यद्रा
गः। अषष्ठ्यादि किं। अन्यस्य यो अन्येन वा आशीः अन्याशीः। कारके छे च नायं निषेधः। अन्यस्य कारकः अन्यत्कारकः। अन्यस्यायं
अन्यदीयः। गहादेराकृतिगणत्वात् छः। अर्थे विभाषा। अन्यदर्थः। अन्यार्थः। कोः कत्तत्पुरुषेऽचि। कोः कत् स्यादजादावुत्तरपदे।
कुत्सितोऽश्वः कदश्वः। कदन्नं। तत्पुरुषे किं। कूष्ट्रो राजा। त्रौ च। कुत्सितास्त्रयः कत्त्रयः। रथवदयोश्च। कद्रथः। कद्वदः। तृणे च जा
तौ। कत्तृणं। का पथ्यक्षयोः। कापथं। काक्षः। अक्षशब्देन तत्पुरुषः। अक्षिशब्देन बहुव्रीहिर्वा। ईषदर्थे। ईषज्जलं काजलं। अजा
तावपि परत्वात्कादेशः। काम्लः। विभाषा पुरुषे। कापुरुषः। कुपुरुषः। अप्राप्तविभाषेयं। ईषदर्थे हि पूर्वविप्रतिषेधान्नित्यमेव।। क
वं चोष्णे। उष्णशब्दे उत्तरपदे कवं का च वा स्यात्। कवोष्णं। कोष्णं। कदुष्णं। पृषोदरादीनि यथोपदिष्टं। पृषोदरप्रकाराणि शिष्टैर्य
थोच्चारितानि तथैव साधूनि। पृषत् उदरं पृषोदरं। तलोपः। वारि वाहको बलाहकः। पूर्वपदस्य बः उत्तरपदादेश्च लत्वं। भवेद्वर्णा
वर्ण२ गमो हंसः सिंहो वर्णविपर्ययात्। गूढोत्मा विकृतेर्वर्णनाशात् पृषोदरं। दिक्शब्देभ्यस्तीरस्य तारभावो वा। दक्षिणतारं। द
क्षिणतीरं। उत्तरतारं। उत्तरतीरं। दुरो दाशनाशदभध्येषूत्वमुत्तरपदादेष्टुत्वं च। दुःखेन दाश्यते दूडाशः। दुःखेन नाश्यते दू

सि॰ द॰ ॥६२॥

दूणाशः। दुःखेन दभ्यते दूडभः। स्वलत्रिभ्यः। दंभेर्नलोपो निपात्यते। दुष्टं ध्यायतीति दूध्यः। आतश्चोपसर्गे कः। ध्रुवं तोः स्यां सीदंति
ऋसी ऋषो णमासन ऋसीति विग्रहः। ध्रुवषत् ऋस्वरस्यादेशः। सदेरधिकरणे उट्। आकृतिगणोऽयं संहितायां। अधिकारो
यं। कर्णे लक्षणस्याविष्टाष्टपंचमणिभिन्नछिन्नछिद्रस्रुवस्वस्तिकस्य। कर्णशब्दे परे लक्षणवाचकस्य दीर्घः। द्विगुणाक
र्णः। लक्षणवाचकस्य किं। शोभनकर्णः। अविष्टादीनां किं। विष्टकर्णः। अष्टकर्णः। भिन्नकर्णः। छिन्नकर्णः। स्रुवकर्णः। स्वस्तिक
कर्णः। नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ। क्विबंतेषु परेषु पूर्वपदस्य दीर्घः। उपानत्। नीवृत्। प्रावृट्। मर्मावित्। नीरुक्। अ
भीरुक्। ऋतीषट्। परीतत्। क्वौ किं। परिहणनं। विभाषा पुरुषे इत्यतो मंडूकप्लुत्या विभाषानुवर्तते। सा च व्यवस्थिता। तेन
नेह () गतिकारकयोरेव। पूरुक्। तिग्मरुक्। वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनां। कोटरादीनां वने परे किंशुलुकादीनां गिरौ परे
दीर्घः स्यात्संज्ञायां। वनं पुरगामिश्रकासिध्रकासारिकाकोटराग्रेभ्यः। वनशब्दस्योत्तरपदस्य णभ्य एव णत्वं नत्वन्येभ्यः। इह
कोटरांताः पंच दीर्घविधौ कोटरादयो बोध्याः। तेषां कृतदीर्घाणां णत्वविधौ निर्देशो नियमार्थः। अग्रेशब्दस्य तु विध्यर्थः। पुर
गावणं। मिश्रकावणं। सिध्रकावणं। सारिकावणं। कोटरावणं। एव किं। असिपत्रवनं। वनस्याग्रे अग्रेवणं। राजदंतादिषु निपा एभ्य
तनात्सप्तम्या अलुक्। प्रातिपदिकार्थमात्रे प्रथमा। किंशुलुकागिरिः। बले। बले प्रत्यये परे दीर्घः स्यात्संज्ञायां। कृषीवलः। मतौ
बह्वचोऽनजिरादीनां। अमरावती। अनजिरादीनां किं। अजिरवती। बह्वचः किं। व्रीहिमती। संज्ञायामित्येव। नेह। वलयवती। शरा
नष्ठ दीनां च। शरावती। इको वहेऽपीलोः। इगंतस्य दीर्घः स्याद्वहे। ऋषीवहं। कपीवहं। इकः किं। पिंडवहं। अपीलोः किं। पीलुवहं। अपी
ल्वादीनामिति वक्तव्यं। दारुवहं। उपसर्गस्य घञ्यमनुष्ये बहुलं। उपसर्गस्य बहुलं दीर्घः स्यात् घञंते परे न तु मनुष्ये। परीपा गणेन्द्रा
कः। परिपाकः। अमनुष्ये किं। निषादः। इकः काशे। इगंतस्योपसर्गस्य दीर्घः स्यात्काशे। वीकाशः। नीकाशः। इकः किं। प्रकाशः। ॥६२॥

अष्टनः संज्ञायां। उत्तरपदे दीर्घः। अष्टापदं। संज्ञायां किं। अष्टपुत्रः। चितेः कपि। एकचितीकः। द्विचितीकः। नरे संज्ञायां। विश्वानरः। मित्रे
चर्षौ। विश्वामित्रः। ऋषौ किं। विश्वामित्रो माणवकः। शुनोदंतदंष्ट्राकर्णकुंदवराहपुच्छपदेषु दीर्घो वाच्यः। श्वादंत इत्यादि। प्रनिर
न्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि। एभ्यो वनस्य णत्वं स्यात्। प्रवणं कार्ष्यवणं। इह णासरतोन्त्यत्वं।
विभाषौषधिवनस्पतिभ्यः। वनस्य णत्वं स्यात्। दूर्वावणं। दूर्वावनं। शिरीषवणं। शिरीषवनं। द्व्यच्त्र्यच्भ्यामेव। नेह। देवदारुवनं।
इरिकादिभ्यः प्रतिषेधो वक्तव्यः। इरिकावनं। मिरिकावनं। वाहनमाहितात्। आरोप्य यदुह्यते तद्वाचिस्थान्निमित्तात्परस्य
वाहननकारस्य णत्वं स्यात्। इक्षुवाहणं। आहितात्किं। इन्द्रवाहनं। इन्द्रस्वामिकं वाहनमित्यर्थः। वहतेर्ल्युटि। तिरछिदिर्दे
वरस्त्वे निपातनात्। पानं देशे। पूर्वपदस्थान्निमित्तात्परस्य पानस्य नस्य णः स्याद्देशे गम्ये। क्षीरपानं येषां ते क्षीरपा
णा उशीनराः। सुरापाणाः प्राच्याः। पीयत इति पानं। कर्मणि ल्युट्। वा भावकरणयोः। पानस्यैव। क्षीरपाणं। क्षीरपा
नं। गिरिनद्यादीनां वा। गिरिनदी। गिरिणदी। चक्रणितंबा। प्रातिपदिकान्तनुम्विभक्तिषु च। पूर्वपदस्थान्निमित्तात्पर
स्य एषु स्थितस्य नस्य णो वा स्यात्। प्रातिपदिकान्ते। माषवापिणौ। नुमि। व्रीहिवापाणि। विभक्तौ। माषवापेण। पक्षे माष
वापिना। विस्पादि उत्तरपदे यत्प्रातिपदिकं तदंतस्यैव णत्वं। नेह। गर्गाणां भगिनी गर्गभगिनी। अत एव नुम्ग्रहणं
कृतं। अंगस्य नुम्विधानात् तद्भक्तो हि नुम् न तूत्तरपदस्य। किं च प्रहिण्वन्तिसादौ हिवेर्नुमो णत्वार्थमपि नुम्ग्रह
णं। प्रेन्वनं। मिसादौ क्षुभ्नादित्वान्न। युवादेर्न। रम्ययूना। परिपक्वानि। एकाजुत्तरपदे णः। निसमिस्फकं। वृत्रहणौ।
हरिं मानयतीति हरिमाणी। नुमि। क्षीरपाणि। विभक्तौ। क्षीरपेण। रम्यविष्णा। कुमति च। कवर्गवत्युत्तरपदे प्राग्वत्।।
हरिकामिणौ। हरिकामाणि। हरिकामेण। पदव्यवायेऽपि। पदेन व्यवधाने णत्वं न स्यात्। माषकुंभवापेन। चतुरंगयो

सि॰कौ॰
॥९३॥

गेन। अतद्धित इति वाच्यं। आङ्गोमयेण। अपक्क गोमयेण। कुस्तुंबुरूणि जातिः। अत्र सुट् निपात्यते। कुस्तुंबुरु धान्याकं। स्त्री
त्वमतंत्र जातिः किं। कुतुंबुरूणि कुत्सितानीति तिंदुकीफलानीत्यर्थः। अपरस्पराः क्रियासातत्ये। अपरस्पराः सार्थं ग
च्छंति। सततमविच्छेदेन गच्छंतीत्यर्थः। क्रियेति किं। अपरपरा गच्छंति। अपरे च परे च सकृदेव गच्छंति। गोष्पदं सेविता
सेवित प्रमाणेषु। सुट् सस्य षत्वं च निपात्यते। गावः पद्यंते अस्मिन्देशे स गोभिः सेवितो गोष्पदः। असेविते। अगोष्पदान्य
रण्यानि। प्रमाणे गोष्पदमात्रं क्षेत्रं। असेवितेति किं। गोः पदं गोपदं। आस्पदं प्रतिष्ठायां। आत्मयापनाय स्थानमेषु सुट् निपात्य
ते। प्रतिष्ठेति किं। आपदापदं। आश्चर्यमनित्ये। अद्भुते सुट्। आश्चर्यं यदि स भुंजीत। अनित्ये किं। आचर्यं कर्म शोभनं। वर्चे
स्के वस्करः। कुत्सितं वर्चो वर्चस्कं। अत्र मलं तस्मिन्सुट्। अवकीर्यत इत्यवस्करः। वर्चस्के किं। अवकरः। अपस्करो रथांगं।
अपकरोऽन्यः। विष्किरः शकुनौ विकिरो वा। पक्षे विकिरः। वावचनेनैव सुड्विकल्पे सिद्धे विकिरग्रहणं तस्यापि शकुने र
न्यत्र प्रयोगो मा भूदिति वृत्तिस्तत्व। भाष्यविरोधात्। प्रतिष्कशश्च कशेः। कशगतिशासनयोरिस्य प्रतिपूर्वस्य प
चाद्यचि सुट् निपात्यते षत्वं च। सहायः पुरोयायी वा प्रतिष्कश इत्युच्यते। कशेरिति किं। प्रतिगतः कशां प्रतिकशोऽश्वः।
यद्यपि कशेरेव कशा तथापि कशेरिति धातोर्ग्रहणं उपसर्गस्य प्रतेर्ग्रहणार्थं। तेन धातोरुपसर्गान्न। प्रस्कण्व
हरिश्चंद्रावृषी। हरिश्चंद्रग्रहणमत्रार्थं। ऋषी किं। प्रकण्वो देशः। हरिचंद्रो माणवकः। मस्करमस्करिणौ वेणुप
रिव्राजकयोः। मकरशब्दोऽव्युत्पन्नस्तस्य सुडिनिश्च निपात्यते। वेणाविति किं। मकरो ग्राहः। मकरी समुद्रः। कास्ती
राजस्तुंदे नगरे। ईषत्तीरमस्येति कास्तीरं नाम नगरं। अजस्येव तुंदमस्य अजस्तुंदं नाम नगरं। अजतुंदं। +नग
रे किं। कातीरं। +कारस्करो वृक्षः। कारं करोतीति कारस्करो वृक्षः। अन्यत्र कारकरः। केचित्तु कस्कादिष्विदं पठं

गणेश
॥९३॥

तिष्ठत्सु तेषु । पारस्करप्रभृतीनि च संज्ञायां । एतानि ससुट्कानि निपात्यन्ते नाम्नि । पारस्करः । किष्किंधा । तद्बृहतोः करपत्योश्चोरदे
वतयोः सुट् तलोपश्च । तास्सर्वं चर्त्वेन दकारोऽपि लोप्यः । तद्बृहतोर्दकारतकारौ तु लुप्येते करपत्योस्तु सुट् । चोरदेवतयोरिति सं
मुदाययोः पाधिः । तस्करः । बृहस्पतिः । प्रायस्य चित्तिचित्तयोः । प्रायश्चित्तिः । प्रायश्चित्तं । वनस्पतिरित्यादि आकृतिगणः ॥ इति समासा
श्रयविधयः ॥ छ ॥ समर्थानां प्रथमाद्वा । इदं पदत्रयमधिक्रियते प्राग्दिश इति यावत् । सामर्थ्यं परिनिष्ठितत्वं । कृतसंधि
कार्यत्वमिति यावत् । प्राग्दीव्यतोऽण् । तेन दीव्यतीत्यतः प्रागण् अधिक्रियते । अश्वपत्यादिभ्यश्च । एभ्योऽण् स्यात् प्राग्दीव्यतीये
ष्वर्थेषु । वक्ष्यमाणस्य ण्यस्यापवादः । तद्धितेष्वचामादेः । ञिति णिति च तद्धिते परेऽचामादेरचो वृद्धिः स्यात् । किति च । किति तद्धि
ते च तथा । अश्वपतेरपत्यादि आश्वपतं । गाणपतं । गाणपत्यो मन्त्र इति तु प्रामादिकमेव । दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः । दि
त्यादिभ्यः पत्युत्तरपदाच्च प्राग्दीव्यतीयेष्वर्थेषु ण्यः स्यात् । अणपवादः । दैत्यः । अदितेरादित्यस्य वा अपत्यादि आदित्यः । प्राजा
पत्यः । यमाच्चेति काशिकायां । याम्यः । पृथिव्या ञाञौ । पार्थिवा । पार्थिवी । देवस्य यञञौ । दैव्यं च । बहिषष्टिलोपो यञ्च । बाह्यः ।
ईकक्च । बाहीकः । स्थाम्नोऽकारः । अश्वत्थामः । पृषोदरादित्वात्सस्य तः । भवार्थे तु लुग्वाच्यः । अश्वत्थामा । लोम्नोऽपत्येषु बहुषु दै र
बाह्वादीञोऽपवादः । उडुलोमाः । उडुलोमानः । बहुषु किं । औडुलोमिः । गोरजादिप्रसंगे यत् । गव्यं । अजादिप्रसंगे किं । गोभ्यो हितं गव्यं ।
आगतं गोरूप्यं । उत्सादिभ्योऽञ् । औत्सः । अग्निकलिभ्यां ढग्वक्तव्यः । अग्नेरपत्यादि आग्नेयः । कालेयः । इत्यपत्यादिविकारा
न्तार्थसाधारणप्रत्ययाः ॥ ॥ स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् । धान्यानां भवने इत्यतः प्रागर्थेषु स्त्रीपुंसाभ्यां क्रमान्नञ्स्नञौ
स्तः । स्त्रैणः । पौंस्नः । वत्सर्थे न । स्त्रीपुंवच्चेति ज्ञापकात् । द्विगोर्लुगनपत्ये । द्विगोर्निमित्तं यस्तद्धितोऽजादिरनपत्यार्थः प्राग्दीव्यती
यस्तस्य लुक् । पंचसु कपालेषु संस्कृतः पुरोडाशः पंचकपालः । द्विगुनिमित्तत्वे तु किं । पंचकपालस्येदं पांचकपालं । अजादि किं ।
पंचगर्गरूप्यं । अनपत्ये किं । द्वयोर्मित्रयोरपत्यं द्वैमित्रिः । गोत्रेऽलुगचि । अजादौ प्राग्दीव्यतीये विवक्षिते गोत्रप्रत्ययस्यालुक् स्यात् ।

नस्यैहितमिघ्नती तिष्ठः॥२ ननुउपगुम्नइति स्थिते ओर्गुणस्यरत्वादवो नकितीयथा भाव्यं अतआहद्वद्धिरिति। सक्रुति न्यायस्यैवात्र श्रयणात्॥११

अयस्यवहुत्वविवक्षायायञञोश्चेतिलुक्सचाञादिप्रत्ययेविवक्षितेऽनेनप्रतिषिद्ध इतिगार्ग्यस्य दात्वेकृते तस्य ईयादेशः यस्येतिचे साकारलोपेयलोपार्थमाह अपत्यस्य चेति॥२

सि॰ सु॰ गर्गाणां छात्राः। वृद्धाच्छः। आपत्यस्य च तद्धितेनाति। हलः परस्यापत्ययकारस्य लोपः स्यात्तद्धिते न त्वाकारे। गार्गीयाः। प्राग्दीव्यतः किं।

गर्गेभ्योहितं गर्गीयं। अचि किं। गर्गेभ्य आगतं गर्गरूप्यं। यूनि लुक्। प्राग्दीव्यतीये ऽजादौ विवक्षिते युवप्रत्ययस्य लुक्। ग्लुचुकस्य

गोत्रापत्यं [illegible] ग्लुचुकायनिः। वक्ष्यमाणः फिञ्। ततो यून्यण्। ग्लौचुकायनः। तस्य छात्रो ग्लौचुकायनः। प्रागणे लुकि कृते वृद्धत्वाभा

वात्छोन। वैलादिभ्यश्च। एभ्यो युवप्रत्ययस्य लुक्। पीलाया वा। साल्वेयगान्धारिभ्यां च। तस्मादणेव च इति फिञ्। तस्य लुक्। पैलः पिता पुत्रश्च।

[illegible] तद्राजाच्चाणः। आङ्गः। अङ्गगर्धोर्षेष्ठेणतानि तद्राजसंज्ञान्यत एव। इति फिञ्लुक्। आङ्गः पिता पुत्रश्च।

यञ्ञ्च तदन्ताद्युवप्रत्ययस्य लुक्स्यात्तच्चेद्धात्रं प्राचां भवति। पुन्नागोरेरस्यापत्यं। अतइञ्। यञिञोश्चेति फक्। पान्नागारिः पि

तापुत्रश्च। प्राचां किं। दाक्षिः पिता। दाक्षायणः पुत्रः। नतौल्वलिभ्यः। तौल्वल्यादिभ्यः परस्य युवप्रत्ययस्य लुक् न। एवं च प्राप्तः।

तौल्वलः। ततः इञ्। फक्। तौल्वलिः पिता। तौल्वलायनः पुत्रः। फक्फिञोरन्यतरस्यां। यूनि लुगिति निवृत्तौ लुक् प्राप्ते विकल्पार्थं

सूत्रं। कास्यायनस्य छात्राः कातीयाः कास्यायनीयाः। यस्कस्यापत्यं यास्कः। शिवाद्यण्। तस्यापत्यं युवा यास्कायनिः। अ

णोद्व्यचः इति फिञ्। तस्य छात्राः यास्कीयाः यास्कायनीयाः। तस्यापत्यं। समर्थानां प्रथमाद्वा। तेनैकदिक्। समर्थेदपत्ये वैतुक्तावक्ष्य

माणश्च प्रत्ययो वा स्यात्। उपगोरपत्यमौपगवः। आदिवृद्धिः रस्योपधा वृद्धिं बाधते। तस्येदमित्यपत्येऽपि बाधनार्थं

कृतं भवेत्। उत्सर्गः शेषएवासौ। वृद्धान्यस्य प्रयोजनं। भानोरपत्यं भानवः। कृतसंधेः किं। सौ श्रितिः। अव्ययः। तत्र हपरिभाषपा

सानुश्रितिर्मा भूत्। समर्थपरिभाषया नेह। वस्त्रमुपगोरपत्यं चैत्रस्य। प्रथमात्किं। अपत्यवाचकात्षष्ठ्यन्तात्मा भूत्। वा

ग्रहणाद्वाक्यमपि। देवयज्ञीति सूत्रे। दस्यतरस्यां ग्रहणानुवृत्तेः समासोऽपि। उपगवपत्यं। ओर्गुणः। ओपगवः। आभ्य

पतः। दैत्यः। औत्सः। स्त्रैणः। पौंस्नः। अपत्यं पौत्रप्रभृति गोत्रं। अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात्। जीवतितु ॥६४॥

५ एकार्थीभावलक्षणं सामर्थ्यं

५ रागद्वेषवैलक्षण्यसत्वेऽपितदनादरेणक्षिप्तितिस्येदमितिइदमर्थेअपत्यसमस्तविकारादीनांअंतर्भावादपत्येऽपिप्राप्तेकिमनेनतस्यापत्यमितिसूत्रेणेत्यर्थःप्राग्दीव्यतइत्यस्याघ्यर्थेतथापियोगविभागःकिमर्थः

५ समाधत्तेबाधनार्थमिति।तस्येदमितिसस्यवृद्धाचकेवलाच्छस्त्वबाधनार्थंएवकृत्सूत्रंभवेदित्यर्थः।ननुतस्येदमित्यस्योत्सर्गत्वादपवादस्यवृद्धाच्छस्यचशैषिकत्वादपत्यार्थेप्रसक्तिरेवनास्तिअपत्यसाधितदनुर्थो

५ पर्यवसेय्यो यो योऽर्थःसशेषइत्यपगमादितआह।उत्सर्गःशेषएवासाविति।असौअपत्यार्थःअपत्यभावः।असतियोगविभागेअदंतवाह्वादिप्रकृतिसंबद्धस्यैवयापत्यार्थस्यापयोगादुपग्वादिप्रकृतिसंबद्ध

५ शेपसार्थः शेषएवस्यात्तथा चाणं बाधित्वा भाव्यादिभ्यो वृद्धाच्छः प्रसज्यते। योगविभागेतुकृते प्रकृतिसामान्यसंबद्धस्यापत्यार्थस्योपयोगात् शेषत्वाभावेन छस्य प्राप्तिरेव नास्तीति। ननुउपग्वादेरद्व्य

गर्गादि ॥६४॥

[illegible]

वंश्ये युवा। वंश्ये पित्रादौ जीवति पौत्रादेर्यदपत्यं चतुर्थादि तद्युवसंज्ञमेव स्यान्न तु गोत्रसंज्ञं। भ्रातरि च ज्यायसि। ज्येष्ठे भ्रातरि जीव
ति कनीयांश्चतुर्थादिर्युवा स्यात्। वाऽन्यस्मिन् सपिंडे स्थविरतरे जीवति। भ्रातुरन्यस्मिन् सपिंडे स्थविरतरे जीवति पौत्रप्रभृतेरपत्यं
जीवदेव युवसंज्ञं स्यात्। एकं जीवतिग्रहणमपत्यस्य विशेषणं द्वितीयं सपिंडस्य। तरप्निर्देश उभयोरुत्कर्षार्थः। स्थानेन वयसा
चोत्कृष्टे पितृव्ये मातामहे भ्रातरि वा जीवति। गार्ग्यस्यापत्यं गार्ग्यो गार्ग्यायणो वा। स्थविरे इति किं। स्थानेन वयोन्यूनेन गार्ग्य एव। जीव
ति किं। मृते मृतो वा गार्ग्य एव। वृद्धस्य च पूजायां। इति वार्त्तिकं। गोत्रस्यैव वृद्धसंज्ञा प्राचां। गोत्रस्य युवसंज्ञा पूजायां गम्यमानायां। तरे ४
तत्र भवान् गार्ग्यायणः। पूजेति किं। गार्ग्यः। यूनश्च कुत्सायां। गोत्रसंज्ञेति वाच्यं। गार्ग्यो जाल्मः। कुत्सेति किं। गार्ग्यायणः। ए
को गोत्रे। गोत्रे एक एवापत्यप्रत्ययः स्यात्। उपगोर्गोत्रापत्यं औपगवः। गार्ग्यः। नाडायनः। गोत्रे स्वैको न संख्या ना प्रत्यया
नापरंपरा। यञिञश्च लुङ्न सख्येभ्योः। निष्ठासेतिः प्रसज्यते॥१॥ अपत्यं पितुरेव स्यात्ततः प्राचामपीति च। मतभेदेन तद्रूपस्यै सू
त्रमेतत्तथोत्तरं। पितुरेवापत्यमिति पक्षे हि उपगोस्तृतीये वाच्ये औपगवादि स्यात्। चतुर्थे त्वजीव[?] ज्येष्ठे मृते द्येवुं औप
गवेः फक्। इत्थं फगिञोः परंपरायां सूलीःछं ततमे गोत्रे एकोनत्रिंशत प्रत्ययाः स्युः। पितामहादीनामपीति मुख्यपक्षे तु तृती
येवाच्ये उपगोरण् इष्टसिद्धेऽपि अणंतादिञपि स्यात्। चतुर्थे ततः फगिति फगिञोः परंपरायां शततमे गोत्रेऽष्टनवतिर्
निष्टप्रत्ययाः स्युः। अतो नियमार्थमिदं सूत्रं। एवमुत्तरसूत्रेऽपि। अपत्यं पितुरेव स्यात्। गोत्राद्यून्यस्त्रियां। यून्यपत्ये गोत्रप्रत्ययान्तादेव प्रत्ययः
स्यात्। स्त्रियां तु न युवसंज्ञा। गर्गस्य युवापत्यं गार्ग्यायणः। स्त्रियां गोत्रत्वादेक एव प्रत्ययः। अत इञ्। अदंतयेसातिपदिकेतेतप्र
कृतिकोंतषष्ठ्यंतादिञ् स्यादपत्ये। दाक्षिः। बाह्वादिभ्यश्च। बाहविः। औडुलोमिः। आकृतिगणोऽयं। सुधातुरकङ् च। सौ
धातुरपत्यं सौधातकिः। व्यासवरुडनिषादचंडालबिंबानां चेति वक्तव्यं। न्यासाभ्यापरांताभ्यांर्वो तु ताभ्यामेव च॥

सि·कौ
॥६५॥

पदांताभ्यां यकारवकाराभ्यां परस्य न वृद्धिः किंतु ताभ्यां पूर्वौ क्रमादैचावागमौ स्तः। वैयासकिः। वाहुडकिः। इत्यादि। गोत्रे कुंजादि
भ्यश्च्फञ्। व्रातच्फञोरस्त्रियां। व्रातवाचिभ्यः [redacted] च्फञन्ते [redacted] भ्यश्च स्वार्थे ञ्यः स्यात् न तु स्त्रियां। कौंजायन्यः। बहुत्वेन प्राजत्वात्
लुकं वक्ष्यते। आ ध्रायन्यः। स्त्रियां कौंजायनी। गोत्रत्वेन जातित्वात् ङीप्। अनंतरापत्ये कौंजिः। नडादिभ्यः फक्। गोत्र इत्येव। नाडा
यनः। चारायणः। अनंतरो नाडिः। हरितादिभ्योऽञः। एभ्योऽञन्तेभ्यो ऽपत्ये फक्। हारितायनः। इह गोत्राधिकारेऽपि सामर्थ्या
द्युव्यपत्ये। नहि गोत्राद् परो गोत्रप्रत्ययः। विदाद्यन्तर्गणो हरितादिः। यञिञोश्च। गोत्रे यौ यञिञौ तदंतात् फक् स्यात्। अनातीत्यु
के तापत्यस्येति यलोपेन। गार्ग्यायणः। दाक्षायणः। शरद्वच्छुनकदर्भाद्भृगुवत्साग्रायणेषु। गोत्रे फकि। अत्रिञोरपवादः।
आद्यो विदादिः। शारद्वतायनो भार्गवश्चेत्। शारद्वतोऽन्यः। शौनकायनो वात्स्यश्चेत्। शौनकोऽन्यः। दार्भायण आग्रायणश्चेत्।
दार्भिरन्यः। द्रोणपर्वतजीवंतादन्यतरस्यां। एभ्यो गोत्रे फग्वा। द्रोणायनः। द्रौणिः। पार्वतायनः। पार्वतिः। जैवंतायनः। जैवंतिः।
गृनादिरिह दृष्टः। अपत्यमात्रे ऽनंतरे तूपचारात्। अनृष्यानंतर्ये विदादिभ्योऽञ्। एभ्योऽञ् गोत्रे ये त्वत्रानृषयस्तेभ्यस्त्वानंत
र्ये। सूत्रे स्यादर्थेऽञ्। बिदस्य गोत्रं बैदः। अनंतरे तु बैदिः। वाहादेराकृतिगणत्वादिञ्। पुत्रस्यापत्यं पौत्रः। दौहित्रः। गर्गादिभ्यो यञ्।
गोत्र इत्येव। गार्ग्यः। वात्स्यः। यञञोश्च। गोत्रे यद्यञन्तमञन्तं च तदवयवयो रेतयोर्लुक् स्यात्। तत्कृते बहुत्वे न तु स्त्रियां। गर्गाः। व
त्साः। विदाः। उर्वाः। तत्कृते इति किं। प्रियगार्ग्याः। स्त्रियां तु गार्ग्यः स्त्रियः। गोत्रे किं। द्वैप्याः। औत्साः। प्रवराध्याय प्रसिद्धमिह गोत्रं। ते
नेह न। पौत्राः। दौहित्राः। मधुबभ्रोर्ब्राह्मणकौशिकयोः। गोत्रे यञ्। माधव्यो ब्राह्मणः। माधवोऽन्यः। बाभ्रव्यः। कौशिकः। बाभ्रवो गणेश
ऽन्यः। बभ्रुशब्दस्य गर्गादिपाठात् सिद्धे नियमार्थं सूत्रं। गर्गादिपाठफलं तु लोहितादिकार्यार्थं। बाभ्रव्यायणी। कपिबोधादांगिरसे। ॥६५॥

गोत्रे यञ् स्यात्। काप्यः। बौध्यः। आङ्गिरसे किं। कापेयः। बौधिः। वतण्डाच्च। आङ्गिरस इत्येव। वातण्ड्यः। अनाङ्गिरसे तु गर्गादौ शिवादौ
च पाठाद्यञणौ। वातण्ड्यः। वातण्डः। लुक् स्त्रियां। वतण्डाच्चेति विहितस्य स्त्रियां लुक् स्यात्। शार्ङ्गरवादित्वात् ङीन्। वतण्डी। अना
ङ्गिरसे तु वातण्ड्यायनी। लोहितादित्वात् ष्फः। आङ्गिरसी तु वातण्डी। ऋषित्वादृष्यण्णः ष्वङ्न। अश्वादिभ्यः फञ्। गोत्रे। आश्वाय
नः। पुंसि जाते। पुंसीति प्रकृतिविशेषणं। जातस्य गोत्रं जातायनः। पुंसीति किं। जाताया अपत्यं जातेयः। भर्गात्त्रैगर्ते। भार्गायणः।
त्रैगर्तः। भार्गिरन्यः। शिवादिभ्योऽण्। गोत्र इति निवृत्तं। शिवस्यापत्यं शैवः। गाङ्गः। पक्षे तिकादित्वात् फिञ्। गाङ्गायनिः। शुभ्रादि
त्वाड्ढक्। गाङ्गेयः। अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः। अवृद्धेभ्यो नदीमानुषीनामभ्योऽण् स्यात् ढकोऽपवादः। यामुनः।
नार्मदः। वितस्ताया अपत्यं वैतस्तः। अवृद्धाभ्यः किं। वासवदत्तेयः। नदीमानुषीभ्यः किं। वैनतेयः। तन्नामिकाभ्यः किं। शोभनाया
अपत्यं शौभनेयः। ऋष्यन्धकवृष्णिकुरुभ्यश्च। ऋषयो मन्त्रद्रष्टारः। वासिष्ठः। वैश्वामित्रः। अन्धकेभ्यः। श्वाफल्कः। वृष्णिभ्यः।
वासुदेवः। आनिरुद्धः। शौरिरिति तु बाह्वादित्वात्। कुरुभ्यः। नाकुलः। साहदेवः। इञ एवायमपवादो मध्येऽपवादन्यायात्॥
अत्रिशब्दात्तु परत्वाड्ढक्। आत्रेयः। मातुरुत्संख्यासम्भद्रपूर्वायाः। संख्यादिपूर्वस्य मातृशब्दस्योदादेशः स्यादण्प्रत्यय
श्च। द्वैमातुरः। षाण्मातुरः। सांमातुरः। भाद्रमातुरः। आदेशार्थं वचनं प्रत्ययस्तूत्सर्गेणैव सिद्धः। स्त्रीलिङ्गनिर्देशोऽर्था
पेक्षः। तेन धान्यमातुर्न। संख्येति किं। सौमात्रः। शुभ्रादित्वाद्वैमात्रेयः। कन्यायाः कनीन च। ढकोऽपवादेऽण् तत्संनियोगेन क
नीनादेशश्च। कानीनो व्यासः। कर्णश्च। अनूढाया एवापत्यमित्यर्थः। विकर्णशुङ्गछगलाद्वत्सभरद्वाजात्रिषु। अपत्येऽण्।
वैकर्णो वात्स्यः। वैकर्णिरन्यः। शौङ्गो भारद्वाजः। शौङ्गिरन्यः। छागलेऽ आत्रेयः। छागलिरन्यः। केचित्तु शुङ्गेत्याकारान्तं पठन्ति। तेषां ढ
क् प्रत्युदाहरणं। शौङ्गेयः। पीलाया वा। तन्नामिकाणं बाधित्वा ढक् परत्वात्। प्राप्ते पक्षेऽण् विधीयते। पीलाया अपत्यं पैलः॥

४ टेपरे। प्रवाहणस्यापत्यं प्रावाहणेयः। प्रवाहणेयः। तस्यापत्यम्। टे। तस्य प्रवाहणशब्दस्योत्तरपदस्याचामादेर्वा वृद्धिः पूर्वपदस्य तु वा॥ ५

सि॰ कु॰ पैलेयः। ढक्च मण्डूकात्। वा दण्। पक्षे इञ्। माण्डूकेयः। माण्डूकः। माण्डूकिः। स्त्रीभ्यो ढक्। स्त्रीप्रत्ययान्तेभ्यो ढक् स्यात्। वैनतेयः। बाहु
॥ ६६॥ दित्वात् सौमित्रिः। शिवादित्वात् सापत्नः। द्व्यचः। स्त्रीप्रत्ययान्तेभ्यो ढक् स्यादपत्ये। तन्नामिकाणः पवादः। दात्तेयः। पार्थ इति तु
तस्येदमित्यण्। इतश्चानिञः। इकारान्ताद्व्यचोपत्ये ढक् स्यान्न तु इञन्तात्। दौलेयः। नैधेयः। शुभ्रादिभ्यश्च। ढक् स्यात्। शु
भ्रस्यापत्यं शौभ्रेयः॥ विकर्णकुषीतकात् काश्यपे। अपत्ये ढक्। वैकर्णेयः। कौषीतकेयः। अन्यो वैकर्णिः। कौषीतकिः। भ्रु
वो वुक् च। वात् ढक्। भ्रौवेयः। प्रवाहणस्य ढे। प्रवाहणशब्दस्योत्तरपदस्याचामादेर्वा वृद्धिः पूर्वपदस्य तु वा। प्रवाहणे
यस्यापत्यं प्रावाहणेयिः। प्रवाहणेयिः। बाह्वतादितन्निमित्ता वृद्धिः टेराश्रयणविकल्पेन बाधितुं न शक्यते इति सूत्रारम्भः॥
कल्याण्यादीनामिनङ्। इनङादेशो ढक् च। काल्याणिनेयः। बान्धकिनेयः। कुलटाया वा। इनङ् मात्रं विकल्प्यते। ढक्
तु नित्यं एव। कौलटिनेयः। कौलटेयः। सती भिक्षुकी अत्र कुलटा। या तु व्यभिचारार्थं कुलान्यटति तस्याः क्षुद्राभ्यो
वेति पक्षे ढ्रक्। कौलटेरः। हृद्भगसिन्ध्वन्ते पूर्वपदस्य च। हृदाद्यन्ते पूर्वोत्तरपदयोरचामादेर्वृद्धिः स्यात्। ञ्णिति कि
ति वा। सुहृदोऽपत्यं सौहार्दः। सुभगाया अपत्यं सौभागिनेयः। सक्तुप्रधानाः सिन्धवः सक्तुसिन्धवः। तेषु भवः साक्तु
सैन्धवः। चटकाया ऐरक्। चटकस्येति वाच्यम्। लिङ्गविशिष्टपरिभाषया स्त्रिया अपि। चटकस्य चटकाया वा अपत्यं चाटके
रः। स्त्रियामपत्ये लुग्वक्तव्यः। तयोरेव स्त्र्यपत्ये चटका। गोधाया ढ्रक्। गोधेरः। शुभ्रादित्वात् पक्षे ढक्॥
गौधेयः। आरगुदीचाम्। गोधारः। रकारो विशेषणार्थः। रकारोच्चारणमन्यतो विधानार्थं। जडस्यापत्यं जाडारः। पण्डस्यापत्यं गणेश
पाण्डारः। क्षुद्राभ्यो वा। अङ्गहीनाः शीलहीनाः क्षुद्रास्ताभ्यो वा द्रक्। पक्षे ढक्। काणेरः। काणेयः। दासेरः। दासेयः॥ ॥ ६६॥

नतु स्त्रियां मित्रयवः। अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च। एभ्यो गोत्रप्रत्ययस्य लुक् स्यात् बहुत्वे ७

पितृष्वसुश्छण। अस्य लोपापवादः। पैतृष्वस्रीयः। ढकि लोपः। पितृष्वसुरन्त्यलोपः स्यात् ढकि। अत एव ढक्। पैतृष्वसेयः। मातृष्वसुश्च। पितृ
ष्वसुर्यदुक्तं तदस्यापि स्यात्। मातृष्वस्रीयः। ढकि लोपः। मातृष्वसेयः। चतुष्पाद्भ्यो ढञ्। ढे लोपोऽकद्र्वाः। कद्रूमित्रस्योवर्णान्तस्य
लोपः स्यात् ढे परे। कामण्डलेयः। कमण्डलुशब्दश्चतुष्पाज्जातिविशेषः। गृष्ट्यादिभ्यश्च। एभ्यो ढञ् स्यात्। अण एव ढकोऽपवादः।
गार्ष्टेयः। मित्रयोरपत्यं। अपत्ये प्राप्ते ढञ्। केकयमित्रयुप्रलयानां यादेरियः। एषां यकारादेरियादेशः स्यात् ञिति णिति किति
३५ तिवतश्चिते परे। इतियादेशे प्राप्ते। दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वा
कमैत्रेयहिरण्मयानि। एतानि निपात्यन्ते इति लोपः। मैत्रेयः। मैत्रेयौ। यस्कादिभ्यो गोत्रे। एभ्योऽपत्यप्रत्ययस्य लुक् स्यात् तत्कृते
बहुत्वे। अत्रयः। भृगवः। कुत्साः। वसिष्ठाः। गोतमाः। अङ्गिरसः। बह्वच इञः प्राच्यभरतेषु। बह्वचः परो य इञ् प्राच्यगोत्रे भर
तगोत्रे च वर्तमानस्तस्य लुक् स्यात्। पन्नागाराः। युधिष्ठिराः। न गोपवनादिभ्यः। एभ्यो गोत्रप्रत्ययस्य लुक् न। बिदाद्यन्तर्गणोऽयं। गोप
वनाः। शैग्रवाः। तिककितवादिभ्यो द्वन्द्वे। एभ्यो गोत्रप्रत्ययस्य बहुषु लुक् स्याद् द्वन्द्वे। तैकायनयश्च कैतवायनश्च तिकादिभ्यः फिञ्।
तस्य लुक्। तिककितवाः। उपकादिभ्योऽन्यतरस्यामद्वन्द्वे। एभ्यो गोत्रप्रत्ययस्य बहुत्वे लुक् वा स्यात् द्वन्द्वे चाद्वन्द्वे च। भ्राष्टककपि य१
ष्ठलाः। भ्राष्टकिकापिष्ठलयः। लमकाः। लामकायनाः। आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्। एतयोरवयवस्य गोत्रप्रत्ययस्याण् कृ६
यञश्च बहुषु लुक् स्यात्। अवशिष्टप्रकृतिभागस्य यथासंख्यमगस्तिकुण्डिनच् एतावादेशौ स्तः। अगस्तयः। कुण्डिनाः। राजश्वशु
राद्यत्। राज्ञोऽपत्ये जातावेवेति वाच्यं। ये चाभावकर्मणोः। यादौ तद्धिते परे न प्रकृत्या स्यात् न तु भावकर्मणोः। राजन्यः। श्वशुर्यः। जातिग्र
हणात् क्षत्रियादन्यत्र राजनः। अन्। अणि अन् प्रकृत्या स्यात्। इति टिलोपो न। अभावकर्मणि किं। राज्ञः कर्म भावो वा राज्यं। संयोगादिश्च। इन्
प्रकृत्याऽणि परे। चक्रिणोऽपत्यं चाक्रिणः। नमपूर्वोऽपत्येऽवर्मणः। मपूर्वोऽन् प्रकृत्या स्यादपत्ये। भाद्रसामः। मपूर्वः किं। सौत्वनः। अपत्ये किं।

सि·कौ· चर्मण्णपरिरतश्चामेर्णरथः। अवर्मणः किं। नर्मैवर्मणः पर्यां वाक वर्मणः। वाहितनाम्न इति वाच्यं। हितनाम्नोऽपत्यं हैतनाम
नः। हैतनामः। ब्राह्मोजातौ। दौ गवि भागोत्र कर्तव्यः। ब्राह्मेति निपात्यते। अनपत्ये टिलोपः। ब्राह्मी हविः। ततो जातौ। अपत्ये जाताव
॥६७॥ ग्नि ब्रह्मणः टिलोपो न स्यात्। आत्मन् एः पत्यं ब्राह्मणः। अपत्ये किं। ब्राह्मी ओषधिः। औक्षमनपत्ये। अलि टिलोपो निपात्यते।
न४ औक्षं पदं। अपत्ये किं। उक्ष्णोऽपत्यमौक्ष्णः। षपूर्वहन्धृतराज्ञामणि। षपूर्वो योऽन् तस्य हनादेश्च भस्यातो लोपोऽणि। ताक्ष्णः।
भ्रौणघ्नः। धार्तराज्ञः। अपत्य संयाते राज्ञः। घेति किं। सामनः। अणि किं। ताक्ष्ण्यः। क्षत्राद्घः। क्षत्रियः। जाताविस्येव। क्षात्रिरन्यः।
कुलात्खः। कुलीनः। तदन्तादपि उत्तरसूत्रे अपूर्वपदादिति लिङ्गात्। आढ्यकुलीनः। अपूर्वपदादन्यतरस्यां यड्ढकञौ। कुला
दित्येव। पक्षे खः। कुल्यः। कौलेयकः। कुलीनः। पदग्रहणं किं। बहुकुल्यः। बाहुकुलेयकः। बहुकुलीनः। दुष्कुलाड्ढक्। पक्षे ख
दौष्कुलेयः। + महाकुलादञ्खञौ। अन्यतरस्यामित्यनुवर्तते। पक्षे खः। माहाकुलः। माहाकुलीनः। महाकुलीनः। दुष्कु
लीनः। स्वसुश्छः। स्वस्रीयः। भ्रातुर्व्यच्च। चाच्छः। अप एणपवादः। भ्रातृव्यः। भ्रात्रीयः। व्यन्सपत्ने। भ्रातुर्व्यन्स्याद्दपत्ये प्रकृति
प्रत्ययसमुदायेन शत्रौ वाच्ये। भ्रातृव्यः। शत्रुः। पाप्मना भ्रातृव्येणेति तूपचारात्। रेवत्यादिभ्यष्ठक्। ठस्येकः। अगात्सदृस्य ठस्य
इकादेशः स्यात्। रैवतिकः। गोत्रस्त्रियाः कुत्सने ण च। गोत्रं या स्त्री तद्वाचकाद्ध्दा ठठको स्तः। कुत्सायां सामर्थ्याद्युनि।
४ भस्याढे तद्धिते ति गार्ग्यो अपत्यं गार्गो गार्गिको वा जाल्मः। वृद्धाद्वा फाग्ये शाठाकाहाठको। यस्येति लोपः। आपत्यस्य स्थितिये लोपः। वृद्धाट्ठक्सौवीरेषु
बहुलं। सुवीरदेशोद्भवाः सौवीराः। वृद्धात्सौवीरगोत्राद्बहुलं ठक् स्यात्कुत्सायां। भागवित्तेर्भागवित्तिकः। पक्षे फक्। भाग
वित्तायनः। केवलाफिञन्तात्सौवीरगोत्रादपत्ये छ ठक् वक् कुत्सायां। यमुन्दस्यापत्यं यामुन्दायनिः। तिकादिभ्यः फिञ्। तस्यापत्य गर्णेशा
यामुन्दायनीयः। यामुन्दायनिकः। कुत्सायां किं। यामुन्दायनिः। औत्सर्गिकस्याणि एव क्षत्रियेति लुक्। सौवीरेषु किं। तैकायनिः। ॥६७॥

फांटाहृतिमिमताभ्यां णफिञौ । सौवीरेषु नेह यथासंख्यं । अल्पाच्तरस्य परनिपाताल्लिंगादिति वृत्तिः । भाष्ये तु यथासंख्य
मेवस्थितं । फांटाहृतः । फांटाहृतायनिः । मैमतः । मैमतायनिः । कुर्वादिभ्यो ण्यः । अपत्ये कौरव्याः । औस्नण्यः । वावदूक्यः । सम्राजः
क्षत्रिये । साम्राज्यः । साम्राज्योन्यः । सेनांतलक्षणकारिभ्यश्च । एभ्यो ण्यः । हारिषेण्यः । लाक्षण्यः । कारिः शिल्पी तस्मात् तान्तुवा
य्यः । कौभकार्यः । नापित्यः । उदीचामिञ् । हारिषेणिः । लाक्षणिः । तान्तुवायिः । कौभकारिः । नापितान्तु परत्वात्फिञेव । नापिताय
निः । तक्ष्णोण उपसंख्यानं । ताक्ष्णः । पक्षे ताक्षण्यः । तिकादिभ्यः फिञ् । तैकायनिः । कौशल्यकार्माार्याभ्यां च । अपत्ये फिञ् इञो
पवादः । परमप्रकृतेरेवायमिष्यते । प्रत्ययसन्नियोगेन प्रकृतिरूपं निपात्यते । कुशालस्यापत्यं कौशल्यायनिः । कर्मारस्यापत्यं
कार्मार्यायणिः । छागवृषयोरपि । छागायनिः । वार्ष्यायणिः । अणो द्व्यचः । अपत्ये फिञ् । इञोपवादः । कार्त्रीयणिः । अणः किं ।
दाक्षायणः । द्व्यचः किं । औपगविः । त्यदादीनां वा फिञ् वाच्यः । त्यादायनिः । त्यादः । उदीचां वृद्धादगोत्रात् । आम्रगुप्तायनिः । प्राचां
तु आम्रगुप्तिः । वृद्धात् किं । दाक्षिः । अगोत्रात् किं । औपगविः । वाकिनादीनां कुक् च । अपत्ये फिञ् वा । वाकिनस्यापत्यं वाकिनकायनिः ।
वाकिनिः । पुत्रान्तादन्यतरस्यां । अस्मादपि फिञ् सिद्धः । तस्मिन्परे पुत्रान्तस्य वा कुक् विधीयते । गार्गीपुत्रकायणिः । गार्गीपुत्रायणिः ।
गार्गीपुत्रिः । प्राचामवृद्धात्फिन् बहुलं । ग्लुचुकायनिः । [illegible] । मनोर्जातावञ्यतौ षुक् च । समुदायार्थो जातिः । मानुषः । मनुष्यः ।
जनपदशब्दात्क्षत्रियादञ् । जनपदक्षत्रिययोर्वाचकादञ् स्यादपत्ये । दाण्डिनायनेति सूत्रे निपातनाट्टिलोपः । ऐक्ष्वाकः । ऐक्ष्वाकौ ।
क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत् । तद्राजमाचक्षाणस्तद्राज इत्यन्वर्थसंज्ञासामर्थ्यात् । पंचालानां राजा पांचालः ।
पूरोरण् वक्तव्यः । पौरवः । पाण्डोर्ड्यण् । पाण्ड्यः । साल्वेयगान्धारिभ्यां च । आभ्यामपत्येञ् । वृद्धेदिति ञ्यङोपवादः । साल्वेयः । गान्धारः ।
तस्य राजन्यप्येवं । द्व्यञ्मगधकलिंगसूरमसादण् । अञोपवादः । द्व्यच् । आंगः । वांगः । सौह्मः । मागधः । कालिंगः । सौरमसः । तस्य

सि.कौ. राजन्यश्चेवं। वृद्धेत्कोसलाजादाञ्ञ्यङ्। वृद्धात्। आंबष्ठ्यः। सौवीर्यः। इत्। आवंत्यः। कौसल्यः। अजादस्यापत्यं आजाद्यः। कुरुनादिभ्यो
॥६९८॥ ण्यः। कौरव्यः। नैषध्यः। स नैषधस्यार्थपतेरित्यादौ तु शैषिकोऽण्। साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ्। साल्वो जनपद
स्तदवयवा उदुम्बरादयः। प्रत्यग्रथादिभ्यश्च इञ्स्यादञोपवादः। औदुम्बरिः। प्रात्यग्रथिः। कालकूटिः। आश्मकिः। राजन्य
श्चेवं। ते तद्राजाः। अञादय एतत्संज्ञाः स्युः। तद्राजस्य बहुषु तेनैवास्त्रियां। बहुष्वर्थेषु तद्राजस्य लुक् स्यात् तदर्थकृते बहुत्वेन
तु स्त्रियां। इक्ष्वाकवः। पंचालाः। इत्यादि। कथं तर्हि कौरव्याः पशवः। तस्यामेव रघोः पाण्ड्या इति। कौरव्ये पाण्ड्ये च साधव इति समाधेयं।
रघूणामन्वयं वक्ष्ये। निरुध्यमाना यदुभिः कथंचिदिति तु रघुयदुशब्दयोस्तदपत्ये लक्षणया। कंबोजाल्लुक्। अस्मात्तद्राजस्य
लुक् स्यात्। कंबोजः। कंबोजौ। कंबोजादिभ्य इति वक्तव्यं। चोलः। शकः। व्यञ्जलक्षणस्याणो लुक्। केरलः। यवनः। अऽञो लुक्।
कंबोजाः समरे इति पाठः सुगमः। दीर्घपाठे तु कंबोजो भिजनो येषामिति अर्थः। सिंधुतक्षशिलादिभ्यो[illegible]ण्माविस्यप। स्त्रियामवंतिकु
तिकुरुभ्यः। तद्राजस्य लुक् स्यात्। अवंती। कुंती। कुरूः। अतश्च। तद्राजस्याकारस्य स्त्रियां लुक् स्यात्। शूरसेनी। मद्री। कथं माद्री
सुताविति हरिश्च एव पाठ इति हरदत्तः। भर्गादित्वं वा केल्प्यं। न प्राच्यभर्गादियौधेयादिभ्यः। एभ्यो तत्तद्राजस्य न लुक्। स्त्रियां। पां
चाली। वैदर्भी। आंगी। मागधी। एते प्राच्याः। भार्गी। कारूशी। कैकेयी। केकयी यत्र तु जन्यजनकभावलक्षणे पुंयोगे ङीष्। युधा। क्रौ पु ४
[redacted]। आभ्यो व्युच इति ढक्। ततः स्वार्थे पर्श्वादियौधेयादिभ्यामण्ञाविति सत्रः। शार्ङ्गरवाद्यञ इति ङीन्। अतश्च इति लुक् न तु ढगंतत्वात् ङी
प्युदात्तनिवृत्तिस्वरः स्यात्। यौधेयी। शौक्रेयी। आर्षि[illegible]ओरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे। अवृद्धीनामस्य मुत्तमं तस्य समीप गणेश
मुपोत्तमं। गोत्रे यावत्त्रिभौविहितावनार्षौ तदंतयोर्गुरूपोत्तमयोः प्रातिपदिकयोः स्त्रियां ष्यङादेशः स्यात्। निर्दिश्यमानस्या ॥६९८॥

३१ देवता भवंति । ष्यङणिञोरेव । षडाविता । यङश्चाप् । कुमुदगंधेरपत्यं स्त्री कौमुदगंध्या । वाराह्या । अनार्षयोः किं । वासिष्ठी वैश्वामित्री । गुरू
पोत्तमयोः किं । औपगवी । जातिलक्षणे ङीष् । गोत्रे किं । अहिच्छत्रे जाता आहिच्छत्री । गोत्रावयवात् । गोत्रावयवा गोत्राभिमताः कुला
ख्या [illegible] स्ततो गोत्रे विहितयोरणिञोः स्त्रियां ष्यङादेशः स्यात् । अगुरूपोत्तमार्थमारंभः । पौणिक्या । भौणिक्या । कौड्यादिभ्यश्च ।
स्त्रियां ष्यङ् प्रत्ययः स्यात् । अगुरूपोत्तमार्थोऽनणिञर्थश्चारंभः । कौड्या । व्याड्या । सूत युवत्यां । सूता । भोज क्षत्रिये । भोज्या । दैव
यज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्यां । एभ्यश्चतुर्भ्यः ष्यङ् वा । अगोत्रार्थमिदं गोत्रेपि परत्वात्प्रवर्तते । पक्षे इतो मनुष्ये
ति ङीष् । दैवयज्ञ्या दैवयज्ञी इत्यादि । इत्यपत्याधिकारः । तेन रक्तं रागात् । रज्यतेऽनेनेति रागः । कषायेण रक्तं वस्त्रं काषायं । मांजिष्ठं । रागा
त्किं । देवदत्तेन रक्तं वस्त्रं । लाक्षारोचनाट्ठक् । लाक्षिकः । रौचनिकः । शाकलकर्दमाभ्यामुपसंख्यानं । शाकलिकः । कार्दमिकः । आभ्या
मण्पीति वृत्तिकारः । शाकलः । कार्दमः । नील्या अन् । नील्या रक्तं नीलं । पीतात्कन् । पीतकं । हरिद्रामहारजनाभ्यामञ् । हारिद्रं ।
माहारजनं । नक्षत्रेण युक्तः कालः । पुष्येण युक्तः पौषमहः । पौषी रात्रिः । लुबविशेषे । पूर्वेण विहितस्य लुप् स्यात् षष्टिदंडात्मकस्य काले
स्यावांतरविशेषश्चेन्न गम्यते । अद्य पुष्यः । कथं तर्हि पुष्ययुक्ता पौर्णमासी पौषी । विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्य
इति निर्देशेन पौर्णमास्यामयं लुब्नेति ज्ञापितत्वात् । श्रवणशब्दात् अत एव लुप् । युक्तवद्भावाभावश्च । अत्र बाधकान्य
पि निपातनानि भवंति । श्रावणी । संज्ञायां श्रवणाश्वत्थाभ्यां । विशेषार्थोऽयमारंभः । श्रवणा रात्रिः । अश्वत्थो मुहूर्तः ।
२ संज्ञायां किं । श्रावणी । आश्वत्थी । द्वंद्वाच्छः । नक्षत्रद्वंद्वाद्युक्ते काले छः स्यात् अविशेषे लुप्सति च । तिष्यपुनर्वसवीयमहः ।
राधानुराधीया रात्रिः । दृष्टं साम । तेनेत्येव । वसिष्ठेन दृष्टं वासिष्ठं साम । अस्मिन्नर्थेऽण्डिद्वाच्यः । उशनसा दृष्टं औ

सि॰ स्तु॰ शानसं। औशानं। कलेर्ढक्। कालेयं। वामदेवाड्ड्यड्ड्यौ। वामदेवेन दृष्टं साम वामदेव्यं। सिद्धयस्येति लोपेन किमर्थं ययतो ड्तिौ।
॥९९॥ ग्रहणमाः तदर्थमेव वामदेव्यस्य नञ्स्वरे। परिवृतो रथः। वस्त्रैः परिवृतो वास्त्रो रथः। रथः किं। वस्त्रेण परिवृतः कायः। सम
तादेष्टितः परिवृत इत्युच्यते। तेनेह न। छात्रैः परिवृतो रथः। पाण्डुकम्बलादिनिः। पाण्डुकम्बलेन परिवृतः पाण्डुकम्बली। पाण्डु
कम्बलशब्दो राजास्तरणवर्णकम्बलस्य वाचकः। मत्वर्थीयेनैव सिद्धे वचनमणो निवृत्त्यर्थं। द्वैपवैयाघ्रादञ्। द्वीपिनो
विकारो द्वैपः। तेन परिवृतो द्वैपो रथः। एवं वैयाघ्रः। कौमारापूर्ववचने। कौमारेत्ससविभक्तिको निर्देशः। अपूर्वत्वे निपात
नमिदं। अपूर्वपतिं कुमारीमुपपन्नः पतिः कौमारः। पक्षे। अपूर्वपतिः कुमारी पतिमुपपन्ना कौमारी भार्या। तत्रोद्धृतममत्रेभ्यः।
शरावे उद्धृतः शाराव ओदनः। उद्धरतिरिहोद्धरणमेवं केनिधाने वर्तते। तेन सप्तम्या उद्धृत्य निहित इत्यर्थः। स्थण्डिलाच्छयित
रि व्रते। तत्रैव। समुदायेनैव व्रतं गम्यते। स्थण्डिले शयितुं नियमोऽस्य स्थाण्डिलो भिक्षुः। संस्कृतं भक्षाः। सप्तम्यन्तादण्
स्यात्संस्कृतेऽर्थे यत्संस्कृतं भक्षाश्चेत्ते स्युः। भ्राष्ट्रे संस्कृता भ्राष्ट्राः। अष्टसु कपालेषु संस्कृतोऽष्टाकपालः। पुरोडाशः।
शूलोखाद्यत्। अणोऽपवादः। शूले संस्कृतं शूल्यं मांसं। उखा पात्रविशेषः। तस्यां संस्कृतमुख्यं। दध्नष्ठक्। दध्नि संस्कृतं
दाधिकं। उदश्वितोऽन्यतरस्यां। ठक्स्यात्पक्षेऽण्। इसुसुक्तान्तात्कः। इस् उस् उक् त एतदन्तादङ्गात्परस्य ठस्य कः स्यात्।
उदकेन श्वयतीति वर्धते इत्युदश्वित्। तत्र संस्कृतः औदश्वित्कः। औदश्वितः। इसुसोः प्रतिपदोक्तयोर्ग्रहणान्नेह। आशिषा चर
ति आशिषिकः। उषा चरति औषिकः। दोषउपसंख्यानं। दोर्भ्यां तरति दौष्कः। [illegible]राद्धृन्नो। अत्र संस्कृतमित्येव संबध्यते न तु भ गणेश
क्षा इति। तेन यवाग्वामभिभवति। क्षैरेयी। सास्मिन्पौर्णमासीति। इति शब्दात्संज्ञायामिति लभ्यते। पौषी पौर्णमासी [illegible] ॥९९॥

अस्मिन्पौषो मासः॥ आग्रहायण्यश्वत्थाट्ठक्॥ अग्रहायनमस्याः इत्याग्रहायणी। प्रज्ञादेराकृतिगणत्वादण्। पूर्वपदात्संज्ञा
यामिति णत्वं। आग्रहायणी पौर्णमासी अस्मिन्नाग्रहायणिको मासः॥ अश्वत्थेन युक्ता पौर्णमासी अश्वत्थः। निपात
नात्साधुः। पौर्णमास्यां अपि लुप्। आश्वत्थिकः॥ विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः॥ एभ्यः पक्षे ठक्। फाल्गुनि
कः। फाल्गुनो मासः। श्रावणिकः। श्रावणः। कार्त्तिकिकः। कार्त्तिकः। चैत्रिकः। चैत्रः॥ सास्य देवता॥ इन्द्रो देवतास्य ऐन्द्रं ह
विः। पाशुपतं। बार्हस्पत्यं। त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता। मन्त्रस्तुत्या च। ऐन्द्रो मन्त्रः॥ आग्नेयो वै ब्राह्मणो देव
तयेत्युक्तिरौपचारिकी। सर्वत्राग्निकलिभ्यां ढक्। कस्येत्॥ कशब्दस्येकारादेशः स्यादस्य प्रत्ययसंनियोगेन। यस्येति लोपा
पवादः। कायं हविः। श्री देवतास्य श्रायं। शुक्राद्घन्। शुक्रियं। अपोनप्त्रपांनप्तृभ्यां घः॥
अपोनप्त्रियं। अपांनप्त्रियं। अपोनपादपान्नपाद्देवता। प्रत्ययसंनियोगेन तु रूपमिदं शास्यते। अत एवापोनपाते अपां
नपाते अनुब्रूहीति प्रैषः॥ छ च॥ योगविभागो यथासंख्यनिरासार्थः। अपोनप्त्रीयं। अपांनप्त्रीयं। शतरुद्राद्घश्च। शतरुद्रो देव
तास्य शतरुद्रियं। शतरुद्रीयं। घच्छयोर्विधानसामर्थ्यान्नोऽलुग्जनपदे इति न लुक्। महेन्द्राद्घाणौ च॥ वा स्युः। महेन्द्रियं
हविः। माहेन्द्रं। महेन्द्रीयं। सोमाट्ट्यण्। सौम्यं। टित्वान्ङीप्। सौमी ऋक्। वाय्वृतुपित्रुषसो यत्॥ वायव्यं। ऋतव्यं।
रीङृतः॥ अकृद्यकारेऽसार्वधातुके यकारे च्वौ च परे ऋदन्तस्याङ्गस्य रीङादेशः स्यात्। यस्येति लोपः। पित्र्यं। उषस्यं। द्यावापृथिवीशु
नासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च॥ द्यावापृथिवीयं। द्यावापृथिव्यं। शुनासीरीयं। शुनासीर्यं। अग्नेर्ढक्॥ आ
ग्नेयं। कालेभ्यो भववत्॥ मासिकं। प्रावृषेण्यं। महाराजप्रोष्ठपदाट्ठञ्॥ माहाराजिकं। प्रौष्ठपदिकं। देवताद्वन्द्वे च॥ अत्र पूर्व

सि॰सु॰ तरप्योराघयोर्वृद्धिर्णितिकिति च। आग्निमारुतं। नेन्द्रस्य परस्य। सौमेन्द्रः। परस्य किं। ऐन्द्राग्नः। दीर्घाच्च वरुणस्य। दीर्घात्परस्य वरुणस्य
170॥ [redacted] न वृद्धिः। ऐन्द्रावरुणं। दीर्घात्किं। आग्निवारुणीमनड्वाहीं। तदस्मिंच र्त्ततश्चेति नव यज्ञादिभ्य उपसंख्यानं। नावयज्ञिकः। का
लः। पाकयज्ञिकः। पूर्णमासादण् वक्तव्यः। पूर्णमासोऽस्यां वर्त्तते पौर्णमासी ति[stain]थिः। पितृव्यमातुलमातामहपितामहाः। एते नि
पात्यंते। पितुर्भ्रातरि व्यत्। पितुर्भ्राता पितृव्यः। मातुर्डुलच्। मातुर्भ्राता मातुलः। मातृपितृभ्यां पितरि डामहच्। मातुः पिता माताम
हः। पितुः पिता पितामहः। मातरि षिच्च। मातामही। पितामही। अवेर्दुग्धे सोढदूसमरीसचो वक्तव्याः। सकारणादिसामर्थ्यात्षष्ठ्यर्थः।
अविसोढं। अविदूसं। अविमरीसं। तिलान्निष्फलात् पिंजपेजौ। तिलपिंजः। तिलपेजः। वंध्यस्तिल इत्यर्थः। पिंजश्छंदसि डित्वं।
तिल्पिंजः। तस्य समूहः। काकानां समूहः काकं। बाकं। भिक्षादिभ्योऽण्। भिक्षाणां समूहो भैक्षं। गार्भिणीनां समूहो गार्भिणं।
इह भस्याढे इति पुंवद्भावे कृते। इनण्यनपत्ये। अनपत्यार्थे इनि परे प्रकृत्या स्यात्। तेन नस्तद्धिते इति टिलोपो न। युवतीनां
समूहो यौवनं। दात्रतो दनुदात्तादेरञि। यौवतं। गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ्। एभ्यः समूहे वु
ञ् स्यात्। लौकिकमिह गोत्रं तच्चापत्यमात्रं। युवोरनाकौ। युवु एतयोरनुनासिकयो[stain]क्रमादन अक एतावादेशौ स्तः। ग्लु
चुकायनीनां समूहो ग्लौचुकायनकं। औक्षकमित्यादि। आपत्यस्य चेति लोपे प्राप्ते। प्रकृत्याऽके राजन्यमनुष्ययुवानः। राजन्य
कं। मानुष्यकं। वृद्धाच्चेति वक्तव्यं। वार्द्धकं। केदाराद्यञ् च। वाद्वुञ्। कैदार्यं। कैदारकं। गणिकायाश्चेति वक्तव्यं। गाणिक्यं। ठञ्क
वचिनश्च। चात्केदारादपि। कवचिनां समूहः कावचिकं। कैदारिकं। ब्राह्मणमाणववाडवाद्यत्। ब्राह्मण्यं। माणव्यं। पृष्ठादुपसं गणेश
ख्यानं। पृष्ठ्यः। ग्रामजनबंधुभ्यस्तल्। ग्रामता। जनता। बंधुता। गजसहायाभ्यां चेति वक्तव्यं। गजता। सहायता। अह्नः खः क्रतौ। ॥170॥

अहीनः। आहर्गणसाध्यसुत्याकः क्रतुरित्यर्थः। क्रतौ किं। आह्नः। इह खंडिकादित्वादञ्। अह्नष्टखोरेवेति नियमाट्टिलोपो न। पर्श्वा ण
स्वक्तव्यः। सिति च। सिति परे पूर्वं पदं स्यात्। अभत्वादोर्गुणो न। पर्शूनां समूहः पार्श्वं। अनुदात्तादेरञ्। कापोतं। मायूरं। खं
डिकादिभ्यश्च। अञ् स्यात्। खंडिकानां समूहः खांडिकं। चरणेभ्यो धर्मवत्। काठकं। छांदोग्यं। अचित्तहस्तिधेनोष्ठक्। साक्तु
कं। हास्तिकं। धैनुकं। केशाश्वाभ्यां यञ्छावन्यतरस्यां। पक्षे ठगणौ। कैश्यं। कैशिकं। आश्वीयं। आश्वं। पाशादिभ्यो यः। पा
श्या। तृण्या। धूम्या। वन्या। वात्या। खलगोरथात्। खल्या। गव्या। रथ्या। इनित्रकट्यचश्च। खलादिभ्यः क्रमात्स्युः। खलिनी। गो
त्रा। रथकट्या। खलादिभ्य इनिर्वक्तव्यः। डाकिनी। कुटुम्बिनी। आकृतिगणोयं। विषयो देशे। षष्ठ्यन्तादणादयः स्युः। अत्यंतपरिशी
लितेर्थे स च देशः। शिबीनां विषयो देशः। शैबः। देशे किं। देवदत्तस्य विषयोनुवाकः। राजन्यादिभ्यो वुञ्। राजन्यकः। भौरिक्याद्यै
षुकार्यादिभ्यो विधल्भक्तलौ। भौरिकीनां विषयो देशः भौरिकिविधं। भौलिकिविधं। ऐषुकारिभक्तं। सारसायनभक्तं। सोस्या
दिरिति छंदसः प्रगाथेषु। पंक्तिरादिरस्येति पांक्तः प्रगाथः। स्वार्थ उपसंख्यानं। त्रिष्टुबेव त्रैष्टुभं। संग्रामे प्रयोजनयोद्धृभ्यः। सोस्ये
त्यनुवर्तते। सुभद्रा प्रयोजनमस्य संग्रामस्य सौभद्रः। भरता योद्धारोस्य संग्रामस्य भारतः। तदस्यां प्रहरणमिति क्रीडायां णः।
अणोपवादः। दंडः प्रहरणमस्यां क्रीडायां दाण्डा। मौष्टा। घञः सास्यां क्रियेति ञः। घञन्तात् क्रियावाचिनः प्रथमान्तादस्यामिति
सप्तम्यर्थे स्त्रीलिंगे ञः प्रत्ययः स्यात्। घञ इति सततग्रहणं कृतिकारकं एव स्यात्प्रियग्रहणं। श्येनतिलस्य पाते ञे। श्येनतिलयो
र्मुमागमः स्यात् ञे परे पातशब्दे उत्तरपदे। श्येनंपातोस्यां वर्तते श्यैनंपाता मृगया। तिलंपातोस्यां वर्तते तैलंपाता स्वधा। श्ये
नतिलस्य किं। दंडपातोस्यां तिथौ वर्तते दांडपाता। तदधीते तद्वेद। व्याकरणमधीते वेद वा वैयाकरणः। क्रतूक्थादिसूत्रान्ताट्ठक्।
क्रतुविशेषस्य वाचिनामेव ग्रहणं। तेभ्यो मुख्यार्थेभ्यो वेदितरि तत्प्रतिपादकग्रंथपरेभ्यस्त्वध्येतरि। आग्निष्टोमिकः। वा

सि·कौ·
॥७१॥

अपेयिकः । उक्थं सामविशेषः । तल्लक्षणपरो ग्रन्थविशेषो लक्षणयोक्थं । तदधीते वेद वा औक्थिकः । मुख्यार्थात्तु उक्थशब्दाट्ठग
गणे नेष्यते । न्याय । नैयायिकः । वृत्ति । वार्तिकः । लोकायत । लौकायतिकः । इत्यादि । सूत्रान्तात् अकल्पादेरेवेष्यते । सांग्रहसूत्रि
कः । अकल्पादेः किं । काल्पसूत्रः । विद्यालक्षणकल्पान्तादिति वक्तव्यं । वायसविद्यिकः । गौलक्षणिकः । आश्वलक्षणिकः । पा
राशरकल्पिकः । अङ्गक्षत्रधर्मत्रिपूर्वाद्विद्यान्तान्नेति वक्तव्यं । आङ्गविद्यः । क्षात्रविद्यः । धार्मविद्यः । त्रिविद्यो विद्या त्रिविद्या-
तामधीते वेत्ति वा त्रैविद्यः । आख्यानाख्यायिकेतिहासपुराणेभ्यश्च । यावक्रीतमधिकृत्य कृतमाख्यानमुपचाराद्यावक्रीतं त
दधीते वेत्ति वा यावक्रीतिकः । वासवदत्तामधिकृत्य कृता आख्यायिका वासवदत्ता । अधिकृत्य कृते ग्रन्थे इत्यर्थे वृद्धाच्छः ।
तस्य लुबाख्यायिकाभ्यो बहुलमिति लुक् । ततोऽनेन ठक् । वासवदत्तिकः । ऐतिहासिकः । पौराणिकः । सर्वादेः सादेश्च लुग्वक्तव्यः ।
सर्वान् वेदानधीते सर्ववेदः । सर्वतन्त्रः । सवार्तिकः । द्विगोर्लुगिति लुक् । द्वितन्त्रः । इकन्पदोत्तरपदाच्छतषष्टेः षिकन्पथः । पूर्व
पदिकः । उत्तरपदिकः । शातपथिकः । शातपथिकी । षाष्टिपथिकः । षाष्टिपथिकी । क्रमादिभ्यो वुन् । क्रमकः । क्रमपदशिक्षामीमां
सा क्रमादिः । अनुब्राह्मणादिनिः । तदधीते तद्वेदेत्यर्थे । ब्राह्मणसदृशोऽयं ग्रन्थोऽनुब्राह्मणं । तदधीतेऽनुब्राह्मणी । मत्व
र्थे इनिनैव सिद्धेऽण्बाधनार्थमिदं । वसन्तादिभ्यष्ठक् । वासन्तिकः । अथर्वाणमधीते आथर्वणिकः । दाण्डिनायनेति सूत्रे
निपातनाट्टिलोपो न । प्रोक्ताल्लुक् । प्रोक्तार्थकप्रत्ययात्परस्याध्येतृवेदितृप्रत्ययस्य लुक् स्यात् । पणनं पणः । घञर्थे
कविधानमिति कः । सोऽस्यास्तीति पणी । तस्य गोत्रापत्यं पाणिनः । गाथिविदथिकेशिगणिपणिनश्च । एते प्रकृत्या स्युः ।
इति टिलोपो न । ततो यत इञ् । पाणिनिः । क्षत्रियार्षञितो यूनि लुगणिञोः । एषु प्रत्ययान्तात्क्षत्रि[illegible]य गोत्रप्रत्ययान्तादृष्य
भिधायिनो गोत्रप्रत्ययान्तात् ञितश्च परयोर्युवाभिधायिनोरणिञोर्लुक् स्यात् । कौरव्यः पिता कौरव्यपुत्रः । श्वाफल्कः पिता

निलु

गणेश
॥७१॥

४ वामरथ्यस्य कुर्वादौ कण्वाद्यादेश इष्यते॥ तस्य गर्गादिता चापि छात्रे लुक्स्यसां ततः॥३॥२

आफल्कः पुत्रः। वासिष्ठः पिता वासिष्ठः पुत्रः। तैकायनिः पिता तैकायनिः पुत्रः। एतेभ्यः किं। शिवाघणकौहडः। तत इञ्। कौहडिः पुत्रः।
स्तनिकिः। वामरथ्यस्य छात्राः। वामरथाः। इति इञो लुक् न भवति। आर्षग्रहणेन प्रतिपदोक्तस्य ऋष्यण एव ग्रहणात्। पाणिनि
ना प्रोक्तं पाणिनीयं। ररूयाख्यः। इञश्चेत्यण् न तु न गोत्रे यञिञ् तदन्तादिति वक्ष्यमाणत्वात्। ततो ध्येतृवेदित्र[illegible]णो लुक्। स्वरे
स्त्रियां च विशेषः। पाणिनीयः। पाणिनीया। सूत्राच्च कोपधात्। सूत्रवाचिनः ककारोपधाद् ध्येतृवेदितृप्रत्ययस्य लुक् स्यात्।
प्रोक्तार्थ आरम्भः। अष्टौ अध्यायाः परिमाणमस्य अष्टकं पाणिनेः सूत्रं। तदधीयते विदन्ति वा अष्टकाः। छन्दोब्राह्मणा
नि च तद्विषयाणि। छन्दांसि ब्राह्मणानि च प्रोक्तप्रत्ययान्तानि तद्विषयाणि स्युः। अध्येतृवेदितृप्रत्ययं विना न प्रयोज्यानीत्य
र्थः। कठेन प्रोक्तमधीयते कठाः। वैशंपायनान्ते[illegible]वासित्वाणिनिः। तस्य कठचरकादिति लुक्। ततोऽण्। तस्य प्रोक्ताल्लुक्।
तदस्मिन्नस्तीति देशे तन्नाम्नि। उदुम्बराः सन्त्यस्मिन् देशे औदुम्बरः। तेन निर्वृत्तं। कुशाम्बेन निर्वृत्ता कौशाम्बी नगरी। तस्य निवा
सः। शिबीनां निवासो देशः शैबः। अदूरभवश्च। विदिशाया अदूरभवं वैदिशं। चकारेण प्रागुक्तास्त्रयोऽर्थाः सन्निधाप्यन्ते।
तेन वक्ष्यमाणप्रत्ययानां चातुरर्थिकत्वं सिध्यति। ओरञ्। अणोऽपवादः। कक्षतु। काक्षतवं। नद्यां मतुप्। इक्षुमती॥
मतोश्च बह्वजङ्गात्। बह्वच् अङ्गं यस्य मतुपस्तदन्तादञ्। नाणः। सैध्रकावत। बह्वचेति किं। आहिमतं। अङ्गग्रहणं बह्वजिति त
द्विशेषणं यथा स्यात्। मत्वन्तविशेषणं मा भूत्। बह्वचः कूपेषु। अणोऽपवादः। दीर्घवरत्रेण निर्वृत्तः दैर्घवरत्रः कूपः। उदक् च विपाशः।
विपाशा उत्तरतीरे कूले ये कूपास्तेष्वञ्। अञ्जन्तर्थ आरम्भः। दत्तेन निर्वृत्तः दात्तः कूपः। उदक् किं। दक्षिणतः कूपेष्वेवाण्। संकला
दिभ्यश्च। कूपेष्विति निवृत्तं। सांकलं। पौष्कलं। स्त्रीषु सौवीरसाल्वप्राक्षु। स्त्रीलिङ्गेषु देशेषु वाच्येष्वञ्। सौवीरेषु दत्तामित्रेण
दात्ता१ निर्वृत्ता मित्री नगरी। प्राचि। माकन्दी। सुवास्त्वादिभ्योऽण्। अञोऽपवादः। सुवास्तोरदूरभवं सौवास्तवं। वर्णु। वार्णवं। अण्ग्रहणं घा
साल्वे। वैधूमाग्नी नगरी।१

सर्वाचार्यानुरोधेन कृतं स्वरूपं संप्रति प्रत्याचष्टे तदशिष्यमिति । अङ्गा वङ्गाः कलिङ्गा इत्यादयो बहुवचनान्ता एव संज्ञा इति तत्र शास्त्रेण लिङ्गसंख्ये प्रतिपादनीये । प्रापो दारा इत्यादिषु वे
तिभावः ।१०

सि॰ लु॰
७२॥

मतुपोऽपवादार्थं । सौवास्तवी । रौमणी । रोमणी शब्दात्‌ दन्ताच्च अण्‌ । रूपाद्योपवादः । रौमणः । प्राजकरो एणः । कोपधाच्च । अण्‌ । अत्रोपवा-
दः । कार्णच्छिद्रकः । कार्णच्छिद्रकः । रूपः । कार्कवाकवं । त्रैशंकवं । वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यककठ-
कोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः । सप्तद-
शभ्यः सप्तदश क्रमात्स्युः । चातुरर्थिकाः । अरीहणादिभ्यो वुञ् । अरीहणेन निर्वृत्तम् आरीहणकम् । कृशाश्वादिभ्यश्छण् । कार्शाश्वीयं । १ञा
ऋश्यादिभ्यः कः । ऋश्यकं । कुमुदादिभ्यष्ठच् । कुमुदिकं । काशादिभ्य इलः । काशिलः । तृणादिभ्यः सः । तृणसं । प्रेक्षादिभ्य इ-
निः । प्रेक्षी । अश्मादिभ्यो रः । अश्मरः । सख्यादिभ्यो ढञ् । साखेयं । संकाशादिभ्यो ण्यः । सांकाश्यं । बलादिभ्यो यः । बल्यं । प-
क्षादिभ्यः फक् । पाक्षायणः । पथः पंथ च । पान्थायनः । कर्णादिभ्यः फिञ् । कार्णायनिः । सुतंगमादिभ्य इञ् । सौतंगमिः । प्रग-
द्यादिभ्यो ञ्यः । प्रागद्यः । प्रगघः । वराहादिभ्यः कक् । वाराहकः । कुमुदादिभ्यष्ठक् । कौमुदिकः । जनपदे लुप् । जनपदे वाच्ये
चातुरर्थिकस्य लुप् स्यात् । लुपि युक्तवद्व्यक्तिवचने । लुपि सति प्रकृतिवल्लिङ्गवचने स्तः । पञ्चालानां निवासो जनपदः पं-
चालाः । कुरवः । अङ्गाः । कलिङ्गाः । तदशिष्यं संज्ञाप्रमाणत्वात् । युक्तवद्वचनं न कर्तव्यं संज्ञानां प्रमाणत्वात् । लुब्योगाप्रख्या-
नात् । लुबपि न कर्तव्यो ऽवयवार्थस्येहाप्रतीतेः । योगप्रमाणे च तदभावेऽदर्शनं स्यात् । यदि हि योगस्यावयवार्थस्येदं बोध-
कं स्यात्तदा तदभावे न दृश्येत । प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् । प्रत्ययार्थः प्रधानमित्येवंरूपं वचनमप्य-
शिष्यं कुतः अर्थस्य लोकत एव सिद्धेः । कालोपसर्जने च तुल्यं । अतीताया रात्रेः पश्चार्धेनागामिन्याः पूर्वार्धेन च सहितो गणेश
दिवसोऽद्यतनः । विशेषणमुपसर्जनमित्यादि पूर्वाचार्यैः परिभाषितं । तत्राप्यशिष्यं तत्समानं लोकप्रसिद्धेः । विशेषण-
नां चाजातेः । लुबर्थस्य विशेषणानामपि तद्वल्लिङ्गवचने स्तो जातिं वर्जयित्वा । पञ्चालाः । रमणीयाः । गोदौ रमणीयौ । पञ्जा ॥७२॥

प्रवर्ते प्रमाणमेत्र हिताय
प्रसंगात्स्वर्थीयार्थे मणाविगंश्च स्यहितिप

उपजीवकं प्रत्याख्यायोपजीव्यं प्रत्याचष्टे लुब्योगेति । प्रकृतिप्रत्ययार्थयोः संबन्धो योगः इत्याशयेन फलितमाह अवयवार्थस्येति । पञ्चालादयः शब्दाः क्षत्रियेषु यथा रूढास्तथा जनपदेष्व-
पीति तस्य निवास इत्यर्थस्य प्रहरणं नक्षत्रेति नह्वितो नेयोऽसंघटते किमनेन लुपो विधानेनेत्यर्थः ५   विनापि क्षत्रियसंबन्धं पञ्चालादिशब्दो जनपदेषु प्रयुज्यत इति किं सूत्रेणेत्यर्थः ५

संज्ञायामिति कनोलुप मनुष्य इति लुप एवं चातुरर्थमयः पुमान २ हरीतक्यादिभ्यश्चेत्यत्र लुक १

तेः किं। पंचालाः जनपदः। गोदौ ग्रामः। हरीतक्यादिषु व्यक्तिः। हरीतक्याः फलानि हरीतक्यः। खलतिकादिषु वचनं। खलतिकस्य पर्व
तस्यादूरभवानि खलतिकवनानि। मनुष्यलुपि प्रतिषेधः। मनुष्यलक्षणे लुबर्थे विशेषणानां न। लुबतस्य तु भवतीत्यर्थः।
चंचा अभिरूपः। वरणादिभ्यश्च। एभ्यश्चातुरर्थिकस्य लुप। अजनपदार्थ आरंभः। वरणानामदूरभवं वरणाः। शर्कराया
वा। अस्माच्चातुरर्थिकस्य वा लुप स्यात्। ठक् छौ च। शर्कराया एतौ स्तः। कुमुदादौ वराहादौ च पाठसामर्थ्यात् स्पष्टे ठ चके
कौ। वाग्रहणसामर्थ्यात् स्पष्टे औत्सर्गिकोऽण तस्य लुब्विकल्पः। षट् रूपाणि। शार्करा। शार्करं। शार्करिकं। शार्करीयं। शा
र्करिक। शार्करिकं। नद्यां मतुप। चातुरर्थिकः। इक्षुमती। मध्वादिभ्यश्च। मतुप स्यात्। चातुरर्थिकः। अनद्यर्थ आरंभः। मधु
मान्। कुमुदनडवेतसेभ्यो ड्मतुप। कुमुद्वान्। नड्वान्। वेतस्वान्। आघयोऽीयः इति अतेमादुपधाया इति वक्ष्यमाणेन वः। महिषाच्चे
ति वक्तव्यं। महिष्मान् नाम देशः। नडशादात् ड्वलच्। नड्वलः। शादेः जंबालघासयोः। शाद्वलः। शिखाया वलच्। शिखावलं नाम नग
र्यः। उत्करादिभ्यश्छः। उत्करीयं। नडादीनां कुक् च। नडकीयं। केश्याकृते ऐव्वाकेषु चकीयः। तक्षन्नलोपश्च। तक्षकीयः। बिल्वादिभ्योऽण् स्याल्लुक्।
नडादिषु गता बिल्वादयस्तेभ्योऽण् तस्य लुक् यथा स्यात् कुकोनिवृत्तिर्मा भूत। अन्यथा संनियोगशिष्टानामिति कुगपि निवर्तेत।
लुक् यतः लस्य सर्वलोपार्थोलोपो हि यमात्रस्य स्यात्॥ इति चातुरर्थिका:॥ शेषे। अपत्यादिचतुरर्थ्यन्तादन्योऽर्थः शेषस्तत्राण
दयः स्युः। चक्षुषा गृह्यते चाक्षुषं रूपं। श्रावणः शब्दः। औपनिषदः पुरुषः। दृषदि पिष्टा दार्षदाः सक्तवः। उलूखले क्षुण्णः। औलू
खलो यावकः। अश्वैरुह्यते आश्वो रथः। चतुर्भिरुह्यते चातुरं शकटं। चतुर्दश्यां दृश्यते चातुर्दशं रक्षः। शेष इति लक्षणं चा
धिकारश्च। तस्य विकारः इत्यतः प्राक् शेषाधिकारः। राष्ट्रावारपाराद्घखौ। आभ्यां क्रमाद्घखौ स्तः शेषे। राष्ट्रियः। अवारपारीणः।
अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यं। अवारीणः। पारीणः। पारावारीणः। इह प्रकृतिविशेषात् घादयष्टुट्
नद्धितेषरे। बिल्वाःयस्यां सन्ति विल्वकीया। तस्यां भवो बैल्वकः। वेत्रकीया। वैत्रकाः। छस्य किं। छमात्रस्य लुक् ६

सि॰ सा॰ लँताः प्रत्यया उच्यंते । तेषां जातादयोऽर्थाः समर्थविभक्तयश्च वक्ष्यंते । ग्रामादुरखञौ । ग्राम्यः । ग्रामीणः । कत्र्यादिभ्यो ढकञ् । कुत्सिताः
।७३। त्रयः कत्त्रयः । तत्र जातादिः कात्त्रेयकः । नागरेयकः । ग्रामादिरेवानुवृत्तेः । ग्रामेयकः । कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु । कौलेयकः
श्वा । कौलोन्यः । कौक्षेयकोऽसिः । कौक्षोन्यः । ग्रैवेयको[stain]लंकारः । ग्रैवोन्यः । नद्यादिभ्यो ढक् । नादेयं । माहेयं । वाराणसेयं । दक्षिण
पश्चात्पुरसस्त्यक् । दक्षिणेति आजंतमव्ययं । दाक्षिणात्यः । पाश्चात्यः । पौरस्त्यः । कापिश्याः ष्फक् । कापिश्यां जातादि कापिशाय
नं मधु । कापिशायनी द्राक्षा । रंकोरमनुष्येऽण् च । रांकवो गौः । रांकवायणः । अमनुष्ये किं । रांकवो मनुष्यः । घुप्रागपा
गुदक्प्रतीचो यत् । दिव्यं । प्राच्यं । अपाच्यं । उदीच्यं । प्रतीच्यं । कंथायाष्ठक् । कांथिकः । वर्णौ वुक् । वर्णुनदसमीपदेशो वर्णुः । तद्वि
षयार्थवाचि कंथाशब्दाद्वुक् । यथा हि जाते हिमवत्सु कांथकं । अव्ययात्त्यप् । अमेहक्वतसित्रेभ्य एव । अमातिकसनार्थयोः ॥
अमात्यः । इहत्यः । क्वत्यः । ततस्त्यः । तत्रत्यः । परिगणनं किं । उपरिष्टाद्भव औपरिष्टः । अव्ययानां भमात्रे टिलोपः । अनिसौयं । बहि
न७ षष्टिलोपविधानात् तेन न हि । आरातीयः । सर्वभुवेरतिवक्तव्यं । निसः । निसो गते । ह्रस्वात्तादौ तद्धिते । ह्रस्वादिणः परस्य सस्य षः
स्यात् तादौ तद्धिते परे । निर्गतो वर्णाश्रमेभ्यो निष्ट्यः । चंडालादिः । आरण्याण्णः । आरण्याः सुमनसः । दूरादेत्यः । दूरेत्यः । उत्त
रादाहञ् । औत्तराहः । ऐषमोह्यः[stain]श्वसोऽन्यतरस्यां । एभ्यस्त्यः स्याद्वा । पक्षे वक्ष्यमाणौ घुघुलौ । ऐषमस्त्यं । ऐषमस्तनं ।
ह्यस्त्यं । ह्यस्तनं । श्वस्त्यं । श्वस्तनं । [stain] पक्षे शौवस्तिकं वक्ष्यते । तीररूप्योत्तरपदादञौ । यथासंख्येन । काकतीरं । पाल्वल
तीरं । शैवरूप्यं । तीररूप्यान्तादिति नो । बहुचः पूर्वपदात् मा भूत् । बाहुरूप्यं । दिक्पूर्वपदादसंज्ञायां ञः । अणोऽपवादः । गणेश
पौर्वशालः । असंज्ञायां किं । संज्ञा भूता याः प्रकृतेः मा भूत् । पूर्वेषुकामशम्यां भवः । पूर्वेषुकामशमः । ग्रावाग्राम ।७३।

नगरात्। इस्कन्तरपदरङ्हिः। मद्रेभ्योऽञ्। दिक्पूर्वपदादित्येव। दिशोमद्राणामितिमइपर्वुदासाद्दादिरङ्हिः। पौर्वमद्रः।
आपरमद्रः। उदीच्यां ग्रामाद्बह्वचोऽन्तोदात्तात्। अञ्स्यात्। शैवपुरं। प्रस्थोत्तरपदपलद्यादिकोपधादण्। माहिक
प्रस्थः। पालदः। पारिषदः। नैलीनकः। कण्वादिभ्यो गोत्रे। एभ्यो गोत्रप्रत्ययान्तेभ्योऽण्स्यात्। कण्वो गर्गादिः।
तस्य काण्वास्य छात्राः काण्वाः। इञश्च। गोत्रे य इञ् तदन्तादण्स्यात्। दाक्षाः। गोत्रे किं। सौतंगमेरिदं सौतंगमीयं।
गोत्रमिह शास्त्रीयं न लौकिकं। तेनेह न। पाणिनीयं। न द्व्यचः प्राच्यभरतेषु। इञश्चेत्यस्यापवादः। प्राष्ठीयाः। काशी
याः। भरतानां प्राच्यत्वेपि पृथगुपादानमन्यत्र प्राच्यग्रहणे भरतानामग्रहणस्य लिङ्गं। वृद्धिर्यस्याचामादिस्तद्वृ
द्धं। यस्य समुदायस्याचां मध्ये आदिर्वृद्धिस्तद्वृद्धसंज्ञं स्यात्। त्यदादीनि च। वृद्धसंज्ञानि स्युः। वृद्धाच्छः। शाली
यः। मालीयः। तदीयः। एङ् प्राचां देशे। एङ् यस्याचामादिस्तद्वृद्धसंज्ञं वा स्याद्देशाभिधाने। एणीपचनीयः।
गोनर्दीयः। भोजकटीयः। एणीपचनः। गोनर्दः। भोजकटः। एङ् किं। आहिछत्रः। कान्यकुब्जः। वा नामधेयस्य। वृद्धसं
९५ ज्ञा वक्तव्या। देवदत्तः। देवदत्तीयः। भवतष्ठक्छसौ। वृद्धाद्भवत एतौ स्तः। भावत्कः। भवदीयः। वृद्धादित्यनुवृ
त्तेः शत्रन्तादेव। भावतः। काश्यादिभ्यष्ठञ्ञिठौ। इकार उच्चारणार्थः। काशिकी। काशिका। वैदिकी। वैदिका।
आपदादिपूर्वपदात्कालान्तात्। आपदादिराकृतिगणः। आपत्कालिकी। आपत्कालिका। बाहीकग्रामेभ्यश्च।
बाह्लिकग्रामवाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ स्तः। छस्यापवादः। कास्तीरं नाम बाह्लिकग्रामः। कास्तीरिकी। कास्ती
रिका। विभाषोशीनरेषु। एषु ये ग्रामास्तद्वाचिवृद्धेभ्यष्ठञ्ञिठौ स्तो वा। सौदर्शनिकी। सौदर्शनिका। सौदर्शनी

विस्त॰ यः। ओर्देशे ठञ्। उवर्णान्ताद् देशवाचिनः ठञ्। निषादकर्षूः। नैषादकर्षुकः। केऽण इति ह्रस्वः। देशे इति किं। पटोश्छात्राः पाटवाः। त्रि
।।१७४।। ठ्वाद्वर्तयितुं ठञ्ग्रहणं। वृद्धाच्छस्य परत्वाद् अयं बाधते। दाक्षिकर्षुकः। वृद्धात्प्राचां। प्राग्देशवाचिनो वृद्धाद् वेति
नियमार्थं सूत्रं। आढकजम्बुकः। नेह। मल्लवास्तु। मालवास्तवः। धन्वयोपधाद् वुञ्। धन्वविशेषवाचिनो यकारोपधा
च्च देशवाचिनो वृद्धाद् वुञ्। ऐरावतं धन्व। ऐरावतकः। सांकाश्यकाम्पिल्यशब्दौ वुञ्छणादिसूत्रे एव पठितौ। सांका
श्यकः। काम्पिल्यकः। प्रस्थपुरवहान्ताच्च। एतदन्ताद् देशवाचिनो वुञ् छस्यापवादः। मालाप्रस्थकः। नान्दीपुर
कः। पैलुवहकः। पुरान्तग्रहणमप्राप्त्यर्थं। प्राग्देशे तु तरेण सिद्धं। रोपधेतोः प्राचां। रोपधादीकारान्ताच्च प्राग्देश
वाचिनो वृद्धाद् वुञ्। पाटलिपुत्रकः। ईतः। काकन्दकः। जनपदतदवध्योश्च। जनपदवाचिनस्तदवधिवाचिनश्च
वृद्धाद् वुञ्। आदर्शकः। त्रैगर्तकः। अवृद्धादपि बहुवचनविषयात्। अवृद्धाद् वृद्धाच्च जनपदतदवधिवाचि
नो बहुवचनविषयात् प्रातिपदिकाद् वुञ्। अवृद्धादणो वृद्धाच्छस्यापवादः। अवृद्धाज्जनपदात्। आङ्गकः।
अवृद्धाज्जनपदावधेः। आजमी[illegible]ढकः। वृद्धाज्जनपदात्। दार्वकः। वृद्धाज्जनपदावधेः। कालञ्जरकः।
विषयग्रहणं किं। एकशेषेण बहुत्वे मा भूत्। वर्तनी च वर्तन्यः। तासु भवो वार्तनः। कच्छाग्निवक्त्रगर्तो
त्तरपदात्। देशवाचिनो वृद्धाद् अवृद्धाद्वा वुञ्। दारुकच्छकः। काण्डाग्नकः। सैन्धुवक्त्रकः। बाहुगर्तकः। धूमादिभ
श्च। देशवाचिभ्यो वुञ्। धौमकः। तैर्थकः। नगरात्कुत्सनप्रावीण्ययोः। नगरशब्दाद् वुञ् कुत्सने प्रावी गालेश
ण्ये च गम्ये। नागरकः। चोरः शिल्पी वा। कुत्सने किं। नागरा ब्राह्मणाः। अरण्यान्मनुष्ये। वुञ् अरण्या ।।१७४।।

ष्ठञस्यापवादः। पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वाच्यं। आरण्यकः। वा गोमयेषु। आरण्यका आरण्या वा गोमयाः। वि
भाषा कुरुयुगन्धराभ्यां। वुञ्। कौरवकः। कौरवः। यौगन्धरकः। यौगन्धरः। मद्रवृज्योः कन्। जनपदवुञोपवादः। मद्रेषु जातो मद्र
कः। वृजिकः। कोपधादण्। माहिषिकः। कच्छादिभ्यश्च। देशवाचिभ्यो ऽण्। वुञोपवादः। काच्छः। सैन्धवः। मनुष्यतत्स्थयोर्वुञ्। क
च्छादिभ्यः। अणोपवादः। कच्छे जातादिः। काच्छको मनुष्यः। काच्छकं हसितं। मनुष्ये स्थादिकं। काच्छकोमोः। अपदातौ साल्वात्।
साल्वशब्दस्य कच्छादित्वाद्वुञ् सिद्धे नियमार्थमिदं। अप[illegible]दातावेवेति। साल्वः पदातिर्व्रजति। गोयवाग्वोश्च। साल्वाद्वुञ्
कच्छाद्यणोपवादः। साल्वकौ गौः। साल्विका यवागूः। साल्वमन्यत्। गर्तोत्तरपदाच्छः। देशो ऽणोपवादः। वृकगर्तीयं। उ
त्तरपदग्रहणं बहुच्पूर्वनिरासार्थं। गहादिभ्यश्च। छः। गहीयः। मुखपार्श्वतसोर्लोपश्च। मुखतीयं। पार्श्वतीयं। अव्ययानां भ
मात्रे टिलोपस्यानित्यतां ज्ञापयितुमिदं। कुग्जनस्य परस्य च। जनकीयं। परकीयं। देवस्य च। देवकीयं। स्वक स्वद स्वकीयं।। स्वस्य च। स्वकीयं
वेण्वादिभ्यश्छण्वाच्यः। वैणुकीयं। वैत्रकीयं। औत्तरपदकीयं। प्राचां कटादेः। प्राग्देशवाचिनः कटादेश्छः स्यादणोपवा
दः। कटनगरीयं। कटघोषीयं। कटपल्वलीयं। राज्ञः क च। राज्ञश्छे सिद्धे तत्संनियोगेन कादेशमात्रं विधीयते। राजकीयं। वृ
द्धादकेकान्तखोपधात्। अक इक एवमन्तात्खोपधाच्च वृद्धाद्देशवाचिनश्छः स्यात्। आरसणको जनपदो यत्र ब्रासणाः आयुध
जीविनस्तत्र जातो आरसणकीयः। शाल्मलिकीयः। आयोमुखीयं। कंथापलदनगरग्रामह्रदोत्तरपदात्। कंथादिपञ्चकोत्तर
पदाद्देशवाचिनो वृद्धाच्छः स्यात्। ठञ्ञिठादेरपवादः। दाक्षिकंथीयं। दाक्षिपलदीयं। दाक्षिनगरीयं। दाक्षिग्रामीयं। दाक्षिह्रदी
यं। पर्वताच्च। पर्वतीयः।। विभाषामनुष्ये। मनुष्यभिन्नेर्थे पर्वताच्छो वा स्यात्। पक्षे ऽण्। पर्वतीयानि पार्वता[illegible]नि वा फलानि।
अमनुष्ये किं। पर्वतीयो मनुष्यः। कृकणपर्णाद्भारद्वाजे। भारद्वाजदेशवाचिभ्यामाभ्यां छः स्यात्। कृकणीयं। पर्णीयं। भार

धाजेकिं। कार्कर्णं। पार्णे। युष्मदस्मदोरन्यतरस्यां खञ्च। चाच्छः। पक्षेऽणा युवयोर्युष्माकं वा यं युष्म[illegible]दीयः। अस्मदीयः। त
सि·स्र·को स्मिन्नणि च युष्माकास्माकौ। युष्मदस्मदोरेतावादेशौ स्तः खञि अणि च। यौष्माकीणः। आस्माकीनः। यौष्माकः। आस्माकः।
॥७५॥ तवकममकावेकवचने। एकार्थवाचिनोर्युष्मदस्मदोस्तवकममकौ स्तः खञ्यणि च। तावकीनः। मामकीनः। तावकः। मा
मकः। छे तु। प्रत्ययोत्तरपदयोश्च। मपर्यन्तयोरेकार्थयोस्त्वमौ स्तः प्रत्यये उत्तरपदे च। त्वदीयः। मदीयः। अर्धाद्यत्। अ
र्ध्यः। परावराधमोत्तमपूर्वाच्च। परार्ध्यम्। अवरार्ध्यम्। अधमार्ध्यम्। उत्तमार्ध्यम्। दिक्पूर्वपदाट्ठञ्च। चाद्यत्। पूर्वार्ध्यम्। पौर्वार्धि
कम्। ग्रामजनपदैकदेशादञ्ठञौ। ग्रामैकदेशवाचिनो जनपदैकदेशवाचिनश्च दिक्पूर्वपदादर्धान्तादञ्ठञौ स्तः।
इमे अस्माकं ग्रामस्य जनपदस्य वा पौर्वार्धिकाः पौर्वार्धाः। ग्रामस्य पूर्वस्मिन्नर्धे भवा इति तद्धितार्थे समासः। ठञ्ग्रहणस्य
स्पार्थं। अत्र चेत्सकस्त्वे यतोऽप्यनुकर्षः स्याद्व्याख्येत। मध्यान्मः। मध्यमः। असाम्प्रतिके। मध्या[illegible]शब्दाद प्रत्ययः स्यात्साम्प्रती
केऽर्थे। उत्कर्षापकर्षहीनो मध्यो वैयाकरणः। मध्यं दारु। नातिदीर्घं नातिह्रस्वमि[illegible]त्यर्थः। द्वीपादनुसमुद्रं यञ्। समु
ते द्रसमीपे यो द्वीपस्तद्विषयाद्द्वीपशब्दाद्यञ्। द्वैप्यम्। द्वैप्या। कालाट्ठञ्। कालवाचिभ्यष्ठञ्। मासिकम्। सांवत्सरिकम्। साय
म्प्रातिकः। पौनःपुनिकः। कथं तर्हि शार्वरस्य तमसो निषिद्धये इति कालिदासः। अनुदितौषसरागा इति भारविः। स
मानकालीनम्। प्राक्कालीनमित्यादि। अपभ्रंश एवेति प्रामाणिकाः। तत्र जात इति यावत्कालोऽधिकारः। श्राद्धे
शरदः। ठञ्। ऋत्वणोऽपवादः। शारदिकं श्राद्धम्। विभाषा रोगात[illegible]पयोः। शारदिकः शारदो वा रोग आतपो वा। गरोत्र
घतयोः किम्। शारदं दधि। निशाप्रदोषाभ्यां च। वा ठञ्। नैशिकम्। नैशम्। प्रादोषिकम्। प्रादोषम्। श्वसस्तुट् च। श्वस ॥७५॥

x न त्वं तरंगत्वात् प्रथमं तु टित्त्वं तु रित्या दाविन सुश्रा इत्यप्रत्ययत याश्रंगसंज्ञा निमित्तं यो युक्तस्य विधीयमानोऽनादेशो न स्यात्। न च तु गेव कार्यः तस्य प्रवृत्ति
नया प्रातस्तनमित्यत्र विसर्जनीया भाव प्रसंगादत आह। तुटः प्रागिति॥ इत्यादीति। आदिशब्दग्राह्य कालतनेष्विति। ७

शौण्डादुकृत्र वा स्यात्तस्य तु डागमश्च। द्वारादीनां च। द्वार। स्वर। व्यल्कश। स्वस्ति। स्वर। अवस्। अन्नु। स्वफ्यकृत्। स्वादुमृदु। स्वं लक्षणं
न च च्छिरे जागमश्च। सौवस्तिकः। संधिवेलाद्यृतुनक्षत्रेभ्योऽण्। संधिवेलादिभ्य ऋतुभ्यो नक्षत्रेभ्यश्च कालवृत्तिभ्योऽण्।
संधिवेलायां भवं सांधिवेलं। ग्रैष्मं। तैषं। संधिवेला संध्या। अमावास्या। त्रयोदशी। चतुर्दशी। पंचदशी पौर्णमासी। प्रतिप
त्। संवत्सरात्फलपर्वणोः। सांवत्सरं फलं पर्व वा। सांवत्सरिकमन्यत्। प्रावृष एण्यः। प्रावृषेण्यः। वर्षाभ्यष्ठक्। वर्षासु साधु वा
र्षिकं वासः। कालात्साधुपुष्प्यत्पच्यमानेष्विति साध्वर्थे। सर्वत्राण् च तलोपश्च। हेमंतादण् स्यात्तलोपश्च लोके वेदयोः।
वक्तव्यः सक्षेत्रमृत्वण्। हैमनं हैमंतं। सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च। सायमित्यादिभ्यश्चतुर्भ्योऽव्ययेभ्यश्च काल
वाचिभ्यष्ट्युट्युलौ स्तस्तयोस्तुट् च। तुटः प्रागनादेशः। अन घत नट् यादिनिर्देशात्। सायंतनं। चिरंतनं। प्राह्णे प्रगे एदंत
त्वं च निपात्यते। प्राह्णेतनं। प्रगेतनं। दोषातनं। दिवातनं। चिरपरुत्परारिभ्यस्त्नो वक्तव्यः। चिरत्नं। परुत्नं। परारित्नं। अ
ग्रादिपश्चाड्डिमच्। अग्रिमं। आदिमं। पश्चिमं। अन्ताच्च। अन्तिमं। विभाषा पूर्वाह्णापराह्णाभ्यां। आभ्यां ट्युट्युलौ वा स्तस्तयो
स्तुट् च। पक्षे ठञ्। पूर्वाह्णेतनं। पराह्णेतनं। घकालतनेषु कालनाम्नः सप्तम्या अलुक्। पूर्वाह्णः सोढोऽस्येति विग्रहे तु पूर्वाह्णतनं। पौर्वाह्णि
कं। आपराह्णिकं। तत्र जातः। सप्तमीसमर्थाज्जात इत्यर्थेऽणादयो घादयश्च स्युः। स्रुघ्ने जातः स्रौघ्नः। औत्सः। राष्ट्रि
यः। अवारपारीणः इत्यादि। प्रावृषष्ठप्। एण्यस्यापवादः। प्रावृषि जातः प्रावृषिकः। संज्ञायां शरदो वुञ्। ऋत्वणोऽपवादः। शा
रदका दर्भविशेषा मुद्गविशेषाश्च। उत्तरपदस्य। अधिकारोऽयं। हनस्तद्दसस्मसाब्धकः। अवयवादृतोः। अवयवात्पू
र्वपदादृतुवाचिनोऽचामादेर्वृद्धिर्ञिति णिति किति च। पूर्ववार्षिकः। अपरहैमनः। अवयवात् किं। पूर्वासु वर्षासु भवः।

सि·कु· पौर्ववर्षिकः ॥ ऋतोर्वृद्धिमद्विधाववयवानामिति तदंतविधिः । एवं त्राङ्गहलुन । अवयववत्वाभावात् । सुसर्वार्द्धाज्जनपदस्य । उत्तरपदवृद्धिः ।
॥१७६॥ सुपांचालकः । सर्वपांचालकः । अर्द्धपांचालकः । जनपदतदवध्योरिति वुञ् । सुसर्वार्द्धदिक्शब्देभ्यो जनपदस्येति दंतेन विधिः ।
दिशोमद्राणां । दिग्वाचकात्परस्य मद्रभिन्नस्य जनपदवाचिनो वृद्धिः स्यात् । पूर्वपांचालकः । दिशः किं । पूर्वपंचालानामयं पौ
र्वपंचालकः । अमद्राणां किं । पौर्वमद्रः । योगविभाग उत्तरार्थः । प्राचां ग्रामनगराणां । दिशः परेषां ग्रामवाचिनगरवाचिनामंगा
नामवयवस्य वृद्धिः स्यात् । पूर्वेषुकामशम्यां भवः पूर्वेषुकामशमः । नगर । पूर्वपाटलिपुत्रकः । पूर्वाह्लापराह्लार्द्रामूलप्रदो
षावस्कराद्वुन् । पूर्वाह्लकः । अपराह्लकः । आर्द्रकः । मूलकः । प्रदोषकः । अवस्करकः । पथः पंथ च । पथिजातः पंथकः । अमावा
स्याया वा । अमावास्यकः । आमावास्यः । अ च । अमावास्यः । सिंधपराकाभ्यां कन् । सिंधुकः । कच्छाद्यणि मनुष्यवुञि च प्राप्ते । अप
करकः । औत्सर्गिकोऽणि प्राप्ते । अणञौ च । क्रमात्स्तः । सैंधवः । आपकरः । श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुन
र्वसुहस्तविशाखाषाढाबहुलाल्लुक् । एभ्यो नक्षत्रवाचिभ्यः परस्य जातार्थप्रत्ययस्य लुक् । लुक् तद्धितलुकि । तद्धितलुकि स्य७
उपसर्जनस्त्रीप्रत्ययस्य लुक् स्यात् । श्रविष्ठासु जातः श्रविष्ठः । फल्गुनः इत्यादि । चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्या
नं । चित्रायां जातो चित्रा रेवती रोहिणी । आभ्यो लुक् तद्धितलुकीति लुकि कृते पिप्पल्या० देराकृतिगणत्वान्ङीष् ।
फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ । स्त्रियामित्येव । फल्गुनी । अषाढा । श्रविष्ठाषाढाभ्यां छण् वक्तव्यः । अस्त्रियामपि । श्राविष्ठी
यः । आषाढीयः । जे प्रोष्ठपदानां । प्रोष्ठपदानामुत्तरपदस्याचामादेरचो वृद्धिः स्यात् जातार्थे ञिति णिति किति च । प्रोष्ठपदा
सु जातो प्रोष्ठपादो माणवकः । जे इति किं । प्रोष्ठपदासु भवः प्रौष्ठपदः । बहुवचनानिर्देशात् पर्यायोपि गृह्यते । भद्रपादः । स्थाना गालेश
न्तगोशालखरशालाच्च । एभ्यो जातार्थप्रत्ययस्य लुक् स्यात् । गोस्थाने जातो गोस्थानः । गोशालः । खरशालः । विभाषा १७६॥

सेनेति नपुंसकत्वे ह्रस्वत्वं। वत्सशालाभिजिदश्वयुक्छतभिषजो वा। एभ्यो जातार्थे लुग्वा। वत्सशाले जातो वत्सशालो वात्स-
शालः इत्यादि। जातार्थप्रतिप्रसूतोऽण्ठञ्ढावेव लक्ष्यः। शातभिषः। शातभिषजः। शातभिषक्। नक्षत्रेभ्यो बहुलं। जातप्रत्यय-
स्य बहुलं लुक्। रोहिणः। रौहिणः। कृतलब्धक्रीतकुशलाः। तत्रेत्येव। स्रुघ्ने कृतो लब्धः क्रीतः कुशलो वा स्रौघ्नः। प्राय-
भवः। तत्रेत्येव। स्रुघ्ने प्रायेण बाहुल्येन भवति स्रौघ्नः। उपजानूपकर्णोपनीवेष्ठक्। औपजानुकः। औपकर्णिकः। औप-
नीविकः। संभूते। स्रुघ्ने संभवति स्रौघ्नः। कोशा[illegible]ढ्ञ्। कौशेयं वस्त्रं। कालात्साधुपुष्प्यत्पच्यमानेषु। हेमंते साधुर्हैमंतः
प्राकारः। वसंते पुष्यंति वासंत्यः कुंदलताः। शरदि पच्यंते शारदाः शालयः। उप्ते च। हेमंते उप्यंते हैमंता यवाः। आश्वयु-
ज्या वुञ्। ठञोऽपवादः। आश्वयुज्यामुप्ता आश्वयुजका माषाः। ग्रीष्मवसंतादन्यतरस्यां। पक्षे ऋत्वण्। ग्रैष्मकं। वासंत-
कं। ग्रैष्मं। वासंतं। देयमृणे। कालादित्येव। मासे देयमृणं मासिकं। कलाप्यश्वत्थयवबुसाद्वुन्। यस्मिन्काले मयूराः के-
लापिनः संभवंति स उपचारात्कलापी। तत्र देयमृणं कलापकं। अश्वत्थस्य फलमश्वत्थस्तद्युक्तः कालोऽप्यश्वत्थः। यस्मि-
न्काले अश्वत्थाः फलंति तत्र देयमृणमश्वत्थकं। यस्मिन्यवबुसमुत्पद्यते तत्र देयमृणं यवबुसकं। ग्रीष्मावरसमाद्वुञ्।
ग्रीष्मे देयमृणं ग्रैष्मकं। आवरसमकं। संवत्सराग्रहायणीभ्यां ठञ् च। चाद्वुञ्। सांवत्सरिकं। सांवत्सरकं। आग्रहायणि-
कं। आग्रहायणकं। व्याहरति मृगः। कालवाचिनः सप्तम्यंताद्व्याहरतीत्यर्थे ठञादयः स्युः। यो व्याहरति मृगश्चेत्। निशा-
यां व्याहरति नैशो मृगः। नैशिकः। तदस्य सोढं। कालादित्येव। निशासहचरितमध्ययनं निशा। तत्सोढमस्य नैशिकः। त-
त्र भवः। स्रुघ्ने भवः स्रौघ्नः। राष्ट्रियः। दिगादिभ्यो यत्। दिश्यं। वर्ग्यं। शरीरावयवाच्च। दंत्यं। कर्ण्यं। प्राचां नगरांते। प्राचां देशे न-
पद१ गरांतेंगे पूर्वोत्तरयोरचामादेर्वृद्धिः स्यात् ञिति णिति किति च। सुह्मनगरे भवः सौह्मनागरः। पौंड्रनागरः। प्राचां किं। मनग-

सि॰सु॰ रमुदक्ष्ण। तत्र भवो मानरगरः। जंगलधेनुवलजांतस्य विभाषितमुत्तरं। जंगलाद्यंतस्यांगस्याचामादेरचो वृद्धिः स्यात्
उत्तरपदस्य वा। ञ्णिति किति च। कुरुजंगले भवं। कौरुजंगलं। कौरुजांगलं। वैश्वधेनवं। वैश्वधैनवं। सौवर्णवलजं। सौ
॥७७॥ वर्णवालजं। दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्। दार्तेयं। कलशिर्घटः। तत्र भवं कालशेयं। ग्रीवाभ्योऽण् च। बाहुल्य।
ग्रैवेयं। ग्रैवं। गंभीराञ्ञ्यः। गंभीरे भवं गांभीर्यं। पंचजनादुपसंख्यानं। पांचजन्यः। अव्ययीभावाच्च। परिमुखे भवं पारि
मुख्यं। परिमुखादिभ्य एवेष्यते। नेह। औपकूलः। अंतःपूर्वपदाट्ठञ्। अव्ययीभावादित्येव। वेश्मनि अंतर्वेश्म।
तत्र भवमांतर्वेश्मिकं। आंतर्गणिकं। अध्यात्मादेष्ठञिष्यते। अध्यात्मं भवमाध्यात्मिकं। अनुशतिकादीनां च। ए
षामुभयपदवृद्धिर्ञ्णिति किति च। आधिदैविकं। आधिभौतिकं। ऐहलौकिकं। अध्यात्मादिराकृतिगणः। देविका
शिंशपादित्यवाड्दीर्घसत्त्रश्रेयसामात्। एषां पंचानामचामादेरच आत् स्यात् ञिति किति च। देविकाकूले भवा
दाविकाकूलाः शालयः। शिंशपाया विकारः शांशपश्चमसः। पलाशादिभ्यो वेत्यञ्। दित्यौह इदं दात्यौहं। दीर्घसत्त्रे भ
वं दार्घसत्त्रं। श्रेयसि भवं श्रायसं। ग्रामात्पर्यनुपूर्वात्। ठञ्। अव्ययीभावादित्येव। पारिग्रामिकः। आनुग्रामिकः। जि
ह्वामूलांगुलेश्छः। जिह्वामूलीयं। अंगुलीयं। वर्गान्ताच्च। कवर्गीयं। अशब्दे यत्खावन्यतरस्यां। पक्षे सर्वे छः। मद्वर्ग्यः।
मद्वर्गीणः। मद्वर्गीयः। अशब्दे किं। कवर्गीयो वर्णः। कर्णललाटात्कनलंकारे। कर्णिका। ललाटिका। तस्य व्याख्यान इति च
व्याख्यातव्यनाम्नः। सुपां व्याख्यानः सौपो ग्रंथः। तैङः। कार्तः। सुप्सु भवं सौपं। बह्वचोऽन्तोदात्ताट्ठञ्। षत्वणत्वयोर्विधायकं शा
स्त्रं षत्वणत्वं तस्य व्याख्यानस्तत्र भवो वा षात्वणात्विकः। क्रतुयज्ञेभ्यश्च। सोमसाध्येषु यागेषु प्रसिद्धौ तत्रान्यतरोपा गणेश
दानेन सिद्धे उभयोपादानसामर्थ्यादसोमकादपीह गृह्यते। आग्निष्टोमस्य व्याख्यानस्तत्र भवो वा आग्निष्टोमिकः। वा ॥७७॥

अपेयिकः। पाकयज्ञिकः। नावयज्ञिकः। बहुवचनं स्वरूपविधिनिरासार्थं। अनन्तोदात्तार्थ आरम्भः। अध्यायेष्वेवर्षेः। ऋषिशब्देभ्यो
लक्षणया व्याख्येये ग्रन्थे वर्तमानेभ्यो भवे व्याख्याने वाध्याये ठञ् स्यात्। वसिष्ठेन दृष्टो मन्त्रस्तस्य व्याख्यानस्तत्र भवो वा वासि
ष्ठिकोऽध्यायः। अध्याये इति किं। वासिष्ठी ऋक्। पौरोडाशपुरोडाशात्ष्ठन्। पुरोडाशा सहचरितो मन्त्रः पुरोडाशः स एव पौरोडाशः।
ततः ष्ठन्। पौरोडाशिकः। पुरोडाशिकः। छन्दसो यदणौ। छन्दस्यः। छान्दसः। द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामा
ख्यातादृक्। द्व्यचः। ऐष्टिकः। पाशुकः। ऋत्। चातुर्होतृकः। ब्राह्मणिकः। आर्चिकः। इत्यादि। ऋगयनादिभ्यः। ठञ् आदेरपवा
दः। आर्गयनः। औपनिषदः। वैयाकरणः। तत आगतः। स्रुघ्नादागतः स्रौघ्नः। ठगायस्थानेभ्यः। शुल्कशालाया आगतः शौ
ल्कशालिकः। शुण्डिकादिभ्योऽण्। आयस्थानठकः छादीनां चापवादः। शुण्डिकादागतः शौण्डिकः। कार्कणः। तैर्थः। विद्यायोनिसं
बन्धेभ्यो वुञ्। औपाध्यायकः। पैतामहकः। ऋतष्ठञ्। वुञोऽपवादः। हौतृकं। मातृकं। भ्रातृकं। पितुर्यच्च। पित्र्यं। रीङृतः। यस्ये
ति लोपः। पित्र्यं पैतृकं। गोत्रादङ्कवत्। बिदेभ्य आगतं बैदं। गार्गं दाक्षं। औपगवं। नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानां न
ञः परेषां शुच्यादीनामादेरचो वृद्धिः पूर्वपदस्य वा त्रिपदादौ। आशौचं। अशौचं। आनैश्वर्यं। अनैश्वर्यं। आक्षेत्रज्ञं। अक्षेत्रज्ञं।
आकौशलं। अकौशलं। आनैपुणं। अनैपुणं। हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः। समादागतं समरूप्यं। विषमरूप्यं। पक्षे ग
हादित्वाच्छः। समीयं विषमीयं। देवदत्तरूप्यं। दैवदत्तं। मयट् च। सममयं। विषममयं। देवदत्तमयं। प्रभवति। ततः इत्येव। हि
मवतः प्रभवति [redacted] हैमवती गङ्गा। विदूराञ्ञ्यः। विदूरात्प्रभवति वैदूर्यो मणिः। तद्गच्छति पथिदूतयोः। स्रुघ्नं गच्छति स्रौघ्नः
पन्था दूतो वा। अभिनिष्क्रामति द्वारं। तदित्येव। स्रुघ्नमभिनिष्क्रामति स्रौघ्नं कान्यकुब्जद्वारं। अधिकृत्य कृते ग्रन्थे। तदित्येव। शारी
रकमधिकृत्य कृतो ग्रन्थः शारीरकीयः। शारीरकं भाष्यमिति त्वभेदोपचारात्। शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः। शि

सि॰स्तु॰ ।।७८।।

भ्रूनांक्रंदनं शिशुक्रंदः ।। तमधिकृत्य कृतो ग्रंथः ।। शिशुक्रंदीयः । यमस्य सभा यमसभं । क्लीबत्वं निपातनात् । यमसभीयः ।। कि
रातार्जुनीयं । इंद्रजननादिराकृतिगणः ।। इंद्रजननीयं । विरुद्धभोजनीयं । सोस्य निवासः ।। सुघ्नो निवासो वासोस्य स्रौघ्नः ।
अभिजनश्च ।। सुघ्नोभिजनो यस्य स्रौघ्नः । यत्रस्वयं वसति स निवासः । यत्र पूर्वैरुषितं सोऽभिजन इति विवेकः ।। आयुध
जीविभ्यश्छः पर्वते । पर्वतवाचिनः प्रथमांतादभिजनश्चाद्वादस्येत्यस्मिन्नर्थे छः स्यात् ।। हृद्गोलः पर्वतोभिजनो येषामायुधजी
विनां ते हृद्गोलीयाः ।। आयुधेति किं । ऋक्षोदः पर्वतोभिजनो येषां ते आर्क्षोदा द्विजाः ।। शंडिकादिभ्यो ञ्यः ।। शंडिकोभिजनोस्य
शांडिक्यः ।। सिंधुतक्षशिलादिभ्योणञौ । सिंध्वादिभ्योण् तक्षादिभ्योञ् स्यादुक्तेर्थे । सैंधवः । तक्षशिला नगरी अभि
जनो यस्य ताक्षशिलः ।। तूदीसलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः ।। तूदी अभि[illegible]जनो यस्य तौदेयः ।। सालातुरीयः ।।
वार्मतेयः । कौचवार्यः ।। भक्तिः ।। सोऽस्येत्यनुवर्तते । भज्यते सेव्यत इति भक्तिः ।। सुघ्नो भक्तिरस्य स्रौघ्नः ।। अचित्ताददेश
कालाट्ठक् । अपूपाः भक्तिरस्य आपूपिकः । पायसिकः ।। अचित्तादिति किं । देवदत्तः ।। अदेशात् किं । स्रौघ्नः ।। अकालात् किं । ग्रै
ष्मः । महाराजाट्ठञ् । माहाराजिकः । वासुदेवार्जुनाभ्यां वुन् । वासुदेवकः ।। अर्जुनकः ।। गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् ।। अ
णोपवादः ।। परत्वाद्वृद्धाच्छं बाधते । ग्लुचुकायनिर्भक्तिरस्य ग्लौचुकायनकः ।। नाकुलकः ।। बहुलग्रहणं ग्रहणे पाणिनो
भक्तिरस्य पाणिनीयः ।। जनपदिनां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने ।। जनपदस्वामिवाचिनां बहुवचने जन
पदवाचिना समानशब्दानां जनपदवत्सर्वं स्यात्प्रकृतिः प्रत्ययश्च ।। जनपदतद[illegible]दवध्योरिति प्रकरणे येप्रत्ययास्तेत्राति
दिश्यंते । आंगा जनपदो भक्तिरस्याङ्गकः ।। अंगाः क्षत्रिया भक्तिरस्याङ्गकः ।। जनपदिनां किं । पंचालब्राह्मणा भक्तिरस्य पांचा ग॰को॰गु॰
लः ।। जनपदेनेति किं । पौरवा राजा भक्तिरस्य पौरवीयः ।। तेन प्रोक्तं । पाणिनिना प्रोक्तं पाणिनीयं । तित्तिरिवरतंतुखंडिकोखा ।।७८।।

छच्छा । छंदो आम्नाय एणनीति[illegible] तद्धियपंतातित्तिरिणा प्रोक्तमधीयते तैत्तिरीयाः । काश्यपकौशिकाभ्यामृषिभ्यां णिनिः । काश्यपे
न प्रोक्तमधीयते काश्यपिनः । कलापिवैशंपायनांतेवासिभ्यश्च । कलापांतेवासिभ्य हरिद्रुणा प्रोक्तमधीयते हारिद्रविणः ।
वैशंपायनांतेवासिभ्यः । आलम्बिनः । पुराणप्रोक्तेषु ब्राह्मणकल्पेषु । तृतीयांतात्प्रोक्तार्थे णिनिः स्यात् प्रोक्तेपुराणप्रोक्ताश्चेत । य३
ब्राह्मणकल्पास्ते भवंति । पुराणेन चिरंतनेन मुनिना प्रोक्ताः । भल्लुभाल्लविनः । शाट्यायन । शाट्यायनिनः । कल्पे । पिंगपिंगी ।
कल्पः । पुराणग्रहणादिकिं । याज्ञव[illegible]ल्कानि ब्राह्मणानि । आरम्भरथः । कल्पः । अरुणि । आपस्यस्येति यलोपः । कठचरका
लुक् । आभ्यां प्रोक्तप्रत्ययस्य लुक् । कठेन प्रोक्तमधीयते कठाः । चरकाः । कलापिनोऽण् । कलापिना प्रोक्तमधीयते काला
पाः । नांतस्य टिलोपे । सब्रह्मचारिपीठसर्पिकलापिकौथुमितैतिलिजाजलिलांगलिशिलालिशिखंडिसूकरसद्मसु
पर्वणामुपसंख्यानमित्युपसंख्यानात् टिलोपः । छगलिनो ढिनुक् । छगलिना प्रोक्तमधीयते छागलेयिनः । पाराशर्य
शिलालिभ्यां भिक्षुनटसूत्रयोः । णिनिः स्यात् । पाराशर्येण प्रोक्तमधीयते पाराशरिणो भिक्षवः । [illegible]शै[illegible]नो नटाः । रा:७
कर्मंदकृशाश्वादिनिः । भिक्षुनटसूत्रयोरित्येव । कर्मंदेन प्रोक्तमधीयते कर्मंदिनो भिक्षवः । कृशाश्वि × लोलि + नो नटाः ।
तेनैकदिक् । सुदाम्ना अद्रिणा एकदिक् सौदामनी । तसिश्च । स्यच तादिपाठादय्ययलं । पीलुमूलेनैकादिक् पीलुमूलतः ।
उरसो यच्च । वा तसिः । अणोऽपवादः । उरसा एकदिक् उरस्यः । उरस्तः । उपज्ञाते । तेनेत्येव । पाणिनिना उपज्ञातं पाणिनीयं ।
कृते ग्रंथे । वररुचिना कृतो वाररुचो ग्रंथः । संज्ञायामित्येव । अन्यथार्थमिदं । मक्षिकाभिः कृतं माक्षिकं मधु । कुलाला
दिभ्यो वुञ् । कुलालेन कृतं कौलालकं । वारुडकं । क्षुद्राभ्रमरवटरपादपादञ् । तेन कृते संज्ञायां । क्षुद्राभिः कृतं क्षौ
द्रं । भ्रामरं । वाटरं । पादपं । तस्येदं । उपगोरिदमौपगवं । वहेस्तुरणिट् च । संवोढुः सांवहित्रं । अग्नीधः शरणे रण् भं च ।

सि॰कौ अग्निमिंधे ऽग्नीत्। तस्य स्थानमाग्नीध्रं। ताच्छब्द्यात्सोप्याग्नीध्र॥ समिधामाधाने षेण्यण्। सामिधेन्यो मंत्रः॥ सामिधेनी
ऋक्॥ रथाद्यत्। रथ्यं चक्रं। पत्रपूर्वादञ्। पत्रं वाहनं। अश्वरथस्येदं आश्वरथं। पत्राध्वर्युपरिषदश्च। अत्र पत्रात्वा
।७६।। ह्ये। अश्वस्येदं वहनीयमाश्वं। आध्वर्यवं। पारिषदं। हलसीराट्ठक्। हालिकं। सैरिकं। द्वंद्वाद्वुन्वैरमैथुनिकयोः। काको
लूकिका। कुत्सकुशिकिका। द्वंद्वे देवासुरादिभ्यः प्रतिषेधः। दैवासुरं। गोत्रचरणाद्वुञ्। औपगवकं। चरणाद्धर्मा
म्नाययोरिति वक्तव्यं। काठकं। संघांकलक्षणेष्वञ्यञिञामण्। घोषग्रहणमपि कर्तव्यं। अत्र। बैदः। संघोऽंको घोषो
वा। बैदं लक्षणं। यञ्। गार्गः॥ गार्गं। इञ्। दाक्षः॥ यद्धं परंपरासंबंधोऽंकः साक्षात्तु लक्षणं। शाकलाद्वा ऽप्र सवोचके र्थे।
पक्षे चरणत्वाद्वुञ्। शाकलेन प्रोक्तमधीयते शाकलाः। तेषां संघोऽंको घोषो वा शाकलः॥ शाकलकः॥ लक्षणे क्लीब
ता। छंदोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः॥ छंदोगानां धर्म आम्नायो वा छांदोग्यं। औक्थिक्यं। याज्ञिक्यं। बाह्वृच्यं।
नाट्यं। चरणाद्धर्माम्नाययोरित्युक्तं। तत्साहचर्यान्नटशब्दादपि तत्रैव। न दंडमाणवांतेवासिषु। दंडप्रधाना माण
वाः शिष्येषु शिष्येषु वुञ् न स्यात्। दाक्षाः॥ दंडमाणवाः शिष्या वा। रैवतिकादिभ्यश्छः। तस्येदमित्यर्थे। वुञोऽपवादः।
रैवतिकीयः। बैजवापीयः। कौपिंजलहास्तिपदादण्॥ कुपिंजलस्यापत्यं इहैवास्मादेव निपातनादण्। तदंतास्तु
ऽनरण्। कौपिंजलः॥ गोत्रवुञोऽपवादः॥ हस्तिपादस्यापत्यं हास्तिपदः॥ चरणवुञोऽपवादः॥ आथर्वणिकस्येकलोपश्च। आ
णः। आथर्वणिकस्यायमाथर्वणो धर्म आम्नायो वा। चरणवुञोऽपवादः॥ [redacted] ।समाप्ताः
शैषिकाः। तस्य विकारः॥ अश्मनो विकारे टिलोपो वक्तव्यः॥ अश्मनो विकार आश्मनः। भास्मनः। मार्त्तिकः। अवयवे च प्रा गलेदा
ण्योषधिवृक्षेभ्यः॥ वाद्धिकारः। मयूरस्यावयवो विकारो वा मायूरः। मौर्वं कांडं भस्म वा। पैप्पलं। बिल्वादिभ्योऽण्। बैल्वः ।७६।।

कोपधाच्च । अण् स्यात् । अञोऽपवादः । तार्क्वं । तार्कवं । तैत्तिडीकं । त्रपुजतुनोः षुक् । आभ्यामण् विकारे एतयोः षुगागमश्च । त्रापु-
षं । जातुषं । ओरञ् । दैवदारवं । अनुदात्तादेश्च । दाधित्थं । कापित्थं । पलाशादिभ्यो वा । पालाशं । कारीरं । शम्याः ष्लञ् । शामी-
लं भस्म । षित्त्वान्ङीष् । शामीली स्रुक् । मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः । प्रकृतिमात्रान्मयट् स्याद्विकारावयवयोः ।
अश्ममयं । आश्मनं । अभक्ष्येत्यादि किं । मौद्गः सूपः । कार्पासमाच्छादनं । नित्यं वृद्धशरादिभ्यः । आम्रमयं । शरमयं ।
एकाचो नित्यं । त्वङ्मयं । वाङ्मयं । कथं तर्हि आप्यमन्मयमिति । तस्येदमित्यण्णन्तात्स्वार्थे ष्यञ् । गोश्च पुरीषे । गोः पुरीषं गोम-
यं । पिष्टाच्च । मयड्विकारे । पिष्टमयं भस्म । कथं पैष्टी सुरेति । सामान्यविवक्षायां तस्येदमित्यण् । संज्ञायां कन् । पिष्टादित्येव ।
पिष्टस्य विकारविशेषः पिष्टकः । पूपोऽपूपः पिष्टकः स्यात् । व्रीहेः पुरोडाशे । मयट् । बिल्वाद्यणोऽपवादः । व्रीहिमयः पुरोडाशः ।
व्रैहमन्यत् । असंज्ञायां तिलयवाभ्यां । तिलमयं । यवमयं । संज्ञायां तु । तैलं । यावकः । तालादिभ्योऽण् । अञ्मयटोरपवादः ।
तालाद्धनुषि । तालं धनुः । अन्यत्तालमयं । ऐन्द्रायुधं जातरूपेभ्यः परिमाणे । अण् । बहुवचनात्स्वरूपग्रहणं । हाटकः । ता-
पनीयः । सौवर्णो वा निष्कः । परिमाणे किं । हाटकमयी यष्टिः । प्राणिरजतादिभ्योऽञ् । शौकं । बाकं । राजतं । [illegible]तं । ञितश्च तत्प्रत्य- त्रि
यात् । ञितो विकारावयवार्थकप्रत्ययस्तदन्तादञ् तयोरेवार्थयोः । मयटोऽपवादः । शामीलस्य शामीलं । दाधित्थाद्-
धित्थं । ञितः किं । बैल्वमयं । क्रीतवत्परिमाणात् । प्राग्वतेष्ठञित्यारभ्य क्रीतार्थे ये प्रत्यया येनोपाधिना परिमाणाद्विहि-
तास्ते तथैव विकारेऽपि दृश्यन्ते । अण्णादीनामपवादः । निष्केण क्रीतं नैष्किकं । एवं निष्कस्य विकारो नैष्किकः । शतस्य वि-
कारः शत्यः शतिकः । उष्ट्राद्वुञ् । प्राण्यञोऽपवादः । औष्ट्रकः । उमोर्णयोर्वा । औमं । औमकं । और्णं । और्णकं । वुञभावे यथा-
क्रमादणञौ । एण्या ढञ् । ऐणेयं । एणस्य तु ऐणं । गोपयसोर्यत् । गव्यं । पयस्यं । द्रोश्च । द्रुर्वृक्षस्तस्य विकारोऽवयवो

सि॰ सु॰ वाड्वयं। मानेवयः। द्रोरिसेवा द्रुवयं। यौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयं॥ समरः। फलेलुक्। विकारावयवप्रत्ययस्य लुक्स्यात्। आ
॥२०॥ मलक्याः फलमामलकं। प्लक्षादिभ्योऽण्। विधानसामर्थ्यान्न लुक्। प्लाक्षं। न्यग्रोधस्य च केवलस्य। अस्य न वृद्धिरैजाग
मश्चान्नैयग्रोधं। जंब्वा वा। फले एवा। जांबवं। पक्षे। ओरञ्। तस्य लुक्। जंबु। लुप्च। जंब्वाः फलप्रत्ययस्य लुप्स्यात् वा। लुपि यु
क्तवत्। जंब्वाः फलं जंबूः। फलपाकशुषामुपसंख्यानं। व्रीहयः। मुद्गाः। पुष्पमूलेषु बहुलं। मल्लिकायाः पुष्पं मल्लिका। जात्याः
पुष्पं जाती। विदार्या मूलं विदारी। बहुलग्रहणान्नेह। पाटलानि पुष्पाणि। साल्वानि मूलानि। बाहुलकाल्लुक् क्वचित्।
अशोकं। करवीरं। हरितक्यादिभ्यश्च। एभ्यः फलप्रत्ययस्य लुप्। हरितक्यादीनां लिंगमेव प्रकृतिवत्। हरितक्याः फ
लानि हरीतक्यः। कंसीयपरशव्ययोर्यञञौ लुक् च। कंसीयपरशव्याभ्यां यञञौ स्तश्छयतोश्च लुक्। कंसाय हितं कंसी
यं तस्य विकारः कांस्यं। परशवे हितं परशव्यं। तस्य विकारः पारशवः॥ ७॥ इति प्राग्दीव्यतीयाः॥ ७॥ प्राग्वहतेष्ठक्। तद्वहती
त्यतः प्राक् ठगधिक्रियते। तदाहेति माशब्दादिभ्य उपसंख्यानं। माशब्दः कार्य इति य आह स माशब्दिकः। स्वागतादीनां च।
ऐच्न स्यात्। स्वागतमित्याह स्वागतिकः। स्वाध्वरिकः। स्वंगस्यापत्यं स्वांगिः। व्यंगस्यापत्यं व्यांगिः। व्यडस्यापत्यं व्याडिः।
व्यवहारेण चरति व्यावहारिकः। स्वपतौ साधु स्वापतेयं। आलोप्रभूतादिभ्यः। प्रभूतमाह प्राभूतिकः। पार्याप्तिकः। पृच्छतौ
सुस्नातादिभ्यः। सुस्नातं पृच्छति सौस्नातिकः। सौखशायनिकः। आनुशातिकादि। गच्छतौ परदारादिभ्यः। पारदारिकः। गौ
रुतल्पिकः। तेन दीव्यति खनति जयति जितं। अक्षैर्दीव्यति आक्षिकः। अभ्र्या खनति आभ्रिकः। अक्षैर्जयति आक्षिकः।
अक्षैर्जितमाक्षिकं। संस्कृतं। दध्ना संस्कृतं दाधिकं। मारीचिकं। कुलत्थकोपधादण्। ठकोपवादः। कुलत्थैः संस्कृतं कौ गणेश
लत्थं। तैत्तिडीकं। तरति। उडुपेन तरति औडुपिकः। गोपुच्छाट्ठञ्। गौपुच्छिकः। नौद्व्यचष्ठन्। नाविकः। घाटिकः। बाहुभ्यां तर ॥२०॥

धिवाहुका स्त्री। चरति। तृतीयान्तं गच्छति भक्षयतीत्यर्थयोष्ठक्। हस्तिना चरति हास्तिकः। शाकटिकः। दध्ना चरति दाधिकः। आक
र्षात्ष्ठल्। आकर्षो निकषोपलः। आकर्षादिति पाठान्तरं। तेन चरति आकर्षिकः। पित्वान्ङीष्। आकर्षिकी। पर्पादिभ्यष्ठन्। प
र्पेण चरति पर्पिकः। पर्पिकी। येन पीठेन पंगवश्चरंति स पर्पः। अश्विकः। रथिकः। श्वगणाट्ठञ्च। चात्ष्ठन्। श्वादेरिञि। ऐज्न स्यात्।
श्वभस्त्रस्यापत्यं श्वाभस्त्रिः। श्वादंष्ट्रिः। तदादिविधौ चेतदेव ज्ञापकं। इकारादाविति वाच्यं। श्वगणेन चरति श्वागणिकः। श्वाग
णिकी। [redacted]। श्वगणिकः। श्वगणिकी। पदान्तस्यान्यतरस्यां। श्वादेरंगस्य पदशब्दान्तस्येज्वा स्यात्। श्वा
पदस्येदं श्वापदं। शौवापदं। वेतनादिभ्यो जीवति। वेतनेन जीवति वैतनिकः। धानुष्कः। वस्नक्रयविक्रयाट्ठन्। वस्नेन मूल्येन
जीवति वस्निकः। क्रयविक्रयग्रहणं संघातविगृहीतार्थं। क्रयविक्रयिकः। क्रयिकः। विक्रयिकः। आयुधाच्छ च। चाट्ठन्। आ
युधेन जीवति आयुधीयः। आयुधिकः। हरत्युत्संगादिभ्यः। उत्संगेन हरति औत्संगिकः। भस्त्रादिभ्यः ष्ठन्। भस्त्रया हरति भ
स्त्रिकः। षित्वान्ङीष्। भस्त्रिकी। विभाषा विवधात्। विवधेन हरति विवधिकः। पक्षे ठक्। वैवधिकः। एकदेशविकृतस्यानन्यत्वा
त् वीवधादपि ष्ठन्। वीवधिकः। विवधिकी। विवध वीवध शब्दावुभयतोबद्धशिक्ये स्कन्धवाह्यकाष्ठे वर्तेते। अण् कुटि
लिकायाः। कुटिलिका व्याधानां गतिविशेषः। कर्मारोपकरणं लोहं च। कुटिलिकया हरति मृगान् अंगारान्वा कौटि
लिको व्याधः कर्मारश्च। निर्वृत्तेऽक्षद्यूतादिभ्यः। अक्षद्यूतेन निर्वृत्तं आक्षद्यूतिकं वैरं। त्रेर्मम्नित्यं। त्रिप्रत्ययान्तप्रकृतिका
न्तृतीयान्तान्निर्वृत्तेऽर्थे मप् स्यान्नित्यं। कृत्या निर्वृत्तं कृत्रिमं। पक्त्रिमं। भावप्रत्ययान्तादिमप् वक्तव्यः। पाकेन निर्वृत्तं पाकिमं। त्या
गिमं। अपमित्ययाचिताभ्यां कक्कनौ। अपमित्येति ल्यबन्तं। अपमित्य निर्वृत्तमापमित्यकं। याचितेन निर्वृत्तं याचितकं। संसृ
ष्टे। दध्ना संसृष्टं दाधिकं। चूर्णादिनिः। चूर्णैः संसृष्टाः चूर्णिनोऽपूपाः। लवणाल्लुक्। लवणेन संसृष्टो लवणः सूपः। लू

सि॰कौ॰

॥२२१॥ दे

वर्णं शाकं। मुद्गादण्। मौद्गओदनः॥ व्यंजनैरुपसिक्ते। दध्ना उपसिक्तं दाधिकं॥ ओजःसहोम्भसा वर्त्तते। औजसिकः शूरः। साह
सिकश्चौरः॥ आम्भसिको मत्स्यः। तत्प्रत्यनुपूर्वमीपलोमकूलं। द्वितीयांतादस्माद्वर्त्तत इत्यस्मिन्नर्थे ठक् स्यात्। क्रियाविशेष
णं द्वितीया। प्रतीपं वर्त्तते प्रातीपिकः॥ आन्वीपिकः॥ प्रातिलोमिकः॥ आनुलोमिकः। प्रातिकूलिकः॥ आनुकूलिकः॥ परिमुखं च। प
रिमुखं वर्त्तते पारिमुखिकः। पारिपार्श्विकः॥ प्रयच्छति गर्ह्यं। द्विगुणार्थं द्विगुणं। तत्प्रयच्छति द्वैगुणिकः। त्रैगुणिकः। वृद्धेर्वृ
धुषिभावो वक्तव्यः। वार्धुषिकः। कुसीददशैकादशात् ष्ठन्ष्ठचौ। गर्ह्यार्थाभ्यामाभ्यामेतौ स्तः प्रयच्छत्यर्थे। कुसीदं वृद्धिः। तदर्थं द्रव्यं
कुसीदं। तत्प्रयच्छति कुसीदिकी। एकादशार्थत्वादेकादश। ते वेतवृत्त्यन्तो दश वेति विग्रहे ऽकारः समासान्तस्तत एव सूत्रे निपात्यते।
दशैकादशिको॥ दशैकादशिकी। दशैकादशान्प्रयच्छतीति ऽस्मत्तमर्णं एवेलाभिततद्धितार्थः। उञ्छति। बदराण्युञ्छति बादरिकः।
रक्षति। समाजं रक्षति सामाजिकः। शब्ददर्दुरं करोति। शब्दं करोति शाब्दिकः॥ दार्दुरिकः। शाकुनिकः॥ मायूरिकः॥ पक्षिमत्स्य
मृगान् हन्ति। स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणं। मत्स्यपर्यायेषु मीनस्यैव। पक्षिणो हन्ति पाक्षिकः। मात्स्यिकः। मैनिकः।
शाकुलिकः। मार्गिकः। हारिणिकः॥ सारंगिकः॥ परिपंथं च तिष्ठति। अस्माद्द्वितीयांतात्तिष्ठति हंति चेत्यर्थे ठक् स्यात्। पंथा
नं वर्जयित्वा व्याप्य वा तिष्ठति पारिपंथिकश्चौरः। पारिपंथं हंति पारिपंथिकः। माथोत्तरपदपदव्यनुपदं धावति। दंडाकारो
माथः। पंथाः दंडमाथः। दंडमाथं धावति दांडमाथिकः। पादविकः। आनुपदिकः। आक्रंदाट्ठञ्च। अस्माद्धावत्यर्थे ठञ् धावतिर
स्यर्थे। आक्रंदं दुःखिनां रोदनस्थानं धावति आक्रंदिकः। पदोत्तरपदं गृह्णाति। पूर्वपदं गृह्णाति पौर्वपदिकः। औत्तरपदिकः॥ प्रति
कंठार्थललामं च। एभ्यो गृह्णात्यर्थे ठक्। प्रतिकंठं गृह्णाति प्रातिकंठिकः। आर्थिकः। लालामिकः। धर्मं चरति। धार्मिकः। अधर्माच्चे
ति वक्तव्यं। आधर्मिकः। प्रतिपथमेति ठंश्च। प्रतिपथमेति प्रातिपथिकः। समवायान्समवैति। सामवायिकः। सामूहिकः। परिषदो

ग॰ले॰श॰

॥२२१॥

ण्यः ॥ परिषदं समवैति पारिषद्यः ॥ सेनाया वा । ण्यः स्यात् । पक्षे ठक् । सैन्यः सैनिकः ॥ संज्ञायां ललाटकुक्कुट्यौ पश्यति ॥ ललाटं पश्यति लालाटिकः सेवकः ॥ कुक्कुटीशब्देन तत्पातार्हः अल्पदेशो लक्ष्यते । कौक्कुटिको भिक्षुः ॥ तस्य धर्म्यं ॥ आपणस्य धर्म्यमापणिकं ॥ अण् महिष्यादिभ्यः ॥ महिष्या धर्म्यं माहिषं । याजमानं ॥ ऋतोऽञ् ॥ यातुर्धर्म्यं यात्रं । नराच्चेति वक्तव्यं । नरस्य धर्म्या नारी । विशसितुरिड्लोपश्चाञ्च वक्तव्यः ॥ विशसितुर्धर्म्यं वैशस्त्रं ॥ विभाजयितुर्णिलोपश्चाञ्च वक्तव्यः ॥ विभाजयितुर्धर्म्यं वैभाजित्रं ॥ अवक्रयः ॥ षष्ठ्यन्ताट्ठक् स्यादवक्रयेऽर्थे । आपणस्यावक्रयः ॥ आपणिकः ॥ राजग्राह्यं द्रव्यमवक्रयः ॥ तदस्य पण्यं । अपूपाः पण्यमस्य आपूपिकः ॥ लवणाट्ठञ् ॥ लावणिकः ॥ किसरादिभ्यः ष्ठन् ॥ किसरं पण्यमस्य किसरिकः ॥ षित्वात् ङीष् । किसरिकी । उशीरं नलदं उसादि । किसरादयः सर्वे सुगन्धिद्रव्यविशेषवाचिनः ॥ शलालुनोऽन्यतरस्यां ॥ ष्ठन् । पक्षे ठक् । शलालुकः ॥ शलालुकी । शालालुकः ॥ शालालुकी । शलालु सुगन्धिद्रव्यविशेषः ॥ शिल्पं ॥ मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः ॥ मड्डुकझर्झरादणन्यतरस्यां । मड्डुकवादनं शिल्पमस्य माड्डुकः ॥ माड्डुकिकः ॥ झार्झरः ॥ झार्झरिकः ॥ प्रहरणं ॥ तदस्येत्येव । असिः प्रहरणमस्य आसिकः ॥ धानुष्कः ॥ परश्वधाट्ठञ् च । पारश्वधिकः ॥ शक्तियष्ट्योरीकक् । शाक्तीकः ॥ याष्टीकः ॥ अस्तिनास्तिदिष्टं मतिः ॥ तदस्येत्येव । अस्ति परलोके मतिर्यस्य आस्तिकः ॥ नास्ति मतिर्यस्य नास्तिकः ॥ दिष्टं मतिर्यस्य दैष्टिकः ॥ शीलं ॥ अपूपभक्षणं शीलमस्य आपूपिकः ॥ छत्रादिभ्यो णः ॥ गुरोर्दोषाणामावरणं छत्रं तच्छीलमस्य छात्रः ॥ कार्मस्ताच्छील्ये ॥ कार्म इति ताच्छील्ये णो टिलोपश्चेति निपात्यते । कर्मशीलः कार्मः ॥ नस्तद्धित इत्येव सिद्धे णकारान्ताच्छीलिके लोपि । तेन चौरी तापसी स्यादिति सिद्धं । ताच्छील्ये किं । कार्मणः ॥ कर्माध्ययने वृत्तं ॥ प्रथमान्तात्सप्तम्यर्थे ठक् स्यादध्ययने वृत्ता या सा चेत्प्रथमान्तस्यार्थः । ऐकान्यिकः ॥ यस्याध्ययने प्रवृत्तस्य परीक्षाकाले विपरीतोच्चारणरूपं स्खलितमेकं जातं सः ॥ बह्वच्पूर्वपदाट्ठच् । प्राग्वि

सि०कौ० पर्येद्वादशान्यानिकर्माण्यध्ययने वृत्ता [redacted] न्यस्य द्वादशान्विकः॥ द्वादशापपाठान्यस्यजाताइत्यर्थः। हितंभक्षाः॥ अप
॥८२॥ पभक्षणं हितमस्मै आपूपिकः। तदस्मै दीयते नियुक्तं। अग्रभोजनं नियतं दीयते स्मै आग्रभोजनिकः। श्राणामांसौदनाट्टि
ठन्। श्राणानियुक्तं दीयते स्मै श्राणिकः॥ मांसौदनग्रहणं संघातविगृहीतार्थं। मांसौदनिकः। मांसिकः॥ औदनिकः॥ भ
क्तादणन्यतरस्यां। पक्षे ठक्। भक्तमस्मै नियुक्तं दीयते भाक्तः॥ भाक्तिकः। तत्र नियुक्तः॥ आकारे नियुक्तः आकारिकः॥ अगा
रान्ताट्ठन्। देवागारे नियुक्तो देवागारिकः॥ अध्यायिन्यदेशकालात्। निषिद्धदेशकालवाचकाट्ठक् स्यादध्येतरि। श्मशाने
ध्यीते श्माशानिकः॥ चतुर्दश्यामधीते चातुर्दशिकः॥ कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति। तत्र सैव। वंशकठिने व्यवहरति
२ ए वांशकठिनिकः॥ वंशावैवः कठिना यस्मिन्देशो स वंश कठिनः। तस्मिन्देशे या क्रिया यथा नुष्ठेया तां तथैवानुतिष्ठती त्य
र्थः। प्रास्तारिकः॥ सांस्थानिकः॥ निकटे वसति। नैकटिको भिक्षुः॥ आवसथात्ष्ठल्। आवसथे वसति आवसथिकः॥ षि
त्वान्ङीष्। आवसथिकी। आकर्षात्ष्ठल्। पर्पादिभ्यः ष्ठन्। कुसीदसूत्राद्ध्। आवसथो त्किसरादेः। षितः षट्‌त्तेठगधिकारे। ष
डिति सूत्रे बद्धे न विहिताइत्यर्थः। प्रसंगात्स्वरूपं ठकोधिकारः समाप्तः॥ प्राग्घिताद्यत्। तस्मै हितमित्यतः प्राग्यदधि
क्रियते। तद्वहति रथयुगप्रासंगं। रथं वहति रथ्यः॥ युग्यः॥ वत्सानां दमनकाले स्कन्धेकाष्ठं मासज्यते स प्रासंगः॥ तं वहति
प्रासंग्यः॥ धुरो यड्ढकौ। हलि चेति दीर्घे प्राप्ते। न भकुर्छुरां। नस्य कुर्छुरोश्चोपधाया दीर्घो न स्यात्। धुर्यः॥ धौरेयः॥ खःस
र्वधुरात्। सर्वधुरां वहति सर्वधुरीणः॥ एकधुराल्लुक्च। एकधुरीणः॥ एकधुरः। शकटादण्। शकटं वहति शाकटो
गौः। हलसीराट्ठक्। हलं वहति हालिकः॥ सैरिकः॥ संज्ञायां जन्याः। जनीं वधूं जनी वहति प्रापयति जजन्याः॥ विध्यत्यधनुषा।
हृदि तीक्ष्णतां विध्यती त्यर्थे यत्स्यान्न चेत्तत्र धनुः करणं। पादौ विध्यंति पद्याः शर्कराः॥ धनगणं लब्धा वृत्तेतमेतत्। गणेश
॥८२॥

धन्यः। गणं लब्धा गण्यः। अन्नाण्णः। अन्नं लब्धा आन्नः। वशंगतः। वश्यः परेच्छानुचारी। पदमस्मिन् दृश्यं। पद्यः कर्दमः। नाति
भुष्क इत्यर्थः। मूलमस्याबर्हि। आवर्हणमाबर्हः उत्पाटनं। तदस्यास्तीति आबर्हि। मूलमाबर्हि येषां ते मूल्या मुद्गाः।
संज्ञायां धेनुष्या। धेनुशब्दस्य षुगागमो यत्प्रत्ययश्च स्यादर्थे निपात्यते [illegible] यां। धेनुष्या बन्धके स्थिता। गृहपतिना संयुक्ते ञ्यः। संज्ञा ३
गृहपतिर्यजमानः तेन संयुक्तो गार्हपत्योऽग्निः। नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमि
तसंमितेषु। नावा तार्यं नाव्यं। वयसा तुल्यो वयस्यः। धर्मेण प्राप्यं + मूल + धर्म्यं। विषेण वध्यो विष्यः। मूलेन आनाम्यं मूल्यं।
हलाग्रे [illegible] मूलेन समो मूल्यः। सीतया संमितं सीत्यं क्षेत्रं। तुलया संमितं तुल्यं। धर्मपथ्यर्थन्यायादनपेते। धर्मादनपेतं धर्म्यं पथ्यं।
अर्थ्यं। न्याय्यं। छन्दसो निर्मिते। छन्दसा निर्मितं छन्दस्यं। इच्छया कृतमित्यर्थः। उरसोऽण् च। चाद्यत्। उरसा निर्मितः पुत्रः औरसः।
उरस्यः। हृदयस्य प्रियः। हृद्यो देशः। हृदयस्य हृल्लेखयदण्लासेषु इति हृदादेशः। बन्धने चर्षौ। हृदयशब्दात् षष्ठ्यन्तात् ब
न्धने यत् स्याद्वेदे ऋषिश्चेत्। हृदयस्य बन्धन ऋषिः। वशीकरणमन्त्रः। मतजनहलात् करणजल्पकर्षेषु। मतं ज्ञानं तस्य
करणं भावः साधनं वा मत्यं। जनस्य जल्पो जन्यः। हलस्य कर्षो हल्यः। तत्र साधुः। अग्र्यः। सामसु साधुः सामन्यः। ये चाभाव
कर्मणोरिति प्रकृतिभावः। कर्मण्यः। शरण्यः। प्रतिजनादिभ्यः खञ्। प्रतिजने साधुः प्रातिजनीनः। सांयुगीनः। सार्वजनीनः॥
वैश्वजनीनः। भक्ताण्णः। भक्ते साधवो भाक्ताः शालयः। परिषदो ण्यः। पारिषद्यः। परिषद इति योगविभागात् णोऽपि। पारिषदः।
कथादिभ्यष्ठक्। कथायां साधुः काथिकः। गुडादिभ्यष्ठञ्। गुडे साधुर्गौडिक इक्षुः। साक्तुको यवः। पथ्यतिथिवसतिस्वपते
र्ढञ्। पथि साधु पाथेयं। आतिथेयं। वसनं वसतिः तत्र साधुः वासतेयी रात्रिः। स्वापतेयं धनं। सभाया यः। सभ्यः। समान
तीर्थे वासी। साधुरिति निवृत्तं। वसतीति वासी। समानतीर्थे गुरौ वसति इति सतीर्थ्यः। समानोदरे शयित ओ चोदात्तः। समाने

सि॰ सु॰ उदरे शयितः स्थितः समानोदर्यो भ्राता। सोदराद्यः। सोदर्यः॥ अर्थः प्राग्वत्॥ इति प्राग्घितीयाः॥ ७॥ प्राक्क्रीताच्छः॥ तेन
॥२३॥ क्रीतमित्यतः प्राक् छो ऽधिक्रियते। उगवादिभ्यो यत्। प्राक्क्रीतादित्येव। उवर्णान्ताद्गवादिभ्यश्च यत् स्यात्। छस्यापवादः॥
नाभि नभं च। नभ्यो ऽक्षः॥ नभ्यमञ्जनं। रथनाभावेवेदं। शुनः संप्रसारणं वा च दीर्घत्वं। श्वन्यं। शून्यं। ऊधसो ऽनङ् च। ऊधन्यः॥ वकारादिलोपोपि नः
कंबलाच्च संज्ञायां। यत् स्यात्। कंबल्यमूर्णापलशतं। संज्ञायां किं। कंबलीया ऊर्णा। विभाषा हविरपूपादिभ्यः॥ आमिक्ष्यं
दधि। आमिक्षीयं। पुरोडाश्या तंडुलाः। पुरोडाशीयाः। अपूप्यं। अपूपीयं। तस्मै हितं। वत्सेभ्यो हितो वत्सीयो गोधुक्। शंक-
व्यं दारु। गव्यं। हविष्यं। शरीरावयवाद्यत्। दंत्यं। कंठ्यं। नस्यं। नाभ्यं। ये च तद्धिते। यादौ तद्धिते परे शिरःशब्दस्य शीर्षन्नादे-
शः स्यात्। शीर्षण्यः। तद्धिते किं। शिर इच्छति शिरस्यति। वा केशेषु। शीर्षण्याः। शिरस्याः केशाः। अचि शीर्षः इति वाच्यं।
अणादौ तद्धिते शीर्षादेशः। स्थूलशिरस इदं स्थौलशीर्षं। खलयवमाषतिलवृषब्रह्मणश्च। खलाय हितं खल्यं। य-
व्यं। ब्रह्मण्यं। चाद्रथ्या। अजाविभ्यां थ्यन्। अजथ्या यूथिः। अविथ्या। आत्मन्विश्वजनभोगोत्तरपदात्खः। आत्मा-
ध्वानौ खे। एतौ खे प्रकृत्या स्तः। आत्मने हितं आत्मनीनं। विश्वजनीनं। कर्मधारयादेवेष्यते। षष्ठीतत्पुरुषाद्बहुव्री-
हेश्च छ एव। विश्वजनीयं। पंचजनादुपसंख्यानं। सर्वजनाट्ठञ् खश्च। सार्वजनिकः। सर्वजनीनः। महाजनाट्ठञ्। माहाजनि-
कः। मातृभोगीणः। पितृभोगीणः। राजभोगीनः। पंचजनीनः। आचार्यादणत्वं च। आचार्यभोगीनः। सर्वपुरुषाभ्यां णढञौ।
सर्वाण्णो वेति वक्तव्यं। सर्वस्मै हितं सार्वं। सर्वीयं। पुरुषाड्ढञ् वधविकारसमूहतेनकृतेषु। भाष्यकारप्रयोगात्तेनेत्यस्य द्व- नह्यगालोरी
न्द्वमध्ये निवेशः। पुरुषस्य वधः पौरुषेयः। तस्येदमित्यणि प्राप्ते। पुरुषस्य विकारः पौरुषेयः। प्राणिरजतादिभ्यो ऽञिति
त्यञि प्राप्ते। समूहे ऽपि प्राप्ते। एकाकिनो ऽपि परितः पौरुषेयवृता इव इति माघः। तेन कृते ग्रन्थे ऽणि प्राप्ते। अत्र धेनुप्रा ॥२३॥

साद्यदोऽत्राप्राप्यरत्वेति विवेकः। मा प्राण्वन्तरकाभ्यां स्वत्र। माणवाय हितं माणवीनं। चारकं। तदर्थं विकृतेः प्रकृतौ। विप्रक
तिवाचकाच्चतुर्थ्यन्तादर्थाया प्रकृतौ वा प्याया प्रत्ययः स्यात्। अगारेभ्य एतानि अगारीयाणि काष्ठानि। प्राकारीया इष्ट
काः शंकव्यं दारु। छदिरुपधिबलेर्ढञ्। छादिषेयाणि तृणानि। बालेया तण्डुलाः। उपधिशब्दात्स्वार्थे दृश्यते। उपधीयत
इत्युपधिः रथांगं तदेव औपधेयं। ऋषभोपानहोर्ञ्यः। छस्यापवादः। आर्षभ्यो वत्सः। औपानह्यो मुञ्जः। चर्मण्यप्य
यमेव पूर्वविप्रतिषेधेन। औपानह्यं। चर्मणोऽञ्। चर्मण्यो या विकृतिस्तद्वाचकादञ् स्यात्। वध्रेदं वाध्रं चर्म। तदस्य तद
स्मिन् स्यादिति। प्राकारत्वमासामिष्टकानां स्यात् प्राकारीया इष्टकाः। प्रासादीयं दारु। प्राकारोऽस्मिन् स्यात् प्राकारीयो देशः।
इति शब्दो लौकिकीं विवक्षामनुसारयति। तेनेह न। प्रासादो देवदत्तस्य स्यादिति। परिखाया ढञ्। पारिखेयी भूमिः॥ छ
छयतोरन्तविधिः॥ छ॥ प्राग्वतेष्ठञ्। तेन तुल्यमिति वतिं वक्ष्यति ततः प्राक् ठञधिक्रियते। आर्हादगोपुच्छसंख्यापरि
माणाट्ठक्। तदर्हतीत्येतदभिव्याप्य ठञधिकारमध्ये ठगपवादष्ठगधिक्रियते गोपुच्छादीन् वर्जयित्वा। असमासे
निष्कादिभ्यः। आर्हादित्येतत्तेन क्रीतमिति यावत्समपदस्यास्यामनुवर्तते। निष्कादिभ्योऽसमासे ठक् स्यादार्हीयेष्वर्थे
षु। नैष्किकं। समासे तु ठञ्। परिमाणान्तस्यासंज्ञाशाणयोः। उत्तरपदवृद्धिः स्यात्। पारमनैष्किकं। असमास
ग्रहणं ज्ञापकं भवति इतः प्राक् तदन्तविधिरिति। तेन सुगव्ययवाप्यमित्यादि। इतः तद्धिते तु संख्यापूर्वपदानां तदन्तग्रह
णं प्राग्वतेरिष्यते तच्चालुकि। पारायणिकः। द्वैपारायणिकः। अलुकीति किं। द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पं। द्विशूर्पेण
क्रीतं द्विशूर्पादञ्मात्रं भवति। किं तु ठञ्। द्वैशौर्पिकं। अर्धात्परिमाणस्य पूर्वस्य तु वा। अर्धात्परिमाणवाचकस्य उत्तरपद
स्यादेर्वा वृद्धिः पूर्वपदस्य तु वा स्यात्। द्विधा तिथि। आर्धद्रौणिकं। अर्धद्रौणिकं। नातः परस्य। अर्धात्परस्य परिमाण
आर्धद्रौणिकं।

सि॰कु॰ कारस्य वृद्धिर्न पूर्वपदस्य तु वा ॥ अर्धप्रस्थिकं। आर्धप्रस्थिकं। अतः किं। आर्धकौडविकं। तपरः किं। अर्धखार्यां भवा अर्ध- अर्द्धखारी १
॥२४॥ खारीभार्या। सप्तवृद्धिनिमित्तस्येति पुंवद्भावनिषेधो न स्यात्। शताच्च ठन्यतावशते। शतेन क्रीतं शतिकं। शत्यं। अशते किं। शत २
शतं परिमाणमस्य शतकः संघातः। इह प्रत्ययार्थः शतत्वेनाभिधीयते तेन ठन्यतौ न किं तु कन्नेव। अस्समासद्वे-
वा द्विशतेन क्रीतं द्विशतकं। संख्याया अतिशदन्तायाः कन्। संख्यायाः कन् स्यादार्हीयेष्वर्थेषु न तु सतिशदन्तायाः। पञ्चभिः क्री-
तः पञ्चकः। बहुकः। अतिशदन्तायाः किं। साप्ततिकः। शदन्तायाः। चात्वारिंशत्कः। वतोरिड्वा। वत्वन्तात्कन इट् स्यात्। तावतिकः। ता-
वत्कः। विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायां। योगविभागः कर्तव्यः। आभ्यां कन् स्यात्। असंज्ञायां ड्वुन् स्यात्। कन्नोपवादः। विंशकः।
त्रिंशकः। संज्ञायां तु। विंशतिकः। त्रिंशत्कः। कंसाट्टिठन्। टिड्वर्थः। इकार उच्चारणार्थः। कंसिकः। कंसिकी। अर्धाच्चेति
वक्तव्यं। अर्द्धिकः। अर्द्धिकी। कार्षापणाट्टिठन् वक्तव्यः। प्रतिरादेशश्च वा। कार्षापणिकः। कार्षापणिकी। प्रतिकः। प्र-
तिकी। शूर्पादञन्यतरस्यां। शौर्पं। शौर्पिकं। शतमानविंशतिकसहस्रवसनादण्। एभ्योऽण् स्यात्। ठञ्ठकोऽपवा-
दः। शतमानेन क्रीतं शातमानं। वैंशतिकं। साहस्रं। वासनं। अध्यर्धपूर्वद्विगोर्लुगसंज्ञायां। अध्यर्धपूर्वाद्द्विगोश्च परस्या-
र्हीयस्य लुक् स्यात्। अध्यर्धकंसं। द्विकंसं। संज्ञायां तु। पाञ्चलोहितिकं। विभाषा कार्षापणसहस्राभ्यां। लुग्वा स्यात्। अ-
ध्यर्धकार्षापणं। अध्यर्धकार्षापणिकं। द्विकार्षापणं। द्विकार्षापणिकं। औपसंख्यानिकस्य टिठनो लुक्। पक्षेऽध्य-
र्धप्रतिकं। अध्यर्धसहस्रं। अध्यर्धसाहस्रं। द्विसहस्रं। द्विसाहस्रं। द्वित्रिपूर्वान्निष्कात्। लुग्वा स्यात्। द्विनिष्कं। द्विनैष्किकं। गाणोत्रा
त्रिनिष्कं। त्रिनैष्किकं। बहुपूर्वाच्चेति वक्तव्यं। बहुनिष्कं। बहुनैष्किकं। बिस्ताच्च। द्वित्रिबहुपूर्वात् बिस्तान्तादार्हीयस्य लुग्वा स्यात्। ॥२४॥

द्विविस्तं।द्वैवैस्तिकमित्यादि।विंशतिकात्खः।अध्यर्धपूर्वद्विगोरित्येव।अध्यर्धविंशतिकीनं।द्विविंशतिकीनं।खार्या ईकन्।
अध्यर्धखारीकं।द्विखारीकं।केवलायाश्चेति वक्तव्य।खारीकं।पणपादमाषशताद्यत्।अध्यर्धपण्यं।द्विपण्यं।द्विपाद्यं।
शतपादः पद्दितिन।यस्येति लोपस्य स्थानिवद्भावात्।पद्यत्यदर्थे इत्येपिन।एवं गाथस्येवतत्रग्रहणात्।शाणाद्वा।यत् स्यात्।
पक्षेठञ्।तस्य लुक्।अध्यर्ध[…]शाण्यं।अध्यर्धशाणं।द्वित्रिपूर्वादण्च।शाणादित्येव।चाद्यत्।तेन त्रैरूप्यं।परिमाणं
तस्यासंज्ञाशाणयोरिति पर्युदासादादिवृद्धिरेव।द्वैशाणं।द्विशाण्यं।द्विशाणं।इह ठञादयस्त्रयोदश प्रत्ययास्तेषां सम
र्थविभक्तयोर्थाश्चाकांक्षितास्तदिदानीमुच्यंते।तेन क्रीतं।ठञ्॥गोपुच्छेन क्रीतं गौपुच्छिकं।साप्ततिकं।प्रास्थिकं।ठक्।नैष्किकं।
इष्टा एषाः।गोपण्यादस्याल्तद्धितलुकि।लुक्तद्धितलुकीति लुकोप[…]वादः।पंचभिर्गोभिः क्रीतः पंचगुः।तस्य निमित्तं
संयोगोत्पातौ।संयोगः संबंधः।उत्पातः शुभाशुभसूचकः।शतिकः।शतस्य दानं पतिना संयोगः।शतिकं शत्यं।दक्षिणाक्षि
स्पंदनं।तस्य निमित्तमित्यर्थः।वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानं।वातस्य शमनं कोपनं वा वातिकं।पैत्तिकं।
श्लैष्मिकं।सन्निपाताच्चेति वक्तव्यं।सान्निपातिकं।गोद्व्यचोःसंख्यापरिमाणाश्वादेर्यत्।गोर्निमित्तं संयोग उत्पातो गव्यः।द्व्यचः।
धन्यो यशस्यः।स्वर्ग्यः।गोद्व्यचः किं।विजयस्य।वैजयिकः।अत्र संख्येत्यादि किं।पंचानां पंचकं।सप्तकं।प्रास्थिकं।खारीकं।
अश्वादि।आश्विकं।आश्मिकं।ब्रह्मवर्चसाच्चोपसंख्यानं।ब्रह्मवर्चस्यं।पुत्राच्छ च।चाद्यत्।पुत्रीयः।पुत्र्यः।सर्वभूमिपृथि
वीभ्यामणञौ।सर्वभूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः।पार्थिवः।लोकसर्वलोकाट्ठञ्।तत्र विदित इत्यर्थे।लौकिकः॥
॥सर्वभूमिशब्दोऽनुशतिकादिषु पठ्यते।तस्येश्वरः॥तत्र विदित इति च।सर्वभूमेरीश्वरः सर्वभूमौ विदितो वा सार्वभौमः।पार्थिवः।॥

सि॰सु॰ अनुशतिकादित्वादुभयपदवृद्धिः। सार्वलौकिकः॥ तस्य वापः॥ उप्यतेऽस्मिन्निति वापः क्षेत्रं। प्रस्थस्य वापः प्रास्थिकं। द्रौणिकं। खा
रीकं। पात्रात्ष्ठन्। पात्रस्य वापः पात्रिकं। पात्रिकी क्षेत्रभक्तिः॥ तदस्मिन्वृध्यायलाभशुल्कोपदा दीयते॥ वृद्धिर्दीयत इत्या
॥२५॥ दिक्रमेण प्रत्येकसंबंधादेकवचनं। पंचास्मिन्वृद्धिः आयः लाभः शुल्कः उपदा वा दीयते पंचकः॥ शतिकः॥ शत्यः॥
साहस्रः॥ उत्तमर्णेनमर्णात्तिरिक्तं ग्राह्यं वृद्धिः॥ ग्रामादिषु स्वामिग्राह्यो भागः आयः॥ विक्रे[illegible]ता मूल्याधिकं ग्राह्यं लाभः॥
रक्षानिर्वेशो राजभागः शुल्कः॥ उत्कोच उपदा। चतुर्थ्यर्थ उपसंख्यानं। पंचास्मै वृध्यादि दीयते पंचको देवदत्तः॥ सममम
र्घात्स्थलेदाननमिति त्विवदधिकरणत्वविवक्षा वा॥ पूरणार्धाट्ठन्॥ यथाक्रमं ठक्ठिठनोरपवादः॥ द्वितीया वृध्यादिरस्मिन्दी
यते द्वितीयिकः। तृतीयिकः॥ अर्धिकः॥ अर्धशब्दो रूपकस्यार्धे रूढः॥ भागाद्यच्च॥ चाट्ठन्। भागशब्दोऽपि रूपकस्यार्धे। भा
गो वृद्धिरस्मिन्भाग्यः। भागिकः॥ भाग्यं शतं। भागिकं। भाग्या भागिका विंशतिः॥ तद्धरति वहत्यावहति भाराद्वंशादिभ्यः॥
वंशादिभ्यः परो यो भारशब्दस्तदंतप्रातिपदिकं तस्मात्कृतिकद्वितीयान्तादित्यर्थः॥ वंशभारं हरति वहत्यावहति
वा वांशभारिकः। कुटजभारिकः॥ भाराद्वंशादिभ्य इत्यस्य व्याख्यांतरं। भारभूतेभ्यो वंशादिभ्य इति। भारभूतान्वंशान्
हरति वांशिकः। कौटजिकः॥ वस्नद्रव्याभ्यां ठन्कनौ॥ यथासंख्यं स्तः॥ वस्नं हरति वहत्यावहति वस्निकः॥ द्रव्यकः॥ स
म्भवत्यवहरति पचति॥ प्रस्थं संभवति प्रास्थिकः॥ कटाहः॥ प्रस्थं स्वस्मिन्समावेशयतीत्यर्थः॥ प्रास्थिकी ब्राह्मणी॥ प्र
स्थमुपसंहरति पचति वेत्यर्थः॥ तत्संभवतीति द्रोणं पचति द्रोणी। द्रौणिकी॥ आढकाचितपात्रात्खोऽन्यतर गणेश
स्यां॥ पक्षे ठञ्। आढकं संभवति अवहरति पचति वा आढकीना। आढकिकी। आचितीना। आचितिकी। पात्रीणा। पात्रि ॥२५॥

की। द्विगोष्ठंश्च। आढकाचितपात्रादित्येव। आढकाद्यन्ताद्द्विगोः संभवत्यादिष्वर्थेषु ष्ठन्खौ वा स्तः। पक्षे ठञ्। तस्याध्यर्धे
ति लुक्। षित्वान्ङीष्। द्व्याढकिकी। द्व्याढकीना। द्विगोरिति ङीप्। द्व्याढकी। द्व्याचितिकी। द्व्याचितीना। अपरिमाणेति ङीप्
निषेधः। द्व्याचिता। द्विपात्रिकी। द्विपात्रीणा। द्विपात्री। कुलिजाल्लुक्खौ च। कुलिजान्ताद्द्विगोः संभवत्यादिष्वर्थेषु लुक्खौ
वा स्तः। चात्ष्ठंश्च। लुगभावे ठञः। भ्रुवण। द्विकुलिजी। द्विकुलिजीना। द्विकुलिजिकी। द्वैकुलिजिकी॥ सोऽस्यांशवस्नभृतयः॥
अंशो भागः। वस्नं मूल्यम्। भृतिर्वेतनम्। पंचांशो वस्नो भृतिर्वास्य पंचकः॥ तदस्य परिमाणम्॥ प्रस्थः परिमाणमस्य प्रास्थि
को राशिः। संख्यायाः संज्ञासंघसूत्राध्ययनेषु॥ एवं सूत्रमनुवर्तते। तत्र संज्ञायां स्वार्थे प्रत्ययो वाच्यः॥ यद्वा द्येकयोगिति
वत्स्वसंख्यामात्रप्रत्ययः। परिमाणिनि प्रत्ययः। पंचैव पंचकाः शकुनयः। पंचपरिमाणमेषामिति वा। संघे पंचकः। सूत्रे अष्टकं पा
णिनीयं। संघशब्दस्य प्राणिसमूहे रूढत्वात्सूत्रं पृथगुपात्तं। पंचकमध्ययनं। स्तोमे डविधिः। पंचदश मंत्राः परिमाणम
स्य पंचदशः। सप्तदशः। एकविंशः। स्तोमो यागेषु छन्दोगैः क्रियमाणः पृष्ठादिसंज्ञिका स्तुतिः स्तोमः। पंक्तिविंशतित्रिंशच्च
त्वारिंशत्पंचाशत्षष्टिसप्तत्यशीतिनवतिशतं। एते रूढिशब्दा निपात्यंते। पंचद्दशतौ वर्गे वा। पंचपरिमाणमस्य पंचद्
दशत्। पक्षे पंचकः। दशकः। त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण्। त्रिंशदध्यायाः परिमाणमेषां ब्राह्मणानां
त्रैंशानि। चात्वारिंशानि। तदर्हति। लब्धुं योग्यो भवतीत्यर्थे द्वितीयांतादुक्तविषये ठञादयः स्युः। श्वेतछत्रमर्हति श्वैतछत्रिकः। छे
दादिभ्यो नित्यं। नित्यमित्यभीक्ष्ण्ये। छेदमर्हति छैदिकः। वैतसः। विरागाद्विरंगश्च। विरागं नित्यमर्हति
वैरंगिकः। शीर्षच्छेदाद्यच्च। शिरश्छेदं नित्यमर्हति शीर्षच्छेद्यः। शैर्षच्छेदिकः। यद्योगे सन्नियोगेन शिरसः शीर्षभावो नि
पात्यते। दण्डादिभ्यः। एभ्यो यत्स्यात्। दंडमर्हति दण्ड्यः। अर्घ्यः। वध्यः। पात्राद्घंश्च। चाद्यत्। तदर्हतीत्यर्थे। पात्रियः। पात्र्यः।

सि०कौ० कडंकरदक्षिणाच्छ च। चाद्यत्। कडंकरोतीति विग्रहे अत एव निपातनात्खच्। कडंकरं माषमुद्गादिकाष्ठमर्हतीति कडंकरी

॥२९६॥ यो गौः। कडंकर्यः। दक्षिणामर्हतीति दक्षिणीयः। दक्षिण्यः। स्थालीबिलात्। स्थालीबिलमर्हन्ति स्थालीबिलीयास्तण्डुलाः। स्था

लीबिल्याः। पाकयोग्या इत्यर्थः। यज्ञर्त्विग्भ्यां घखञौ। यथासंख्यं स्तः। यज्ञमृत्विजं वाऽर्हतीति यज्ञियः। आर्त्विजीनो यजमा

नः। यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानम्। यज्ञियो देशः। आर्त्विजीनमृत्विक्। आर्हीयाणां ठगादीनामेषोऽवधिः।

अतः परं ठञेव। पारायणतुरायणचान्द्रायणं वर्तयति। पारायणिकश्छात्रः। तुरायणं यज्ञविशेषः। तं वर्तयति तौरायणि

को यजमानः। चान्द्रायणिकः। संशयमापन्नः। संशयविषयीभूतोऽर्थः सांशयिकः। योजनं गच्छति। यौजनिकः। क्रोशशतयो

जनशतयोरुपसंख्यानम्। क्रोशशतं गच्छति क्रौशशतिकः। यौजनशतिकः। ततोऽभिगमनमर्हतीति च वक्तव्यम्। क्रोशशताद

भिगमनमर्हतीति क्रौशशतिको भिक्षुः। यौजनशतिक आचार्यः। पथः ष्कन्। षोऽन्त्यर्थः। पन्थानं गच्छति पथिकः। पथिकी।

पन्थो ण नित्यम्। पन्थानं नित्यं गच्छति पान्थः। पान्था। उत्तरपथेनाहृतं च। उत्तरपथेनाहृतमौत्तरपथिकम्। उत्तरपथेन गच्छतीत्यौ

त्तरपथिकः। आहृतप्रकरणे वारिजङ्गलस्थलकान्तारपूर्वपदादुपसंख्यानम्। वारिपथिकम्। कालात्। व्युष्टादिभ्योऽणित्यतः

प्रागधिकारोऽयम्। तेन निर्वृत्तम्। अह्ना निर्वृत्तमाह्निकम्। तमधीष्टो भृतो भूतो भावी। अधीष्टः सत्कृत्य व्यापारितः। भृतो वेतने

न क्रीतः। भूतः स्वसत्तया व्याप्तकालः। भावी तादृश एवानागतः। मासमधीष्टो मासिकोऽध्यापकः। मासं भृतो मासिकः।

कर्मकरः। मासं भूतो मासिको व्याधिः। मासं भावी मासिक उत्सवः। मासाद्वयसि यत्खञौ। मासं भूतो मास्यः। मासीनः।

द्विगोर्यप्। मासाद्वयसीत्यनुवर्तते। द्वौ मासौ भूतो द्विमास्यः। षण्मासाण्ण्यच्च। वयसीत्येव। यबप्यनुवर्तते। चाद्ठञ्। षाण्मा गणेश

स्यः। षण्मास्यः। षाण्मासिकः। अवयसि ठंश्च। चाण्ण्यत्। षण्मासिको व्याधिः। षाण्मास्यः। समायाः खः। समामधीष्टो भृतो ॥२९६॥

भृतो भावी वा समीनः। द्विगोर्वा। समायाः खः स्याद्वा। तेन निर्वृत्तमित्यादिषु पंचस्वर्थेषु प्रत्ययाः। द्विसमीनः। द्वैसमिकः।
रात्र्यहःसंवत्सराच्च। द्विगोरित्येव। द्विरात्रीणः। द्वैरात्रिकः। द्व्यहीनः। द्वैयह्निकः। समासान्तविधेरनित्यत्वान्न टच्। द्विसंवत्सरी-
णः। संख्यायाः संवत्सरसंख्यस्य च। संख्याया उत्तरपदस्य वृद्धिः स्यात् ञिदादौ। द्विसांवत्सरिकः। द्वे षष्टी भृता द्विषाष्टिकः। प-
रिमाणान्तस्येत्येव सिद्धे संवत्सरग्रहणं परिमाणग्रहणे कालपरिमाणस्याग्रहणार्थं। तेन द्वैसमिक इत्यत्रोत्तरपदवृद्धिर्न।
वर्षाल्लुक् च। वर्षशब्दान्ताद्द्विगोः खः पक्षे ठञ् वा चालुक्। त्रीणि रूपाणि। द्विवर्षीणो व्याधिः। द्विवर्षः। वर्षस्याभविष्यति।
उत्तरपदस्य वृद्धिः स्यात्। द्विवार्षिकः। भविष्यति तु द्वैवर्षिकः। अधीष्टभृतयोरभविष्यतीति प्रतिषेधो न। गम्यते हि तत्र भवि-
ष्यत्ता न तु तद्धितार्थः। द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यतीति द्विवार्षिको मनुष्यः। परिमाणान्तस्यासंज्ञाशाणयोः। द्वौ कुड-
वौ प्रयोजनमस्य द्विकौडविकः। द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसौवर्णिकं। द्विनैष्किकं। असंज्ञायां किं। पंचकलापाः परिमा-
णमस्य पांचकलापिकं। तद्धितान्तः संज्ञा। द्वैशाणं। कुलिजशब्दमपि केचित्पठन्ति। द्वैकुलिजिकः। चित्तवति नित्यं। वर्षश-
ब्दान्ताद्द्विगोः प्रत्ययस्य नित्यं लुक् स्याच्चेतने प्रत्ययार्थे। द्विवर्षो दारकः। षष्टिकाः षष्टिरात्रेण पच्यन्ते। बहुवचनमतन्त्रं। षष्टि-
को धान्यविशेषः। तृतीयान्तात्कन् रात्रशब्दस्य लोपः पक्वे निपात्यते। तेन परिजय्यलभ्यकार्यसुकरं। मासेन परिजय्यो जेतुं शक्यो
मासिको व्याधिः। मासेन लभ्यं कार्यं सुकरं वा मासिकं। तदस्य ब्रह्मचर्यं। द्वितीयान्तात्कालवाचिनोऽस्येत्यर्थे प्रत्ययः स्यात्।
अत्यन्तसंयोगे द्वितीया। मासं ब्रह्मचर्यमस्य मासिको ब्रह्मचारी। आर्धमासिकः। यद्वा प्रथमान्तादस्येत्यर्थे प्रत्ययः। मासो-
स्येति मासिकं ब्रह्मचर्यं। महानाम्न्यादिभ्यः षष्ठ्यन्तेभ्य उपसंख्यानं। महानाम्न्यो नाम विद्यामघवन्निति ऋचः। तासां ब्र

सि॰कौ॰ त्सवर्षमस्य माहानाम्निकः॥ हरदत्तस्तु महानाम्नी इति पुंवद्भावान्माहानाम्निक इत्याह। चतुर्मासाण्ण्यो यज्ञे। तत्र भवे। चतुर्षु मासे
॥२७॥ षु भवति चातुर्मास्यानि यज्ञाः॥ अण् संज्ञायां। चतुर्षु मासेषु भवति चातुर्मासी आषाढी। तस्य दक्षिणा यज्ञाख्येभ्यः। द्वा
दशाहस्य दक्षिणा द्वादशाहिकी। आख्याग्रहणं किं। पदपि। आग्निष्टोमिकी। वाजपेयिकी। तत्र च दीयते कार्यं भववत्।
प्रावृषि दीयते कार्यं वा प्रावृषेण्यं। शारदं॥ ठञ् कालाधिकारस्य एतदवधिः॥ ठञ्। व्युष्टादिभ्योऽण्। व्युष्टे दीयते कार्यं वा वै
युष्टं। व्युष्ट तीर्थ संग्राम प्रवास संस्थादि। तेन यथाकथाचहस्ताभ्यां णयतौ। यथाकथाचेत्यव्ययसंघातात् तृतीयांतात् हस्त
शब्दाच्च यथासंख्यं णयतौ स्तः॥ अर्थाभ्यां तु यथासंख्यं नेष्यते। यथाकथाच दीयते कार्यं वा याथाकथाचं। अना
दरेण देयं कार्यं वेत्यर्थः। हस्तेन दीयते कार्यं वा हस्त्यं। संपादिनि। तेनेत्येव। कर्णवेष्टकाभ्यां संपादि कार्णवेष्टकिकं मुखं।
कर्णालंकाराभ्यामवश्यं शोभत इत्यर्थः। कर्मवेषाद्यत्। कर्मणा संपादि कर्मण्यं शौर्यं। वेषेण संपादी वेष्यो नटः।
वेषः कृत्रिम आकारः॥ तस्मै प्रभवति संतापादिभ्यः॥ संतापाय प्रभवति सांतापिकः॥ सांग्रामिकः॥ योगाद्यच्च। चाट्ठञ्।
योगाय प्रभवति योग्यः॥ यौगिकः॥ कर्मण उकञ्। कर्मणे प्रभवति कार्मुकं। समयस्तदस्य प्राप्तं। समयः प्राप्तोऽस्य सा
म[illegible]यिकं। ऋतोरण्। ऋतुः प्राप्तोऽस्य आर्तवं। कालाद्यत्। कालः प्राप्तोऽस्य काल्यं। शीतं। प्रकृष्टे ठञ्। कालादित्येव। तदस्ये
ति वा। प्रकृष्टः दीर्घः कालोऽस्येति कालिकं वैरं। प्रयोजनं। तदस्येत्येव। इंद्रमहः प्रयोजनमस्य ऐंद्रमहिकं। प्रयोजनं फ
लं कारणं च। विशाखा[illegible]षाढादण् मंथदंडयोः॥ आभ्यामण् स्यात् प्रयोजनमित्यर्थे क्रमान्मंथदंडयोरर्थयोः॥ वि गणेश
शाखा प्रयोजनमस्य वैशाखो मंथः। आषाढो दंडः। चूडादिभ्य उपसंख्यानं। चूडा। चौडं। श्रद्धा। श्राद्धं। अनुप्रवचनादि ॥२७॥

व्यवच्छेदः। अनुप्रवचनं प्रयोजनमस्य अनुप्रवचनीयं। समापनात्सपूर्वपदात्। व्याकरणसमापनं प्रयोजनमस्य व्याकर
णसमापनीयः। ऐकागारिकट् चौरे। एकमसहायमगारं प्रयोजनमस्य मुमुषिषोः स ऐकागारिकश्चौरः। आकालि
कडाद्यन्तवचने। समानकालावाद्यन्तौ यस्य स आकालिकः। समानकालस्य आकालआदेशः। आशुविनाशीत्यर्थः। एक
दिवसे मध्याह्नादुत्पद्य द्वितीयदिने तत्रैव नश्यतीति वा। आकालिकीष्टिः। आकालिका विद्युत्॥ ठञः प्रलैवधिः॥ छ॥
८ तेन तुल्यं क्रिया चेद्वतिः। ब्राह्मणेन तुल्यं ब्राह्मणवदधीते। क्रिया चेत्किं। गुणतुल्ये मा भूत्। पुत्रेण तुल्यः स्थूलः। त
त्र तस्येव। मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः। चैत्रस्येव चैत्रवन्मैत्रस्य गावः। तदर्हं। विधिमर्हति विधिवत्पूज्यते।
क्रियाग्रहणं मण्डूकप्लुत्यानुवर्तते तेनेह न। राजानमर्हति छत्रं। तस्य भावस्त्वतलौ। प्रकृतिजन्यबोधे प्रकारो भावः। गो
र्भावो गोत्वं। गोता। त्वान्तं क्लीबं। तलन्तं स्त्रीलिंगं। आ च त्वात्। ब्रह्मणस्त्व इत्यतः प्राक् त्वतलावधिक्रियेते। अपवादैः सह स
मावेशार्थं गुणवचनादिभ्यः कर्मणि विधानार्थं च। चकारो नञ्स्नञ्भ्यामपि समावेशार्थः। स्त्रिया भावः स्त्रैणं। स्त्री
त्वं। स्त्रीता। पौंस्नं। पुंस्त्वं। पुंस्ता। न नञ्पूर्वात्तत्पुरुषादचतुरसंगतलवणवटयुधकतरसलसेभ्यः। इतः परं ये भावप्रत्य
यास्ते नञ्तत्पुरुषान्न स्युः अचतुरादीन् वर्जयित्वा। अपतित्वं। नञ्पूर्वात्किं। बार्हस्पत्यं। तत्पुरुषात्किं। नास्य पटवः सन्ति स
अपटुस्तस्य भावः आपटवं। अचतुरेति किं। आचतुर्यं। आसंगत्यं। आलवण्यं। आवट्यं। आयुध्यं। आकतर्यं। आरस्यं। आ
लस्यं। पृथ्वादिभ्य इमनिज्वा। वा वचनमणादिसमावेशार्थं। र ऋतो हलादेर्लघोः। इष्ठेमेयःसु। टेः। टिलोपः स्या
दिष्ठेमेयःसु। एषु भावः। प्रथिमा। मादिवत्। वर्णदृढादिभ्यः ष्यञ्च। चादिमनिच्। शौक्ल्यं। शुक्लिमा। दार्ढ्यं। एषु पृथुमृदुभृ

पार्थवं। म्रदिमा १

सि॰ स्तु॰ शार्ङ्गरवाद्युपरिष्ठानामेव वरत्वं। दृढिमा। खोडिपर्थः। श्रोचिती। याथाकामी। गुणवचनब्राह्मणादिभ्यः कर्मणि च। चाद्भावे।
॥२८॥ जडस्य कर्मभावो वा जाड्यं। मौढ्यं। ब्राह्मण्यं। अर्हतो नुम् च। अर्हतो भावः कर्म वा आर्हन्त्यं। आर्हंती। ब्राह्मणादिराकृतिग
णः। यथातथयथापुरयोः पर्यायेण। नञ्पूर्वयोरेतयोः पूर्वोत्तरपदयोः पर्यायेणाचो वृद्धिर्णिति स्यात्। अयथात
थाभावः अयाथातथ्यं। आयथातथ्यं। अयाथापुर्यं। आयथापुर्यं। आपादसमाप्तेर्ब्राह्मणादिराकृतिगणः? कारः। चतुर्वर्णा
दीनां स्वार्थ उपसंख्यानं। चत्वारो वर्णाः चातुर्वर्ण्यं। चातुराश्रम्यं। त्रैस्वर्यं। षाड्गुण्यं। सैन्यं। सान्निध्यं। सामीप्यं। औपम्यं। त्रै
लोक्यमित्यादि। सर्ववेदाः सर्ववेदाः। तानधीते सर्ववेदः। सर्वादेरिति लुक्। स एव सार्ववेद्यः। चतुर्वेदस्योभयपदवृद्धि सादेश्चलु
श्च। चतुरो वेदानधीते चतुर्वेदः। स एव चातुर्वैद्यः। चतुर्विद्यस्येति पाठान्तरं। चतुर्विद्य एव चातुर्वैद्यः। स्तेनाद्यन्नलोपश्च। ग्वक्तव्यः ६
स्तेनति संघात ग्रहणं। स्तेन चौर्ये। एवा घत्र। स्तेनस्य भावः कर्म वा स्तेयं। स्तेनाद्दिवोगादि भक्ष्ये स्तेन्यं। मितिच्छन्नं तेमपि
केचित् पठन्ति। सख्युर्यः। सख्युर्भावः कर्म वा सख्यं। दूतवणिग्भ्यां च। दूतस्य भावः कर्म वा दूत्यं। वाणिज्यं। इति काशिका। मा
घवस्तु वणिज्याशब्दः स्वभावात्स्त्रीलिंगः। भावप्रत्ययान्तप्रत्ययो नतु कर्मणि स्यात्। भाष्येतु दूतवणिग्भ्यां चेति नास्ते
व। आसमणादित्वादाणिज्यमपि। कपिज्ञात्योर्ढक्। कापेयं। ज्ञातेयं। पत्यन्तपुरोहितादिभ्यो यक्। सेनापत्यं। पौरोहित्यं। राजा
सौ। राजन्शब्दो समासे पदं लभते इत्यर्थः। राज्ञो भावः कर्म वा राज्यं। समासेतु ब्राह्मणादित्वाष्यञ्। आधिराज्यं। प्राणभृ
ज्जातिवयोवचनोद्गात्रादिभ्योऽञ्। प्राणभृज्जातिः। आश्वं। औष्ट्रं। वयो वचनं। कौमारं। कैशोरं। औद्गात्रं। औन्नेत्रं।
सौष्टवं। दौष्टवं। हायनान्तयुवादिभ्योऽण्। [redacted]। द्वैहायनं। यौवनं। स्थाविरं। श्रोत्रियस्य यलोपश्च। श्रोत्रं। कै गणेशा
शलचपलनिपुणपिशुनकुतूहलक्षेत्रज्ञाः। युवादिषु ब्राह्मणादिषु च पठ्यन्ते। कौशलं। कौशल्यमित्यादि। इगन्ताच्च ॥२२॥

लघुपूर्वात्। शुचेर्भावः कर्म वा शौचं। मौनं। कथं काव्यं। कविशब्दस्य ब्राह्मणादित्वात्। योपधाद्गुरूपोत्तमाद्वुञ्। रामणीयकं। आभि
धानीयकं। सहायाद्वा। साहाय्यं। साहायकं। द्वन्द्वमनोज्ञादिभ्यश्च। शैष्योपाध्यायिका। मानोज्ञकं। गोत्रचरणाच्छ्लाघात्याकारत
दवेतेषु। आसाकारोधिक्षेपः। तदवेतस्ते गोत्रचरणयोर्भावकर्मणी प्राप्तः। अवगतवान् वा। गार्गिकया श्लाघते। गार्ग्यत्वेन वि
कत्थत इत्यर्थः। गार्गिकयात्याकुरुते। गार्गिकामवैति। होत्राभ्यश्छः। होत्राशब्दः ऋत्विग्वाची स्त्रीलिंगः। बहुवचनाद्द्रोषग्र
हणं। अच्छावाकस्य भावः कर्म वा। अच्छावाकीयं। मैत्रावरुणीयं। ब्रह्मणस्त्वः। होत्रावाचिनो ब्रह्मन्शब्दात् त्वः स्यात्। छस्यापवादः।
ब्रह्मत्वं। नेति वाच्ये त्ववचनं तलो बाधनार्थं। ब्राह्मणपर्यायात्तु ब्रह्मन्शब्दात्तु त्वतलौ। ब्रह्मत्वं। ब्रह्मता॥ नञ्स्नञोरधिकारः समाप्तः॥ ५॥
धान्यानां भवने क्षेत्रे खञ्। भवत्यस्मिन्निति भवनं। मुद्गानां भवनं क्षेत्रं मौद्गीनं। व्रीहिशाल्योर्ढक्। व्रैहेयं। शालेयं। यवयवक
षष्टिकाद्यत्। यवानां भवनं क्षेत्रं यव्यं। यवक्यं। षष्टिक्यं। विभाषा तिलमाषोमाभङ्गाणुभ्यः। यत् स्यात्। पक्षे खञ्। तिल्यं। तैली
नं। माष्यं। माषीणं। उम्यं। औमीनं। भङ्ग्यं। भाङ्गीनं। अणव्यं। आणवीनं। सर्वचर्मणः कृतः खखञौ। असामर्थ्येऽपि निपातना
त्समासः। सर्वैश्चर्मभिः कृतः सर्वचर्मीणः। सार्वचर्मीणः। यथामुखसंमुखस्य दर्शनः खः। मुखस्य सदृशं यथामुखं। प्रति
बिम्बं निपातनात्सादृश्येऽव्ययीभावः। समं सर्वं मुखं संमुखं। समशब्दस्याकारलोपो निपात्यते। यथामुखं दर्शनः। यथामु
खीनः। सर्वस्य मुखस्य दर्शनः संमुखीनः। तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति। सर्वादेः पथ्याद्यन्तात् खः स्यात्। सर्वपथा
न् व्याप्नोति सर्वपथीनः। सर्वाङ्गीणः। सर्वकर्मीणः। सर्वपात्रीणः। आप्रपदं प्राप्नोति। पादस्याग्रं प्रपदं तन्मर्यादीकृत्य आ
प्रपदं। आप्रपदीनः पटः। अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु। अनुरायामे सादृश्ये वा। अनुपदं बद्धा अनुप

सि॰कौ॰ ॥२८६॥

दीनाउपानत्‌। सर्वान्नानि भक्षयति सर्वान्नीनो भिक्षुः। अयानयः स्थलविशेषः। तन्नेयः अयानयीनः शारः। परोवरपरं-
परपुत्रपौत्रमनुभवति। परांश्चावरांश्चानुभवति परोवरीणः। अवरस्योत्वं निपात्यते। परांश्च परतरांश्चानु-
भवति परंपरीणः। प्रकृतेः पररभावो निपात्यते। पुत्रपौत्रमनुभवति पुत्रपौत्रीणः। परंपराशब्दस्य अव्युत्पन्नं
शब्दान्तरं स्त्रीलिंगे। तस्मादेव स्वार्थे ष्यञि पारंपर्यं। कथं पारोवर्यविदिति। असाधुरेवायं। खप्रत्ययसन्नियोगेनै-
व परोवरेति निपातनात्। अवारपारात्यन्तानुकामं गामी। अवारपारगामी। अवारपारीणः। अवारीणः। पारीणः। पारा-
वारीणः। अत्यन्तगामी। अत्यन्तीनः। भृशं गन्ता इत्यर्थः। अनुकामं गामी। अनुकामीनः। यथेष्टं गन्ता इत्यर्थः। समांसमां
विजायते। यप्सोपो वशिष्टविभक्तेरलुक् पूर्वपदे निपात्यते। समांसमीना। गौः। समांसमीना सा या प्रतिवर्षं प्रसू-
यते। खप्रत्ययानुसक्तो यलोपो वा वक्तव्यः। समांसमां विजायते समायासमायो वा। अद्यश्वीनावष्टब्धे। अद्यश्वो
वा विजायते अद्यश्वीना वडवा। आसन्नप्रसवेत्यर्थः। केचित्तु विजायत इति नानुवर्तयन्ति। अद्यश्वीनं मरणं।
आसन्नमित्यर्थः। आगवीनः। आङ्पूर्वाद्गोः कर्मकरे खप्रत्ययो निपात्यते। गोप्रत्यर्पणमर्यादया यः कर्म करो-
ति स आगवीनः। अनुग्वलंगामी। अनुगु गोः पश्चात् पर्याप्तं गच्छति अनुगवीनो गोपालः। अध्वनो यत्खौ। अ-
ध्वानमलंगच्छति अध्वन्यः। अध्वनीनः। ये चाभावकर्मणोः। आत्माध्वानौ खे इति प्रकृतिभावः। अभ्यमित्राच्छ
च। चात् घखौ। अभ्यमित्रीयः। अभ्यमित्र्यः। अभ्यमित्रीणः। अमित्राभिमुखं सुष्ठु गच्छतीत्यर्थः। गोष्ठात्खञ् भूत-
पूर्वे। गोष्ठो भूतपूर्वो गौष्ठीनो देशः। अश्वस्यैकाहगमः। एकाहेन गम्यत इत्येकाहगमः। आश्वीनोऽध्वा। शालीनकौ-

गणेश ॥२८६॥

पीने अधृष्टाकार्ययोः। शालाप्रवेशमर्हति शालीनः। अधृष्टः। कूपपतनमर्हति कौपीनं पापं। तत्साधनत्वात्तद्गतगोप्यं चा
ङ्ग पुरुषलिंगमपि। तत्संबंधात्तदाच्छादनमपि। व्रातेन जीवति। व्रातेन शरीरायासेन जीवति नतु बुद्धिवैभवेन। स व्रातीनः।
साप्तपदीनं सख्यं। सप्तभिः पदैरवाप्यते साप्तपदीनं। हैयंगवीनं संज्ञायां। ह्योगोदोहस्य हियंगुरादेशः। विकारार्थे खञ् च
निपात्यते। दुह्यत इति दोहः क्षीरं। ह्योगोदोहस्य विकारः हैयंगवीनं। नवनीतं। तस्य पाकमूले पील्वादिकर्णादिभ्यः कुण
ब्जाहचौ। पीलूनां पाकः पीलुकुणः। कर्णस्य मूलं कर्णजाहं। पक्षात्तिः। मूलग्रहणमात्रमनुवर्तते। पक्षस्य मूलं पक्षतिः।
तेन वित्तश्चुंचुपचणपौ। पकारः प्रत्यययोरादौ लुप्तनिर्दिष्टः। तेन चस्य चैव संज्ञा। विद्यया वित्तः विद्याचुंचुः। विद्याचणः।
विनञ्भ्यां नानाञौ नसह। असहार्थे एव। नाञ्वर्तमानाभ्यां स्वार्थे प्रत्ययौ। विना। नाना। वेः शालच्छंकटचौ। क्रियाविशि
ष्टसाधनवाचकात्स्वार्थे। विस्तृतं विशालं। विशंकटं। संप्रोदश्च कटच्। संकटं। प्रकटं। उत्कटं। वा। विकटं। अलाबूतिलो
माभंगाभ्यो रजस्युपसंख्यानं। अलाबूनां रजः अलाबूकटं। गोष्ठजादयः स्थानादिषु पशुनामभ्यः। गवां स्थानं गोगोष्ठं। सं
घाते कटच्। अवीनां संघातः अविकटः। विस्तारे पटच्। अविपटः। द्वित्वे गोयुगच्। द्वावुष्ट्रौ उष्ट्रगोयुगं। षट्त्वे षड्गवच्। अ
श्वषड्गवं। स्नेहे तैलच्। तिलतैलं। सर्षपतैलं। भवने क्षेत्रे शाकटशाकिनौ। इक्षुशाकटं। इक्षुशाकिनं। अवात्कुटारच्च। अवकु
टच्। अवाचीनः। अवकुटारः। अवकटः। नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः। अवादित्येव। नतं नमनं नासि
कायास्तत्प्रवटीटं। अवनाटं। अवभ्रटं। तद्योगान्नासिकाप्यवटीटा। पुरुषोऽप्यवटीटः। नेर्बिडज्बिरीसचौ। निबिडं। निबिरी
सं। इनच्पिटच्चिकचि च। नेरित्येव। नासिकायानतेऽभिधेये इनच्पिटचौ प्रत्ययौ प्रकृतेश्चिकचि इत्यादेशौ च। कप्र

प्रमाणमिह परिच्छेदकमात्रं न तु मानान्तरं । द्वयसच् दघ्नच् तु ऊर्ध्वमाने एव भवतः । प्रथमश्च द्वितीये अन्ये ऊर्ध्वमाने मतौ मम तौ मम मते इति भाष्यात् । ऊर्ध्वं स्थितं तेन येन मीयते ६
तेन ऊर्ध्वमानमस्तीति । तेनाति यस्मानां दीर्घं द्वयसं क्षेत्रमित्यादि न प्रयुज्यते । यथोत्तरं मुनीनां प्रामाण्यात् ४

द्विगोः प्रमाणत्वान्तं विध्यभावात् सर्वत्र प्राप्तो विधीयते ५

सि॰ कौ॰ स्यपविकादेशौ च वक्तव्यौ । चिकिनं । चिपिटं । चिक्कं । क्लिन्नस्य चिल्पिल् लश्चास्य चक्षुषी । क्लिन्ने चक्षुषी अस्य चिल्लः । पि-
॥७०॥ ल्लः । चुल्लश्च । चुल्लः । उपाधिभ्यां त्यकन्नासन्नारूढयोः । संज्ञायामित्यनुवर्तते । पर्वतस्यासन्नं स्थलमुपत्यका । आरूढं स्थ-
लमधित्यका । कर्मणि घटोऽठच् । घटतेरिति घटः । पवा घटः । कर्मणि घटते कर्मठः पुरुषः । तदस्य संजातं तारकादिभ्य इत-
प्रमाणत्वेन येषु सिद्धाः तेभ्यः परस्येषा यतु॰ रू॰ ५ च् । तारकाः संजाता अस्य तारकितं नभः । आकृतिगणोऽयं । प्रमाणे द्वयसज्दघ्नञ्मात्रचः । तदस्येत्यनुवर्तते । ऊरू प्रमाणम-
स्य ऊरुद्वयसं । ऊरुदघ्नं । ऊरुमात्रं । प्रमाणे लः । शमः । दिष्टिः । वितस्तिः । द्विगोर्नित्यं । द्वौ शमौ प्रमाणमस्य द्विशमं । प्रमा-
णपरिमाणाभ्यां संख्यायाश्चापि संशये मात्रज्वक्तव्यः । शममात्रं । प्रस्थमात्रं । पञ्चमात्राः । वत्वन्तात्स्वार्थे द्वयसज्मात्रचौ ।
हस्तिप्रमाणमस्य हस्तिद्वयसमित्यादौ इति प्रकृतिभावः तावद्द्वयसं तावन्मात्रं । पुरुषहस्तिभ्यामण् च । पुरुषः प्रमाणमस्य पौरुषं । पुरुषद्वयसं । यत्तदेतेभ्यः परिमाणे
वतुप् । यत्परिमाणमस्य यावान् । तावान् । एतावान् । किमिदम्भ्यां वो घः । आभ्यां वतुप् स्यात् वस्य च घः । कियान् । इयान् । कि-
मः संख्यापरिमाणे डति च । वा वतुप् तस्य च वस्य घः स्यात् । का संख्या येषां ते कति । कियन्तः । संख्याया अवयवे तय-
य प् । पञ्च अवयवा अस्य पञ्चतयं । द्वित्रिभ्यां तयस्यायज्वा । द्वयं । द्वितयं । त्रयं त्रितयं । उभादुदात्तो नित्यं । उभशब्दात्तयपो यच्
स्यात्स चाद्युदात्तः । उभयं । तदस्मिन्नधिकमिति दशान्ताड्डः । एकादश अधिका अस्मिन्नेकादशं शतसहस्रं । यो रेव प्यते ।
नेह । एकादश अधिका अस्यां विंशत्यां । प्रकृतिप्रत्ययार्थयोः समानजातीयत्व एवेष्यते । नेह । एकादश माषा अधिका
अस्मिन्नस्सुवर्णशते । शदन्तविंशतेश्च । डः स्यादुक्तेऽर्थे । त्रिंशदधिका अस्मिन्त्रिंशं शतं । विंशं । संख्याया गुणस्य निमा- ग॰ रू॰ श
ने मयट् । भागस्य मूल्ये वर्तमानात्प्रथमान्तात्संख्यावाचिनः षष्ठ्यर्थे मयट् स्यात् । यवानां द्वौ भागौ निमानमस्योद- ॥६०॥
श्वित्वत इह एकमिह विंशतिशब्दान्तरं कर्तव्यं । शदिति शब्दान्तरे इति तेन एकविंशं शतमित्यादि सिध्यति । अन्यथा ग्रहणवते इति तदन्तविधिप्रतिषेधादिह न स्यात् २

।भ्रिंशागस्य छिमयमुद्श्विघवानां गुणस्येति किं। द्वौ व्रीहियवौ मूल्यमानमस्योदश्वितः।निमाने किं। द्वौ गुणौ क्षीरस्य एक
स्तैलस्य द्विगुणं तैलं पच्यते क्षीरेण।तस्य पूरणे डट्।एकादशानां पूरणः एकादशः।नान्तादसंख्यादेर्मट्।डटो मडागमः
स्यात्।पञ्चानां पूरणः पञ्चमः।नान्तात् किं।विंशः।असंख्यादेः किं।एकादशः।षट्कतिकतिपयचतुरां थुक्।एषां थुगागमः स्याड्
डटि।षण्णां पूरणः षष्ठः।कतिथः।कतिपयशब्दस्यासंख्यात्वेऽपि अत एव ज्ञापकाड्डट्।कतिपयथः।चतुर्थः।चतुरश्छयतावाद्य
२५ क्षरलोपश्च।तुरीयः।तुर्यः।बहुपूगगणसंघस्य तिथुक्।डटि एषां वा।पूगसंघयोरसंख्यात्वेऽपि अत एव डट्।बहुतिथः इत्यादि।
वतोरिथुक्।डतीयेवं।यावतिथः।द्वेस्तीयः।डटोऽपवादः।द्वयोः पूरणो द्वितीयः।त्रेः संप्रसारणं च।तृतीयः।विंशत्यादिभ्यस्तमडन्य
तरस्याम्।एभ्यो डटस्तमडागमो वा स्यात्।विंशतितमः।विंशः।एकविंशतितमः।एकविंशः।नित्यं शतादिमासार्द्धमाससंवत्स
राच्च।शतस्य पूरणः शततमः।एकशततमः।मासादेरत एव डट्।मासतमः।षष्ट्यादेश्चासंख्यादेः।षष्टितमः।संख्यादेस्तु
विंशत्यादिभ्य इति विकल्प एव।एकषष्टः।एकषष्टितमः।मतौ छः सूक्तसाम्नोः।मत्वर्थे छः स्यात्।अच्छावाकशब्दोऽस्मिन्न
स्तीत्यच्छावाकीयं सूक्तम्।वारवन्तीयं साम।अध्यायानुवाकयोर्लुक्।मत्वर्थस्य छस्य।अत एव ज्ञापकात्तत्र छः।विधानसाम
र्थ्यात् च विकल्पेन लुक्।गर्दभाण्डः।गर्दभाण्डीयः।विमुक्तादिभ्योऽण्।मत्वर्थेऽण् स्यादध्यायानुवाकयोः।विमुक्तशब्दोऽस्मिन्न
स्तीति वैमुक्तः।दैवासुरः।गोषदादिभ्यो वुन्।मत्वर्थेऽध्यायानुवाकयोः।गोषदकः।इषेत्वकः।तत्र कुशलः पथः।वुन् स्यात्।पथिकु
शलः पथकः।आकर्षादिभ्यः कन्।आकर्षे कुशलः आकर्षिकः।आकर्षादिभ्य इति रेफरहितो मुख्यः पाठः।आकर्षो निकषः।
धनहिरण्यात्कामे।कामइच्छा।धने कामो धनको देवदत्तस्य।हिरण्यकः।स्वाङ्गेभ्यः प्रसिते।केशेषु प्रसितः केशकः।तद्वना

सि.सु. यांतस्य रड् स्वर्थः॥ उदराट्ठगाद्यूने॥ अविजिगीषौ ठक्प्रत्ययान्तः कनोपवादः॥ बुभुक्षया स्वं तपीडितुदरे प्रसितः औदरिकः॥ आद्यूने किं।
॥७१॥ उदरकः॥ उदरपरिमार्जनादौ प्रसक्त इत्यर्थः॥ सस्येन परिजातः॥ कन्स्यादेव तेन तु ठकः॥ सस्यशब्दो गुणवाची। न तु धान्यवाची॥ शस्ये
नेति पाठान्तरे। शस्येन गुणेन परिजातः संबद्धः शस्यकः साधुः॥ अंशं हारी॥ हारी आवश्यके णिनिः॥ अत एव तद्योगे षष्ठी न॥ अं
शको दायादः॥ तन्त्रादचिरापहृते॥ तन्त्रकः पटः॥ प्रत्यग्र इत्यर्थः॥ ब्राह्मणकोष्णिके संज्ञायां॥ आयुधजीविनो ब्राह्मणा यस्मिन् देशे
स ब्राह्मणकः॥ अल्पमन्नं यस्यां सा उष्णिका यवागूः॥ अन्नशब्दस्य उष्णादेशो निपात्यते॥ शीतोष्णाभ्यां कारिणि॥ शीतं करोति शीत
कः अलसः॥ उष्णं करोति उष्णकः शीघ्रकारी॥ अधिकं॥ अध्यारूढशब्दात्कन् उत्तरपदलोपश्च॥ अनुकाभिकाभीकः कमिता॥
अचभिभ्यां कन् अभेः पाक्षिको दीर्घश्च॥ अनुकामयते अनुकः [illegible]॥ अभिकामयते अभिकः [illegible]॥ अभीकः॥ पार्श्वेनान्विच्छ
ति॥ अनृजुरुपायः पार्श्वं तेनान्विच्छति पार्श्वकः॥ अयःशूलदण्डाजिनाभ्यां ठक्ठञौ॥ तीक्ष्णोपायो यः शूलं तेनान्विच्छति
आयःशूलिकः॥ साहसिकः॥ दण्डाजिनं दम्भः॥ तेनान्विच्छति दाण्डाजिनिकः॥ तावतिथं ग्रहणमिति लुग्वा॥ कन्स्यात्पूरण
प्रत्ययस्य वा लुक्। द्वितीयकं। द्विकं वा ग्रहणं देवदत्तस्य। द्वितीयेन रूपेण ग्रहणमित्यर्थः॥ तावतिथेन गृह्णातीति कन्
वक्तव्यः॥ नित्यं च लुक्। षष्ठेन रूपेण गृह्णातीति षट्को देवदत्तः॥ पंचकः॥ स एषां ग्रामणीः॥ देवदत्तो मुख्यो येषां ते देवदत्तकाः॥ श्रीराम
त्वत्काः॥ मत्काः॥ शृङ्खलमस्य बन्धनं करभे॥ शृङ्खलकः करभः॥ उत्क उन्मनाः॥ उद्गमनं तेनस्कन्नत्वे रूढत्वादन्यार्थकत्वात् उत्क
उत्कण्ठितः॥ कालप्रयोजनाद्रोगे॥ कालवचनात्प्रयोजनवचनाच्च कन्स्याद्रोगे। द्वितीयेऽह्नि भवो द्वितीयको ज्वरः॥ प्रयोज गालेश्री
नं कारणं रोगस्य फलं वा॥ विषपुष्पैर्जनितो विषपुष्पकः॥ उष्णं कार्यमस्य उष्णकः॥ रोगे किं। द्वितीयो दिवसोऽस्य तदस्मिन्नन्नं प्राये सं ॥९१॥

ज्ञायां। प्रथमांतात्सप्तम्यर्थे कन् स्यात् यत्प्रथमांतमन्नं चेत्प्रायविषयं तत्र। गुडापूपाः प्रायेणान्नमस्यां गुडापूपिका पौर्णमासी॥
वटकेभ्य इनिर्वाच्यः। वटकिनी। कुल्माषादञ्। कुल्माषाः प्रायेणान्नमस्यां कौल्माषी। श्रोत्रियंश्छंदोधीते। श्रोत्रियः। वेदमनुव
क्तेत्यर्थः॥ श्राद्धमनेन भुक्तमिनिठनौ। श्राद्धी। श्राद्धिकः। पूर्वादिनिः। पूर्वं कृतमनेन पूर्वी। सपूर्वाच्च। कृतपूर्वी। इष्टादिभ्य
श्च। इष्टमनेन इष्टी। अधीती। छंदसि परिपंथिपरिपरिणौ पर्यवस्थातरि। लोके तु परिपंथिशब्दो न्याय्यः। अनुपद्यन्वे
ष्टा। अनुपदमन्वेष्टा। अनुपदी गवां। साक्षाद्द्रष्टरि संज्ञायां। साक्षाद्द्रष्टा साक्षी। क्षेत्रियच् परक्षेत्रे चिकित्स्यः। क्षेत्रियो व्या
धिः शरीरांतरे चिकित्स्यः। अप्रतीकार्य इत्यर्थः॥ इंद्रियमिंद्रलिंगमिंद्रदृष्टमिंद्रसृष्टमिंद्रजुष्टमिंद्रदत्तमिति वा। इं
द्र आत्मा तस्य लिंगं करणेन कर्तुरनुमानात्। इति करणः। कोपरार्थः। इंद्रेण दुर्जयमिंद्रियं। तदस्यास्त्यस्मिन्निति म
तुप्। गावोस्यास्मिन् वा संति गोमान्। भूमनिंदाप्रशंसासु नित्ययोगेतिशायने। संबंधेस्ति विवक्षायां भवंति मतुबाद
यः॥१॥ रसादिभ्यश्च। मतुप्। रसवान्। रूपवान्। अन्यमत्वर्थीयनिवृत्त्यर्थं वचनं। रस। रूप। वर्ण। गंध। स्पर्श। शब्द। स्नेह। गु
ण त। एकाचः। स्ववान्। गुणग्रहणं रसादीनां विशेषणं। तसौ मत्वर्थे। तांतसांतौ भसंज्ञौ स्तो मत्वर्थे प्रत्यये। वसोः संप्रसा
रणं। विदुष्मान्। गुणवचनेभ्यो मतुपो लुगिष्टः। शुक्लो गुणोस्यास्तीति शुक्लः पटः। कृष्णः। मादुपधायाश्च मतोर्वोऽयवा
दिभ्यः। मवर्णावर्णांतान्मवर्णावर्णोपधाच्च यवादिवर्जितात् परस्य मतोर्मस्य वः स्यात्। किंवान्। ज्ञानवान्। विद्यावान्। लक्ष्मी
वान्। यशस्वान्। भास्वान्। यवादेर्न। यवमान्। भूमिमान्। झयः। झयंतान्मतोर्मस्य वः स्यात्। अपदांतत्वाज्जश्त्वं। वि
द्युत्वान्। संज्ञायां। मतोर्मस्य वः स्यात्। अहीवती। मुनीवती। शरादित्वाद्दीर्घः। आसंदीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्म

एवती। एते षट् संज्ञायां निपात्यंते। आसनशब्दस्य आसंदीभावः। आसंदीवान् ग्रामः। अन्यत्र आसनवान्। अस्थिशब्दस्या
ष्ठीभावः। अस्थिमानन्यत्र। चक्रशब्दस्य चक्रीभावः। चक्रीवान्नाम राजा। चक्रवानन्यत्र। कक्ष्यायाः संप्रसारणं। कक्षीवा
न्नाम ऋषिः। कक्ष्यावानन्यः। लवणशब्दस्य रुमण्भावः। रुमण्वान्नाम पर्वतः। लवणवानन्यत्र। चर्मणो णलोपाभावो णत्वं
च। चर्मण्वती नाम नदी। चर्मवत्यन्यत्र। उदन्वानुदधौ च। उदकस्य उदन्भावो मतौ। उदधौ संज्ञायां च। उदन्वान् समुद्र ऋ
षिश्च। राजन्वान् सौराज्ये। राजन्वती भूः। राजवानन्यत्र। प्राणिस्थादातो लजन्यतरस्यां। चूडालः। प्राणिस्थात्किं। शि
खावान्दीपः। आतः किं। हस्तवान्। प्राण्यंगादेव। नेह मेधावान्। प्रत्ययस्वरेणैव सिद्धेंऽतोदात्तत्वे चूडालोसीत्यादौ
स्वरितो वानुदात्ते पदादौ इति स्वरितबाधनार्थश्चकारः। सिध्मादिभ्यश्च। लज्वा स्यात्। सिध्मलः। सिध्मवान्। अन्यत
रस्यां ग्रहणं मतुप्समुच्चयार्थं। न तु प्रत्ययविकल्पार्थं। तेनाकारांतेभ्य इनिठनौ न। वातदंतबलललाटानामूङ्
च। वातूलः। वत्सांसाभ्यां कामबले। आभ्यां लज्वा स्यात् यथासंख्यं कामवति बलवति चार्थे। वत्सलः। अंसलः। फेना
दिलच्च। चाल्लच्च। अन्यतरस्यां ग्रहणं मतुप्समुच्चयार्थमनुवर्तते। फेनिलः। फेनलः। फेनवान्। लोमादिपामादिपिच्छादिभ्यः
शनेलचः। लोमादिभ्यः शः। लोमशः। लोमवान्। रोमशः। रोमवान्। पामादिभ्यो नः। पामनः। अंगात्कल्याणे। अंगना।
लक्ष्म्या अच्च। लक्ष्मणः। विष्वगित्युत्तरपदलोपश्चाकृतसंधेः। विषुणः। पिच्छादिभ्य इलच्। पिच्छिलः। पिच्छवान्।
उरसिलः। उरस्वान्। प्रज्ञाश्रद्धार्चाभ्यो णः। प्राज्ञो व्याकरणं। प्राज्ञा। श्राद्धः। आर्चः। वृत्तेश्च। वार्तः। तपःसहस्राभ्यां
विनीनी। विनीन्योरिकारो नकारपरिग्रहणार्थः। तपस्वी। सहस्री। असंतत्वाददंतत्वाच्च सिद्धे पुनर्वचनमणबाधा

माऽस्त्विति। सहस्रात्तु ठनो बाधनार्थं अणं च। योगविभाग उत्तरार्थः॥ तापसः॥ साहस्रः॥ ज्योत्स्नादिभ्य उपसंख्यानं॥ ज्यौ
त्स्नः॥ तामिस्रः॥ सिकताशर्कराभ्यां च। सैकतो घटः॥ शार्करः॥ देशे लुबिलचौ च। चाद् अण्मतुपौ च। सिकताः सन्त्यस्मिन्दे १८
शे सिकताः॥ सिकतिलः॥ सैकतः॥ सिकतावान्। एवं शर्करादि साधि॥ दन्त उन्नत उरच्। उन्नता दन्ताः सन्त्यस्य दन्तुरः॥
ऊषसुषिमुष्कमधो रः॥ ऊषरः॥ सुषिरः॥ मुष्कोऽण्डः॥ मुष्करः॥ मधु माधुर्यं। मधुरः॥ रप्रकरणे खमुखकुञ्जेभ्य उपसंख्या
नं। खरः॥ मुखरः॥ कुञ्जो हस्तिहनुः॥ कुञ्जरः॥ नगपांसुपाण्डुभ्यश्च। नगरं। पाण्डुरः॥ पांसुरः॥ पाण्डुरशब्दस्त्वव्युत्पन्न
एव। कच्छ्वा ह्रस्वत्वं च। कच्छुरः॥ द्युद्रुभ्यां मः॥ द्युमः॥ द्रुमः॥ केशाद्वोऽन्यतरस्यां। प्रकृतेनान्यतरस्यां ग्रहणेन मतुपि
सिद्धे पुनर्ग्रहणमिनिठनोः समावेशार्थं। केशवः। केशी। केशिकः। केशवान्। अन्येभ्योऽपि दृश्यते। मणिवो नागवि
शेषः॥ हिरण्यवो निधिविशेषः॥ अर्णसो लोपश्च। अर्णवः॥ गाण्ड्यजगात्संज्ञायां। ह्रस्वदीर्घयोर्यणा तन्त्रेण निर्देशः॥
गाण्डिवं। गाण्डीवं। अर्जुनस्य धनुः॥ अजगवं पिनाकः॥ काण्डाण्डादीरन्नीरचौ। काण्डीरः॥ आण्डीरः॥ रजःकृष्यासुतिपरिषदो
वलच्। रजस्वला स्त्री। कृषीवलः॥ वले इति दीर्घः॥ आसुतीवलः॥ शौण्डिकः। परिषद्वलः॥ पर्षदिति पाठान्तरं। पर्षद्वलः॥
अन्येभ्योऽपि दृश्यते। भ्रातृवलः॥ शत्रुवलः॥ वले इत्यत्र संज्ञायामिति समनुवृत्तेर्नेह। दीर्घः॥ दन्तशिखात्संज्ञायां। दन्तावलो ह
स्ती। शिखावलः केकी॥ ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः। मत्वर्थे निपात्यन्ते। ज्यो
तिष उपधालोपो नश्च प्रत्ययः॥ ज्योत्स्ना॥ तमस उपधाया इत्वं रश्च। तमिस्रा। स्त्रीत्वमतन्त्रं। तमिस्रं। शृङ्गादिनच्। शृङ्गि
णः॥ ऊर्जसो बलच्। तेन बाधा माऽस्त्विति विनिरपि। ऊर्जस्वी। ऊर्जस्वलः॥ ऊर्जो असुगागमः। इति रक्षितः। विंसो ऊर्जस्य

तीति नियतः। अप्रसक्तत्वे नैवोपपत्तेः। गोशकादिभ्यो मिनिः। गोमी। मलशब्दादिनच्। मलिनः। ईमसश्च (मल) मसः। अत इनिठनौ। दंडी।
दण्डिकः। व्रीह्यादिभ्यश्च। व्रीही। व्रीहिकः। न च सर्वेभ्यो व्रीह्यादिभ्य इनिठनौ विधीयेते। किं तर्हि शिखामालासंज्ञादिभ्य इ-
निः। यवखदादिभ्य इकः। अन्येभ्य उभयं। तुन्दादिभ्य इलच्च। यादिनिठनौ मतुप् च। तुन्दिलः। तुन्दी। तुन्दिकः। तुन्दवान्। उदर।
पिचंड। यव। व्रीहि। स्वांगाद्विवृद्धौ। कर्णिलः। कर्णी। कर्णिकः। कर्णवान्। एकगोपूर्वाट्ठञ् नित्यं। एकशतमस्यास्तीति ऐ-
कशतिकः। ऐकसहस्रिकः। गोशतिकः। गोसहस्रिकः। शतसहस्रान्ताच्च निष्कात्। निष्कात्परो यः शतसहस्रशब्दौ तदन्ताट्ठ-
ञिति पदिकाहुरेन्स्यात् मत्वर्थे। नैष्कशतिकः। नैष्कसहस्रिकः। रूपादाहतप्रशंसयोर्यप्। आहतं रूपमस्यास्तीति रूप्यः
कार्षापणः। प्रशस्तं रूपमस्यास्तीति रूप्यो गौः। आहते किं। रूपवान्। अन्येभ्योपि दृश्यते। हिम्याः पर्वताः। गुण्या ब्राह्म-
णाः। अस्मायामेधास्रजो विनिः। यशस्वी। यशस्वान्। मायावी। मायावान्। व्रीह्यादिपाठादिनिठनौ। मायी। मायिकः।
।केत्रेत चालकत्व। स्रग्वी। आमयस्योपसंख्यानं दीर्घश्च। आमयावी। शृंगवृन्दाभ्यामारकन्। शृंगारकः। वृन्दारकः। फल-
बर्हिभ्यामिनच्। फलिनः। बर्हिणः। हृदयाच्चालुरन्यतरस्यां। हृदयालुः। हृदयी। हृदयिकः। हृदयवान्। शीतोष्णतृप्र-
भ्यस्तदसहने। शीतं न सहते शीतालुः। उष्णालुः। कापितचीतिरक। तृप्रः पुरोडाशः। तन्न सहते तृप्रालुः। तृप्रं दुःख-
मिति माधवः। हिमाच्चेलुः। हिमं न सहते हिमेलुः। बलादूलः। बलं न सहते बलूलः। वातात्समूहे च। वातं न सहते वात-
समूहो वा वातूलः। तप्पर्वमरुद्भ्यां। पर्वतः। मरुत्तः। ऊर्णाया युस्। सिध्मालस्य दत्तो ऊर्णायुः। अचछेदसि इति केचित्तु वर्णयं-
ति। युक्तं चैतत् अन्यथा हि अहंशुभमोरियुस्त्रैवोर्णाग्रहणं कुर्यात्। वाचोग्मिनिः। वाग्ग्मी। आलजाटचौ बहुभाषिणि।

कुत्सित इति वक्तव्यं । कुत्सितं बहु भाषते वाचाटो वाचाटः । यस्तु सम्यग्बहु वदति तत्र वाग्मीत्येव । स्वामिन्नैश्वर्ये । ऐश्वर्यवा
चकात्स्वशब्दान्मत्वर्थे आमिनिच् स्यात् । स्वामी । अर्श आदिभ्योऽच् । अर्शांसि अस्य विद्यन्ते अर्शसः । आकृतिगणोऽयं । द्वन्द्वोपतापग
र्ह्यात्प्राणिस्थादिनिः । द्वन्द्वः कटकवलयिनी । शंखनूपुरिणी । उपतापो रोगः । कुष्ठी । किलासी । गर्ह्यं निंद्यं । ककुदावर्ती ।
काकतालुकी । प्राणिस्थात्किं । पुष्पफलवान् घटः । प्राण्यंगादेव । पाणिपादवती । अत इत्येव । चित्रकललाटिकावती । सिद्धे
प्रत्यये पुनर्वचनं ठनादिबाधनार्थं । वातातिसाराभ्यां कुक् च । वातादिभिः । वातकी । अतीसारकी । रोगे चायमिष्यते । नेह । वा
तवती गुहा । पिशाचाच्च । पिशाचकी । वयसि पूरणात् । पूरणप्रत्ययान्तान्मत्वर्थे इनिः स्यात् वयसि द्योत्ये । मासः संवत्सरो
वास्यास्तीति पंचमी उष्ट्रः । ठन्बाधनार्थमिदं । वयसि किं । पंचमवान् ग्रामः । सुखादिभ्यश्च । इनिर्मत्वर्थे । सुखी । दुःखी । माला
क्षेपे । माली । धर्मशीलवर्णान्ताच्च । धर्मान्तादिनिर्मत्वर्थे । ब्राह्मणधर्मी । ब्राह्मणशीली । ब्राह्मणवर्णी । हस्ताज्जातौ । ह
स्ती । जातौ किं । हस्तवान् पुरुषः । वर्णाद्ब्रह्मचारिणि । वर्णी । पुष्करादिभ्यो देशे । पुष्करिणी पद्मिनी । देशे किं । पुष्करवा
न् हस्ती । बाहूरुपूर्वपदाद्बलात् । बाहुबली । ऊरुबली । सर्वादेश्च । सर्वधनी । सर्वबीजी । अर्थाच्चासन्निहिते । अर्थी । सन्नि
हिते तु अर्थवान् । तदन्ताच्च । धान्यार्थी । हिरण्यार्थी । बलादिभ्यो मतुबन्यतरस्यां । बलवान् । बली । उत्साहवान् । उत्साही ।
संज्ञायां मन्माभ्यां । मन्नन्तान्मान्ताच्चेनिर्मत्वर्थे । प्रथिमिनी । दामिनी । होमिनी । सोमिनी । संज्ञायां किं । सोमवान् । कंशंभ्यां ब
भयुस्तितुतयसः । कं शमिति मान्तौ । कमिति उदकसुखयोः । शमिति सुखे । आभ्यां सप्त प्रत्ययाः स्युः । युसयसोः स
कारः पदत्वार्थः । कंबः । कंभः । कंयुः । कंतिः । कंतुः । कंतः । कंयः । शंबः । शंभः । शंयुः । शंतिः । शंतुः । शंतः । शंयः । अनुस्वारस्य

सि.सु. वैकल्पिकः। पसेरवेलिः। वकारयकारपरस्यानुनासिकौ वयो। तुंदिवलिवटेर्भः। तुंदज्ञानाभि(?)स्तं दिः। मद्ध्स्योपधोयमिति
॥६४॥ माघवः। तुंदिभः। वलिभः। वटिभः। पामादित्वाद्वलिनोऽपि। अहंशुभमोर्युस्। अहमिति मान्तमव्ययमहंकारे। शुभमिति
शुभे। अहंयुः। अहंकारवानित्यर्थः। शुभंयुः शुभान्वितः। इति मत्वर्थीयाः॥ ॥ प्राग्दिशोविभक्तिः। दिक्शब्देभ्य इत्यतः प्राक्
वक्ष्यमाणाः प्रत्यया विभक्तिसंज्ञाः स्युः। अथ स्वार्थिकाः प्रत्ययाः। समर्थानामिति प्रथमादिति च निवृत्तं। वेत्यनुवर्तते।
एवं। किंसर्वनामबहुभ्योऽद्व्यादिभ्यः। किमः सर्वनाम्नो बहुशब्दाच्चेति प्राग्दिशोऽधिक्रियते। इदमिश्। प्राग्दिशीये परे
एतेतौ रथोः। इदमशब्दस्य एत इत इत्यादेशौ स्तो रेफादौ थकारादौ च प्राग्दिशीये परे। इशोऽपवादः। एतदोऽन्। योग
विभागः कर्तव्यः। एतदः। एतेतौ स्तो रथोः। अन्। एतद इत्येव। अनेकाल्त्वात्सर्वादेशः। नलोपः प्रातिपदिकान्तस्य।
सर्वस्य सोऽन्यतरस्यां दि। प्राग्दिशीये दकारादौ प्रत्यये परे सर्वस्य सो वा स्यात्। पंचम्यास्तसिल्। पंचम्यंतेभ्यः किमा
दिभ्यः तसिल् स्याद्वा। कुतिहोः। किमः कुः स्यात्तादौ हादौ च विभक्तौ परतः। कुतः। कस्मात्। यतः। ततः। इतः। अतः।
तु५ अमुतः। बहुतः। द्व्यादेस्तु द्वाभ्यां। तसेश्च। किंसर्वनामबहुभ्यः परस्य तसेस्तसिलादेशः स्यात्। स्वरार्थं विभक्त्यर्थं च
वचनं। पर्यभिभ्यां च। आभ्यां तसिल् स्यात्। सर्वोभयार्थाभ्यामेव। परितः। सर्वतः। इत्यर्थः। अभितः। उभयत इत्यर्थः। स
प्तम्यास्त्रल्। कुत्र। यत्र। बहुत्र। इदमो हः। त्रलोऽपवादः। इशादेशः। इह। किमोऽत्। वाग्रहणमपकृष्यते। सप्तम्यंतात्किमो
अत्स्यात्। पक्षे त्रल्। क्वाति। किमः क्वादेशः स्यादति। क्व। कुत्र। वा ह च छंदसि। कुह स्थः। कुह जग्मथुः। एतदस्त्रत गणेश
सोस्त्रतसौ चानुदात्तौ। अन्वादेशविषये एतदोऽश् स्यात्स चानुदात्तस्त्रतसोः परतस्तौ चानुदात्तौ स्तः। एस्मिन्या न,॥७४॥

मे सुरवं वसामः। अथो अन्नाधीमहे। अतो न गंतास्मः। इतराभ्योपि दृश्यंते। पंचमी सप्तमीतरविभक्त्यंतादपि तसिलादयो दृश्यंते।
दृशिग्रहणाद्भवदादियोगे एव। स भवान् ततो भवान्। तत्र भवान्। तं भवंतं। ततो भवंतं। तत्र भवंतं। एवं दीर्घायुः। देवानां
प्रियः। आयुष्मान्। सर्वैकान्यकिंयत्तदः काले दा। सप्तम्यंतेभ्य एभ्यः ते कालार्थेभ्यः स्वार्थे दा स्यात्। सर्वस्मिन् काले सदा
सर्वदा। एकदा। अन्यदा। कदा। यदा। तदा। काले किं। सर्वत्र देशे। इदमो र्हिल्। सप्तम्यंतात्काले इसेव। हस्यापवादः। अस्मिन्
काले एतर्हि। काले किं। इह देशे। अधुना। इदमः सप्तम्यंतात् कालवाचिनः स्वार्थे ऽधुना प्रत्ययः स्यात्। इइरा यस्येति लोपः।
अधुना। दानीं च। इदानीं। तदो दा च। तदा। तदानीं। तदो दाव चनमनुर्थकं विहितत्वात्। अनद्यतने र्हिलन्यतरस्यां। कर्हि।
कदा। यर्हि। यदा। तर्हि। तदा। एतस्मिन् काले एतर्हि। सद्यः परुत्परार्यैषमः परेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरप
रेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः। एते निपात्यंते। समानस्य सभावो द्यस् चाहनि। समानेऽहनि सद्यः। पूर्वपूर्वतरयोः परः। उद
री च प्रत्ययो संवत्सरे। अस्मिन् संवत्सरे ऐषमः। पूर्वस्मिन् वत्सरे परुत्। पूर्वतरे वत्सरे परारि। इदम इश् समसण् प्रत्ययश्च सं
वत्सरे। अस्मिन् संवत्सरे ऐषमः। परस्मादेद्युश्चाहनि। परस्मिन्नहनि परेद्यवि। इदमोऽश् द्यश्च। अस्मिन्नहनि अद्य। पूर्वा
दिभ्योऽष्टभ्योऽहन्येद्युस्। पूर्वस्मिन्नहनि पूर्वेद्युः। अन्यस्मिन्नहनि अन्येद्युः। उभयोरह्नोरुभयेद्युः। द्युश्चोभयाद्वक्तव्यः।
उभयद्युः। प्रकारवचने थाल्। प्रकारवृत्तिभ्यः किमादिभ्यः स्थाल् स्यात्स्वार्थे। तेन प्रकारेण तथा। यथा। इदमस्थमुः।
थालोपवादः। एतदोपि वाच्यः। अनेन एतेन वा प्रकारेण इत्थं। किमश्च। केन प्रकारेण कथं।।।। इति प्राग्दिशीया विभ
क्तिसंज्ञा नोपसर्गे च धिः॥८५॥ दिक्शब्देभ्यः सप्तमीपंचमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः। सप्तम्याद्यंतेभ्यो दिशि

सि.स्तु. रूढेभ्यो दिग्देशकालवृत्तिभ्यः स्वार्थे अस्तातिप्रत्ययः स्यात्। पूर्वाधरावराणामसि पुरधवश्चैषां। एभ्यो अस्तात्यर्थे असिप्रत्ययः स्यात् तद्यो
॥२६५॥ गे चैषां क्रमात् पुर् अध् अव् इत्यादेशाः स्युः। अस्ताति च। अस्तातौ परे पूर्वादीनां पुरादयः स्युः। पूर्वस्यां पूर्वस्याः पूर्वा वा दिक् पुरः।
पुरस्तात्। अधः। अधस्तात्। अवः। विभाषावरस्य। अवरस्यास्तातौ परे अव स्याद्वा। अवस्तात्। अवरस्तात्। एवं देशे काले च।
दिशि रूढेभ्यः किं। ऐन्द्र्यां वसति। सप्तम्याद्यन्तेभ्यः किं। पूर्वं ग्रामं गतः। दिगादिवृत्तिभ्यः किं। पूर्वस्मिन् गुरौ वसति। अस्तातिचे
ति ज्ञापकादस्तिरस्तातिर्न बाधते। दक्षिणोत्तराभ्यामतसुच्। अस्ताते रपवादः। दक्षिणतः। उत्तरतः। विभाषा परावराभ्यां। परतः।
अवरतः। परस्तात् अवरस्तात्। अञ्चेर्लुक्। अञ्चत्यन्तादिक्शब्दादस्तातेर्लुक् स्यात्। लुक्तद्धितलुकि। प्राच्यां। प्राच्याः। प्राचीवा
दिक्। प्राक्। उदक्। एवं देशे काले च। उपर्युपरिष्टात्। अस्तातिविषये ऊर्ध्वशब्दस्य उपादेशः स्यात् रिल्रिष्टातिलौ च प्रत्ययौ।
रि उपरि। उपरिष्टाद्वा वसति आगतो रमणीयं वा। पश्चात्। अपरस्य पश्चभावः आति प्रत्यये। अस्तातेर्विषये। उत्तराधरदक्षि
णादातिः। उत्तरात्। अधरात्। दक्षिणात्। एनबन्यतरस्यामदूरेऽपञ्चम्याः। उत्तरादिभ्य एनप् वा स्यादवध्यवधिमतोः सामी
प्ये पञ्चमीं विना। उत्तरेण। अधरेण। दक्षिणेन। पक्षे यथास्वं प्रत्ययाः। इह केचिदुत्तरादीननुवर्त्य दिक्शब्दमात्रादेनप
माहुः। पूर्वेण ग्रामं। अपरेण ग्रामं। दक्षिणादाच्। अस्तातेर्विषये। दक्षिणा वसति। अपञ्चम्या इत्येव। दक्षिणादागतः। आ
हि च दूरे। दक्षिणाद् दूरे आहिः स्यात्। चादाच्। दक्षिणाहि। दक्षिणा। उत्तराच्च। उत्तराहि। उत्तरा। संख्याया विधार्थे धा। क्रिया
प्रकारे वर्तमानात् संख्याशब्दात् स्वार्थे धा स्यात्। चतुर्धा। पञ्चधा। अधिकरणविचाले च। द्रव्यस्य संख्यान्तरापादने संख्या गणेश।
या धा स्यात्। एकं राशिं पञ्चधा कुरु। एकाद्धो ध्यमुञन्यतरस्यां। ऐकध्यं। एकधा। द्वित्र्योश्च धमुञ्। आभ्यां धा इत्यस्य ध ॥२६५॥

भा

मुत्र वास्यात् । द्वैधं । द्विधा । त्रैधं । त्रिधा । धमुञंतात्स्वार्थे ऽदर्शनं । पथि द्वैधानि । एधाच्च । द्वेधा । त्रेधा । याप्ये पाशप् । कुत्सितो भिषक् भिष
क्पाशः । एरएण् भागेतीयादन् । द्वितीयो भागो द्वितीयः । स्वरे विशेषः । तीयादीकक्स्वार्थे वाच्यः । द्वैतीयीकः । द्वितीयः । तार्तीयीकः ।
तृतीयः । नविद्यायाः । द्वितीया । तृतीया । विद्येत्येव । प्रागेकादशभ्योऽछंदसि । एरएण् प्रत्यया तान् गेऽन् । चतुर्थः । पंचमः । षष्ठाष्ट
माभ्यां ञ च । चादन् । षष्ठो भागः । षाष्ठः । अष्टमो । आष्टमः । मानपश्वंगयोः कन्लुकौ च । षष्ठाष्टमशब्दाभ्यां क्रमेण कन्लुकौ स्तो माने
पश्वंगे च वा ञे । षष्ठको भागः । मानं चेत् । अष्टमो भागः । पश्वंगं चेत् । अस्य ञ ओ वा लुक् । चकाराद्यथाप्राप्तं षष्ठः । षाष्ठः । अष्टमः । आ
ष्टमः । महाविभाषया सिद्धे लुग्वचनं सर्वत्र ञ नो निसार्थं विज्ञापयति । एकाद्ाकिनिच्चासहाये । चात्कन्लुकौ । एकः । एकाकी । एक
कः । भूतपूर्वे चरट् । आढ्यो भूतपूर्वः । आढ्यचरः । षष्ठ्या रूप्य च । षष्ठ्यंताद्भूतपूर्वेऽर्थे रूप्यः स्यात् चरट् च । कृष्णस्य भूतपूर्वो गौः ।
कृष्णरूप्यः । कृष्णचरः । तसिलादिषु रूप्यस्यापरिगणनात् पुंवत् । शुभ्राया भूतपूर्वः शुभ्रारूप्यः । अतिशायने तमबिष्ठनौ । अ
तिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः । अयमेषामतिशयेनाढ्यः । आढ्यतमः । लघुतमो लघिष्ठः । तिङश्च । तिङंतादतिश
ये द्योत्ये तमप् स्यात् । तरप्तमपौ घः । एतौ घसंज्ञौ स्तः । किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे । किम एदंतात्तिङोऽव्ययाच्च यो घः
स्तदंतादामुः स्यान्न तु द्रव्यप्रकर्षे । किंतमाम् । प्राह्णेतमां । पचतितमां । उच्चैस्तमां । द्रव्यप्रकर्षे तु उच्चैस्तमस्तरुः । द्विवचनविभज्यो
पपदे तरबीयसुनौ । द्वयोरेकस्यातिशये विभक्तव्ये चोपपदे सुप्तिङंतादेतौ स्तः । पूर्वयोरपवादः । अयमनयोरतिशयेन ल
घुः । लघुतरो लघीयान् । उदीच्याः प्राच्येभ्यः पटुतराः । पटीयांसः । अजादी गुणवचनादेव । इष्ठन्नीयसुनौ गुणवचनादेव
स्तः । नेह । पाचकतरः । पाचकतमः । तुश्छंदसि । तृन्नतृजंतादिष्ठन्नीयसुनौ स्तः । तुरिष्ठेमेयःसु । तृशब्दस्य लोपः स्यादेतेषु परेषु । अ

सि॰कौ॰ तिशयेन कर्त्री करिष्ठः। दोहीयसी धेनुः। प्रशस्यस्य श्रः। अस्य श्रादेशः स्यादजाद्योः। प्रकृत्यैकाच्। इष्ठादिष्वेकाच् प्रकृत्या। श्रे
।।२६६।। ष्ठः। श्रेयान्। ज्य च। प्रशस्यस्य ज्यादेशः स्यादिष्ठेयसोः। ज्येष्ठः। ज्यादादीयसः। आदेः परस्य। ज्यायान्। वृद्धस्य च। ज्यादेशः
स्यादजाद्योः। ज्येष्ठः। ज्यायान्। अन्तिकबाढयोर्नेदसाधौ। अजाद्योः। नेदिष्ठः। नेदीयान्। साधिष्ठः। साधीयान्। स्थूलदूरयु
वह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः। एषां यणादि परं लुप्यते पूर्वस्य च गुणः इष्ठादिषु। स्थविष्ठः। दविष्ठः। यवि
ष्ठः। ह्रसिष्ठः। क्षेपिष्ठः। क्षोदिष्ठः। एवमीयसुन्। ह्रस्वक्षिप्रक्षुद्राणां पृथ्वादित्वाद् ह्रसिमा। क्षेपिमा। क्षोदिमा। प्रियस्थिरस्फिरोरु
बहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः। प्रियादीनां क्रमात् प्रादयः स्युरिष्ठादिषु। प्रेष्ठः। स्थे
ष्ठः। स्फेष्ठः। वरिष्ठः। बंहिष्ठः। गरिष्ठः। वर्षिष्ठः। त्रपिष्ठः। द्राघिष्ठः। वृन्दिष्ठः। एवमीयसुन्। प्रियोरुबहुलगुरुदीर्घाणामेव
थ्वादित्वात्प्रेमेत्यादि। बहोर्लोपो भू च बहोः। बहोः परयोरिमेयसोर्लोपः स्यात् बहोश्च भूरादेशः। आदेः परस्य। भूयान्। भूमा।
इष्ठस्य यिट् च। बहोः परस्य इष्ठस्य लोपः स्यात् यिडागमश्च। भूयिष्ठः। युवाल्पयोः कनन्यतरस्याम्। एतयोः कनादेशो
वा स्यादिष्ठेयसोः। कनिष्ठः। कनीयान्। पक्षे यविष्ठः। अल्पिष्ठः। इत्यादि। विन्मतोर्लुक्। विनो मतुपश्च लुक् स्यादिष्ठेय
सोः। अतिशयेन स्रग्वी स्रजिष्ठः। स्रजीयान्। अतिशयेन त्वग्वान् त्वचिष्ठः। त्वचीयान्। प्रशंसायां रूपप्। सुबन्तात्तिङन्ता
पटु ४ च्च। प्रशस्तः पटुः पटुरूपः। प्रशस्तं पचति पचतिरूपम्। ईषदसमाप्तौ कल्पब्देश्यदेशीयरः। ईषदूनो विद्वान् विद्वत्कल्पः। यशस्कल्पम्।
यजुष्कल्पम्। विद्वद्देश्यः। विद्वद्देशीयः। पचतिकल्पम्। विभाषा सुपो बहुच् पुरस्तात्तु। ईषदसमाप्तिविशिष्टेऽर्थे सुबन्ताद् बहुज्वा गणेश
स्यात्स च प्रागेव न तु परतः। ईषदूनः पटुः बहुपटुः। पटुकल्पः। सुपः किम्। यजतिकल्पम्। प्रकारवचने जातीयर्। प्रकारवति चायं। ।।२६६।।
थाल् तु प्रकारमात्रे। पटुप्रकारः पटुजातीयः।। ।। प्रागिवात्कः। इवे प्रतिकृतौ इति सूत्रात्प्राक्काधिकारः। अव्ययसर्वनाम्नाम

कच्प्रकरणे:। तिङश्चेत्यनुवर्त्तते। कस्य च दः। कां ताव्ययस्य दकारोंतादेशः स्यादकच्च। अज्ञाते। कस्यायमश्वो अश्वकः। उच्चकैः। नीचकैः।
सर्वके। विश्वके। ओकारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकच्। युवकयोः। आवकयोः। युष्मकासु। अस्मकासु। यु
ष्मकाभिः। अस्मकाभिः। ओकारेत्यादि किं। त्वयका। मयका। अकेरप्रकरणे तूष्णीमः काम्वक्तव्यः। मित्वादंत्यादचः प
रः। तूष्णीकामास्ते। शीले कोमलोपश्च। तूष्णीशीलः तूष्णीकः। पचतकि। जल्पतकि। धाकित्। हिरकुत्। कुत्सिते। कु
त्सितो अश्वो अश्वकः। संज्ञायां कन्। कुत्सिते के न स्यात्तद्धितेन चेत्संज्ञा गम्यते। शूद्रकः। राधकः। रचरार्थवचने। अनुकम्पायां।
पुत्रकः। अनुकम्पितः पुत्र इत्यर्थः। नीतौ च तद्युक्तात्। सामदानादिरुपायो नीतिः। तस्यां गम्यमानायामनुकम्पायुक्ता
त्प्रत्ययः स्यात्। हन्त ते धानकाः। गुडकः। एहकि। अद्धकि। एवं गम्यमानात्प्रत्ययः। अनेन तु परंपरासम्बंधे पीति वि दो
शेषः। बह्वचो मनुष्यनाम्नष्ठज्वा। पूर्वसूत्रद्वयविषये। घनिलचौ च। तत्रैव। ठाजादावूर्ध्वं द्वितीयादचः। अस्मिन्प्रकरणे
यष्ठोऽजादिप्रत्ययस्तस्मिन्परे प्रकृतेर्द्वितीयादच ऊर्ध्वं सर्वं लुप्यते। अनुकम्पितो देवदत्तो देविकः। देवियः। देविलः।
देवदत्तकः। अनुकम्पितो वायुदत्तो वायुकः। ठग्रहणमुकोद्वितीयत्वे कविधानार्थं। वायुदत्तः। वायुकः। पितृकः। चतुर्था
दच ऊर्ध्वस्य लोपो वाच्यः। अनुकम्पितो बृहस्पतिदत्तो बृहस्पतिकः। अनजादौ च विभाषा लोपो वक्तव्यः। देवदत्तकः।
देवकः। लोपः पूर्वपदस्य च। दत्तिकः। दत्तियः। दत्तिलः। दत्तकः। विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्यः। देवदत्तः।
दत्तः। देवः। सत्यभामा। भामा। सत्या। उवर्णाल्ल इलस्य च। भानुदत्तः। भानुलः। ऋवर्णाद्पि। सवित्रियः। सवितृलः। चतुर्था
दनजादौ च लोपः पूर्वपदस्य च। अप्रत्यये तथैवेष्टः। उवर्णाल्ल इलस्य च। प्राचामुपादेरडज्वुचौ च। उपशब्द एवादिर्यस्य तिप
दिकात्सर्वे विषये अडच् वुच् एतौ वा स्तः। चाद्यथाप्राप्तं। प्राचामिति पूजार्थं। अनुकम्पित उपेन्द्रदत्तः। उपडः। उपकः।

सि॰स्व॰ उपिकः। उपियः। उपिलः। उपेन्द्रदत्तकः। षडूपालिः। अजातिनाम्नः कन्। मनुष्यनाम्न इत्येव। जातिशब्दो यो मनुष्यनामधेयं तस्मा
॥९७॥ त्कः स्यादनुकम्पायां नीतौ च। सिंहकः। शरभकः। द्वितीयं सन्ध्यक्षरं चेत्तदादेर्लोपो वाच्यः। कहोडः। कहिकः। एकाक्षर
पूर्वपदानामुत्तरपदलोपो वक्तव्यः। वागाशीर्दत्तः वाचिकः। कथं षडङ्गुलिदत्तः षडिक इति। बषष्ठादजातिवचनात् सिद्धं।
शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात्। एषां मनुष्यनाम्नां ठाजादौ परे तृतीयादचः ऊर्ध्वं लोपः स्यात्। पूर्वस्या
पवादः। अनुकम्पितः शेवलदत्तः शेवलिकः। शेवलिलः। सुपरिकः। विशालिकः। वरुणिकः। अर्यमिकः। अजिनान्तस्यो
त्तरपदलोपश्च। अजिनान्तस्य मनुष्यनाम्नोनुकम्पायां कन् तस्य चोत्तरपदलोपः। अनुकम्पितो व्याघ्राजिनो व्याघ्रकः। सिं
हकः। अल्पे। अल्पं तैलं तैलकं। ह्रस्वे। ह्रस्वो वृक्षो वृक्षकः। संज्ञायां कन्। ह्रस्वत्वहेतुकायां संज्ञायां गम्यमानायां कन्।
पूर्वस्यायमपवादः। वंशकः। वेणुकः। कुटीशमीशुण्डाभ्यो रः। ह्रस्वा कुटी कुटीरः। शमीरः। शुण्डारः। कुत्वा डुपच्। ह्रस्वा कुतूः।
कुतुपः। कुतूः कृत्तेः स्नेहपात्रं ह्रस्वा सा कुतुपः पुमान्। कासूगोणीभ्यां ष्टरच्। आयुधविशेषः कासूः। ह्रस्वा सा कासू
तरी। गोणीतरी। वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे। वत्सतरः। द्वितीयं वयः प्राप्तः। उक्षतरः। अश्वतरः। ऋषभतरः। प्रवृत्तिनि
मित्ततनुत्वमेवार्थः। कियत्तदो निर्धारणे द्वयोरेकस्य डतरच्। अनयोः कतरो वैष्णवः। यतरः। ततरः। महाविभाषया।
कः सः यः। वा बहूनां जातिपरिप्रश्ने डतमच्। बहूनां मध्ये निर्धारणे डतमज्वा स्यात्। जातिपरिप्रश्न इति प्रत्याख्यातमा
करे। कतमो भवतां कठः। यतमः। ततमः। वाग्रहणमकजर्थं। यकः। सकः। महाविभाषया। यः। सः। किमोऽस्मिन्विषये
डतरजपि। कतरः। एकाच्च प्राचां। डतरच् डतमच् स्यात्। अनयोरेकतरो मैत्रः। एषामेकतमः। अवक्षेपणे कन्। व्याकर गणेश
णकेन गर्वितः। येनेतरः कुत्स्यते तन्निदं होदाहरणं। स्वतः कुत्सितं तु कुत्सिते इत्यस्य॥ छ॥ प्रागिवीयानां पर्णो वधिः॥ छ॥ ॥९७॥

इवे प्रतिकृतौ। कन् स्यात्। अश्व इव प्रतिकृतिः अश्वकः। प्रतिकृतौ किं। गौरिव गवयः। संज्ञायां च। इवार्थे कन् स्यात् समुदायेन चेत् संज्ञा।
अप्रतिकृत्यर्थ आरम्भः। अश्वसदृशस्य संज्ञा अश्वकः। उष्ट्रकः। लुम्मनुष्ये। संज्ञायां विहितस्य कनो लुप् स्यात् मनुष्ये वाच्ये।
चञ्चा तृणमयः पुमान्। चञ्चेव मनुष्यश्चञ्चा। वध्रिका। जीविकार्थे चापण्ये। जीविकार्थं यद् विक्रियमाणं तस्मिन् वाच्ये कनो
लुप् स्यात्। वासुदेवः। शिवः। स्कन्दः। देवलकानां जीविकार्थासु देवप्रतिकृतिष्विदं। अपण्ये किं। हस्तिकान् विक्रीणीते। देव
पथादिभ्यश्च। कनो लुप् स्यात्। देवपथः। हंसपथः। आकृतिगणोयं। वस्तेर्ढञ्। इवेऽस्यनुवर्तते। प्रतिकृतावितिनिवृत्तं। व
स्तिरिव वास्तेयं। वास्तेयी। शिलाया ढः। शिलाया इति योगविभागाड्ढञपि। शिलेव शिलेयं। शैलेयं। शाखादिभ्यो
यः। शाखेव शाख्यः। मुख्यः। जघन्यः। अग्र्यः। शरण्यः। द्रव्यं च भव्ये। द्रव्यमयं ब्राह्मणः। कुशाग्राच्छः। कुशाग्रमिव कुशा
ग्रीया बुद्धिः। समासाच्च तद्विषयात्। इवार्थविषयात् समासाच्छः स्यात्। काकतालीयो देवदत्तस्य वधः। इह काकताल
समागमसदृशश्चौरसमागम इति समासार्थः। तस्मिन्नुक्ते काकमरणसदृशस्तत्प्रत्ययार्थः। अजाकृपाणीयः। अत
र्कितोपनत इति फलितोर्थः। शर्करादिभ्योऽण्। शर्करेव शार्करं। अङ्गुल्यादिभ्यष्ठक्। अङ्गुलीव आङ्गुलिकः। भरूजेव
भारूजिकः। एकशालाया ठजन्यतरस्यां। एकशालाशब्दादिवार्थे ठञ् वा पक्षे ठक्। एकशालेव एकशालिकः। ऐके
शालिकः। कर्कलोहितादीकक्। कर्कः शुक्लोऽश्वः। स इव कार्कीकः। लौहितीकः। स्फटिकः। पूगाञ्ञ्योऽग्रामणीपूर्वात्।
इवार्थो निवृत्तः। नानाजातीया अनियतवृत्तयोऽर्थकामप्रधानाः संघाः पूगाः। तद्वाचकात् स्वार्थे ञ्यः स्यात्। लोहितध्व
ज्यः। व्रातच्फञोरस्त्रियां। व्रात। कापोतपाक्यः। च्फञ्। कौञ्जायन्यः। ब्राध्नायन्यः। आयुधजीविसंघाञ्ञ्यड्वाहीकेषु
ब्राह्मणराजन्यात्। वाहीकेषु य आयुधजीविसंघस्तद्वाचिनः स्वार्थे ञ्यट्। क्षौद्रक्यः। मालव्यः। टित्वात् ङीप्। क्षौ

सि॰ सु
॥ ६९८ ॥

द्रकी। मालवी। आयुधेति किं। मल्लाः। संघेति किं। सम्राट्। वाहीकेषु किं। शबराः। अब्राह्मणेति किं। गोपालवाः। शालंकायनाः।
ब्राह्मणे तद्विशेषग्रहणं। राजन्यस्य रूपग्रहणं। वृकाट्टेण्यण्। आयुधजीविसंघवाचकात् स्वार्थे। वार्केण्यः। आयुधजीवेति
किं। जातिशब्दो मा भूत्। दामन्यादित्रिगर्त्तषष्ठाच्छः। दामन्यादिभ्यस्त्रिगर्त्तषष्ठेभ्यश्चायुधजीविसंघवाचिभ्यः स्वार्थे छः
स्यात्। त्रिगर्त्ताः षष्ठो वर्गो येषां ते त्रिगर्त्तषष्ठाः। आहुस्त्रिगर्त्तषष्ठांस्तु कौण्डोपरथदाण्डकी। क्रौष्टुकिर्जालमानिश्च ब्रह्मगुप्तो
थ जानकिः॥१॥ दामनीयः। दामनीयौ दामनयः। औलपिः। औलपीयः। त्रिगर्त्तः। कौण्डोपरथीयः। दाण्डकीयः। पर्श्वादि
यौधेयादिभ्यो ऽणञौ। आयुधजीविसंघवाचिभ्य एभ्यः क्रमादेतौ स्तः स्वार्थे। पार्शवः। पार्शवौ। पर्शवः। यौधेयः।
यौ। यौधेयाः। अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ्। अभिजिदादिभ्यो ऽणन्तेभ्यः स्वार्थे यञ्
स्यात्। अभिजितोपत्यमाभिजित्यः। वैदभृत्यः। शालावत्यः। शैखावत्यः। शामीवत्यः। और्णावत्यः। श्रौमतः। ञ्यादयस्त
द्राजाः। पूगाञ्ञ्य इत्यारभ्योक्ता एते तद्राजसंज्ञाः स्युः॥ तेनास्त्रियां बहुषु लुक्। लोहितध्वजाः। कपोतपाकाः। कौञ्जायनाः। ब्राध्ना
यनाः इत्यादि। पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च। लोपवचनमनैमित्तिकत्वार्थं। अतो न स्थानिवत्। पादः पत्।
तद्धितार्थ इति समासे कृते प्रत्ययः। वुन्नन्तं स्त्रियामेव। द्वौ द्वौ पादौ ददाति द्विपदिकां। द्विशतिकां। पादशतग्रहणमनर्थ
कमन्यत्रापि दर्शनात्। द्विमोदकिकां। दण्डव्यवसर्गयोश्च। वुन् स्यात्। अवीप्सार्थमिदं। द्वौ पादौ दण्डितः द्विपदिकां। द्विशतिकां।
व्यवसृजति ददातीत्यर्थः। स्थूलादिभ्यः प्रकारवचने कन्। जातीयरो ऽपवादः। स्थूलप्रकारः स्थूलकः। अणुकः। चंच
त्कृतो रूपसंख्यानं। चंचत्कः। बृहत्कः। सुराया अहौ। सुरावर्णो हि सुरकः। अनत्यन्तगतौ क्तात्। छिन्नकं। भिन्नकं। न सा
मिपचने। सामिपर्याये ऽप्युपपदे क्तान्तान्न कन्। सामिकृतं। अनत्यन्तगते रिह प्रकृत्यैवाभिधानात् पूर्वेणाकन् प्राप्तः। इदमे

गणेश
॥ ६९८ ॥

वनिषेधस्तत्र मत्वंतस्वार्थिकमपि कन्नं ज्ञापयति। बहुतरकं। बृहत्या आच्छादने। कः स्यात्। द्वौ प्रावारौ तेन रासे गोः समोर हति का तथां आ
च्छादने किं। बृहती छंदः। अषडक्षाशितंगवलंकर्मालंपुरुषाध्युत्तरपदात्खः स्यात्। अषडक्षीणो मंत्रः। द्वाभ्यामेव कृत इत्यर्थः।
आशितंगवीनः। आशिता गावोऽस्मिन्निति आशितंगवीनमरण्यं। निपातनात् पूर्वस्य मुम्। अलंकर्मणे अलंकर्मीणः। अलं पुरुषीणः। ईश्वराधी
नः। निस्त्योयंखः। उत्तरसूत्रे विभाषाग्रहणात्। अन्ये विकेवि स्वार्थिका निस्यमि व्यंते। तमबादयः प्राक्कनः। आदयः प्राग्वुनः।
आमादयः प्राङ्मयटः। बृहती आस्यतोः। समासांताश्चेति। विभाषाञ्चेरदिक्स्त्रियां। अदिक्स्त्रीवृत्तेरंचत्यंतात् प्रातिपदिका
त्खः स्याद्वा स्वार्थे। प्राक्। प्राचीनं। प्रत्यक्। प्रतीचीनं। अर्वाक्। अर्वाचीनं। निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः। इति कोशान्निकृष्ट
पर्यायेषु अर्वन्शब्दस्य पाठात् अर्वं तं निकृष्टमित्यर्थः। अर्वतमर्वतीत्यधीक। अर्वाचीनं। अदिक्स्त्रियां किं। प्राची दिक्। दिग्ग्र
हणं किं। प्राचीना ब्राह्मणी। स्त्रीग्रहणं किं। प्राचीनं ग्रामा मादाम्रा। जात्यंताच्छ बंधुनि। ब्राह्मणजातीयः। बंधुनि किं। ब्राह्मणजातिः
शोभना। जातेर्व्यंजकं द्रव्यं बंधु। स्थानांताद्विभाषा सस्थानेनेति चेत्। स्थानेन तुल्ये न चेत् स्थानांतमर्थवदित्यर्थः। पितृस्थानीयः। स
पितृस्थानः। सस्थानेन किं। गोस्थानं। अनुगादिनष्ठक्। अनुगदतीत्यनुगादी। स एवानुगादिकः। णचः स्त्रियामञ्। णच प्रत्य
यांतात्स्त्रियामञ् स्यात् स्वार्थे। कर्मव्यतिहारे। अत्र तेचन स्यात्। व्यावक्रोशी। अणिनुणः। इनुणंतादण् स्यात् स्वार्थे। इन एव
नपत्ये। सांराविणं। विसारिणो मत्स्ये। अण् स्यात्। वैसारिणः। मत्स्ये किं। विसारी देवदत्तः। संख्यायाः क्रियाभ्यावृत्तिगणने
कृत्वसुच्। अभ्यावृत्तिर्जन्म। क्रियाजन्मगणनवृत्तेः संख्याशब्दात् स्वार्थे कृत्वसुच् स्यात्। पंचकृत्वो भुंक्ते। संख्यायाः किं। भू
रिवारान् भुंक्ते। द्वित्रिचतुर्भ्यः सुच्। कृत्वसुचोऽपवादः। द्विर्भुंक्ते। त्रिः। रात्सस्य। चतुः। एकस्य सकृच्च। सकृदित्यादेशः स्यात्।
चासकृच्च। सकृद्भुंक्ते। संयोगांतस्येति सुचो लोपः। न तु हल्ङ्याब्भ्य इति। अत्रैस्मिदित्यत्र सिच इव सुचोऽपि तद्योगात्। विभाषा

सि-स्व ॥७७॥ बहोर्धाविप्रकृष्टकाले। अविप्रकृष्टमासन्नः। बहुधा बहुकृत्वो दिवसस्य भुंक्ते। आसन्नकाले किं। बहुकृत्वो मासस्य भुंक्ते। तत्प्रकृ
तवचने मयट्। प्राचुर्येण प्रस्तुतं प्रकृतं। तस्य वचनं प्रतिपादनं। भावेऽधिकरणे वा ल्युट्। आद्ये। प्रकृतमन्नमन्नमयं। अपूप
मयं। यवागूमयी। द्वितीये। अन्नमयो यज्ञः। अपूपमयं पर्व। समूहवच्च बहुषु। सामूहिकाः प्रत्यया अतिदिश्यन्ते। चान्मयट्।
मोदकाः प्रकृताः मौदकिकं। मोदकमयं। शाष्कुलिकं। शाष्कुलीमयं। द्वितीयेऽर्थे। मौदकिको यज्ञः। मोदकमयः। अनन्तावसथे
तिहभेषजाञ्ञ्यः। अनन्त एव आनन्त्यं। आवसथ एव आवसथ्यं। इतिह इति निपातसमुदायः। ऐतिह्यं। भेषजमिति भैषज्यं। देवता
तान्ताद्दर्थे यत्। तदर्थ एव तादर्थ्यं। स्वार्थे ष्यञ्। अग्निदेवतायै इदं अग्निदेवत्यं। पितृदेवत्यं। पादार्घाभ्यां च। पादार्थमुदकं पाद्यं।
अर्घ्यं। नवस्य नू आदेशः त्नप्तनप्खाश्च प्रत्यया वक्तव्याः। नूत्नं। नूतनं। नवीनं। नश्च पुराणे प्रात्। पुराणे वर्तमानात् प्र
शब्दान्नो वक्तव्यः। चात्त्वप्तनपौ। प्रणं। प्रत्नं। प्रतनं। प्रीणं। भागरूपनामभ्यो धेयः। भागधेयं। रूपधेयं। नामधेयं। आग्नीध्र
५।४ साधारणाद् ञ्। आग्नीध्रं। साधारणं। स्त्रियां ङीप्। आग्नीध्री। साधारणी। अतिथेर्ञ्यः। तादर्थ्य इत्येव। अतिथये इदमातिथ्यं।
देव५ देवात्तल्। देव एव देवता। अवेः कः। अविरेव अविकः। यावादिभ्यः कन्। याव एव यावकः। लोहितान्मणौ। लोहित एव मणिर्लो
हितकः। वर्णे चानित्ये। लोहितकः कोपेन। लोहिताल्लिङ्गबाधनं वा। लोहितिका लोहिनिका कोपेन। रक्ते। लाक्षादिना रक्ते यो लो
हितशब्दस्तस्मात्कन् स्यात्। लिङ्गबाधनं वेत्येव। लोहितिका। लोहिनिका शाटी। कालाच्च। वर्णे चानित्ये। रक्ते इति द्वयमनु
वर्तते। कालकं मुखं वैलक्ष्येण। कालकः पटः। कालिका शाटी। विनयादिभ्यष्ठक्। विनय एव वैनयिकः। सामयिकः।
उपायाद्ध्रस्वत्वं च। औपयिकः। वाचो व्याहृतार्थायां। संदिष्टार्था या वाक् विद्यमाना तद्वाचकशब्दात् स्वार्थे ठक्। संदेशवा ग॰ णो॰ ३
ग्वाचिकं स्यात्। तद्युक्तात्कर्मणोऽण्। कर्मैव कार्मणं। वाचिकं श्रुत्वा क्रियमाणं कर्मेत्यर्थः। ओषधेरजातौ। स्वार्थेऽण्। ओष ॥२६॥

धं पिबति। अलातौ किं। ओषधयः क्षेत्रे रूढाः। प्रज्ञादिभ्यश्च। प्रज्ञ एव प्राज्ञः। प्राज्ञी स्त्री। दैवतः। बान्धवः। मृदस्तिकन्। मृदे
व मृत्तिका। सस्नौ प्रशंसायां। रूपपोऽपवादः। प्रशस्ता मृत् मृत्स्ना। मृत्स्ना। उत्तरद्वाभ्यन्तरस्याग्रहणमिति सोऽसं। बह्वल्या
र्थाच्छस्कारकादन्यतरस्यां। बहूनि ददाति बहुशः। अल्पानि अल्पशः। बह्वल्पार्थान्मङ्गलामङ्गलवचनेन। नेह। ब
हुदः सन्निदेषु। अल्पमाम्नुदयिकेषु। संख्यैकवचनाच्च वीप्सायां। द्वौ द्वौ ददाति द्विशः। माषं माषं माषशः। प्रस्थशः।
परिमाणशब्दा यावत्ता वेकार्था एव। संख्यैकवचनात्किं। घटं घटं ददाति। वीप्सायां किं। द्वौ ददाति। कारकादित्येव। द्व
योर्द्वयोः स्वामी। प्रतियोगे पञ्चम्यास्तसिः। प्रतिना कर्मप्रवचनीयेन योगे या पञ्चमी विहिता तदन्तात्तसिः स्यात्। प्र
द्युम्नः कृष्णतः प्रति। आद्यादिभ्य उपसंख्यानं। आदौ। आदितः। मध्यतः। अन्ततः। पृष्ठतः। पार्श्वतः। आकृतिगणोऽयं। स्वरे
ण स्वरतः। वर्णतः। अपादाने चाहीयरुहोः। अपादाने या पञ्चमी तदन्तात्तसिः स्यात्। ग्रामादागच्छति ग्रामतः। अहीयरु
होः किं। स्वर्गाद्धीयते। पर्वतादवरोहति। अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः। अकर्तरि तृतीयान्तात्तसिः। अति
क्रम्य ग्रहोऽतिग्रहः। चारित्रेणातिगृह्यते। चारित्रतोऽतिगृह्यते। चारित्रेणान्यानतिक्रम्य वर्तत इत्यर्थः। अव्यथनमचल
नं। वृत्तेन न व्यथते। वृत्ततो न व्यथते। वृत्तेन न चलत इत्यर्थः। क्षेपे। वृत्तेन क्षिप्तः। वृत्ततः क्षिप्तः। वृत्तेन निन्दित इत्यर्थः॥
अकर्तरि किं। देवदत्तेन क्षिप्तः। हीयमानपापयोगाच्च। हीयमानपापयुक्तादकर्तरि तृतीयान्तात्तसिः। वृत्तेन ही
यते वृत्ततो हीयते। वृत्तेन पापः। वृत्ततः पापः। क्षेपस्याविवक्षायामिदं। क्षेपे तु पूर्वेणैव सिद्धः। अकर्तरि किं। देवदत्तेन हीयते।
षष्ठ्या व्याश्रये। षष्ठ्यन्तात्तसिर्नानापक्षसमाश्रये। देवा अर्जुनतोऽभवन्। आदित्याः कर्णतोऽभवन्। अर्जुनस्य पक्षे
इत्यर्थः। व्याश्रये किं। वृक्षस्य शाखा। रोगाच्चापनयने। रोगवाचिनः षष्ठ्यन्तात्तसिः चिकित्सायां। प्रवाहिकातः कुरु॥ न १

सि.कौ.
॥१०॥

प्रतीकारमस्याः कुर्विसर्थः। अनुपनयने किं। प्रवाहिकायाः प्रकोपनं करोति। कृभ्वस्तियोगे संपद्यकर्तरि च्विः। अभूत
तद्भावइति च कृव्य। विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्तमानाद्विकारशब्दात्स्वार्थे च्विर्वा स्यात्करोत्यादिभिर्योगे। अ
स्य च्वौ। अवर्णस्य ईत्स्यात् च्वौ। वेर्लोपः। च्व्यंतत्वादव्ययत्वं। अकृष्णः कृष्णः संपद्यते तं करोति कृष्णीकरोति। ब्रह्मीभ
वति। गंगीस्यात्। अव्ययस्य च्वावीत्वं नेति वाच्यं। दोषाभूतमहः। दिवाभूता रात्रिः। एतच्चाव्ययीभावश्चेति सूत्रे भा
ष्ये उक्तं। क्यच्व्योश्च। हलः परस्यापत्ययकारस्य लोपः स्यात् क्ये च्वौ च परतः। गार्गीभवति। च्वौ च। च्वौ परे पूर्वस्य दीर्घः
स्यात्। शुचीभवति। पटूस्यात्। अव्ययस्य दीर्घत्वं नेति केचित्। तन्निर्मूलं। स्वस्ति स्यादिति तु महाविभाषया च्वे
रभावे सिद्धं। स्वस्तीस्यादित्यपि पक्षे स्यादिति चेत्। अस्तु। यदि नेष्यते तर्ह्यनभिधानात्। चिरेवनोस्य घरास्य स्त्व।
ह रीङृतः। मात्रीकरोति। अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च। एषां लोपः स्यात् च्विश्च। अरूकरोति। उन्मनीस्या
त्। उच्चक्षूकरोति। विचेतीकरोति। विरहीकरोति। विरजीकरोति। विभाषा साति कार्त्स्न्ये। च्विविषये साति र्वा
स्यात्कार्त्स्न्ये। सात्पदाद्योः। सस्य षत्वं न स्यात्। दधिसिंचति। कृत्स्नं शस्त्रमग्निः संपद्यते। अग्निसाद्भवति। अ
ग्नीभवति। महाविभाषया वाक्यमपि। कार्त्स्न्ये किं। एकदेशेन शुक्लीभवति पटः। अभिविधौ संपदा च।
संपदा कृभ्वस्तिभिश्च योगे साति र्वा स्याद्व्याप्तौ। पक्षे कृभ्वस्तियोगे च्विः। सं पदानुवाक्यमेव। अग्निसा गणेश
त्संपद्यते। अग्निसाद्भवति शस्त्रं। अग्नीभवति। जलसात्संपद्यते। जलीभवति लवणं। एकस्या व्यक्तेः सर्वा ॥१००॥

वयवावच्छेदेनान्यथाभावः कार्त्स्न्यं। बहूनां व्यक्तीनां किंचिदवयवावच्छेदेनान्यथात्वं त्वभिविधिः। तदधीनवचने। सातिः स्यात्
कृभ्वस्तिभिः सम्पदा च योगे। राजसात्करोति। [redacted] संपद्यते। राजाधीनमित्यर्थः। देये त्रा च। तदधीने देये
त्रा स्यात् सातिः कृञादियोगे। विप्राधीनं देयं करोति। विप्रत्रा करोति। विप्रत्रा संपद्यते। पक्षे विप्रसात्करोति। देये किं। राजसा
द्भवति। राष्ट्रं। देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलं। एभ्यो द्वितीयान्तेभ्यः सप्तम्यन्तेभ्यश्च त्रा स्यात्। देवत्रा वंदे
रमे वा। बहुलोक्तेरन्यत्रापि। बहुत्रा जीवतो मनः। अव्यक्तानुकरणाद्व्यजवरार्धादनितौ डाच्। द्व्यच् अवरं न्यूनं न तु ततो न्यू
नमनेकाजिति यावत्। तादृशमर्धं यस्य तस्माड्डाच् स्यात् कृभ्वस्तिभिर्योगे। डाचि विवक्षिते द्वे बहुलं। नित्यमाम्रेडिते डाचीति
वक्तव्यं। डाच्परं यदाम्रेडितं तस्मिन्परे पूर्वपरयोः पररूपं स्यात्। इति तकारपकारयोः पकारः। पटपटाकरोति। अव्यक्तानु
करणात्किं। दृषत्करोति। द्व्यजवरार्धात्किं। श्रत्करोति। अवरेति किं। खरटखरटा करोति। त्रपटत्रपटा करोति। अनेकाच्
त्वं वस्तुतः पितुं युक्तं। एवं हि डाचीति परसप्तम्येव। द्वित्वे सुवचे स्ववधेयं। अनितौ किं। पटिति करोति। कृञो द्वितीयतृतीय
शम्बबीजात्कृषौ। द्वितीयादिभ्यो डाच् स्यात् कृञ एव योगे कर्षणेऽर्थे। बहुलोक्तेरव्यक्तानुकरणादन्यस्य डाचि न द्वित्वं। द्वि
तीयं तृतीयं करोति द्वितीयाकरोति। तृतीयाकरोति। शं बद्धः प्रतिलोमे। अनुलोमं कृष्टं क्षेत्रं पुनः प्रतिलोमं कर्षतीति शम्बा
करोति। बीजेन सह कर्षतीति बीजाकरोति। संख्यायाश्च गुणान्तायाः। कृञो योगे कृषौ डाच् स्यात्। द्विगुणाकरोति क्षेत्रं। क्षे
त्रं कर्मकं द्विगुणं कर्षणं करोतीत्यर्थः। समयाच्च यापनायां। कृषाविति निवृत्तं। कृञो योगे डाच् स्यात्। समयाकरोति। कालं
यापयतीत्यर्थः। सपत्रनिष्पत्रादतिव्यथने। सपत्राकरोति मृगं। सपुंखस्य शरस्य प्रवेशनेन सपत्रं करोतीत्यर्थः। निष्पत्राकरोति।
सपुंखस्य शरस्यापरपार्श्वे निर्गमनान्निष्पत्रं करोतीत्यर्थः। अतिव्यथने किं। सपत्रं निष्पत्रं वा करोति भूतलं। निष्कुलान्निष्कोष

राजसात् २

भल्लासाके भल्लाकरोति मांसं। भल्लेन पचती
त्यर्थः २

सि॰सु॰ ऐ। निष्कुलाकरोति दाडिमं। निर्गतं कुलं अंतरवयवानां समूहो यस्मादिति बहुव्रीहेर्डाच्। सुखप्रियादानुलोम्ये। सुखाकरो
॥९९॥ ति प्रियाकरोति गुरुं। अनुकूलाचरणेनानंदयतीत्यर्थः। दुःखात्प्रातिलोम्ये। दुःखाकरोति स्वामिनं। पीडयतीत्यर्थः।
सत्यादशपथे। सत्याकरोति भांडं वणिक्। क्रेतव्यमिति तथ्यं करोतीत्यर्थः। शपथे तु सत्यं करोति विप्रः। मद्रात्प
रिवापणे। मद्रशब्दो मंगलार्थः। परिवापणं मुंडनं। मद्राकरोति कुमारं। मंगल्यमुंडनेन संस्करोतीत्यर्थः। भद्राच्चे
ति वक्तव्यं। भद्राकरोति। अर्थः प्राग्वत्। परिवापणे किं। मद्रं करोति भद्रं करोति॥ ॥ इति तद्धितप्रक्रिया [illegible]॥ छ॥
सर्वस्य द्वे। सपि कस्मानीयवीप्सयोः। आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य द्विर्वचनं स्यात्। आभीक्ष्ण्यं तिङंते
ष्वव्ययसंज्ञककृदंतेषु च। पचति पचति। भुक्त्वा भुक्त्वा। वीप्सायां वृक्षं वृक्षं सिंचति। ग्रामो ग्रामो रमणीयः। परेर्व
र्जने। परि परि वंगेभ्यो वृष्टो देवः। वंगान्परिहृत्येत्यर्थः। परेर्वर्जने वा वचनं। परि वंगेभ्यः। उपर्यध्यधसः सामीप्ये।
उपर्युपरि ग्रामं। ग्रामस्योपरिष्टात्समीपदेश इत्यर्थः। वाक्यादेरामंत्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सने
षु। असूयायां। सुंदर सुंदर वृथा ते सौंदर्यं। संमतौ। देव देव वंद्योसि। कोपे। दुर्विनीत दुर्विनीत इदानीं ज्ञा
स्यसि। कुत्सने। धानुष्क धानुष्क वृथा ते धनुः। भर्त्सने। चोर चोर घातयिष्यामि त्वां। एकं बहुव्रीहिवत्। द्विरुक्त
एकशब्दो बहुव्रीहिवत् स्यात्। तेन सुब्लोपपुंवद्भावौ। एकैकमक्षरं। इह द्वयोरपि सुपोर्लुकि सति बहुव्रीहिव गणेश
द्भावादेव प्रातिपदिकात्समुदायात्सुप्। एकैकया आहुत्या। इह सर्वभागे पुंवद्भावादेव ग्रहे विशेषः। न बहुव्रीहौ ॥९९॥

अध्यधि सुखं दुःखं। सुखस्योपरिष्टात्समीपकाले दुःखमित्यर्थः। अधोधो लोकं। लोकस्याधस्तात्समीपदेश इत्यर्थः। ५

विस्पत्र पुनर्बहुव्रीहिग्रहणं मुख्यबहुव्रीहिलाभार्थं । तेनातिदिष्टबहुव्रीहौ सर्वनामता स्यादेवेति प्राञ्चः । वस्तुतस्तु
भाष्यमते प्रत्याख्यातमेवैतत् । तत्र मतेऽपि बहुव्रीह्यर्थे लौकिके विग्रहे निषेधकं न तु बहुव्रीहावपि तिरहातिदेश
शंकैव नास्ति । एकैकस्मै देहि । आबाधे च । पीडायां द्योत्यायां द्वे स्तो बहुव्रीहिवच्च । गतगतः । विरहात्सीदन्मा
नस्येयमुक्तिः । बहुव्रीहिवद्भावात्सुब्लुक् । गतगता । इह पुंवद्भावः । कर्मधारयवदुत्तरेषु । इत उत्तरेषु द्विर्वचने
षु कर्मधारयवत्कार्यं । प्रयोजनं सुब्लोपपुंवद्भावान्तोदात्तानि । प्रकारे गुणवचनस्य । सादृश्ये द्योत्ये गुणव
चनस्य द्वे स्तस्तच्च कर्मधारयवत् । कर्मधारयवदुत्तरेष्वित्यधिकारात् । तेन पूर्वभागस्य पुंवद्भावः समासस्येत्यं
तोदात्तत्वं च । पटुपट्वी । पटुपटुः । पटुसदृश ईषत्पटुरिति यावत् । गुणोपसर्जनद्रव्यवाचिनः केवलगुणवाचि
नश्चेह ग्रहणं । तेनेह न । शुक्लशुक्लं रूपं । शुक्लः शुक्लः पटः । आनुपूर्व्ये द्वे वाच्ये । मूले मूले स्थूलः । संभ्रमेण प्रवृत्तो य
थेष्टमनेकधा प्रयोगो न्यायसिद्धः । सर्पः २ बुध्यस्व । सर्पः ३ बुध्यस्व । क्रियासमभिहारे च । लुनीहि लुनीहि
त्येवायं लुनाति । नित्यवीप्सयोरिति सिद्धे भृशार्थं द्वित्वार्थमिदं । पौनःपुन्येऽपि लोट् सह समुच्चित्य द्योतकता
लभ्यं वा । कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलं । बहुलग्रहणादन्यपरयोर्न समासवत् । इतरस्त्रा
द्रस्यान्निसे । असमासवद्भावे पूर्वपदस्थस्य सुपः सुर्वक्तव्यः । अन्योन्यं विप्रा नमन्ति । अन्योन्यौ । अन्योन्यावारे । अन्यो
न्येन कृतं । अन्योन्यस्मै दत्तमित्यादि । अन्योन्येषां पुष्करैरामृशन्तः । इति माघः । एवं परस्परं । अत्र कस्कादित्वाद्विसर्ग

सि॰सु नीयस्य सः। इतरेतरं। स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वा वाच्यः। अन्योन्यां। अन्योन्यं। परस्परां परस्परं।
॥१९·२॥ इतरेतरां इतरेतरं वा। इमे ब्राह्मण्यौ कुले वा भोजयतः। अत्र केचित् आमादेशो द्वितीयायामेव। भाष्योदाहृतत्वात्।
तेन स्त्रीनपुंसकयोरपि तृतीयादिषु पुंवदेव रूपमिच्छन्ति। अन्ये तूदाहरणस्य दिङ्मात्रत्वात् सर्वविभक्तीनामामादे
शमाहुः। दलद्वये टाबभावः। क्लीबे चाद्विरतः स्वमोः। समासे सोरलुक्क्लीति सिद्धं बाहुलकात्रयं। न त्याहि। अन्योन्यपर
स्परमित्यत्र दलद्वयेपि टाप्प्राप्तः। न च सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः। अन्यपरयोरसमासवद्भावात्। न च द्विर्वचनमे
वरत्विः। यायाप्रियः प्रेक्षतसासेत्यादावतिप्रसंगात्। अन्योन्यमितरेतरमित्यत्र वाऽतुत्तरादिन्यद्द्रूपा[illegible]सुः। अ
न्ये। न्यस्य संसक्तमहस्त्रियाम्। अन्योन्याश्रयः। परस्पराक्षिसादृश्यं। अदृष्टपरस्परैरिति सादौ सोर्लुक्प्राप्तः। सर्ववाहु
लकबलेन समाधेयं। प्रकृतवार्तिकं भाष्योदाहरणं स्त्रियामिति सूत्रे। अन्योन्यसंश्रयेत्वेतदिति भाष्यं वात्र प्रमाणमिति।
अकृच्छ्रे प्रियसुखयोरन्यतरस्यां। प्रियप्रियेण ददाति। प्रियेण वा सुखसुखेन सुखेन वा। द्विर्वचने कर्मधारयवद्भावात् लु
क्किं पुनस्तदेव वचनं। अतिप्रियमपि वस्तुनायासेन ददातीत्यर्थः। यथास्वे यथायथं। यथास्वमिति वीप्सायामव्ययीभावः। यो
यदात्मीयं यच्चात्मीयं तद्यथास्वं तस्मिन् यथाशब्दस्य द्वित्वं क्लीबत्वं च निपात्यते। यथायथं ज्ञाता। यथास्वभावमित्यर्थः।
यथात्मीयमिति वा। द्वंद्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु। द्विशब्दस्य द्विर्वचनं पूर्वपद
स्यामभावो त्वं चोत्तरपदस्य नपुंसकत्वं च निपात्यते एष्वर्थेषु। तत्र रहस्यं द्वंद्वशब्दस्य वाच्यं। इतरे विषयभूताः। द्वं गणेश
द्वं मंत्रयते। रहस्यमित्यर्थः। मर्यादास्थित्यनतिक्रमः। आचतुरं हीमे पशवो द्वंद्वं मिथुनायंते। मातापुत्रेण मिथुनं गच्छति। ॥[illegible]२॥

पौत्रेण प्रपौत्रेण पीतिमर्यादार्थः। व्युत्क्रमणं पृथगवस्थानं। द्वंद्वं व्युत्क्रांताः। द्विवर्गसंबंधेन पृथगवस्थिताः। द्वंद्वं यज्ञपात्राणि प्रयुनक्ति। द्वंद्वं संकर्षणवासुदेवौ। अभिव्यक्तौ साहचर्येणेत्यर्थः। योगविभागादन्यत्रापि द्वंद्वं दृश्यते॥ छ॥ इति द्विरुक्तप्रक्रिया॥ छ॥ इति श्रीमद्भट्टोजिदीक्षितविरचितायां सिद्धांतकौमुद्यां पूर्वार्द्धं समाप्तं॥ छ॥ ॥ छ॥ ॥ छ॥ ॥ छ॥ ॥ छ॥ ॥ छ॥ ॥ छ॥ ॥ छ॥ ॥ छ॥ ॥ छ॥ ॥ छ॥ ॥ छ॥ ॥

श्रीवक्रतुंडाय नमः॥ श्रीगणेशाय नमः॥ श्रीगणेशार्पणमस्तु। शिवाय नमः। रामाय नमः। असतो॰।

ग।

१०३

३२

